कालेन विनियुज्यन्ते सत्त्वमेकं तु शाश्वतम् ॥ ८ ॥
यथा जीर्णमजीर्णं वा वस्त्रं त्यक्त्वा तु पूरुषः ।
अन्यद्गृह्णाति वस्त्रमेवं देहाः शरीरिणाम् ॥ ९ ॥
वैचित्रवीर्य साध्यं हि दुःखं वा यदि वा सुखम् ।
प्राप्नुवन्तीह भूतानि स्वकृतेनैव कर्मणा ॥ १० ॥
कर्मणा प्राप्यते स्वर्गः सुखं दुःखं च भारत ।
ततो वहति तं भारमवशः स्ववशोऽपि वा ॥ ११ ॥
यथा च मृन्मयं भाण्डं पक्वामृद्वं विपद्यते ।
किञ्चित्प्रक्रियमाणं वा कृतमात्रमथापि वा ॥ १२ ॥
छत्रं चाप्यवरोप्यन्तमवतीर्णमथापि वा ।
आर्द्रं वाऽप्यथवा शुष्कं पच्यमानमथापि वा ॥ १३ ॥
उत्तार्यमाणमाघातादुद्भूतं वापि भारत ।

परिणामश्च वयसः सर्वबन्धुक्षयश्च मे ॥ १९ ॥
सुहृन्मित्रविनाशश्च दैवयोगादुपागतः ।
कोऽन्योऽस्ति दुःखिततरो मत्तोऽन्यो हि पुमान्भुवि ॥२०॥
तन्ममाद्यैव पश्यन्तु पाण्डवाः सांशितव्रताः ।
विवृतं ब्रह्मलोकस्य दीर्घमध्वानमास्थितम् ॥ २१ ॥
वैशम्पायन उवाच-तस्य लालप्यमानस्य बहुशोकं वितन्वतः ।
शोकापहं नरेन्द्रस्य सञ्जयो वाक्यमब्रवीत् ॥ २२ ॥
शोकं राजन्व्यपनुद श्रुतास्ते वेदनिश्चयाः ।
शास्त्रागमाश्च विविधा बृद्धेभ्यो नृपसत्तम ॥ २३ ॥
सृञ्जये पुत्रशोकार्ते यदूचुर्मुनयः पुरा ।
यथा यौवनजं दर्पमास्थिते ते सुते नृप ॥ २४ ॥
न त्वया सुहृदां वाक्यं ब्रुवतामवधारितम् ।
स्वार्थश्च न कृतः कश्चिल्लुब्धेन फलगृद्धिना ॥ २५ ॥
असिनैवैकधारेण स्वबुद्ध्या तु विचेष्टितम् ।
प्रायशोऽवृत्तसम्पन्नाः सततं पर्युपासिताः ॥ २६ ॥
यस्य दुःशासनो मंत्री राधेयश्च दुरात्मवान् ।

भोगना पडा। मुझे निश्चय है कि मैंने पहिले जन्मोंमें कुछ पाप किया था, उसीसे ब्रह्माने मुझे ऐसे ऐसे दुःख दिये। यह बुढापा, बन्धु और मित्रोंका नाश ये प्रारब्धहीसे सब दुःख इकट्ठे होगये हैं; अब इस जगतमें हमारे समान दुःखी और कौन है? इसलिये व्रतधारी पाण्डव आज ही हमें ब्रह्म लोकके बडे रास्तेमें जाते देखें, अर्थात् हम इसही समय प्राण त्याग करते हैं। (१८-२१)

श्रीवैशम्पायन मुनि बोले, इस प्रकारसे राजाको अनेक प्रकार रोते देख सञ्जय बोले, हे महाराज! आपने बृद्धोंके मुखसे वेद और अनेक शास्त्र सुने है, इसलिये आप शोकको छोड दीजिए, हे राजन्! जैसे पुत्रके मरनेसे राजा सृञ्जयको शोक हुआ था और उनको मुनियोंने समझाया था, जैसे उनके पुत्रोंको अभिमान हुआ था, ऐसे ही तुम्हारे पुत्रको भी अभिमान हुआ था, आपने पहिले किसीकी बात नहीं मानी, केवल लोभमें पडके अन्याय करने लगे और अपना भी प्रयोजन कुछ सिद्ध न कर सके, केवल अत्यन्त तेजधारवाली तलवारके समान अपनी महातेज बुद्धिसे काम करते रहे। (२२-२६)

अथवा परिभृज्जन्तमेवं देहाः शरीरिणाम् ॥ १४ ॥
गर्भस्थो वा प्रसूतो वाऽप्यथवा दिवसान्तरः।
अर्धमासगतो वाऽपि मासमात्रगतोऽपि वा ॥ १५ ॥
संवत्सरगतो वापि द्विसंवत्सर एव वा।
यौवनस्थोऽथ मध्यस्थो वृद्धो वाऽपि विपद्यते ॥ १६ ॥
प्राक्कर्मभिस्तु भूतानि भवन्ति न भवन्ति च।
एवं सांसिद्धिके लोके किमर्थमनुतप्यसे ॥ १७ ॥
यथा तु सलिलं राजन् क्रीडार्थमनुसन्तरत्।
उन्मज्जेच्च निमज्जेच्च किञ्चित्सत्वं नराधिप ॥ १८ ॥
एवं संसारगहने उन्मज्जननिमज्जने।
कर्मभोगेन बध्यन्ते क्लिश्यन्ते चाल्पबुद्धयः ॥ १९ ॥
ते तु प्राज्ञाः स्थिताः सत्वे संसारेऽस्मिन् हितैषिणः।
समागमज्ञा भूतानां ते यान्ति परमां गतिम् ॥ २० ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां स्त्रीपर्वणि जलप्रदानिकपर्वणि विशोककरणे तृतीयोऽध्यायः ॥ ३ ॥ [१०१]

धृतराष्ट्र उवाच—कथं संसारगहनं विज्ञेयं वदतां वर।
एतदिच्छाम्यहं श्रोतुं तत्त्वमाख्याहि पृच्छतः ॥ १ ॥

चुल्हेपर चढी, कोई उतरी, कोई उतरती, कोई आधी पकी और पूरी पककर फूटती है, ऐसेही किसीका शरीर गर्भहीमें उत्पन्न होते ही, किसीका एक दिनमें, किसीका दूसरे दिन, किसीका एक पक्षमें, किसीका एक महीनेमें, किसीका एक वर्षमें, किसीका दो वर्षमें, किसीका जवानीमें, किसीका बुढापेमें नष्ट होजाता है, पहिले कर्मोंके वशमें होकर मनुष्य उत्पन्न होते हैं और मरते हैं, यह संसार अपने स्वभावसे ऐसे ही चलता है, जैसे कोई जन्तु खेलनेके लिये पानीमें तैरता है, उसमें कभी डूबता है और कभी उछलता है, ऐसे ही इस गम्भीर जगत्में मूर्ख कर्मके वशमें होकर बन्धते हैं और दुःख भोगते हैं, परन्तु कल्याण चाहनेवाले पण्डित इन सब दुःखोंसे छूटकर मोक्ष पदको पाते हैं। (१२–२९) [१०१]

स्त्री पर्वमें तीन अध्याय समाप्त।

स्त्री पर्वमें चार अध्याय।

महाराज धृतराष्ट्र बोले, हे कहनेवालोंमें श्रेष्ठ विदुर! इस संसाररूपी वन को मनुष्यसे ही जान सक्ता है, हम

शकुनिश्चैव दुष्टात्मा चित्रसेनश्च दुर्मतिः ॥ २७ ॥
शल्यश्च येन वै सर्वं शल्यभूतं कृतं जगत् ।
कुरुवृद्धस्य भीष्मस्य गान्धार्या विदुरस्य च ॥ २८ ॥
द्रोणस्य च महाराज कृपस्य च शरद्वतः ।
कृष्णस्य च महाबाहो नारदस्य च धीमतः ॥ २९ ॥
ऋषीणां च तथाऽन्येषां व्यासस्यामिततेजसः ।
न कृतं तेन वचनं तव पुत्रेण भारत ।
न धर्मः सत्कृतः कश्चिन्निलं युद्धमभीप्सता ॥ ३० ॥
अल्पबुद्धिरहङ्कारी नित्यं युद्धमिति ब्रुवन् ।
क्रूरो दुर्मर्षणो नित्यमसन्तुष्टश्च वीर्यवान् ॥ ३१ ॥
श्रुतवानसि मेधावी सत्यवांश्चैव नित्यदा ।
न मुह्यन्तीदृशाः सन्तो बुद्धिमन्तो भवादृशाः ॥ ३२ ॥
न धर्मः सत्कृतः कश्चित्त्वया पुत्रेण भारिष ।
क्षपिताः क्षत्रियाः सर्वे शत्रूणां वर्धितं यशः ॥ ३३ ॥
मध्यस्थो हि त्वमप्यासीर्न क्षमं किञ्चिदुक्तवान् ।
दुर्धरेण त्वया भारस्तुल्या न नमं गुरुः ॥ ३४ ॥

विदुर उवाच— जन्मप्रभृति भूतानां क्रिया सर्वोपलक्ष्यते ।
पूर्वमेवेह कलिले वसते किञ्चिदन्तरम् ॥ २ ॥
ततः स पञ्चमेऽतीते मासे वासमकल्पयत् ।
ततः सर्वाङ्गसम्पूर्णो गर्भो वै स तु जायते ॥ ३ ॥
अमेध्यमध्ये वसति मांसशोणितलेपने ।
ततस्तु वायुवेगेन ऊर्ध्वपादो ह्यधः शिराः ॥ ४ ॥
योनिद्वारमुपागम्य बहून् क्लेशान्स मूर्च्छति ।
योनिसम्पीडनाच्चैव पूर्वकर्मभिरन्वितः ॥ ५ ॥
तस्मान्मुक्तः स संसाराद्दन्यान्पश्यत्युपद्रवान् ।
ग्रहास्तमनुगच्छन्ति सारमेया ह्यामिषम् ॥ ६ ॥
ततः प्राप्तोत्तरे काले व्याधयश्चापि तं तथा ।
उपसर्पन्ति जीवन्तं वध्यमानं स्वकर्मभिः ॥ ७ ॥
तं यद्धामिन्द्रियैः पार्थः सह्यान्युभिरागतम् ।
व्यसनान्यपि वर्तन्ते विविधानि नराधिप ॥ ८ ॥
व्याधयश्चाग्र्यसंभूता नैव मृत्युर्निवर्तते यः ।
तदा नाधिगतिं धीमान्प्रजानन्ना तमाः ना ॥ ९ ॥

आदावेव मनुष्येण वर्तितव्यं यथाक्षमम् ।
यथा नातीतमर्थं वै पश्चात्तापेन युज्यते ॥ ३५ ॥
पुत्रगृद्धया त्वया राजन् प्रियं तस्य चिकीर्षितम् ।
पश्चात्तापामिमं प्राप्तो न त्वं शोचितुमर्हसि ॥ ३६ ॥
मधु यः केवलं दृष्ट्वा प्रपातं नानुपश्यति ।
स भ्रष्टो मधुलोभेन शोचत्येवं यथा भवान् ॥ ३७ ॥
अर्थान्न शोचन्प्राप्नोति न शोचन्विन्दते फलम् ।
न शोचन् श्रियमाप्नोति न शोचन्विन्दते परम् ॥३८॥
स्वयमुत्पादयित्वाऽग्निं वस्त्रेण परिवेष्टयन् ।
दह्यमानो मनस्तापं भजते न स पण्डितः ॥ ३९ ॥
त्वयैव ससुतेनायं वाक्यवायुसमीरितः ।
लोभाज्येन च संसिक्तो ज्वलितः पार्थपावकः ॥४० ॥
तस्मिन् समिद्धे पतिताः शलभा इव ते सुताः ।
तान्वै शराग्निर्दग्धान्न त्वं शोचितुमर्हसि ॥ ४१ ॥
यच्चाश्रुपातात्कलिलं वदनं वहसे नृप ।
अशास्त्रदृष्टमेतद्धि न प्रशंसन्ति पण्डिताः ॥ ४२ ॥
विस्फुलिङ्गा इव ह्येतान्दहन्ति किल मानवान् ।

समान बोझ न रक्खा, मनुष्यको ऐसा उचित है कि पहिले ही शक्तिके अनुसार ऐसा विचारकरे, जिसमें आगे कोई दुःख न भोगना पडे। तुमने भी पुत्रके प्रेममें आकर दुर्योधनके अनुकूल ही वर्त्ताव किया, फिर अब आपत्ति पडनेसे क्यों शोक करते हो ? (३२-३६)

जो केवल शहत देखकर वृक्षपर चढ जाता है और अपने गिरनेका भय नहीं करता, वह वृक्षपरसे गिरकर तुम्हारे ही समान आपत्ति भोगता है। शोचसे धन, बल, लक्ष्मी और मोक्ष सिद्ध नहीं होती। जो आप ही आग बनाकर पीछे कपडेसे ढकता है और पीछे जलनेसे शोच करता है, वह पण्डित नहीं कहाता तुमने अपने पुत्रको सङ्ग लेकर वचन रूपी वायुसे धौंककर और लोभरूपी घी डालकर युधिष्ठिररूपी अग्निको चैतन्य कर दिया, उस बढी हुई अग्निकी बाणरूपी ज्वालामें तुम्हारे पुत्र पतङ्गके समान जल गये, अब तुम उनका क्या शोच करते हो ? अब जो तुम अपनी आंसुवोंसे शरीरको भिगा रहे हो, यह व्यवहार शास्त्रसे विरुद्ध है, पण्डित ऐसा

तथैव परिरक्षन्ति ये ध्यानपरिनिष्ठिताः।
अयं न बुद्ध्यते तावद्यमलोकमथागतम् ॥ १० ॥
यमदूतैर्विकृष्यंश्च मृत्युं कालेन गच्छति।
वाग्घीनस्य च यन्मात्रामिष्टानिष्टं कृतं मुखे।
भूय एवात्मनाऽऽत्मानं वध्यमानमुपेक्षते ॥ ११ ॥
अहो विनिकृतो लोको लोभेन च वशीकृतः।
लोभक्रोधभयोन्मत्तो नात्मानमवबुध्यते ॥ १२ ॥
कुलीनत्वे च रमते दुष्कुलीनान्विकुत्सयन्।
धनदर्पेण दृप्तश्च दरिद्रान्परिकुत्सयन् ॥ १३ ॥
मूर्खानिति परानाह नात्मानं समवेक्षते।
दोषान्क्षिपति चान्येषां नात्मानं शास्तुमिच्छति॥१४॥
यदा प्राज्ञाश्च मूर्खाश्च धनवन्तश्च निर्धनाः।
कुलीनाश्चाकुलीनाश्च मानिनोऽथाप्यमानिनः ॥ १५ ॥
सर्वे पितृवनं प्राप्ताः क्षपन्ति विगतत्वचः।
निर्मांसैरस्थिभूयिष्ठैर्गात्रैः स्नायुनिबन्धनैः ॥ १६ ॥

भला काम करते करते आपत्तियोंसे तृप्त नहीं होता, तब महात्मा शास्त्र और ध्यानकी विधिसे अपने आत्माकी रक्षा करते हैं। परन्तु मूर्ख कुछ भी नहीं जान सक्ता, तब उसे यमदूत खींचकर मारडालते हैं और यमलोकको ले जाते हैं। तब सब इन्द्रिय नष्ट होनेपर भी जो पहिले पुण्य और पाप किया था, उसका फल देखकर भी अपने कल्याणका कोई उपाय नहीं करता, अर्थात् अपने आप ही बन्धन काटनेका उपाय नहीं करता। (६–११)

देखो कैसे आश्चर्यकी बात है, कि सब जगत् पागलके समान होकर लोभके वशमें पडा है, देखो मनुष्य लोभ, क्रोध और भयसे पागल होकर अपने आत्माका कुछ ज्ञान नहीं करता। "हम कुलीन है" इस अभिमानसे छोटे कुलवालोंका और धनके अभिमानसे दरिद्रियोंकी निन्दा करता है, मैं पण्डित हूं और सब मूर्ख है, यह जानकर दूसरोंके दोष देखाता है, परन्तु अपने दोषोंको दूर करनेकी इच्छा नहीं करता। (१२-१४)

देखो पण्डित, मूर्ख, धनी, निर्धन, कुलीन, अकुलीन, मानी और मानरहित सब ही श्मशानमें जाकर नङ्ग होकर सो जाते हैं, किसीका मांस हड्डी और वसा भी नहीं बचती, उस समय दूसरे

स्वधामिवाप्य ज्वलनः पितृप्रियस्ततः प्रशान्तः सलिलप्रवाहतः ॥५०॥
समाप्तविद्यं तु गुरोः सुतं नृपः समाप्तकर्माणमुपेत्य ते सुतः ।
सुहृद्वृतोऽत्यर्थमपूजयन्मुदा जिते बलौ विष्णुमिवामरेश्वरः ॥५१॥ [८१७]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि पाण्ड्यवधे विंशोऽध्यायः ॥ २० ॥

धृतराष्ट्र उवाच— पाण्ड्ये हते किमकरोदर्जुनो युधि सञ्जय ।
एकवीरेण कर्णेन द्रावितेषु परेषु च ॥ १ ॥
समाप्तविद्यो बलवान्युक्तो वीरः स पाण्डवः ।
सर्वभूतेष्वनुज्ञातः शङ्करेण महात्मना ॥ २ ॥
तस्मान्महद्भयं तीव्रमामित्रघ्नाद्धनञ्जयात् ।
स यत्तत्राकरोत्पार्थस्तन्ममाचक्ष्व सञ्जय ॥ ३ ॥
सञ्जय उवाच— हते पाण्ड्येऽर्जुनं कृष्णस्त्वरन्नाह वचो हितम् ।
पश्यामि नाहं राजानमपयातांश्च पाण्डवान् ॥ ४ ॥
निवृतैश्च पुनः पार्थैर्भग्नं शत्रुबलं महत् ।
अश्वत्थाम्नश्च सङ्कल्पाद्भृताः कर्णेन सृञ्जयाः ॥ ५ ॥

को मारकर और राक्षसोंको भोजन देकर प्रेतरूप हविको प्राप्त होकर अन्तमें जैसे स्मशानकी अग्नि जल प्रवाहसे शान्त होती है, वैसे ही वह पांड्यराज अश्वत्थामाके बाणोंसे शान्त हुए ॥ राजा मलयध्वजके मरनेके पश्चात् तुम्हारे पुत्र राजा दुर्योधनने समस्त विद्या जाननेवाले और समस्त कर्मको समाप्त करनेवाले अश्वत्थामाकी इसप्रकार स्तुति करी, जैसे बलिके जीतनेपर देवतोंके राजा इन्द्रने विष्णुकी की थी ॥ (४९-५१) [८१७]

कर्णपर्वमें बीस अध्याय समाप्त ।

कर्णपर्वमें इक्कीस अध्याय।

धृतराष्ट्र बोले,हे सञ्जय ! राजा मलयध्वजके मरनेके पश्चात् जब महावीर कर्णने पाण्डवोंकी सेनाको भगाया, तब अर्जुनने क्या कहा ? क्योंकि अर्जुनने समस्त धनुर्वेद पढा है, और साक्षात् शिवने उसे आशीर्वाद दिया है, कि तुम किसीसे युद्धमें नहीं हारोगे, इस लिये हम शत्रुनाशन अर्जुनसे बहुत डरते है । अतः कुन्तीपुत्र अर्जुनने जो कर्म किया हो सो हमसे कहो ॥ (१-३)

सञ्जय बोले, हे राजन् ! राजा मलयध्वजके मरनेके पश्चात् शीघ्रतामे कृष्णने अर्जुनसे हितका वचन कहा, हम राजा युधिष्ठिरको तथा अन्य पाण्डवोंको नहीं देखते हैं । निश्चयसे पाण्डव लोग युद्धसे पराङ्मुख हुए हैं, क्योंकि पाण्डव लोग युद्धके लिये खडे रहते तो शत्रुओंकी

तथाश्वरथनागानां कृतं च कदनं महत् ।
सर्वमाख्यातवान्वीरो वासुदेवः किरीटिने ॥ ६ ॥
एतच्छ्रुत्वा च दृष्ट्वा च भ्रातुर्घोरं महद्भयम् ।
वाहयाश्वान्हृषीकेश क्षिप्रमित्याह पाण्डवः ॥ ७ ॥
ततः प्रायाद्धृषीकेशो रथेनाप्रतियोधिना ।
दारुणश्च पुनस्तत्र प्रादुरासीत्समागमः ॥ ८ ॥
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः ।
भीमसेनमुखाः पार्थाः सूतपुत्रमुखा वयम् ॥ ९ ॥
ततः प्रववृते भूयः संग्रामो राजसत्तम ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ १० ॥
धनूंषि बाणान्परिघानसिपट्टिशतोमरान् ।
मुसलानि भुशुण्डीश्च सशक्त्यृष्टिपरश्वधान् ॥ ११ ॥
गदाः प्रासाञ्शितान्कुन्तान्भिन्दिपालान्महांकुशान् ।
प्रगृह्य क्षिप्रमापेतुः परस्परजिघांसया ॥ १२ ॥
बाणज्यातलशब्देन द्यां दिशः प्रदिशो वियत् ।
पृथिवीं नेमिघोषेण नादयन्तोऽभ्ययुः परान् ॥ १३ ॥

सेनाका नाश होनेके विना नहीं रहता, देखो अश्वत्थामाके संकल्प के अनुसार कर्णने सृञ्जय वीरोंका नाश किया है, तथा देखो कर्ण सहस्रों हाथी, घोडे और रथोंको नाश कर रहे हैं, इत्यादि सब श्रीकृष्णने अर्जुनसे कहा ॥ (४-६)

श्रीकृष्णके ऐसे वचन सुन युद्धको देख और अपने भाईके दुःखको जानके अर्जुनने श्रीकृष्णसे कहा, हमारे घोडोंको शीघ्र चलाओ, अर्जुनके वचन सुन, श्रीकृष्णने बहुत वेगसे घोडोंको चलाया, तब दारुण युद्ध होने लगा ॥ उसी समय भीमसेनको आगे करके युधिष्ठिर की सेना और कर्णको आगे करके हमारी सेना बेडर होकर युद्ध करने लगी, हे महाराज ! अनन्तर यमराजकी पुरीको भरनेवाला कर्ण और पाण्डवोंका घोर युद्ध होने लगा ॥ (७–१०)

योद्धा लोग धनुष, बाण, परिघ, खड्ग, पट्टिश, तोमर, मूसल, भुशुण्डी, शक्ति, कटार, फरश, गदा, भिन्दिपाल, प्रास, कुन्तल, और बडे अंकुश लेकर एक दूसरेको मारनेके लिये प्रहार करने लगे ॥ वीरोंके धनुष, बाण और तालियोंके शब्दसे दिशा, कोने और आकाश पूरित होगए । तथा रथोंकी पहियोंके

विशेषं न प्रपश्यन्ति तत्र तेषां परे जनाः ।
येन प्रत्यवगच्छेयुः कुलरूपविशेषणम् ॥ १७ ॥
यदा सर्वे समं न्यस्ताः स्वपन्ति धरणीतले ।
कस्माद्न्योन्यमिच्छन्ति प्रत्यक्षुमिह दुर्बुधाः ।
प्रत्यक्षं च परोक्षञ्च यो निशम्य श्रुतिं त्विमाम्॥१८ ॥
अध्रुवे जीवलोकेऽस्मिन् यो धर्ममनुपालयन् ।
जन्मप्रभृति वर्तेत प्राप्नुयात्परमां गतिम् ॥ १९ ॥
एवं सर्वं विदित्वा वै यस्त्वमनुवर्तते ।
स प्रमोक्ष्यते सर्वान्पन्थानो मनुजेश्वर ॥ २० ॥ [१२१]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सर्ववेदान्तर्गत जनमेजयादिकपर्वणि
विदोक्तकरणे चतुर्थोऽध्यायः ४ ।

धृतराष्ट्र उवाच—यदिदं धर्मनैपुणं बुद्ध्या समनुगम्यते ।
तद्धि विस्तरतः सर्वं बुद्धिमार्ग प्रशंस मे ॥ १ ॥
विदुर उवाच— अत्र ते वर्णयिष्यामि नमस्कृत्वा स्वयंभुवे ।
यथा सम्यगयं वेदान्सर्वे धर्मगतिः ॥ २ ॥
यश्चिन्मात्रमिदं ब्रह्म सर्वमात्मा द्विजः किल ।

महद्दुर्गमनुप्राप्तो वनं क्रव्यादसंकुलम् ॥ ३ ॥
सिंहव्याघ्रगजक्षौंघैरतिघोरं महास्वनैः।
पिशितादैरतिभयैर्महोग्राकृतिभिस्तथा ॥ ४ ॥
समन्तात्सम्परिक्षिप्तं यत्स्म दृष्ट्वा त्रसेद्यमः।
तदस्य दृष्ट्वा हृदयमुद्वेगमगमत्परम् ॥ ५ ॥
अभ्युच्छ्रयं च रोम्णां वै विक्रियाश्च परन्तप।
स तद्वनं व्यनुसरन्संप्रधावन्नितस्ततः ॥ ६ ॥
वीक्षमाणो दिशः सर्वाः शरणं क्व भवेदिति।
स तेषां छिद्रमन्विच्छन्प्रद्रुतो भयपीडितः ॥ ७ ॥
न च निर्याति वै दूरं न चातैर्विप्रमुच्यते।
अथापश्यद्वनं घोरं समंताद्वागुरावृतम् ॥ ८ ॥
बाहुभ्यां सम्परिक्षिप्तं स्त्रिया परमघोरया।
पञ्चशीर्षधरैर्नागैः शैलैरिव समुन्नतैः ॥ ९ ॥
नभःस्पृशैर्महावृक्षैः परिक्षिप्तं महावनम्।
वनमध्ये च तत्राभूदुदपानः समावृतः ॥ १० ॥
वल्लीभिस्तृणछन्नाभिर्दृढाभिरभिसंवृतः।
पपात स द्विजस्तत्र निगूढे सलिलाशये ॥ ११ ॥
विलग्नश्चाभवत्तस्मिंल्लतासन्तानसंकुले।
पनसस्य यथा जातं वृन्तबद्धं महाफलम् ॥ १२ ॥

नेवाले, भयरूप महाशब्दवाले बाघ, हाथी और ऋच्छोंके झुण्डोंसे भरे, भयानक, गर्जने योग्य, वनमें पहुंच गया, जिस वनको देखकर साक्षात् यमराज भी डरे, वहां जाकर इस ब्राह्मणका हृदय कांपने लगा, रोएं खडे होगये और सब काम भूल गया। फिर चारों ओर देखता हुआ "मैं किधर जाऊं" ये विचारता हुआ, उन जन्तुवोंसे बचता हुआ भयसे व्याकुल होकर इधर उधर वनमें घूमने लगा।

उस वायुसे भरे वनसे विषयोंसे व्याकुल ब्राह्मण दूर न जा सका, फिर पर्वतोंके समान ऊंचे पांच विषीले सांपके सहित एक स्त्रीको देखा, फिर आकाशके समान वृक्षोंसे पूरित बेत और बडे बडे तिनकोंसे भरे एक तालाबको देखा, फिर ब्राह्मण उस गहरे तलाबमें गिर पडा, फिर एक तिनकेको पकडकर उस लता भरे तलाबमें अभिमान सहित इस प्रकार लटकने लगा, जैसे कटहरका बडा फल।

यतितं सर्वयत्नेन शमं प्रति जनेश्वर ॥ १८ ॥
न च दैवकृतो मार्गः शक्यो भूतेन केनचित्।
घटताऽपि चिरं कालं नियन्तुमिति मे मतिः ॥ १९ ॥
देवतानां हि यत्कार्यं मया प्रत्यक्षतः श्रुतम्।
तत्तेहं सम्प्रवक्ष्यामि यथा स्थैर्यं भवेत्तव ॥ २० ॥
पुराऽहं त्वरितो यातः सभामैन्द्रीं जितक्लमः।
अपश्यं तत्र च तदा समवेतान्दिवौकसः ॥ २१ ॥
नारदप्रमुखाश्चापि सर्वे देवर्षयोऽनघ।
तत्र चापि मया दृष्टा पृथिवी पृथिवीपते ॥ २२ ॥
कार्यार्थमुपसम्प्राप्ता देवतानां समीपतः।
उपगम्य तदा धात्री देवानाह समागतान् ॥ २३ ॥
यत्कार्यं मम युष्माभिर्ब्रह्मणः सदने तदा।
प्रतिज्ञातं महाभागास्तच्छीघ्रं संविधीयताम् ॥ २४ ॥
तस्यास्तद्वचनं श्रुत्वा विष्णुर्लोकनमस्कृतः।
उवाच वाक्यं प्रहसन् पृथिवीं देवसंसदि ॥ २५ ॥
धृतराष्ट्रस्य पुत्राणां यस्तु ज्येष्ठः शतस्य वै।
दुर्योधन इति ख्यातः स ते कार्यं करिष्यति ॥ २६ ॥
तं च प्राप्य महीपालं कृतकृत्या भविष्यसि।

ने शान्तिके लिये बहुत यत्न भी किये, परन्तु कोई मनुष्य बहुत दिनतक बहुत यत्न करनेपर भी प्रारब्धको नहीं रोक सका, हमने जो देवतोंकी बात अपने कानसे सुनी थी सो तुमसे कहते हैं, उसके सुननेसे तुम कुछ सावधान होगे। (१३–२०)

पहिले मैं एकदिन बहुत शीघ्रतासे सावधान होकर इन्द्रकी सभामें गया, वहां जाकर सब देवतोंको देखा। हे पापरहित! वहां नारद आदि सब देव ऋषि भी बैठे थे, मैंने वहां पृथ्वीको भी देखा, पृथ्वी कुछ कामके लिये देवतोंके यहां गई थी, उसने सब देवतोंसे कहा, तुम लोगोंने जो मेरे काम के लिये कहा था, और धर्मसे जो प्रतिज्ञा की थी, उसे सत्य करो। पृथ्वीके ऐसे वचन सुन देवतोंकी सभामें बैठे हुए जगत्‌वन्दित विष्णु हंसकर पृथ्वी से बोले, हे पृथ्वी! जो धृतराष्ट्रके सौ बेटोंमें बड़ा दुर्योधन है, वह तुम्हारे कामको सिद्ध करेगा, उस ही राजासे

स तथा लम्बते तत्र ह्यूर्ध्वपादो ह्यधः शिराः ।
अथ तत्रापि चान्योऽस्य भूयो जात उपद्रवः ॥ १३ ॥
कूपमध्ये महानागमपश्यत महाबलम् ।
कूपवीनाहवेलायामपश्यत महागजम् ॥ १४ ॥
षड्वक्त्रं कृष्णशुक्लं च द्विषट्कपदचारिणम् ।
क्रमेण परिसर्पन्तं वल्लीवृक्षसमावृतम् ॥ १५ ॥
तस्य चापि प्रशाखासु वृक्षशाखावलम्बिनः ।
नानारूपा मधुकरा घोररूपा भयावहाः ॥ १६ ॥
आसते मधु संवृत्य पूर्वमेव निकेतजाः ।
भृशोभृशः समीहन्ते मधूनि भरतर्षभ ॥ १७ ॥
स्वादनीयानि भूतानां यैर्यालो विप्रकृष्यते ।
तेषां मधूनां बहुधा धारा प्रस्रवते तदा ॥ १८ ॥
आलम्बमानः स पुमान धारां पिबति सर्वदा ।
न चास्य तृष्णा विरता पिबमानस्य सर्वदे ॥ १९ ॥
अथोपयाति तदा निष्पतन्तः स पतन्तः ।
न चास्य जीविते राजन्निर्वेदः समजायत ॥ २० ॥
तस्यैष च मनुष्यस्य जीविताशा प्रतिष्ठिता ।
कृष्णा शुक्लाश्च तं वृक्षं भूतयन्ति च सर्वदा ॥ २१ ॥
व्यालश्च बलवान्नित्ये स्त्रिया च परमोग्रया ।

वह जिस डालमें लटकता था, वहां इसका शिर नीचेको पैर ऊपरको थे, तब वहां उसने फिर एक उपद्रव देखा कि कूपके बीचमें सांप बैठा है और ऊपर एक मतवाला हाथी खड़ा है, उस हाथी के छः मुख, सफेद और काला रङ्ग और चार पैर है, और आसमें उन्नीस, डाल पकड़ा हुआ है, उस कूपके ऊपर से एक बड़ा, उसकी डालियोंमें बहुत से अनेक रङ्गोंके, छोटे छोटे बहुत

है, उससे बार बार थोड़ा मधु गिरता है, और उसीको खाकर वह मूर्ख ब्राह्मण उस मधुमक्खीमें प्रसन्न होरहा है और इसकी तृप्ति नहीं बुझती और उसको यही इच्छा होती है, कि मैं सदा यहीं पड़ा रहूं। कभी उससे निराश नहीं होता, फिर उस ब्राह्मणने देखा कि कई सफेद और कई काले रंगके चिह्न उसको ले चलते रहे हैं, उसे काट रहे हैं तात्पर्य यह ब्राह्मणको जानेकी

कूपाधस्ताच्च नागेन पीनाहे कुञ्जरेण च ॥ २२ ॥
वृक्षप्रपाताच्च भयं मूषिकेभ्यश्च पञ्चमम्।
मधुलोभान्मधुकरैः षष्ठमाहुर्महद्भयम् ॥ २३ ॥
एवं स वसते तत्र क्षिप्तः संसारसागरे।
न चैव जीविताशायां निर्वेदमुपगच्छति ॥२४॥ [१४५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां स्त्रीपर्वणि जलप्रदानिकपर्वणि विशोककरणे पचमोऽध्यायः॥ ५ ॥

धृतराष्ट्र उवाच- अहो खलु महद्दुःखं कृच्छ्रवासश्च तस्य ह।
कथं तस्य रतिस्तत्र तुष्टिर्वा वदतां वर ॥ १ ॥
स देशः क नु यत्रासौ वसते धर्मसङ्कटे।
कथं वा स विमुच्येत नरस्तस्मान्महाभयात् ॥ २ ॥
एतन्मे सर्वमाचक्ष्व साधु चेष्टामहे तदा।
कृपा मे महती जाता तस्याभ्युद्धरणेन हि ॥ ३ ॥
विदुर उवाच- उपमानमिदं राजन्मोक्षविद्भिरुदाहृतम्।
सुकृतं विन्दते येन परलोकेषु मानवः ॥ ४ ॥
उच्यते यत्तु कान्तारं महासंसार एव सः।
वनं दुर्गं हि यच्चैतत्संसारगहनं हि तत् ॥ ५ ॥

आशा न छूटी, भयानक सांप, घोर स्त्री, वनके जन्तु, नीचेवाला सांप, ऊपर वाला हाथी, लता काटनेवाले दोनों मूसे और मधुमक्खी इन छह महाभयोंको भूलकर भी वह ब्राह्मण केवल शहतके स्वादको लेने लगा, और जीनेसे निराश न हुआ और इस ही प्रकार कूवेरूपी संसारमें पडा रहा। (३—२४) [१४५]

स्त्रीपर्वमें पांच अध्याय समाप्त।

स्त्रीपर्वमें ६. अध्याय।

महाराज धृतराष्ट्र बोले, हे कहनेवालोंमें श्रेष्ठ विदुर! कष्टकी बात है कि वह ब्राह्मण महाकष्टमें पडा कहो वह वहां कैसे प्रसन्न और तृप्त होता था, वह देश कहां है, जहां ब्राह्मण धर्मके सङ्कटमें पडा था, वह उस दुःखसे कैसे छूटेगा, मुझे उसके ऊपर बहुत कृपा आई है, तुम यह मुझसे सब वर्णन करो। (१-३)

विदुर बोले, हे महाराज! मोक्ष जाननेवाले महात्माओंने यह वृत्तान्त कहा है, इससे मनुष्यका परलोकमें कल्याण होता है। हमने जो भयानक वन कहा, वहीं घोर संसार है। जङ्गली जन्तु

मा तान् शोचस्व राजेन्द्र न हि शोकेऽस्ति कारणम्॥३५॥
न हि ते पाण्डवाः स्वल्पमपराध्यन्ति भारत।
पुत्रास्तव दुरात्मानो यैरियं घातिता मही ॥ ३६ ॥
नारदेन च भद्रं ते पूर्वमेव न संशयः।
युधिष्ठिरस्य समितौ राजसूये निवेदितम् ॥ ३७ ॥
पाण्डवाः कौरवाः सर्वे समासाद्य परस्परम्।
न भविष्यन्ति कौन्तेय यत्ते कृत्यं तदाचर ॥ ३८ ॥
नारदस्य वचः श्रुत्वा तदाऽशोचन्त पाण्डवाः।
एवं ते सर्वमाख्यातं देवगुह्यं सनातनम् ॥ ३९ ॥
कथं ते शोकनाशः स्यात्प्राणेषु च दया प्रभो।
स्नेहश्च पाण्डुपुत्रेषु ज्ञात्वा दैवकृतं विधिम् ॥ ४० ॥
एष चार्थो महाबाहो पूर्वमेव मया श्रुतः।
कथितो धर्मराजस्य राजसूये क्रतूत्तमे ॥ ४१ ॥
यतितं धर्मपुत्रेण मया गुह्ये निवेदिते।
अविग्रहे कौरवाणां दैवं तु बलवत्तरम् ॥ ४२ ॥
अनतिक्रमणीयो हि विधी राजन्कथञ्चन।
कृतान्तस्य तु भूतेन स्थावरेण चरेण च ॥ ४३ ॥
भवान्धर्मपरो यत्र बुद्धिश्रेष्ठश्च भारत।

तुम्हारे पुत्रोंके ही देखते नाश हुआ, इसलिये तुम उनका शोक मत करो। क्यों कि शोकसे कुछ होता नहीं। (३३-३५)

हे भारत! तुम्हारे दुष्ट पुत्रोंने इस जगत्का नाश किया, अब भी पाण्डव तुम्हारा कुछ अपराध नहीं करेंगे। हे राजन्! तुम्हारा कल्याण हो। युधिष्ठिरकी राजसूय यज्ञमें नारदने ये सब पहिले ही कह दिया था, कि कौरव और पाण्डव परस्पर लड़के मर जावेंगे, इसलिये जो तुम्हें करना होवे सो करो। नारदके ऐसे वचन सुन पाण्डवोंने उस ही समय बहुत शोच किया था, हमने ये सब गुप्त बात तुमसे कही। अब तुम ये सब आरम्भसे हुआ ऐसा विचार कर शोक छोड़ दो, मुझ पर कृपा करो। हे महाबाहो! हमने युधिष्ठिरके राजसूय यज्ञमें ये सब समाचार पहिले ही सुना था, जब मैंने यह गुप्त बात युधिष्ठिरसे कही थी, तभीसे उन्होंने शान्तिके लिये बहुत यत्न किया, परन्तु प्रारब्ध बड़ी ही बलवान है; इसे कोई कर्म सांत नहीं

ये च ते कथिता व्याला व्याधयस्ते प्रकीर्तिताः ।
या सा नारी बृहत्काया अध्यतिष्ठत तत्र वै ॥ ६ ॥
तामाहुस्तु जरां प्राज्ञा रूपवर्णविनाशिनीम् ।
यस्तत्र कूपे नृपते स तु देहः शरीरिणाम् ॥ ७ ॥
यस्तत्र वसतेऽधस्तान्महाहिः काल एव सः ।
अन्तकः सर्वभूतानां देहिनां सर्वहार्यसौ ॥ ८ ॥
कूपमध्ये च या जाता वल्ली यत्र स मानवः ।
प्रताने लम्बते लग्नो जीविताशा शरीरिणाम् ॥ ९ ॥
स यत्तु कूपवीनाहं तं वृक्षं परिसर्पति ।
षड्वक्त्रः कुञ्जरो राजन्स तु संवत्सरः स्मृतः ॥१० ॥
मुखानि ऋतवो मासाः पादा द्वादशकीर्तिताः ।
ये तु वृक्षं निकृन्तन्ति मूषिकाः पन्नगास्तथा ॥ ११ ॥
राज्यहानि तु तान्याहुर्भूतानां परिचिन्तकाः ।
ये तं मधुकरास्तत्र कामान्ते परिचारिणः ॥ १२ ॥
यत्तु तत्र मधु क्षौद्रं तत्तेषां सम्प्रसर्पणम् ।
तां तु कामरजोनिघ्नास्तत्र तत्र मानवाः ॥ १३ ॥
एवं संसारचक्रस्य परिवर्तो निबोधतः ।
येन संसारचक्रस्य पारमाप्नोति वै पुमान् ॥ १४ ॥ [१०९]

धृतराष्ट्र उवाच—अहोऽभिहितमाख्यानं भवता तत्त्वदर्शिना।
भूय एव तु मे हर्षः श्रुत्वा वागमृतं तव ॥ १ ॥
विदुर उवाच— श्रृणु भूयः प्रवक्ष्यामि मार्गस्यैतस्य विस्तरम्।
यच्छ्रुत्वा विप्रमुच्यन्ते संसारेभ्यो विचक्षणाः ॥ २ ॥
यथा तु पुरुषो राजन्दीर्घमध्वानमाश्रितः।
क्वचित्क्वचिच्छ्रमाच्छ्रान्तः कुरुते वासमेव वा ॥ ३ ॥
एवं संसारपर्याये गर्भवासेषु भारत।
कुर्वन्ति दुर्बुधा वासं मुच्यन्ते तत्र पण्डिताः ॥ ४ ॥
तस्मादध्वानमेवैतमाहुः शास्त्रविदो जनाः।
यत्तुसंसारगहनं वनमाहुर्मनीषिणः ॥ ५ ॥
सोऽयं लोकसमावर्त्तो मर्त्यानां भरतर्षभ।
चराणां स्थावराणां च न गृध्येत्तत्र पण्डितः ॥ ६ ॥
शारीरा मानसाश्चैव मर्त्यानां ये तु व्याधयः।
प्रत्यक्षाश्च परोक्षाश्च ते व्यालाः कथिता बुधैः ॥ ७ ॥
क्लिश्यमानाश्च तैर्नित्यं वार्यमाणाश्च भारत।

ण्डित लोग संसारकी फांसी काटकर सुख पाते हैं। (४—१४) [१५९]

स्त्रीपर्वमें छः अध्याय समाप्त।

स्त्रीपर्वमें सात अध्याय।

महाराज धृतराष्ट्र बोले, हे विदुर! तुम बहुत पण्डित हो, तुमने जो मित्रके समान वचन कहे इनको सुनकर मैं बहुत प्रसन्न हुआ, अब तुम कुछ और वर्णन करो। (१)

विदुर बोले, हे राजन्! अब हम इस ही विषयको फिर विस्तारसे वर्णन करते हैं, आप सुनिये इस ही तत्त्वको जानकर पण्डित लोग संसारबन्धनसे छूट जाते हैं, जैसे मनुष्य बहुत दूरके मार्गको चला जाता है और थक थककर कहीं कहीं बैठ जाता है। हे भारत! इसही प्रकार मनुष्य गर्भवासमें आकर मूर्ख फिर भी उसी बन्धनमें पडते हैं और पण्डित लोग उसी बन्धनको काटकर सुख भोगते हैं, जिस संसारको वनरूपसे वर्णन किया था; उसीको यहां पर मार्ग कहा है। (२-५)

हे भरतसिंह! चर और अचर जीवोंसे भरा हुआ यह लोक अनेक चक्रके समान है, पण्डित इस संसारकी कर्मा भी इच्छा नहीं करते, इस जगत्में जिन मनुष्योंको संसारमें मन और शरीरके रोग होते हैं, वेही सांप है। हे भारत!

एतच्छ्रुत्वा तु वचनं व्यासः सत्यवतीसुतः ।
धृतराष्ट्रस्य राजेन्द्र तत्रैवान्तरधीयत ॥ ५३ ॥ [२४१]

इतिश्री महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां स्त्रीपर्वणि जलप्रदानिकपर्वणि
धृतराष्ट्रविशोककरणे अष्टमोऽध्याय ॥ ८ ॥

जनमेजय उवाच- गते भगवति व्यासे धृतराष्ट्रो महीपतिः ।
किमचेष्टत विप्रर्षे तन्मे व्याख्यातुमर्हसि ॥ १ ॥
तथैव कौरवो राजा धर्मपुत्रो महामनाः ।
कृपप्रभृतयश्चैव किमकुर्वत ते त्रयः । ॥ २ ॥
अश्वत्थाम्नः श्रुतं कर्म शापश्चान्योन्यकारितः ।
वृत्तान्तमुत्तरं ब्रूहि यदभाषत सञ्जयः ॥ ३ ॥
वैशम्पायन उवाच-हते दुर्योधने चैव हते सैन्ये च सर्वशः ।
सञ्जयो विगतप्रज्ञो धृतराष्ट्रमुपास्थितः ॥ ४ ॥
सञ्जय उवाच— आगम्य नानादेशेभ्यो नानाजनपदेश्वराः ।
पितृलोकगता राजन् सर्वे तव सुतैः सह ॥ ५ ॥
याचयमानेन मनसं तव पुत्रेण भारत ।
घातिता पृथिवी सर्वा वैरस्यान्तं चिचिंत्सता ॥ ६ ॥

मैं शोक छोडने और मन सावधान करनेका यत्न करूंगा । राजा धृतराष्ट्रके ऐसे वचन सुन सत्यवतीके पुत्र व्यास मुनि वहीं अन्तर्धान होगये।(५०-५३)

स्त्री पर्वमें आठ अध्याय समाप्त । [२४१]

स्त्री पर्वमें नौ अध्याय ।

महाराज जनमेजय बोले, हे ब्राह्मण श्रेष्ठ वैशम्पायन मुने, जब धृतराष्ट्रके पास भगवान वेदव्यास चले गये, तब उन्होंने क्या किया ? कुरुकुलश्रेष्ठ महाराज धर्मराज युधिष्ठिरने तथा वचे हुए कृपाचार्य, अश्वत्थामा और कृतवर्माने क्या किया सो कहिये । हमने अश्वत्थामा और श्रीकृष्णके परस्पर शापकी कथा सुनी इसके पश्चात् सञ्जयने राजा धृतराष्ट्रसे क्या कहा सो कहिये।(१-३)

श्रीवैशम्पायन मुनि बोले, हे राजन जनमेजय ! जब राजा दुर्योधन मारे गये और सब सेनाका नाश हो चुका तब सञ्जय शोकसे व्याकुल होकर राजा धृतराष्ट्रके पास आकर कहने लगे। सञ्जय बोले, हे राजन ! अनेक देशोंके राजा कुरुक्षेत्रमें इकट्ठे होकर तुम्हारे पुत्रोंके सहित मारे गये। अनेक बार पाण्डवोंने पृथ्वी जीती तो भी दुर्योधनने वैरका अन्त करनेके लिये ये सब जगत्का

संसारे भ्रमतां राजन् दुःखमेतद्धि जायते ।
तस्मादस्य निवृत्त्यर्थं यत्नमेवाचरेद् बुधः ।
उपेक्षा नात्र कर्तव्या शतशाखः प्रवर्धते ॥
यतेन्द्रियो नरो राजन् क्रोधलोभनिराकृतः ।
सन्तुष्टः सत्यवादी यः स शान्तिमधिगच्छति॥
याम्यमाहू रथं ह्येनं मुह्यन्ते येन दुर्बुधाः ।
स चैनत्प्राप्नुयाद्राजन्यत्त्वं प्राप्तो नराधिप ॥ १
अनुतर्षुलमेवैतद्दुःखं भवति भारिप ।
राज्यनाशं सुहृन्नाशं सुतनाशं च भारत ।
साधुः परमदुःखानां दुःखभैषज्यमाचरेत् ॥ २
ज्ञानौषधमवाप्येह दूरपारं महौषधम् ।
छिन्द्याद्दुःखमहाव्याधिं नरः संयतमानसः ॥ २०
न विक्रमो न चाप्यर्थो न मित्रं न सुहृज्जनः ।
तथोन्मोचयते दुःखाद्यथाऽऽत्मा स्थिरसंयमः ॥ २१
तस्मान्मैत्रं समास्थाय शीलमापद्य भारत ।
दमस्त्यागोऽप्रमादश्च ते त्रयो ब्रह्मणो हयाः ॥ २३

घूमनेसे बचता है । (५-१५)

हे राजन् ! संसारमें घूमनेवालोंको बार बार यही दुःख भोगने पडते हैं, इसलिये पण्डित इनको छोडनेहीका उपाय करे, इसके छोटनेमें विलम्ब नहीं करना चाहिये, क्यों कि विलम्ब करनेसे यह वृक्ष बढता ही जाता है । हे राजन् ! जो मनुष्य इन्द्रियोंको वशमें करके क्रोध और लोभको छोड देता है, सन्तोष करके सत्य बोलता है, वही शान्ती और सुख पाता है । (१६-१८)

हे महाराज ! यह शरीर यमराजका रथ है, इसमें बैठकर मूर्ख लोग पागल होजाते हैं और उनही दुःखों हैं, जिनमें आप पडे है । और मित्रोंका नाश होना ये उन्हें ही होते हैं । जो बहुत ले है, इसलिये पण्डितको उचित अपने दुःखोंकी औषधि करे, सं रोगकी औषधि मनुष्य अपने वशमें करके करे । इसकी औष ज्ञान ही है, मनुष्यको जैसे मन रता शक्ति उसको जैसे छुरा म तैसे बल, धन, मित्र और बन्धु, न नहीं छुडा सकते । इसलिये आप मनको स्थिर करके सावधान हो

यथा वायुस्तृणाग्राणि संवर्तयति सर्वतः ।
तथा कालवशं यान्ति भूतानि भरतर्षभ ॥ १५ ॥
एकसार्थप्रयातानां सर्वेषां तत्र गामिनाम् ।
यस्य कालः प्रयात्यग्रे तत्र का परिदेवना ॥ १६ ॥
यांश्चापि निहतान्युद्धे राजंस्त्वमनुशोचसि ।
न शोच्या हि महात्मानः सर्वे ते त्रिदिवं गताः॥१७॥
न यज्ञैर्दक्षिणावद्भिर्न तपोभिर्न विद्यया ।
तथा स्वर्गमुपायान्ति यथा शूरास्तनुत्यजः ॥ १८ ॥
सर्वे वेदविदः शूराः सर्वे सुचरितव्रताः ।
सर्वे चाभिमुखाः क्षीणास्तत्र का परिदेवना ॥ १९ ॥
शरीराग्निषु शूराणां जुहुवुस्ते शराहुतीः ।
ह्रियमाणान् शरांश्चैव सेहुरुत्तमपूरुषाः ॥ २० ॥
एवं राजंस्त्वाचक्षे स्वर्ग्यं पन्थानमुत्तमम् ।
न युद्धादधिकं किञ्चित्क्षत्रियस्येह विद्यते ॥ २१ ॥
क्षत्रियास्ते महात्मानः शूराः समितिशोभनाः ।
आशिषं परमां प्राप्ता न शोच्याः सर्व एव हि॥ २२ ॥
आत्मनाऽऽत्मानमाश्वास्य मा शुचः पुरुषर्षभ ।
नाद्य शोकाभिभूतस्त्वं कार्यमुत्सृष्टुमर्हसि ॥ २३ ॥ [२६४]

इति श्रीमहाभारते वैशम्पायनीया सौपर्णेयि जलप्रदानिकपर्णि विदुरवाक्ये नवमोऽध्याय ॥ ९ ॥

जिनको उड़ाया करता है, ऐसे ही कालके वशमें होकर सब प्राणी भ्रमा करते हैं। सबको वहीं जाना है परन्तु जिसका काल पहिले आता है, वही पहिले जाता है इसमें शोचनेका क्या काम है ? हे राजन् ! जिन युद्धमें गये हुए महात्माओंका आप शोच करते हैं वे शोचने योग्य नहीं थे. वे सब स्वर्गको गये। क्षत्रियोंको युद्धमें मारनेमें जो कीर्ति मिलती है सो दक्षिणा सहित यज्ञ, और अनेक तप करनेसे भी नहीं मिलती। उन वीरोंने शत्रुओंकी शरीररूपी अग्निमें बाणरूपी आहुती छोड़ी और तेज बाणों को सहा। हे राजन्! क्षत्रियोंके लिये युद्धसे बचकर और कोई स्वर्गका मार्ग नहीं है। सब महात्मा वीर क्षत्री उत्तम स्वर्गको गये इसलिये उनका शोच नहीं करना चाहिये। हे भरतसिंह! आप अपनी बुद्धिसे अपना धीरज बांधिये क्यों कि शोचसे व्याकुल होना

तं तथा पतितं भूमौ निःसंज्ञं प्रेक्ष्य बान्धवाः।
कृष्णद्वैपायनश्चैव क्षत्ता च विदुरस्तथा ॥ २ ॥
सञ्जयः सुहृदश्चान्ये द्वाःस्था ये चास्य संमताः।
जलेन सुखशीतेन तालवृन्तैश्च भारत ॥ ३ ॥
पस्पर्शुश्च करैर्गात्रं वीज्यमानश्च यत्नतः।
आश्वास्य तु चिरं कालं धृतराष्ट्रं तथागतम् ॥ ४ ॥
अथ दीर्घस्य कालस्य लब्धसंज्ञो महीपतिः।
विललाप चिरं कालं पुत्राधिभिरभिप्लुतः ॥ ५ ॥
धिगस्तु खलु मानुष्यं मानुषेषु परिग्रहे।
यतो मूलानि दुःखानि सम्भवन्ति मुहुर्मुहुः ॥ ६ ॥
पुत्रनाशेऽर्थनाशे च ज्ञातिसम्बन्धिनामथ।
प्राप्यते सुमहद्दुःखं विषाग्निप्रतिमं विभो ॥ ७ ॥
येन दह्यन्ति गात्राणि येन प्रज्ञा विनश्यति।
येनाभिभूतः पुरुषो मरणं बहु मन्यते ॥ ८ ॥
तदिदं व्यसनं प्राप्तं मया भाग्यविपर्ययात्।
तस्यान्तं नाधिगच्छामि ऋते प्राणविमोक्षणात्॥ ९ ॥
तथैवाहं करिष्यामि अद्यैव द्विजसत्तम।
इत्युक्त्वा तु महात्मानं पितरं ब्रह्मवित्तमम् ॥ १० ॥

न देखकर सब बान्धव, श्रीकृष्णद्वैपायन वेदव्यास, विदुर, और सञ्जय आदि सब मन्त्री उनके ऊपर ठंडा जल छिड़कने लगे, बहुत देरमें बहुत यत्न करनेसे राजा धृतराष्ट्र चैतन्य होकर पुत्रोंके शोकसे व्याकुल होकर बहुत देर तक रोते रहे। फिर कहने लगे कि, मनुष्य जन्मको धिक्कार है, विशेष कर गृहस्थों को: क्यों कि बार बार गृहस्थोंको दुःख ही भोगना होता है। देखो पुत्र, धन, ज्ञाति और संबन्धियोंका नाश होनेसे दुःख और विषाग्निके समान महादुःख भोगने पडते हैं। जिनको सहते सहते शरीर जलने लगते और बुद्धिका नाश होजाता है, उस समय जीनेसे मरना अच्छा समझते हैं। आज प्रारब्ध उलटी होनेसे मुझे भी वैसाही भयानक दुःख हुवा है। मुझे निश्चय होता है, कि, विना प्राण छोडे इस दुःखके पार नहीं जा सकूंगा, हे ब्राह्मणश्रेष्ठ व्यास मुने! अब मैं अपना प्राण छोड दूंगा। (१–९)

महात्मा वेद जाननेवालोंमें श्रेष्ठ

प्रकीर्य केशान् सुशुभान् भूषणान्यवमुच्य च ।
एकवस्त्रधरा नार्यः परिपेतुरनाथवत् ॥ ९ ॥
श्वेतपर्वतरूपेभ्यो गृहेभ्यस्तास्त्वपाक्रमन् ।
गुहाभ्य इव शैलानां पृषत्यो हतयूथपाः ॥ १० ॥
तान्युदीर्णानि नारीणां तदा वृन्दान्यनेकशः ।
शोकार्तान्यब्रुवन् राजन्किंशारीणामिवाङ्गने ॥ ११ ॥
प्रगृह्य बाहून् क्रोशन्त्यः पुत्रान् भ्रातॄन्पितॄनपि ।
दर्शयन्तीव ता ह स्म युगान्ते लोकसंक्षयम् ॥ १२ ॥
विलपन्त्यो रुदन्त्यश्च धावमानास्ततस्ततः ।
शोकेनोपहतज्ञानाः कर्तव्यं न प्रजज्ञिरे ॥ १३ ॥
व्रीडां जग्मुः पुरा याः स्म सख्ीनामपि योषितः ।
ता एकवस्त्रा निर्लज्जाः श्वभ्रेणां पुरतोऽभवन् ॥ १४ ॥
परस्परं समुत्सृज्य शोकेष्वाश्वासयंस्तदा ।
ता शोकविह्वला राजन्नवैक्षन्त परस्परम् ॥ १५ ॥
ताभिः परिवृतो राजा रुदतीभिः सहस्रशः ।
निर्ययौ नगरादीनस्तृणमायोधनं प्रति ॥ १६ ॥

देखा था, वेही स्वामियोंके मरनेसे साधारण मनुष्यके आगे कुलस्त्रियां चलीं, स्त्रियोंने अपने बाल खोल दिये और कोई अपने गहने उतार उतार कर फेंकने लगीं, सब स्त्री एक एक धोती पहिनकर अनाथके समान घरसे निकलीं जैसे हाथियोंके न रहनेसे उनकी हथनी रोती हुई गुफाओंसे निकलती है, तैसे ही सब स्त्री मेरु पर्वतके शिखरके समान घरोंसे निकलीं। (१-९)

उस समय रोती हुई स्त्रियोंके झुंड चारों ओर नगरसे दौड़ते थे, कोई दूसरी का हाथ पकड़कर भाई, बेटे, पिता आदिको रोती थी। उस समय ऐसा पड़ता था कि जगतमें प्रलय होगा कोई रोती थी, कोई चिल्लाती थी, ज्ञानशून्य होकर इधर उधरको दौड़ती थी। उस समय उन्हें यह नहीं पड़ता था कि हमें क्या करना चाहिये जो स्त्री पहिले सखियोंसे भी लज्जा करती थी, सो निर्लज्ज होकर एक वस्त्र पहिनकर शत्रुओंके आगे घूमने लगी एक दूसरीको समझाने लगी एक दूसरीको दुःख देने लगी। (१०-१५)

राजा इन सहस्रों रोती हुई स्त्रियोंके झुंडमें होकर शोकसे व्याकुल हो

तेन शब्देन महता संहृष्टाश्चक्रुराहवम् ।
वीरा वीरैर्महाघोरं कलहान्तं तितीर्षवः ॥ १४ ॥
ज्यातलत्रधनुःशब्दः झुञ्झराणां च बृंहताम् ।
पादातानां च पततां नृणां नादो महानभूत् ॥ १५ ॥
तालशब्दांश्च विविधाञ्शूराणां चाभिगर्जताम् ।
श्रुत्वा तत्र भृशं त्रेसुः पेतुर्मम्लुश्च सैनिकाः ॥ १६ ॥
तेषां निनदतां चैव शस्त्रवर्षं च सृञ्चताम् ।
बहूनाधिरथिर्वीरः प्रममाथेषुभिः परान् ॥ १७ ॥
पञ्च पञ्चालवीराणां रथान्दश च पञ्च च ।
साश्वसूतध्वजान्कर्णः शरैर्निन्ये यमक्षयम् ॥ १८ ॥
योधमुख्या महावीर्याः पाण्डूनां कर्णमाहवे ।
शीघ्रास्त्रास्तूर्णमावृत्य परिवव्रुः समन्ततः ॥ १९ ॥
ततः कर्णो द्विषत्सेनां शरवर्षैर्विलोडयन् ।
विजगाहाण्डजाकीर्णां पद्मिनीमिव यूथपः ॥ २० ॥
द्विषन्मध्यमवस्कन्द्य राधेयो धनुरुत्तमम् ।
विधुन्वानः शितैर्बाणैः शिरांस्युन्मथ्य पातयत् ॥२१॥

शब्दसे भूमिको नादित करते हुए शत्रुओंकी ओर बढने लगे ॥ उस बडे शब्दसे प्रसन्न होकर कलहका अन्त करनेके लिये वीर लोग दूसरे वीरोंसे बडा घोर युद्ध करने लगे ॥ (११-१४)

उस युद्धमें डोरी, तलत्राण और धनुष्यका शब्द, तथा गर्जते हुए हाथी और गिरनेवाले पैदलोंका घोर शब्द होने लगा ॥ शूरवीरोंकी गर्जना और तालोंके शब्दको सुनकर कादर मरने और डरने लगे ॥ इस प्रकार गर्जते हुए और शस्त्रोंकी वर्षा करते हुए वीरोंको महारथ कर्ण अपने शस्त्रोंसे मारने लगे ॥ (१५-१७)

कर्णने अपने बाणोंसे पाञ्चाल देशके बीस महारथोंको अश्व,सारथी और ध्वजाओंके सहित मार कर यमपुरी में भेज दिया ॥ तब पाण्डवोंकी सेनाके प्रधान सेनापति शीघ्र शस्त्र चलाते हुए कर्णके चारों ओर आ घिरे । तब कर्णने अपने बाणोंसे उस सेनाको इस प्रकार मथा, जैसे मछलीसे भरे हुए तालाबको मतवाला यूथपति हाथी मथता है ॥ १८-२९

राधापुत्र कर्ण अपनी धनुषको घुमाते हुए युद्धमें घूमने लगे । अनेक शत्रुओंके शिरोंको काटकर पृथ्वीमें गिराते हुए

तथाश्वरथनागानां कृतं च कदनं महत्।
सर्वमाख्यातवान्वीरो वासुदेवः किरीटिने ॥ ६ ॥
एतच्छ्रुत्वा च दृष्ट्वा च भ्रातुर्घोरं महद्भयम्।
वाहयाश्वान्हृषीकेश क्षिप्रमित्याह पाण्डवः ॥ ७ ॥
ततः प्रायाद्धृषीकेशो रथेनाप्रतियोधिना।
दारुणश्च पुनस्तत्र प्रादुरासीत्समागमः ॥ ८ ॥
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः।
भीमसेनमुखाः पार्थाः सूतपुत्रमुखा वयम् ॥ ९ ॥
ततः प्रववृते भूयः संग्रामो राजसत्तम।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ १० ॥
धनूंषि बाणान्परिघानसिपट्टिशतोमरान्।
मुसलानि भुशुण्डीश्च सशक्त्यृष्टिपरश्वधान् ॥ ११ ॥
गदाः प्रासाञ्शितान्कुन्तान्भिन्दिपालान्महांकुशान्।
प्रगृह्य क्षिप्रमापेतुः परस्परजिघांसया ॥ १२ ॥
बाणज्यातलशब्देन द्यां दिशः प्रदिशो वियत्।
पृथिवीं नेमिघोषेण नादयन्तोऽभ्ययुः परान् ॥ १३ ॥

सेनाका नाश होनेके विना नहीं रहता, देखो अश्वत्थामाके सकल्प के अनुसार कर्णने सृञ्जय वीरोंका नाश किया है, तथा देखो कर्ण सहस्रों हाथी, घोडे और रथोंको नाश कर रहे हैं, इत्यादि सब श्रीकृष्णने अर्जुनसे कहा॥ (४-६)

श्रीकृष्णके ऐसे वचन सुन युद्धको देख और अपने भाईके दुःखको जानके अर्जुनने श्रीकृष्णसे कहा, हमारे घोडोंको शीघ्र चलाओ, अर्जुनके वचन सुन, श्रीकृष्णने बहुत वेगसे घोडोंको चलाया, तब दारुण युद्ध होने लगा॥ उसी समय भीमसेनको आगे करके युधिष्ठिर की सेना और कर्णको आगे करके हमारी सेना बेडर होकर युद्ध करने लगी, हे महाराज! अनन्तर यमराजकी पुरीको भरनेवाला कर्ण और पाण्डवोंका घोर युद्ध होने लगा॥ (७–१०)

योद्धा लोग धनुष, बाण, परिघ, खड्ग, पट्टिश, तोमर, मूसल, भुशुण्डी, शक्ति, कटार, फरश, गदा, भिन्दिपाल, प्रास, कुन्तल, और बडे अंकुश लेकर एक दूसरेको मारनेके लिये प्रहार करने लगे॥ वीरोंके धनुष, बाण और तालियोंके शब्दसे दिशा, कोने और आकाश पूरित होगए। तथा रथोंकी पहियोंके

सर्वमन्यत्परिक्षीणं सैन्यं ते भरतर्षभ ॥ ४ ॥
इत्येवमुक्त्वा राजानं कृपः शारद्वतस्ततः ।
गान्धारीं पुत्रशोकार्तामिदं वचनमब्रवीत् ॥ ५ ॥
अभीता युध्यमानास्ते घ्नन्तः शत्रुगणान्बहून् ।
वीरकर्माणि कुर्वाणाः पुत्रास्ते निधनं गताः ॥ ६ ॥
ध्रुवं संप्राप्य लोकांस्ते निर्मलान् शस्त्रनिर्जितान् ।
भास्वरं देहमास्थाय विहरन्त्यमरा इव ॥ ७ ॥
न हि कश्चिद्धि शूराणां युद्ध्यमानः पराङ्मुखः ।
शस्त्रेण निधनं प्राप्तो न च कश्चित्कृताञ्जलिः ॥ ८ ॥
एवं तां क्षत्रियस्याहुः पुराणाः परमां गतिम् ।
शस्त्रेण निधनं संख्ये तत्र शोचितुमर्हसि ॥ ९ ॥
न चापि शस्त्रवस्तेषामृद्ध्यन्ते राज्ञि पाण्डवाः ।
शृणु यत्कृतमस्माभिरश्वत्थामपुरोगमैः ॥ १० ॥
अधर्मेण हतं श्रुत्वा भीमसेनेन ते सुतम् ।
सुतं जिघिरमासाद्य पाण्डूनां कदनं कृतम् ॥ ११ ॥
पञ्चाला निहताः सर्वे धृष्टद्युम्नपुरोगमाः ।
द्रुपदस्यात्मजाश्चैव द्रौपदेयाश्च पातिताः ॥ १२ ॥

बचे हैं और आपकी सब सेना मर गई, राजा धृतराष्ट्रसे ऐसा कहकर पुत्रशोकसे व्याकुल गान्धारीसे कृपाचार्य ऐसे बोले। हे गान्धारी, तुम्हारे सब पुत्र निर्भय होकर शत्रुओंका नाश करके अपनी यश कीर्तिको जगत्में स्थापन करके युद्धमें मारे गये। (१-६)

अपने निर्मल देह धारण करके अपने पुण्योंके बलसे उत्तम लोकमें देवतोंके समान विहार करते हैं, इन वीरोंमें कोई न था, जो युद्धसे फिरा हो। सब अधर्मसे मारे गये; किन्तु शत्रुओंके आगे हाथ नहीं जोड़े अर्थात् कोई होकर नहीं मरा, उन महात्माने योंके लिये यही गति कही है, मरना ही परम गति है, इसलिये इनका शोच मत करो। (७-९)

हे गान्धारी, तुम्हारे पुत्रोंके शत्रु पा की भी वृद्धि नहीं होगी; देखो व्यासकी सहायतासे हम लोगोंने वृत्त किया है सो सुनो; जब हम ने सुना कि तुम्हारे पुत्र राजा वनको भीमसेनने अधर्मसे मा हम लोगोंने छावनीमें जाकर सबको

जगाम हास्तिनपुरं कृपः शारद्वतस्तदा ।
स्वमेव राष्ट्रं हार्दिक्यो द्रौणिर्व्यासाश्रमं ययौ॥ २१ ॥
एवं ते प्रययुर्वीरा वीक्षमाणाः परस्परम् ।
भयार्ताः पाण्डुपुत्राणामागस्कृत्वा महात्मनाम् ॥२२॥
समेत्य वीरा राजानं तदा त्वनुदिते रवौ ।
विप्रजग्मुर्महात्मानो यथेच्छकमरिन्दमाः ॥ २३ ॥
समासाद्याथ वै द्रौणिं पाण्डुपुत्रा महारथाः ।
व्यजयंस्ते रणे राजन् विक्रम्य तदनन्तरम् ॥ २४ ॥ [३०८]

इति श्रीमद्भारते जनमेजयस्य सहितायां वैशम्पायनीयायां गोपथेनि जलप्रदानिकपर्वणि
कृपप्रस्थानभोजदर्शने एकादशोऽध्याय ॥ ११ ॥

जनमेजय उवाच-हतेषु सर्वसैन्येषु धर्मराजो युधिष्ठिरः ।
शुश्रुवे पितरं वृद्धं निर्यान्तं गजसाह्वयात् ॥ १ ॥
सोऽभ्ययात्पुत्रशोकार्तः पुत्रशोकपरिप्लुतम् ।
शोचमानं महाराज भ्रातृभिः सहितस्तदा ॥ २ ॥
अन्वीयमानो वीरेण द्वारकेण महात्मना ।
युयुधानेन च तथा तथैव च युयुत्सुना ॥ ३ ॥

उधर और घबड़ाकर एक दूसरेसे सम्मती करने लगे फिर तीनों एक दूसरेसे पूछकर तीन ओरको चले गये, कृपाचार्य हस्तिनापुरको, हृदीकपुत्र कृतवर्मा अपने देश अर्थात् द्वारकाको और द्रोणाचार्यके पुत्र अश्वत्थामा व्यासमुनिके आश्रमको चले गये, इस प्रकार ये तीनों वीर महात्मा पाण्डवोंके डरसे व्याकुल होकर एक दूसरेकी ओर देखते हुए तीन ओरको चले गये, जिस समय ये तीनों वीर राजा धृतराष्ट्रसे मिले थे, उस समय सूर्य अस्त होना चाहते थे। जब अश्वत्थामा व्यासमुनिके आश्रम पर पहुंचे तब ही महारथ पाण्डवोंने अपने बलसे उनको जीत लिया।

इति श्रीमहाभारतमें ग्यारह अध्याय समाप्त। [३०८]

ग्यारहवां अध्याय।

वैशम्पायन मुनि बोले, हे राजन् जनमेजय! जब सब सेना मारी गई तब अश्वत्थामाको जीतके युधिष्ठिरने सुना कि हमारे वृद्ध पिता हस्तिनापुरसे चले जाते हैं, तब पुत्र शोकसे व्याकुल राजा युधिष्ठिर, पुत्र शोकसे व्याकुल राजा धृतराष्ट्रके पास चले, उनके सब महारथी भाई भी युयुत्सु और सात्यकि आदि युयुधान भी थे, उनके बीच

जगाम हास्तिनपुरं कृपः शारद्वतस्तदा ।
स्वमेव राष्ट्रं हार्दिक्यो द्रौणिर्ग्यासाश्रमं ययौ॥ २१ ॥
एवं ते प्रययुर्वीरा वीक्षमाणाः परस्परम् ।
भयार्ताः पाण्डुपुत्राणामागस्कृत्वा महात्मनाम् ॥२२॥
समेत्य वीरा राजानं तदा त्वनुदिते रवौ ।
विप्रजग्मुर्महात्मानो यथेष्टक्रममरिन्दमाः ॥ २३ ॥
समाख्याय वै द्रौणिं पाण्डुपुत्रा महारथाः ।
न्यजयंस्ते रणे राजन् विक्रम्य तदनन्तरम् ॥ २४ ॥ [३०८]

इति श्री महाभारते आदिपर्वणि सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

कृष्णद्वैपायनोऽध्यायः ॥ ११८ ॥

वैशम्पायन उवाच-हतेषु सर्वशस्त्रेषु धर्मराजो युधिष्ठिरः ।
शुश्रुवे पितरं शुद्धं निर्याप्तं भ्रातृभिः सह ॥ १ ॥
सोऽभ्यगात्पुत्रशोकार्तः पुत्रशोकपरिप्लुतम् ।
शोच्यमानं महाराज भ्रातृभिः सहितस्तदा ॥ २ ॥
अभ्यागमानो वीरेण द्वैपायनेन महात्मना ।
युयुधानेन च तथा तथैव च युयुत्सुना ॥ ३ ॥

तुरंत और चढ़ाई करके दूसरेसे लड़ने लगे कि इनमें एक दूसरेसे दुगुना बल पैदा हो गया, कृपाचार्य हस्तिनापुरको, हार्दिक्य कृतवर्मा अपने देश अर्थात् द्वारकाको और द्रोणाचार्यके पुत्र अश्वत्थामा व्यासके आश्रमको चले गये, इस प्रकार ये सबके सब वीर अत्यन्त दयालु होकर एक दूसरेको देखते हुए दीन होकर के चले गये, तब हे राजन् ! वे महात्मा पाण्डव दोनों ओर दो दो सेनाओंके बीचमें धर्मराज युधिष्ठिर, पुत्रके शोकसे दुःखी पिता शुद्धोदनके निकट गये, उस समय भाइयोंसहित वे शोकसे व्याकुल हो रहे थे। उस समय महात्मा वीर द्वैपायन व्यास, युयुधान और युयुत्सु भी वहां गये, इसके पीछे

तब ही महाराज पाण्डवोंने अपने बलसे उनको जीत लिया।

इति श्री महाभारत आदिपर्वमें सत्रहवां अध्याय समाप्त। [३०८]

कृष्णद्वैपायन अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय! जब पिता पांडु पांडवोंको और अश्वत्थामाको और पुत्रके शोकसे युधिष्ठिरने सुना कि हमारे पिता हस्तिनापुरसे वनको आये हैं, तब युधिष्ठिर, पुत्रके शोकसे व्याकुल हो रहे थे, इसलिये वह भाइयोंसहित उनके पास गये, उस समय महात्मा वीर द्वैपायन व्यास और युयुधान और युयुत्सु भी वहां गये, इसके पीछे

निहताः सहिताश्चान्यैस्तच्च नास्त्यप्रियं मम ॥ १८ ॥
किं तु कर्माकरोद्भीमो वासुदेवस्य पश्यतः ।
दुर्योधनं समाहूय गदायुद्धे महामनाः ॥ १९ ॥
शिक्षयाऽभ्यधिकं ज्ञात्वा चरन्तं बहुधा रणे ।
अधो नाभ्याः प्रहृतवांस्तन्मे कोपमवर्धयत् ॥ २० ॥
कथं नु धर्मं धर्मज्ञैः समुद्दिष्टं महात्मभिः ।
त्यजेयुराहवे शूराः प्राणहेतोः कथञ्चन ॥ २१ ॥ [३७६]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां स्त्रीपर्वणि जलप्रदानिकपर्वणि गान्धारीसान्त्वनायां चतुर्दशोऽध्यायः ॥ १४ ॥

वैशम्पायन उवाच–तच्छ्रुत्वा वचनं तस्या भीमसेनोऽथ भीतवत् ।
गान्धारीं प्रत्युवाचेदं वचः सानुनयं तदा ॥ १ ॥
अधर्मो यदि वा धर्मस्त्रासात्तत्र मया कृतः ।
आत्मानं त्रातुकामेन तन्मे त्वं क्षन्तुमर्हसि ॥ २ ॥
न हि युद्धेन पुत्रस्ते धर्म्येण स महाबलः ।
न शक्यः केनचिद्धन्तुमतो विषममाचरम् ॥ ३ ॥
अधर्मेण जितः पूर्वं तेन चापि युधिष्ठिरः ।
निकृताश्च सदैव स्म ततो विषममाचरम् ॥ ४ ॥

सेनने दुर्योधनको गदायुद्धमें बुलाकर अनेक प्रकारसे युद्ध करते और अपनेसे अधिक विद्वान देख के उनकी नाभी के नीचे गदा मारी और श्रीकृष्ण भी उस अधर्मको देखते रहे, इसहीको स्मरण करके मुझे बहुत क्रोध आता है और यह भी शोच आता है, कि महात्मा धर्म जाननेवाले शूरवीर केवल प्राणके भयमे धर्मको कैसे छोड देते हैं।(१४ २१)

स्त्रीपर्वमें चौदह अध्याय समाप्त । [३७६]

स्त्रीपर्वमें पदरह अध्याय ।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय ! गान्धारीके ऐसे वचन सुनकर डरते हुए भीमसेन उनके पास गये और कहने लगे कि मैंने यह कर्म चाहे धर्मसे किया, चाहे अधर्मसे किया, केवल दुर्योधनके डरसे अपनी रक्षा करनेके लिये ऐसा किया है; सो तुम क्षमा करो । दुर्योधन महाबलवान था, उसे युद्धमें धर्मसे कोई नहीं जीत सक्ता था, इस ही लिये यह अधर्म मैंने किया दुर्योधनने पहिले महाराज युधिष्ठिरको अधर्महीसे जीता था, और हम लोगोंको अनेक दुःख दिये थे, इसी लिये मैंने

खड्गैश्च विविधैस्तीक्ष्णैः सशरैश्च शरासनैः ॥ २३ ॥
क्रव्यादसङ्घैर्मुदितैस्तिष्ठद्भिः सहितैः क्वचित्।
क्वचिदाक्रीडमानैश्च शयानैश्चापरैः क्वचित् ॥ २४ ॥
एतदेवंविधं वीर सम्पश्यायोधनं विभो।
पश्यमाना हि दह्यामि शोकेनाहं जनार्दन ॥ २५ ॥
पञ्चालानां कुरूणां च विनाशे मधुसूदन।
पञ्चानामपि भूतानामहं वधमचिन्तयम् ॥ २६ ॥
तान्सुपर्णाश्च गृध्राश्च कर्षयंत्यसृगुक्षिताः।
विगृह्य चरणैर्गृध्रा भक्षयन्ति सहस्रशः ॥ २७ ॥
जयद्रथस्य कर्णस्य तथैव द्रोणभीष्मयोः।
अभिमन्योर्विनाशं च काश्चिन्तयितुमर्हति ॥ २८ ॥
अवध्यकल्पान्निहतान् गतसत्वानचेतसः।
गृध्रकङ्कवटश्येनश्वसृगालादनीकृतान् ॥ २९ ॥
अमर्षवशमापन्नान् दुर्योधनवशे स्थितान्।
पश्येमान्पुरुषव्याघ्रान् संशान्तान्पावकानिव ॥ ३० ॥
शयाना ये पुरा सर्वे मृदूनि शयनानि च।

के हाथमें टूटे हुये सांगी, परिघ, खड्ग अनेक प्रकारके बाणवान धनुष पड़े हैं। (२२—२३)

कहीं मांस खानेवाले पक्षी प्रसन्न होकर बैठे हैं, कहीं खेल रहे हैं और कहीं सुखसे सो रहे हैं। हे वीर! हे भगवन्! हे जनार्दन! उनको देखकर मेरा हृदय शोकसे जला जाता है। इस पाञ्चाल और कुरुकुलके नाशसे हमें ऐसा जान पड़ता है, कि सब जगत्का नाश हो गया। देखो इन वीरोंके शरीरमें कहीं तो गीधोंको महलों गिद्ध आदि पक्षी खा रहे हैं, कहीं कोई गिद्ध किसी वीरका पेट खींचे लिये जाते हैं।(२४—२७)

जयद्रथ, कर्ण, भीष्म और अभिमन्यु आदि वीरोंके मृत्यु देखकर किसे शोक न होगा। जिनको कोई नहीं मार सक्ता था, आज उनको चैतन्यरहित निरगकर, मनुष्यके समान मरा हुआ देखकर कौवे, सियार और गिद्ध खा रहे हैं। ये सब वीर क्रोधके वशमें होकर दुर्योधनकी आज्ञासे युद्धमें मारे गये, ये पूर्णमासीके चन्द्रमाके समान मुखवाले वीर इस समय जलती हुई अग्निके समान पृथ्वीमें पड़े हैं। (२८—३०)

जो पहले कोमल बिछौनोंपर सोते

विपन्नास्तेऽद्य वसुधां विवृतामधिशेरते ॥ ३१ ॥
बन्दिभिः सततं काले स्तुवद्भिरभिनन्दिताः ।
शिवानामशिवा घोराः शृण्वन्ति विविधा गिरः॥३२॥
ये पुरा शेरते वीराः शयनेषु यशस्विनः ।
चन्दनागुरुदिग्धाङ्गास्तेऽद्य पांसुषु शेरते ॥ ३३ ॥
तेषामाभरणान्येते गृध्रगोमायुवायसाः ।
आक्षिपन्ति शिवा घोराः विनदंत्यः पुनः पुनः ॥३४॥
बाणान्विनिशितान्पीतान्निस्त्रिंशान् विमला गदाः ।
युद्धाभिमानिनः सर्वे जीवन्त इव बिभ्रति ॥ ३५ ॥
सुरूपवर्णा बहवः क्रव्यादैरवघट्टिताः ।
ऋषभप्रतिरूपाश्च शेरते हरितस्रजः ॥ ३६ ॥
अपरे पुनरालिङ्ग्य गदाः परिघबाहवः ।
शेरतेऽभिमुखाः शूरा दयिता इव योषितः ॥ ३७ ॥
विभ्रतः कवचान्यन्ये विमलान्यायुधानि च ।
न धर्षयन्ति क्रव्यादा जीवन्तीति जनार्दन ॥ ३८ ॥
क्रव्यादैः कृष्यमाणानामपरेषां महात्मनाम् ।
शातकौम्भ्यः स्रजश्चित्रा विप्रकीर्णाः समन्ततः ॥३९॥

थे सो आज पृथ्वीमें मुह फैलाये पडे हैं, पहिले जो सदा भाटोंके मुखसे स्तुति सुनकर प्रसन्न होते थे, वे आज अनेक प्रकारके भयानक सियारियोंके शब्द सुन रहे है । जो पहिले यशस्वी वीर शरीरमें चन्दन और अगर लगाकर पलङ्गपर सोते थे, सो आज धूलमें लोटते पृथ्वीमें पडे हैं। उनके भूषणोंको घोर शब्द करते युद्धमें सियार और कौवे इधर उधर खींच रहे हैं, ये अभिमानी वीर अब तक भी तेजवान खड्ग और निर्मल गदा इस प्रकार ले रहे हैं जैसे जीते हुए लिये रहते थे, अनेक सुन्दर वीरोंके हाथोंको मांस खानेवाले जन्तु इधर उधर लिये घूमते हैं, इस समय भी उनका तेज सूर्यके समान दिखाता है, कोई परिघके समान सुन्दर हाथवाले वीर गदाको छातीसे लगाये युद्धकी ओर मुख किये इस प्रकार सोते हैं, जैसे अपनी प्यारी स्त्रीके सङ्ग सोते थे । किसी वीर को कवच, विमल शस्त्र धारण किये देख और उन्हें जीता जान कोई मांस खानेवाला जन्तु उनके पास नहीं जाने सक्ता । किसी किसी महात्मा

एते गोमायवो भीमा निहतानां यशस्विनाम् ।
कण्ठान्तरगतान्हारानाक्षिपन्ति सहस्रशः ॥ ४० ॥
सर्वेष्वपररात्रेषु या ननन्दन्त बन्दिनः ।
स्तुतिभिश्च पराघ्र्याभिरुपचारैश्च शिक्षिताः ॥ ४१ ॥
तानिमाः परिदेवन्ति दुःखार्ताः परमाङ्गनाः ।
कृपणं वृष्णिशार्दूल दुःखशोकार्दिता भृशम् ॥ ४२ ॥
रक्तोत्पलवनानीव विभान्ति रुचिराणि च ।
मुखानि परमस्त्रीणां परिशुष्काणि केशव ॥ ४३ ॥
रुदिताद्विरता श्वेता ध्यायंत्यः सपरिच्छदाः ।
कुरुस्त्रियोऽभिगच्छन्ति तेन तेनैव दुःखिताः ॥ ४४ ॥
एतान्यादित्यवर्णानि तपनीयनिभानि च ।
रोपरोदनताम्राणि वक्त्राणि कुरुयोषिताम् ॥ ४५ ॥
श्यामानां वरवर्णानां गौरीणामेकवाससाम् ।
दुर्योधनवरस्त्रीणां पश्य वृन्दानि केशव ॥ ४६ ॥
आसामपरिपूर्णार्थं निशम्य परिदेवितम् ।
इतरेतरसंक्रन्दान्न विजानन्ति योषितः ॥ ४७ ॥

वीरको मांसभक्षी वीर खिंच रहे हैं और उनकी मोतीकी माला इधर उधर फैली जाती है। ये देखो, ये भयानक सियार महात्मा वीरोंके गलेसे हार निकालकर इधर उधर खींचे फिरते हैं। (३९-४०)

कोमल मुख इस समय लाल कमलके समान दीखते हैं, ये कुरुकुलकी स्त्री रोना बन्द करके अपने अपने पतियोंके पास बैठी हैं, ये दुःख और शोकसे व्याकुल कौरवोंकी स्त्रियोंके मुख प्रातःकालके सूर्यसे सोना और तांबेके

तेन शब्देन महता संहृष्टाश्चक्रुराहवम् ।
वीरा वीरैर्महाघोरं कलहान्तं तितीर्षवः ॥ १४ ॥
ज्यातलत्रधनुःशब्दः झुञ्झराणां च बृंहताम् ।
पादातानां च पततां नृणां नादो महानभूत् ॥ १५ ॥
तालशब्दांश्च विविधाञ्शूराणां चाभिगर्जताम् ।
श्रुत्वा तत्र भृशं त्रेसुः पेतुर्मम्लुश्च सैनिकाः ॥ १६ ॥
तेषां निनदतां चैव शस्त्रवर्षं च सृञ्चताम् ।
बहूनाधिरथिर्वीरः प्रममाथेषुभिः परान् ॥ १७ ॥
पञ्च पञ्चालवीराणां रथान्दश च पञ्च च ।
साश्वसूतध्वजान्कर्णः शरैर्निन्ये यमक्षयम् ॥ १८ ॥
योधमुख्या महावीर्याः पाण्डूनां कर्णमाहवे ।
क्षिप्रास्त्रास्तूर्णमावृत्य परिवव्रुः समन्ततः ॥ १९ ॥
ततः कर्णो द्विषत्सेनां शरवर्षैर्विलोडयन् ।
विजगाहाण्डजाकीर्णां पद्मिनीमिव यूथपः ॥ २० ॥
द्विषन्मध्यमवस्कन्द्य राधेयो धनुरुत्तमम् ।
विधुन्वानः शितैर्बाणैः शिरांस्युन्मथ्य पातयत् ॥२१॥

शब्दसे भूमिको नादित करते हुए शत्रुओंकी ओर बढने लगे ॥ उस बडे शब्दसे प्रसन्न होकर कलहका अन्त करनेके लिये वीर लोग दूसरे वीरोंसे बडा घोर युद्ध करने लगे ॥ (११-१४)

उस युद्धमें डोरी, तलत्राण और धनुष्यका शब्द, तथा गर्जते हुए हाथी और गिरनेवाले पैदलोंका घोर शब्द होने लगा ॥ शूरवीरोंकी गर्जना और तालोंके शब्दको सुनकर कादर मरने और डरने लगे ॥ इस प्रकार गर्जते हुए और शस्त्रोंकी वर्षा करते हुए वीरोंको महारथ कर्ण अपने शस्त्रोंसे मारने लगे ॥ (१५-१७)

कर्णने अपने बाणोंसे पाञ्चाल देशके बीस महारथोंको अश्व,सारथी और ध्वजाओंके सहित मार कर यमपुरी में भेज दिया ॥ तब पाण्डवोंकी सेनाके प्रधान सेनापति शीघ्र शस्त्र चलाते हुए कर्णके चारों ओर आ घिरे । तब कर्णने अपने बाणोंसे उस सेनाको इस प्रकार मथा, जैसे मछलीसे भरे हुए तालाबको मतवाला यूथपति हाथी मथता है ॥ १८-२९

राधापुत्र कर्ण अपनी धनुषको घुमाते हुए युद्धमें घूमने लगे । अनेक शत्रुओंके शिरोंको काटकर पृथ्वीमें गिराते हुए

चर्मवर्माणि संछिन्नान्यपतन्भुवि देहिनाम् ।
विषेहुर्नास्य संस्पर्शं द्वितीयस्य पतत्त्रिणः ॥ २२ ॥
वर्मदेहासुमथनैर्धनुषः प्रच्युतैः शरैः ।
सौर्य्या तलत्रे न्यहनत्कशया वाजिनो यथा ॥ २३ ॥
पाण्डुसृञ्जयपञ्चालाञ्शरगोचरमागतान् ।
समर्द तरसा कर्णः सिंहो मृगगणानिव ॥ २४ ॥
ततः पाञ्चालराजश्च द्रौपदेयाश्च मारिष ।
यमौ च युयुधानश्च सहिताः कर्णमभ्ययुः ॥ २५ ॥
तेषु व्यायच्छमानेषु कुरुपञ्चालपाण्डुषु ।
प्रियानसून्रणे त्यक्त्वा योधा जघ्नुः परस्परम् ॥ २६ ॥
सुसन्नद्धाः कवचिनः सशिरस्त्राणभूषणाः ।
गदाभिर्मुसलैश्चान्ये परिघैश्च महाबलाः ॥ २७ ॥
समभ्यधावन्त भृशं कालदण्डैरिवोद्यतैः ।
नर्दन्तश्चाह्वयन्तश्च प्रवल्गन्तश्च मारिष ॥ २८ ॥
ततो निजघ्नुरन्योन्यं पेतुश्चान्योन्यताडिताः ।
वमन्तो रुधिरं गात्रैर्विमस्तिष्केक्षणायुधाः ॥ २९ ॥

वीरोंकी ढाल और कवच कटकर पृथ्वी में गिर गये। वह सेना सूर्यके समान तेजस्वी कर्णके बाणोंको न सह सकी॥ कर्णने अपने बाणोंसे इस प्रकार सेनाके वीरोंको मारा जैसे सारथी घोडोंको कोडे मारता है। पाञ्चाल, सृञ्जय और जो पाण्डवोंकी सेनाका वीर कर्णके बाणोंके आगे आया वही सिंहके आगे आये हुए मृगके समान मर गया॥ (२१–२४)

तब कर्णसे युद्ध करनेके लिये पाञ्चालराज, द्रौपदीके पांच पुत्र, नकुल, सहदेव और युयुधान आये इस प्रकारसे कुरु पंचाल और पाण्डवोंके योद्धा यत्न करते थे, तब उनसे युद्ध करनेके लिए प्यारे प्राणोंका मोह छोड कर अनेक योद्धा आये और प्रहार करने लगे। महाबलवान् क्षत्री लोग कवच, शिरस्त्राण, भूषण, गदा, मुसल तथा परिघ आदि लेकर युद्ध करनेको आए; वीर लोग यमराजके दण्डके समान शस्त्र लिये, नाचते, कूदते, पुकारते और गर्जते हुए युद्ध करनेको आए॥ (२५–२८)

एक दूसरेको मारने लगा, कोई मर कर गिरने लगा। किसीके शरीरसे रुधिर बहने लगा, किसीका शिर फटगया। किसीकी आखें और शस्त्र निकलपडीं, किसी

एता दीर्घमिवोच्छ्वस्य विक्रुश्य च विलप्य च ।
विरपन्द्यमाना दुःखेन वीरा जहति जीवितम् ॥ ४८ ॥
बह्व्यो दृष्ट्वा शरीराणि क्रोशन्ति विलपन्ति च ।
पाणिभिश्चापरा घ्नन्ति शिरांसि मृदुपाणयः ॥ ४९ ॥
शिरोभिः पतितैर्हस्तैः सर्वांगैर्यूथशः कृतैः ।
इतरेतरसम्पृक्तैराकीर्णा भाति मेदिनी ॥ ५० ॥
विशिरस्कानधो कायान् दृष्ट्वा स्वेताननिन्दितान् ।
मुह्यन्त्यनुगता नार्यो विदेहानि शिरांसि च ॥ ५१ ॥
शिरः कायेन सन्धाय प्रेक्षमाणा विचेतसः ।
अपश्यन्त्यो परं तत्र नेदमस्येति दुःखिताः ॥ ५२ ॥
बाहूरुचरणानन्यान् विशिखोन्मथितान्पृथक् ।
सन्दधत्योऽसुखाविष्टा मूर्छन्त्येताः पुनः पुनः ॥ ५३ ॥
उत्कृत्य शिरसश्चान्यान्विजघ्नान्मृगपक्षिभिः ।
दृष्ट्वा काश्चिन्न जानन्ति भर्तॄन् भरत योषितः ॥ ५४ ॥
पाणिभिश्चापरा घ्नन्ति शिरांसि मधुसूदन ।
प्रेक्ष्य भ्रातॄन्पितॄन्पुत्रान्पतींश्च निहतान्परैः ॥ ५५ ॥
बाहुभिश्च सखड्गैश्च शिरोभिश्च सकुण्डलैः ।

तक रोकर ऊंचे सांस लेकर और दुःख-से व्याकुल होकर इस प्रकार पृथ्वीमें पडी है, मानों अभी मर जायगी। (४६-४८)

कोई अपने पतियोंका शरीर देखकर रोति है, कोई कोमल हाथोंसे शिर पीट रही है। इस समय यह युद्धभूमि कटे हुए शिर, हाथ और शरीरोंसे पूर्ण दीखती है। ये देखो ये स्त्री शरीररहित शिर और शिररहित शरीरोंको देखकर मूर्च्छित हो रहीं है। कहीं कोई स्त्री दुःखसे व्याकुल होकर शरीरमें शिर लगाकर देखती है और कहती है कि यह शिर इनका नहीं है। कोई बाणोंसे कटे हुवे हाथ, पैर और जांघ मिलाकर दुःखसे व्याकुल होरहीं हैं। कोई कुरु-कुलकी स्त्री स्यार और पक्षियोंसे खाये हुवे शिर हाथमें लेकर अपने पतियोंको नहीं पहिचानती। (४९-५४)

हे मधुसूदन! कोई शत्रुओंके हाथसे मरे भाई, पुत्र और पतियोंको पृथ्वीमें पडा देख हाथोंसे शिर पीट रही है। इस समय यह रुधिर और मांसके कीचड से भरी, कटे हुवे खड्गके सहित, हाथ और कुण्डल सहित शिरोंसे ऐसी

गदया भीमसेनेन पश्य माधव मे सुतम् ।
द्यूतक्लेशाननुस्मृत्य द्रौपदीनोदितेन च ॥ २० ॥
उक्ता ह्यनेन पाञ्चाली सभायां द्यूतनिर्जिता ।
प्रियं चिकीर्षता भ्रातुः कर्णस्य च जनार्दन ॥ २१ ॥
सहैव सहदेवेन नकुलेनार्जुनेन च ।
दासीभूताऽसि पाञ्चालि क्षिप्रं प्रविश नो गृहान् ॥ २२ ॥
ततोऽहमब्रुवं कृष्ण तदा दुर्योधनं नृपम् ।
मृत्युपाशपरिक्षिप्तं शकुनिं पुत्र वर्जय ॥ २३ ॥
निबोधनं सुदुर्बुद्धिं मातुलं कलहप्रियम् ।
क्षिप्रमेनं परित्यज्य पुत्र शाम्यस्व पाण्डवैः ॥ २४ ॥
न बुद्ध्यसे त्वं दुर्बुद्धे भीमसेनममर्षणम् ।
वाङ्नाराचैस्तुदंस्तीक्ष्णैरुल्काभिरिव कुञ्जरम् ॥ २५ ॥
तानेवं रहसि क्रुद्धो वाक्शल्यानवधारयन् ।
उत्ससर्ज विषं तेषु सर्पो गोवृषभेष्विव ॥ २६ ॥
एष दुःशासनः शेते विक्षिप्य विपुलौ भुजौ ।
निहतो भीमसेनेन सिंहेनेव महागजः ॥ २७ ॥

इनके सब शरीरका रुधिर पी लिया, भीमसेनने इसे जूवेमें जीती हुई द्रौपदी के वचनसे मार डाला । (१५–२०)

सञ्जय बोले, हे राजा धृतराष्ट्र ! तब वे तीनों वीर दुर्योधनके पासमे दक्षिणकी ओरको चले, फिर सन्ध्याके समय हेरोंके पास आकर श्रमसे व्याकुल होके, फिर रथोंसे घोडे छोडकर छिपकर हेरोंके पास बैठे, उस समय ये तीनों वीर बाणोंके घावोंसे व्याकुल थे, घोडे थक गये, प्यासके मारे मुख सूख रहे थे, राजाके मरनेसे क्रोध और शोकसे व्याकुल थे, तब घोडे सम्भ तक वहां बैठे । (१-३)

उनको पाण्डवोंकी सेनाका भयानक

केचिन्नागशतप्राणाः केचित्सर्वास्त्रकोविदाः ।
निहताः पाण्डवेयैस्ते मन्ये कालस्य पर्ययम् ॥ ६७ ॥
एवमेतेन भाव्यं हि नूनं कार्येण तत्वतः ।
यथा ह्यस्येदृशी निष्ठा कृतकार्येऽपि दुष्करे ॥ ६८ ॥
भवतोऽस्तु यदि प्रज्ञा न मोहादपनीयते ।
व्यापन्नेऽस्मिन्महत्यर्थे यन्नः श्रेयस्तदुच्यताम् ॥ ६९ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिके पर्वणि द्रौणिमन्त्रणायां प्रथमोऽध्याय ॥ १ ॥

कृप उवाच— श्रुतं ते वचनं सर्वं यद्यदुक्तं त्वया विभो ।
ममापि तु वचः किंचिच्छृणुष्वाद्य महाभुज ॥ १ ॥
आयद्धा मानुषाः सर्वे निबद्धाः कर्मणोर्द्वयोः ।
दैवे पुरुषकारे च परं तास्यां न विद्यते ॥ २ ॥
न हि दैवेन सिध्यंति कार्याण्येकेन सत्तम ।
न चापि कर्मणैकेन द्वाभ्यां सिद्धिस्तु योगतः ॥ ३ ॥
ताभ्यामुभाभ्यां सर्वार्था निबद्धा अधमोत्तमाः ।
प्रवृत्ताश्चैव दृश्यन्ते निवृत्ताश्चैव सर्वशः ॥ ४ ॥

ही बचे हैं, जो वीर मारे गये उनमेंसे किसीको सौ हाथीका बल था, और कोई सब शस्त्र विद्याके जाननेवाले थे, देखो समय बडा कठिन है । कोई यह नहीं जानता था; कि इस कामका यह फल होगा, निश्चय ही कर्मोकी गति बहुत कठिन है. आप इस आपत्तिके समयमें क्या करना चाहिये, और क्या करनेसे हमारा कल्याण होगा सो कहिये ? (६६–६९)

[illegible]

हमने सब सुना, अब कुछ हमारे भी वचन सुनो, हे महाबाहो ! सब मनुष्य प्रारब्ध और उद्योगमें बन्धे हैं, केवल प्रारब्धहीसे सब काम सिद्ध नहीं होते, और केवल उद्योगहीसे सब काम सिद्ध नहीं होते, अर्थात् प्रारब्ध और उद्योग इन दोनों ही से काम सिद्ध होते हैं. जगत्में तीन प्रकारके काम होते हैं. एक उत्तम, दूसरा मध्यम, और तीसरा अधम और तीनों ही काम बिना प्रारब्ध सिद्ध नहीं होते । कहीं जो एक काम यत्नसे सिद्ध होता है, और कहीं वही काम उस ही यत्नसे नष्ट होता दीखता है देखो

श्रुत्वा च निनदं घोरं पाण्डवानां जयैषिणाम् ॥ ४ ॥
अनुसारभयाद्भीताः प्राङ्मुखाः प्राद्रवन्पुनः ।
ते मुहूर्त्तात्ततो गत्वा श्रान्तवाहाः पिपासिताः ॥ ५ ॥
नामृष्यन्त महेष्वासाः क्रोधामर्षवशं गताः ।
राज्ञो वधेन सन्तप्ता मुहूर्त्तं समवस्थिताः ॥ ६ ॥

धृतराष्ट्र उवाच—अश्रद्धेयमिदं कर्म कृतं भीमेन सञ्जय ।
यत्समनागायुतप्राणः पुत्रो मम निपातितः ॥ ७ ॥
अवध्यः सर्वभूतानां वज्रसंहननो युवा ।
पाण्डवैः समरे पुत्रो निहतो मम सञ्जय ॥ ८ ॥
न ह्यिष्टमभ्यतिक्रान्तं शक्यं गावल्गणे नरैः ।
यत्समेत्य रणे पार्थैः पुत्रो मम निपातितः ॥ ९ ॥
अद्रिसारमयं नूनं हृदयं मम सञ्जय ।
हतं पुत्रशतं श्रुत्वा यन्न दीर्णं सहस्रधा ॥ १० ॥
कथं हि वृद्धमिथुनं हतपुत्रं भविष्यति ।
न त्वहं पाण्डवेयस्य विषये वस्तुमुत्सहे ॥ ११ ॥
कथं राज्ञः पिता भूत्वा स्वयं राजा च सञ्जय ।

चेष्टामकुर्वन् लभते यदि किंचिद्यदृच्छया ।
यो वा न लभते कृत्वा दुर्दशौ तावुभावपि ॥ १४ ॥
शक्नोति जीवितुं दक्षो नालसः सुखमेधते ।
दृश्यंते जीवलोकेऽस्मिन्दक्षाः प्रायो हितैषिणः ॥१५॥
यदि दक्षः समारंभात् कर्मणो नाश्नुते फलम् ।
नास्य वाच्यं भवेत्किंचिल्लब्धव्यं वाऽधिगच्छति ॥१६॥
अकृत्वा कर्म यो लोके फलं विंदति धिष्ठितः ।
स तु वक्तव्यतां याति द्वेष्यो भवति भूयशः ॥ १७॥
एवमेतदनादृत्य वर्तते यस्त्वतोऽन्यथा ।
स करोत्यात्मनोनर्थानेष बुद्धिमतां नयः ॥ १८ ॥
हीनं पुरुषकारेण यदि दैवेन वा पुनः ।
कारणाभ्यामथैताभ्यामुत्थानमफलं भवेत् ॥ १९ ॥
हीनं पुरुषकारेण कर्म त्विह न सिध्यति ।
दैवतेभ्यो नमस्कृत्य यस्त्वर्थान्समवगाहते ॥ २० ॥
दक्षो दाक्षिण्यसंपन्नो न स मोघैर्विहन्यते ।

किये प्रारब्धसे कुछ फल प्राप्त करे और जो परिश्रम करनेपर भी फल न पावे, तो इन दोनोंकी निन्दा करनी चाहिये । (८-१४)

उद्योगी जगत्में सुखसे जीता है, और आलसीको सुख नहीं होता, क्यों कि जगत्में प्रायः उद्योगी ही सुखी दीखते हैं, यदि परिश्रमी परिश्रम करनेपर भी कुछ फल न पावे, तो उसे पछताना नहीं पडता. अथवा परिश्रमका फल ही होजाता है. जो आलसी बिना कर्म किये फल पाते हैं, लोग उनके विषयमें अनेक प्रकारकी बात कहते हैं. और बहुत मनुष्य उनसे द्वेष भी करते हैं । (१५-१७)

इसलिये बुद्धिमानोंने यह निश्चय किया है, कि इन दोनों विषयोंको छोडकर जो भिन्न प्रकार कार्य करता है, वह अपने लिये अनर्थ बनाता है । यदि मनुष्य केवल प्रारब्ध या कर्महीको छोडकर कोई कर्मकी सिद्धि करना चाहे तो सिद्धी नहीं होती. अर्थात दोनोंहीसे कर्म करनेसे सिद्ध होता है, जो मनुष्य उद्योगको छोडकर सिद्धी चाहता है, उसका कर्म सिद्ध नहीं होता. जो उद्योगी मनुष्य देवतोंको नमस्कार करके अत्यन्त विचार पूर्वक उद्योग करता है. उसके कार्यमें विघ्न भी नष्ट नहीं कर सकते

प्रेष्यभूतः प्रवर्त्तेयं पाण्डवेयस्य शासनात् ॥ १२ ॥
आज्ञाप्य पृथिवीं सर्वां स्थित्वा मूर्द्धनि सञ्जय ।
येन पुत्रशतं पूर्णमेकेन निहतं मम ॥ १३ ॥
कृतं सत्यं वचस्तस्य विदुरस्य महात्मनः ।
अकुर्वता वचस्तेन मम पुत्रेण सञ्जय ॥ १४ ॥
कथमस्य भविष्यामि प्रेष्यभूतो दुरन्तकृत् ।
कथं भीमस्य वाक्यानि श्रोतुं शक्ष्यामि संजय ॥१५॥
अधर्मेण हते तात पुत्रे दुर्योधने मम ।
कृतवर्मा कृपो द्रौणिः किमकुर्वत सञ्जय ॥ १६ ॥

सञ्जय उवाच— गत्वा तु तावका राजन्नातिदूरमवस्थिताः ।
अपश्यन्त वनं घोरं नानाद्रुमलतावृतम् ॥ १७ ॥
ते मुहूर्त्तं तु विश्रम्य लब्धतोयैर्हयोत्तमैः ।
सूर्यास्तमनवेलायां समासेदुर्महद्वनम् ॥ १८ ॥
नानामृगगणैर्जुष्टं नानापक्षिगणावृतम् ।
नानाद्रुमलताच्छन्नं नानाव्यालनिषेवितम् ॥ १९ ॥
नानातोयैः समाकीर्णं नानापुष्पोपशोभितम् ।
पद्मिनीशतसंछन्नं नीलोत्पलसमायुतम् ॥ २० ॥

कैसे रहूंगा ? हे सञ्जय ! सब पृथ्वीको अपनी आज्ञामें चलाकर राजाके शिर पर रहकर अब युधिष्ठिरकी आज्ञामें कैसे चलूंगा ? (१०-१३)

महात्मा विदुरका वचन सत्य हुआ, दुर्योधनने विदुरकी बात कुछ न मानी इसीसे यह आपत्ति आई । हे सञ्जय ! जिसने मेरे सौ पुत्रोंको मारा उस भीमसेनके वचनोंको मैं कैसे सह सकूंगा ? हे सञ्जय ! जब भीमसेनने हमारे पुत्र दुर्योधनको अधर्मसे मारडाला तब कृपाचार्य, अश्वत्थामा और कृतवर्माने क्या किया । (१४—१६)

सञ्जय बोले, हे महाराज ! जब ये तीनों वीर वहांसे पूर्वकी ओर भागे, तब थोडी दूर जाकर अनेक वृक्ष लताओंसे भरा घोर वन देखा; तब रथोंसे उतरकर थोडे समयतक ठहरकर वहांपर विश्राम किया और घोडोंको पानी पिलाया, तब सूर्य भी अस्त होने लगे । तब ये तीनों दक्षिणकी ओर चलकर उस हरिन, पक्षी, वृक्ष, लता और कांटोंसे भरे वनमें घुसे । (१७—१९)

इनको चारों ओर देखते हुए

बुद्धिश्चिंतयते किंचित् स्वं श्रेयो नावबुध्यते ।
मुह्यता तु मनुष्येण प्रष्टव्याः सुहृदो जनाः ॥ ३० ॥
तत्रास्य बुद्धिर्विनयस्तत्र श्रेयश्च पश्यति ।
ततोस्य मूलं कार्याणां बुद्धया निश्चित्य वै बुधाः ॥ ३१ ॥
तेऽत्र पृष्टा यथाब्रूयुस्तत्कर्तव्यं तथा भवेत् ।
ते वयं धृतराष्ट्रं च गान्धारीं च समेत्य ह ॥ ३२ ॥
उपपृच्छामहे गत्वा विदुरं च महामतिम् ।
ते पृष्टास्तु वदेयुर्यच्छ्रेयो नः समनंतरम् ॥ ३३ ॥
तद्स्माभिः पुनः कार्यमिति मे नैष्ठिकी मतिः ।
अनारंभात्तु कार्याणां नार्थः संपद्यते क्वचित् ॥ ३४ ॥
कृते पुरुषकारे तु येषां कार्य न सिद्ध्यति ।
दैवेनोपहतास्ते तु नात्र कार्या विचारणा ॥ ३५ ॥ [१०४]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिके पर्वणि द्रौणिकृपसंवादे द्वितीयोऽध्यायः ॥ २ ॥

संजय उवाच — कृपस्य वचनं श्रुत्वा धर्मार्थसहितं शुभम् ।
अश्वत्थामा महाराज दुःखशोकसमन्वितः ॥ १ ॥

भी महाअधमी और पापी होगये। मैं यही विचार रहा हूं और इसीसे मेरी बुद्धी इस समय नष्ट होगई है, क्या करना चाहिये यह कुछ नहीं जान पडता और यह भी नियम है कि जब मनुष्यकी बुद्धि नष्ट होजाय तब उसे अपने मित्रोंसे सम्मति पूछनी चाहिये, क्यों कि ऐसे समयमें वे ही उसका कल्याण कर सकते हैं. पण्डितों ने ऐसा कहा है. कि इस समय यथार्थ मित्र कैसा करे वैसाही करना उचित है. इस लिये हमारी बुद्धिमें ऐसा आता है. कि वहां-पर जाकर महाराज धृतराष्ट्र, गान्धारी और महात्मा विदुरसे यह वृत्तान्त कहें, फिर वे लोग जैसा कहेंगे, वैसाही करनेमें हमारा कल्याण होगा, क्यों कि विना उद्योग किये कहीं फल प्राप्त नहीं होता। यदि उद्योग करनेपर कार्य सिद्धि न होय तो उसमें मनुष्यका कुछ दोष नहीं और उसे ही प्रारब्ध कहते हैं। (२८—३५) [१०४]

इस प्रकार श्रीमहाभारत शतसाहस्री संहिता वैयासिकी सौप्तिक पर्वमें द्रौणिकृपसंवाद द्वितीयोऽध्याय समाप्त ॥ २ ॥

संजय बोले, हे महाराज! कृपाचार्यके अर्थ और धर्मसे भरे हुए शुभ वचन सुनकर अश्वत्थामा दुःख और शोकसे युक्त होकर

प्रविश्य तद्वनं घोरं वीक्षमाणाः समंततः ।
ददृशुस्तत्र संछन्नं न्यग्रोधं ते महारथाः ॥ २१ ॥
उपेत्य तु तदा राजन् न्यग्रोधं ते महारथाः ।
ददृशुर्द्विपदां श्रेष्ठाः श्रेष्ठं तं वै वनस्पतिम् ॥ २२ ॥
तेऽवतीर्य रथेभ्यश्च विप्रमुच्य च वाजिनः ।
उपस्पृश्य यथान्यायं संध्यामन्वासत प्रभो ॥ २३ ॥
ततोऽस्तं पर्वतश्रेष्ठमनुप्राप्ते दिवाकरे ।
सर्वस्य जगतो भात्री शर्वरी समपद्यत ॥ २४ ॥
ग्रहनक्षत्रताराभिः संपूर्णाभिरलंकृतम् ।
नभोऽभ्रताम्रिवाभाति प्रेक्षणीयं समंततः ॥ २५ ॥
उलूका ये प्रजल्पंति ये मत्वा रात्रिचारिणः ।
दिवाचराश्च ये मत्वास्ते निद्रावशमागताः ॥ २६ ॥
रात्रिंचराणां सत्त्वानां निर्घोषोऽभूत्सुदारुणः ।
सत्त्वाढ्यश्च प्रमुदितो घोरो प्राप्ता च शर्वरी ॥ २७ ॥
तस्मिन्वनिमुने घोरे कृत्स्नशोकसमन्विताः ।
कृतवर्मा कृपो द्रौणिस्त्रयस्ते विजनं गताः ॥ २८ ॥
तत्रोपविष्टाः शोचन्तो न्यग्रोधस्य समीपतः ।
सर्वेषामेव निधनं कुरूणामवशिष्यताम् ॥ २९ ॥
निद्रया च परीताङ्गा निषेदुर्विवशास्ततः ।

दह्यमानस्तु शोकेन प्रदीप्तेनाग्निना यथा।
क्रूरं मनस्ततः कृत्वा तावुभौ प्रत्यभाषत ॥ २ ॥
पुरुषे पुरुषे बुद्धिर्या या भवति शोभना।
तुष्यंति च पृथक् सर्वे प्रज्ञया ते स्वया स्वया ॥ ३ ॥
सर्वो हि मन्यते लोक आत्मानं बुद्धिमत्तरम्।
सर्वस्यात्मा बहुमतः सर्वाऽऽत्मानं प्रशंसति ॥ ४ ॥
सर्वस्य हि स्वका प्रज्ञा साधुवादे प्रतिष्ठिता।
परबुद्धिं च निन्दन्ति स्वां प्रशंसंति चासकृत् ॥ ५ ॥
कारणान्तरयोगेन योगे येषां समा गतिः।
अन्योन्येन च तुष्यन्ति बहु मन्यंति चासकृत् ॥ ६ ॥
तस्यैव तु मनुष्यस्य सा सा बुद्धिस्तदा तदा।
कालयोगे विपर्यासं प्राप्यान्योन्यं विपद्यते ॥ ७ ॥
विचित्रत्वात्तु चित्तानां मनुष्याणां विशेषतः।
चित्तवैक्लव्यमासाद्य सा सा बुद्धिः प्रजायते ॥ ८ ॥
यथा हि वैद्यः कुशलो ज्ञात्वा व्याधिं यथाविधि।
भैषज्यं कुरुते योगात्प्रशमार्थमिति प्रभो ॥ ९ ॥
एवं कार्यस्य योगार्थं बुद्धिं कुर्वन्ति मानवाः।

क्रोधमें भरकर मनको दूषित करके अश्वत्थामा, कृपाचार्य और कृतवर्मासे बोले। (१—२)

हम यह जानते हैं, कि जगत्में सब मनुष्योंकी बुद्धि अलग अलग होती है, और सब लोग अपने अपनेको महाबुद्धिमान जानकर अपनी अपनी प्रशंसा किया करते हैं। और अपने अपने को बडा समझते हैं सब लोग अपनी अपनी बुद्धिको साधु कहते हैं, परन्तु जो कारण और समयके अनुरोधसे अनेक प्रकारकी बुद्धियोंमेंसे एक बुद्धिको स्थिर करता है, और जो दूसरोंकी सम्मति सुनकर प्रसन्न होता है, उसहीका कार्य सिद्ध होता है, मनुष्योंके चित्तकी वृत्ति अलग अलग होती है,इसी लिये समय समयपर व्याकुल होकर अनेक अनेक प्रकारकी बुद्धि उत्पन्न होती है। जो अपनी स्थिर करी हुई बुद्धिको छोड कर दूसरेकी सम्मतियोंको स्वीकार करता है। उसकी बुद्धि अनेक प्रकारकी बुद्धियोंसे नष्ट होजाती है, (३—८)

जैसे वैद्य अत्यन्त सावधान होकर चिकित्सा करता है, और रोगको शान्त

श्रमेण सुदृढं युक्ता विक्षता विविधैः शरैः ॥ ३० ॥
ततो निद्रावशं प्राप्तौ कृपभोजौ महारथौ ।
सुखोचितावदुःखार्हौ निषण्णौ धरणीतले ॥ ३१ ॥
तौ तु सुप्तौ महाराज श्रमशोकसमन्वितौ ।
महार्हशयनोपेतौ भूमावेव ह्यनाथवत् ॥ ३२ ॥
क्रोधामर्षवशं प्राप्तो द्रोणपुत्रस्तु भारत ।
न वै स स जगामाथ निद्रां सर्प इव श्वसन् ॥ ३३ ॥
न लेभे स तु निद्रां वै दह्यमानो हि मन्युना ।
वीक्षांचक्रे महाबाहुस्तद्वनं घोरदर्शनम् ॥ ३४ ॥
वीक्षमाणो वनोद्देशं नानासत्त्वैर्निषेवितम् ।
अपश्यत महाबाहुर्न्यग्रोधं वायसैर्युतम् ॥ ३५ ॥
तत्र काकसहस्राणि तां निशां पर्यणामयन् ।
सुप्तं स्वपंति कौरव्य पृथक् पृथगुपाश्रयाः ॥ ३६ ॥
सुप्तेषु तेषु काकेषु विश्रब्धेषु समंततः ।
सोऽपश्यत्सहसा यान्तमुलूकं घोरदर्शनम् ॥ ३७ ॥
महास्वनं महाकायं हर्यक्षं बभ्रुपिंगलम् ।
सुदीर्घघोणानग्वरं सुपर्णमिव वेगिनम् ॥ ३८ ॥
सोऽथ शब्दं मृदुं कृत्वा लीयमान इवांडजः ।
न्यग्रोधस्य ततः शाखां प्रार्थयामास भारत ॥ ३९ ॥

व्याकुल होगये । (२०-२९)

उस समय तीनों परिश्रम, घाव और निद्रासे व्याकुल थे, इसलिये पृथ्वीमें लोट गये, तब सदासे सुख भोगनेवाले, दुःख भोगनेमें असमर्थ, शोकसे व्याकुल, उत्तम शय्यामें सोने योग्य, महारथ कृपाचार्य और कृतवर्मा, अनाथके समान पृथ्वीहीमें सोगये; परन्तु क्रोध भरे अश्वत्थामाको निद्रा न आई और सर्पके समान सांस लेते रहे । फिर बार बार क्रोधसे भरकर महाबाहु, अश्वत्थामा उस अनेक जन्तुओंसे भरे घोर वनको देखने लगे । फिर उस वरगदके ऊपर को देखा । (३०—३५)

हे महाराज ! उस वरगद पर सहस्रों कौवे निःसन्देह सो रहे थे उसी समय एक भयानक रूपवाला बडे नखों और बडी चोंचवाला और इन्द्र के समान वेगवाला उल्लू पक्षी वहां उसने चुपके होकर उन सोते हुये कौओं-

प्रज्ञया हि स्वया युक्तास्ताश्च निन्दन्ति मानवाः ॥१०॥
अन्यया यौवने मर्त्यो बुध्या भवति मोहितः ।
मध्येऽन्यया जरायां तु सोऽन्यां रोचयते मतिम् ॥११॥
व्यसनं वा महाघोरं समृद्धिं चापि तादृशीम् ।
अवाप्य पुरुषो भोज कुरुते बुद्धिवैकृतम् ॥ १२ ॥
एकस्मिन्नेव पुरुषे सा सा बुद्धिस्तदा तदा ।
भवत्यकृतधर्मत्वात्सा तस्यैव न रोचते ॥ १३ ॥
निश्चित्य तु यथाप्रज्ञं यां मतिं साधु पश्यति ।
तया प्रकुरुते भावं सा तस्योद्योगकारिका ॥ १४ ॥
सर्वो हि पुरुषो भोज साध्वेतदिति निश्चितः ।
कर्तुमारभते प्रीतो मरणादिषु कर्मसु ॥ १५ ॥
सर्वे हि बुद्धिमाज्ञाय प्रज्ञां वापि स्वकां नराः ।
चेष्टन्ते विविधां चेष्टां हितमित्येव जानते ॥ १६ ॥
उपजाता व्यसनजा यंयमस्य मतिर्मम ।
युवयोस्तां प्रवक्ष्यामि मम शोकविनाशिनीम् ॥ १७ ॥

करता है, ऐसे ही जो बुद्धिमान मनुष्य कार्योंको जानकर भी केवल अपनी बुद्धिसे कार्योंको करता है, उसकी लोग निन्दा करते हैं । युवा अवस्थामें मनुष्य दूसरी ही बुद्धिसे मोहित रहता है मध्य अवस्थामें कुछ और ही बुद्धि हो जाती है, और वृद्धापेमें कुछ और बुद्धि अच्छी लगा करती है. हे कृतवर्मन् ! जब मनुष्यको घोर आपत्ति आकर पडती है. अथवा बहुत अधिक धन प्राप्त हो जाता है, तब उसकी बुद्धि नष्ट होजाती है, परन्तु जब एक ही मनुष्यको अधर्म करनेके कारण अनेक प्रकारकी बुद्धि होती है, तब वह बुद्धि किसीको अच्छी नहीं लगती. जो अपनी बुद्धिके अनुसार अत्यन्त निश्चय करके कार्यका उद्योग करता है. तब वही बुद्धि उसके उद्योगकी सहायता करती है।(९-१४)

हे कृतवर्मन् ! मनुष्य मरणपर्यन्त कामोंको भी अच्छा ही समझकर करता है. क्यों कि मनुष्य जिस कामको करता है उसमें अपनी समस्त बुद्धिको लगा देता है. और उस ही कर्मको अपना कल्याणदायक समझ लेता है।१५-१६

इस कारण इस घोर आपत्तिमें पडनेके कारण जो बुद्धि मुझे उत्पन्न हुई है उसमें मेरा शोक नष्ट होगया । अब तुम दोनोंसे वही बुद्धि मैं कहूंगा, तुम्हारे वह

प्रजापतिः प्रजाः सृष्ट्वा कर्म तासु विधाय च ।
वर्णे वर्णे समाधत्ते ह्येकैकं गुणभाग्गुणम् ॥ १८ ॥
ब्राह्मणे वेदमग्र्यं तु क्षत्रिये तेज उत्तमम् ।
दाक्ष्यं वैश्ये च शूद्रे च सर्ववर्णानुकूलताम् ॥ १९ ॥
अदान्तो ब्राह्मणोऽसाधुर्निस्तेजाः क्षत्रियोऽधमः ।
अदक्षो निंद्यते वैश्यः शूद्रश्च प्रतिकूलवान् ॥ २० ॥
सोऽस्मि जातः कुले श्रेष्ठे ब्राह्मणानां सुपूजिते ।
मन्दभाग्यतयाऽस्म्येतं क्षत्रधर्ममनुष्ठितः ॥ २१ ॥
क्षत्रधर्मं विदित्वाऽहं यदि ब्राह्मण्यमाश्रितः ।
प्रकुर्यां सुमहत्कर्म न मे तत्साधुसंमतम् ॥ २२ ॥
धारयंश्च धनुर्दिव्यं दिव्यान्यस्त्राणि चाहवे ।
पितरं निहतं दृष्ट्वा किं नु वक्ष्यामि संसदि ॥ २३ ॥
सोऽहमद्य यथाकामं क्षत्रधर्ममुपास्य तम् ।
गन्ताऽस्मि पदवीं राज्ञः पितुश्चापि महात्मनः ॥२४ ॥
अद्य स्वप्स्यन्ति पाञ्चाला विश्वस्ता जितकाशिनः ।
विमुक्तयुग्यकवचा हर्षेण च समन्विताः ॥ २५ ॥

सृष्टि बनाई थी तब ही उन्होंने सब वर्णोंके कर्म भी अलग अलग बना दिये थे; और सबमें एक एक गुण भी दे दिया था। ब्राह्मणोंको वेद पढना, क्षत्रियोंको तेज बढाना, वैश्योंको धन कमाना और शूद्रोंको सबकी सेवा करनी। जो ब्राह्मण इन्द्री न जीत सके, जो क्षत्री तेजस्वी न हो, जो वैश्य धन न बढा सके और जो शूद्र इनकी सेवा न करे, तो इन सबकी निन्दा करनी चाहिये। यदि आप मैं जगत्पूरित ब्राह्मण वंशमें उत्पन्न हुआ हूं, परन्तु अभाग्य होनेके कारण क्षात्रिय धर्मको धारण कर रहा हूं, सो आपत्तिमें इस क्षत्रिय ध धारण करके भी अब छोड दूं, ब्राह्मणोंका धर्म करने लगूं तो अ नहीं, यह दिव्य धनुष और इन दि बाणोंको धारण करके भी यदि मारनेका बदला न लूं, तो महात्माओ बैठकर क्या कहूंगा ? (१७-२३)

अब मैं क्षत्रिय धर्मका आश्रय ले अपने पिता और महाराजके पास में जाऊंगा, इस समय विजयी पाञ्च सेना थककर विजय पाकर कवच लकर अत्यन्त विश्वासपूर्वक सो रही सो अभी मैं डेरोंमें घुसकर भूतके सम

छद्मना च भवेत्सिद्धिः शत्रूणां च क्षयो महान् ।
ततः संशयितादर्थाद्योऽर्थो निःसंशयो भवेत् ॥ ४९ ॥
तं जना बहु मन्यंते ये च शास्त्रविशारदाः ।
यच्चाप्यत्र भवेद्वाक्यं गर्हितं लोकनिन्दितम् ॥ ५० ॥
कर्तव्यं तन्मनुष्येण क्षत्रधर्मेण वर्तता ।
निन्दितानि च सर्वाणि कुत्सितानि पदे पदे ॥ ५१ ॥
सोपधानि कृतान्येव पाण्डवैरकृतात्मभिः ।
अस्मिन्नर्थे पुरा गीताः श्रूयंते धर्मचिन्तकैः ॥ ५२ ॥
श्लोका न्यायमवेक्षद्भिस्तत्त्वार्थास्तत्त्वदर्शिभिः ।
परिश्रान्ते विदीर्णे वा भुञ्जाने वाऽपि शत्रुभिः ॥५३॥
प्रस्थाने वा प्रवेशे वा प्रहर्तव्यं रिपोर्बलम् ।
निद्रार्तमर्धरात्रे च तथा नष्टप्रणायकम् ॥ ५४ ॥
भिन्नयोधं हतं यच्च द्विधायुक्तं च यद्भवेत् ।
इत्येवं निश्चयं चक्रे सुप्तानां निशि मारणे ॥ ५५ ॥
पाण्डूनां सहपाञ्चालैर्द्रौणपुत्रः प्रतापवान् ।
स क्रूरां मतिमास्थाय विनिश्चित्य मुहुर्मुहुः ॥ ५६ ॥
सुप्तौ प्रापोधयत्तौ तु मातुलं भोजमेव च ।

मेरा काम सिद्ध हो सक्ता है, यद्यपि यह नियम है कि संशयवाले कामोंसे निःसन्देह काम करना अच्छा है, महात्माओंने यह भी कहा है, कि जगत्में नीच काम करनेसे निन्दा होती है, परन्तु क्षत्रियधर्म करनेवालेको चरण चरणपर निन्दित और दुष्ट कर्म करने होते हैं, पाण्डवोंने भी इस युद्धमें अनेक अधर्म करे हैं, महात्माओंने भी ऐसा कहा है कि चाहे सहज थका हो, चाहे भागता हो, चाहे भोजन करता हो, चाहे चला जाता हो, और चाहे बैठा हो, इसे इत्यादि मारना चाहिये । जिस सेनाका स्वामी मर गया हो, जिसके दो टुकडे होगये हों, जो सेना सोती हो उसे आधी रातमें मारना चाहिये । यही तप जाननेवाले महात्माओंका सिद्धान्त है । (४७—५५)

ऐसा विचारकर प्रतापवान् अश्वत्थामाने पाञ्चाल और पाण्डवोंके मारनेके लिये दुष्ट बुद्धि करी, फिर सोते हुए उसने मामा कृपाचार्य और कृतवर्माको जगाया, इस महाबलवान् कृपाचार्य और कृतवर्मा दुष्ट और लज्जित होकर भ

जयं मत्वाऽऽत्मनश्चैव श्रान्ता व्यायामकर्शिताः ।
तेषां निशि प्रसुप्तानां सुस्थानां शिबिरे स्वके ॥ २६ ॥
अवस्कन्दं करिष्यामि शिबिरस्याद्य दुष्करम् ।
तानवस्कन्द्य शिबिरे प्रेतभूतानचेतसः ॥ २७ ॥
सूदयिष्यामि विक्रम्य मघवानिव दानवान् ।
अद्य तान्सहितान्सर्वान् धृष्टद्युम्नपुरोगमान् ॥ २८ ॥
सूदयिष्यामि विक्रम्य कक्षं दीप्त इवानलः ।
निहत्य चैव पाञ्चालान् शान्तिं लब्धाऽस्मि सत्तम ॥२९॥
पाञ्चालेषु भविष्यामि सूदयन्वै संयुगे ।
पिनाकपाणिः संक्रुद्धः स्वयं रुद्रः पशुष्विव ॥ ३० ॥
अद्याहं सर्वपाञ्चालान्निहत्य च निकृत्य च ।
अर्दयिष्यामि संहृष्टो रणे पाण्डुसुतांस्तथा ॥ ३१ ॥
अद्याहं सर्वपञ्चालैः कृत्वा भूमिं शरीरिणीम् ।
प्रहृत्यैकशरतेषु भविष्याम्यनृणः पितुः ॥ ३२ ॥
दुर्योधनस्य कर्णस्य भीष्मसैन्धवयोरपि ।
गमयिष्यामि पाञ्चालान्पदवीमद्य दुर्गमाम् ॥ ३३ ॥
अद्य पाञ्चालराजस्य धृष्टद्युम्नस्य वै निशि ।
न चिरात्प्रमयिष्यामि पशोरिव शिरो यथा ॥ ३४ ॥
अद्य पाञ्चालपाण्डूनां दायिनानान्मजाशिशि ।

खड्गेन निशितेनाजौ प्रमथिष्यामि गौतम ॥ ३५ ॥
अद्य पाञ्चालसेनां तां निहत्य निशि सौप्तिके।
कृतकृत्यः सुखी चैव भविष्यामि महामते ॥ ३६ ॥[१४०]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्या सौप्तिके पर्वणि द्रौणि-मंत्रणायाम् तृतीयोऽध्यायः॥ ३ ॥

कृप उवाच— दिष्ट्या ते प्रतिकर्तव्ये मतिर्जातेयमच्युत।
न त्वां वारयितुं शक्तो वज्रपाणिरपि स्वयम् ॥ १ ॥
अनुयास्यावहे त्वां तु प्रभाते सहितावुभौ।
अद्य रात्रौ विश्रमस्व विमुक्तकवचध्वजः ॥ २ ॥
अहं त्वामनुयास्यामि कृतवर्मा च सात्वतः।
परानभिमुखं यातं रथावास्थाय दंशितौ ॥ ३ ॥
आवाभ्यां सहितः शत्रून् श्वो निहन्ता समागमे।
विक्रम्य रथिनां श्रेष्ठ पाञ्चालान्सपदानुगान् ॥ ४ ॥
शक्तस्त्वमसि विक्रम्य विश्रमस्व निशामिमाम्।
चिरं ते जाग्रतस्तात स्वप तावन्निशामिमाम् ॥ ५ ॥
विश्रान्तश्च विनिद्रश्च स्वस्थचित्तश्च मानद।
समेत्य समरे शत्रून्वधिष्यसि न संशयः ॥ ६ ॥

श्वाल और पाण्डवोंके बालकोंके शिर मेरे तेज धारवाले खड्गसे कटेंगे। हे महाबुद्धिमन्? आज समस्त सोते हुए पाञ्चालोंको रातमें मारकर मैं सुखी और कृतकृत्य हूंगा। (३५—३६)

सौप्तिकपर्वमें तीसरा अध्याय समाप्त।

सौप्तिकपर्वमें चौथा अध्याय।

कृपाचार्य बोले, हे वीर! आज प्रारब्धवशसे तुम्हें ऐसी बुद्धि उत्पन्न हुई। तुम्हें साक्षात् वज्रधारी इन्द्र भी युद्धमें नहीं रोक सक्ता, परन्तु हमारी बुद्धिमें यह आता है कि इस समय तुम कवच खोलकर, रथसे ध्वजा उतारकर सो रहो। प्रातःकाल होते ही हम कृतवर्मा तुम्हारे सङ्ग चलेंगे और सब शत्रुओंका नाश करेंगे। (१—३)

हे महारथ! तुम हमारी सहायतासे सेना सहित पाञ्चालराजको मारियो, तुम सब कुछ करनेमें समर्थ हो, परन्तु कई दिनसे जाग रहे हो, इसलिये इस समय सो रहो। जब तुम्हारा परिश्रम दूर होजायगा और सोनेके कारण चित्त सावधान हो जायगा। तब हम लोगोंकी सहायतासे तुम निःसन्देह शत्रुओंका

शाकुनिं तु ततः षष्ट्या विव्याध भरतर्षभ ।
सारथिं त्रिभिरानर्छत्तं च भूयो व्यविध्यत ॥ ५ ॥
उलूकस्तं तु विंशत्या विद्ध्वा स्वर्णविभूषितैः ।
अथास्य समरे क्रुद्धो ध्वजं चिच्छेद काञ्चनम् ॥ ६ ॥
स च्छिन्नयष्टिः सुमहान्शीर्यमाणो महाध्वजः ।
पपात प्रमुखे राजन्युयुत्सोः काञ्चनध्वजः ॥ ७ ॥
ध्वजमुन्माथितं दृष्ट्वा युयुत्सुः क्रोधमूर्च्छितः ।
उलूकं पञ्चभिर्बाणैराजघान स्तनान्तरे ॥ ८ ॥
उलूकस्तस्य समरे तैलधौतेन सारिष ।
शिरश्चिच्छेद भल्लेन यन्तुर्भरतसत्तम ॥ ९ ॥
तच्छिन्नमपतद्भूमौ युयुत्सोः सारथेस्तदा ।
तारारूपं यथा चित्रं निपपात महीतले ॥ १० ॥
जघान चतुरोऽश्वांश्च तं च विव्याध पञ्चभिः ।
सोऽतिविद्धो बलवता प्रत्यपायाद्रथान्तरम् ॥ ११ ॥
तं निर्जित्य रणे राजन्नुलूकस्त्वरितो ययौ ।
पञ्चालान्सृञ्जयांश्चैव विनिघ्नन्निशितैः शरैः ॥ १२ ॥
शतानिकं महाराज श्रुतकर्मा सुतस्तव ।

तब शकुनिपुत्र उलूकको साठ तथा सारथीको तीन बाणोंसे विद्ध किया ॥ उलूकने भी क्रोधसे युयुत्सुको सुवर्ण-भूषित बीस बाणोंसे विद्ध करके उनकी सोनेकी ध्वजा काट दी ॥ वह भग्नध्वजा युयुत्सुके आगे ही गिर पडी ॥ (४–७)

अपनी ध्वजाको कटी देख युयुत्सुको महाक्रोध हुआ और पांच बाण उलूककी छातीमें मारे ॥ हे भरतकुल श्रेष्ठ ! उलूकने भी एक तेलमें भीगे बाणसे युयुत्सुके सारथीका सिर काट लिया ॥ उस समय युयुत्सुके सारथीका शिर आकाशसे गिरनेवाली उल्काके समान कटकर पृथ्वीमें गिर पडा ॥ (७—१०)

फिर उलूकने युयुत्सुके चार घोडोंको मारकर उनके शरीरमें भी पांच बाण मारे, बलवान् युयुत्सु बाणोंसे पीडित होकर दूसरे रथपर चढ गये ॥ हे राजन् ! युयुत्सुको युद्धमें जीतकर उलूक अपने तेज बाणोंसे पाण्डवोंकी सेनाको मारते हुए सृंजय और पाञ्चालदेशके क्षत्रियोंसे लडनेको चले गये ॥ (११–१२)

हे राजन् ! उसी समय तुम्हारे पुत्र श्रुतकर्माने क्षणमात्रमें शतानीकके सारथी

व्यश्वसूतरथं चक्रे निमेषार्धाद्‌सम्भ्रमः ॥ १३ ॥
हताश्वे तु रथे तिष्ठञ्शतानीको महारथः ।
गदां चिक्षेप संक्रुद्धस्तव पुत्रस्य मारिष ॥ १४ ॥
सा कृत्वा स्यन्दनं भस्म हयांश्चैव ससारथीन् ।
पपात धरणीं तूर्णं दारयन्तीव भारत ॥ १५ ॥
तावुभौ विरथौ वीरौ कुरूणां कीर्तिवर्धनौ ।
व्यपाक्रमेतां युद्धात्तु प्रेक्षमाणौ परस्परम् ॥ १६ ॥
पुत्रस्तु तव सम्भ्रान्तो विविंशो रथमारुहत् ।
शतानीकोऽपि त्वरितः प्रतिविन्ध्यरथं गतः ॥ १७ ॥
सुतसोमं तु शकुनिर्विद्ध्वा तु निशितैः शरैः ।
नाकम्पयत संक्रुद्धो वार्योघ इव पर्वतम् ॥ १८ ॥
सुतसोमस्तु तं दृष्ट्वा पितुरत्यन्तवैरिणम् ।
शरैरनेकसाहस्रैश्छादयामास भारत ॥ १९ ॥
ताञ्शराञ्शकुनिस्तूर्णं चिच्छेदान्यैः पतत्रिभिः ।
लघ्वस्त्रश्चित्रयोधी च जितकाशी च संयुगे ॥ २० ॥
निवार्य समरे चापि शरांस्तान्निशितैः शरैः ।
आजघान सुसंक्रुद्धः सुतसोमं त्रिभिः शरैः ॥ २१ ॥
तस्याश्वान्केतनं सूतं तिलशो व्यधमच्छरैः ।

और घोडोंको मार डाला ॥ तब महारथ शतानीकने अश्वरहित रथमें बैठके एक भारी गदा तुम्हारे पुत्रपर चलाई ॥ वह गदा श्रुतकर्माके घोडे, सारथी और रथका चूरा करके पृथ्वीमें गिर गई ॥ (१३—१५)

तब वे दोनों कुरुवंशी वीर पृथ्वीमें खडे होकर एक दूसरेको देखते हुए युद्धसे निवृत्त हुए ॥ तब तुम्हारे पुत्र श्रुतकर्मा घबराकर विविंशतिके रथपर चढ गये, इसी प्रकार शतानीक भी प्रतिविन्ध्यके रथपर जा चढे ॥ (१६-१७)

शकुनिने श्रुतसोमके शरीरमें अनेक बाण मारे, परन्तु सुतसोम इस प्रकार युद्धमें खडे रहे जैसे वर्षामें पर्वत ॥ हे भारत ! सुतसोमने अपने पिताके महा-शत्रुको आगे खडा देख सहस्रों बाण उसकी ओर चलाये ॥ शस्त्रविद्याके जानने वाले विजयी चित्रयोधी शकुनिने सुत-सोमके सब बाणोंको अपने तीक्ष्ण बाणोंसे काट दिया,और क्रोध करके सुतसोमको तीन बाणोंसे विद्ध किया ॥ (१८–२०)

न हि त्वां रथिनां श्रेष्ठं प्रगृहीतवरायुधम् ।
जेतुमुत्सहते शश्वदपि देवेषु वासवः ॥ ७ ॥
कृपेण सहितं यान्तं गुप्तं च कृतवर्मणा ।
को द्रौणिं युधि संरब्धं योधयेदपि देवराट् ॥ ८ ॥
ते वयं निशि विश्रान्ता विनिद्रा विगतज्वराः ।
प्रभातायां रजन्यां वै निहनिष्याम शात्रवान् ॥ ९ ॥
तव ह्यस्त्राणि दिव्यानि मम चैव न संशयः ।
सात्वतोऽपि महेष्वासो नित्यं युद्धेषु कोविदः ॥ १० ॥
ते वयं सहितास्तात सर्वान् शत्रून्समागतान् ।
प्रसह्य समरे हत्वा प्रीतिं प्राप्स्याम पुष्कलाम् ॥११॥
विश्रमस्व त्वमव्यग्रः स्वप चेमां निशां सुखम् ।
अहं च कृतवर्मा च त्वां प्रयान्तं नरोत्तमम् ॥ १२ ॥
अनुयास्याव सहितौ धन्विनौ परतापनौ ।
रथिनं त्वरया यान्तं रथमास्थाय दंशितौ ॥ १३ ॥
स गत्वा शिबिरं तेषां नाम विश्राव्य चाहवे ।
ततः कर्ताऽसि शत्रूणां युध्यतां कदनं महत ॥ १४ ॥
कृत्वा च कदनं तेषां प्रभाते विमलेऽहनि ।
चिररव यथा शक्रः सूदयित्वा महासुरान ॥ १५ ॥

नाश करोगे, जब तुम रथपर बैठकर धनुष धारण करोगे, तब साक्षात् इन्द्र भी तुमको नहीं जीत सकेंगे, जब कृपाचार्य और कृतवर्मा तुम्हारी रक्षा करेंगे, तब साक्षात् इन्द्रकी क्या शक्ती है, जो तुमसे युद्ध कर सके ? (४–८)

इसलिये अब हम लोग रात्रिभर सोवें और प्रातःकाल होते ही घोर युद्ध करेंगे, और इनको मारेंगे, इसमें सन्देह नहीं तुम्हारे पास यह दिव्य बाण है, और कृतवर्मा भी महाधनुर्धारी और यह प्रकारकी युद्धविद्या जाननेवाले हैं, सो हम तीनों मिलकर प्रातःकाल शत्रुओंसे युद्ध करेंगे, और युद्धमें शत्रुओंको मारकर अत्यन्त प्रसन्न होंगे । (९–११)

अब तुम सावधान होके इस समय सो रहो, प्रातःकाल होतेही हम और कृतवर्मा दोनों धनुष धारण करके उत्तम रथोंपर चढ़कर तुम्हारे संग चलेंगे, और युद्ध करते हुए शत्रुओंको अपना नाम सुनाकर मारेंगे, फिर उनको निर्मल दिनमें करके तुम इस प्रकार शत्रु कौरव-

तमन्वगात्कृपो राजन् कृतवर्मा च सात्वतः ॥ ३८ ॥
ते प्रयाता व्यरोचन्त परानभिमुखास्त्रयः ।
हूयमाना यथा यज्ञे समिद्धा हव्यवाहनाः ॥ ३९ ॥
ययुश्च शिबिरं तेषां संप्रसुप्तजनं विभो ।
द्वारदेशं तु संप्राप्य द्रौणिस्तस्थौ महारथः ॥ ४० ॥ [२१४]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिके पर्वणि द्रौणिगमने पञ्चमोऽध्यायः ॥ ५ ॥

धृतराष्ट्र उवाच- द्वारदेशे ततो द्रौणिमवस्थितमवेक्ष्य तौ ।
अकुर्वतां भोजकृपौ किं सञ्जय वदस्व मे ॥ १ ॥
सञ्जय उवाच— कृतवर्माणमामंत्र्य कृपं च स महारथः ।
द्रौणिर्मन्युपरीतात्मा शिबिरद्वारमागमत् ॥ २ ॥
तत्र भूतं महाकायं चन्द्रार्कसदृशद्युतिम् ।
सोऽपश्यद्वारमाश्रित्य तिष्ठन्तं लोमहर्षणम् ॥ ३ ॥
वसानं चर्म वैयाघ्रं महारुधिरविस्रवम् ।
कृष्णाजिनोत्तरासङ्गं नागयज्ञोपवीतिनम् ॥ ४ ॥
बाहुभिः स्वायतैः पीनैर्नानाप्रहरणोद्यतैः ।
बद्धाङ्गदमहासर्प ज्वालामालाकुलाननम् ॥ ५ ॥
दंष्ट्राकरालवदनं व्यादितास्यं भयानकम् ।

रथ हांका और शत्रुओंकी ओरको चले। उनके सङ्ग कृपाचार्य और कृतवर्मा भी चले, उस समय इन तीनों वीरोंका ऐसा तेज दीखता था, जैसे यज्ञमें जलती हुई अग्नि। चलते चलते ये तीनों वीर पाण्डवोंकी सेनाके पास पहुंचे, और देखा तो वहां सब वीर सोते हैं तब महारथ अश्वत्थामा रथसे उतरे और द्वारपर गये। (३८—४०)[२१४]

सौप्तिकपर्वमें पांच अध्याय समाप्त।

सौप्तिक पर्वने ए ५ अध्याय।

अश्वत्थामाको डेरोंके द्वारपर खडे देख कृपाचार्य और कृतवर्माने क्या किया सो हमसे कहो! (१)

सञ्जय बोले, अश्वत्थामाको द्वारपर खडे देख दोनों वीरोंने मंत्र सम्मति करी, तब क्रोध भरे अश्वत्थामा थोडा और आगे बढे, तब उन्होंने द्वारपर चन्द्रमा और सूर्यके समान तेजस्वी बडे शरीरवाले, बाघका चमडा ओढे, काले हरिनका चमडा दिखाए, उनेऊ पहिने, अनेक मोटे मोटे हाथोंमें शस्त्र लिये, बाघका चामडा पहिने उसपर दृढ

त्वं हि शक्तो रणे जेतुं पाञ्चालानां वरूथिनीम् ।
दैत्यसेनामिव क्रुद्धः सर्वदानवसूदनः ॥ १६ ॥
मया त्वां सहितं संख्ये गुप्तं च कृतवर्मणा ।
न सहेत विभुः साक्षाद्वज्रपाणिरपि स्वयम् ॥ १७ ॥
न चाहं समरे तात कृतवर्मा न चैव हि ।
अनिर्जित्य रणे पांडून्न च यास्यामि कर्हिचित् ॥ १८ ॥
हत्वा च समरे क्रुद्धान्पञ्चालान्पांडुभिः सह ।
निवर्तिष्यामहे सर्वे हता वा स्वर्गगा वयम् ॥ १९ ॥
सर्वोपायैः सहायास्ते प्रभाते वयमाहवे ।
सत्यमेतन्महाबाहो ब्रवीमि तवानघ ॥ २० ॥
एवमुक्तस्ततो द्रौणिर्मातुलेन हितं वचः ।
अब्रवीन्मातुलं राजन् क्रोधसंरक्तलोचनः ॥ २१ ॥
आतुरस्य कुतो निद्रा नरस्यार्तस्य चामयैः ।
अर्थांश्चिंतयतश्चापि कामयानस्य वा पुनः ।
तदिदं समनुप्राप्तं पश्य मेऽद्य चतुष्टयम् ॥ २२ ॥
पश्य भागचतुर्थो मे स्वप्नमह्राय नाशयेत् ।
किं नाम दुःखं लोकेऽस्मिन्पितुर्वधमनुस्मरन् ॥ २३ ॥

ए जैसे दानवोंको मारकर इन्द्र; जैसे इन्द्र क्रोध करके दानवोंके मारनेमें समर्थ हैं, ऐसेही तुम सब पाञ्चालोंको मारनेको समर्थ हो, हे वीर ! जब हम और कृतवर्मा तुम्हारी युद्धमें रक्षा करेंगे, तब साक्षात् इन्द्र भी तुम्हें नहीं जीत सक्के, हम तुमसे सत्य कहते हैं कि हम और कृतवर्मा शत्रुवोंको विना जीते युद्धसे न हटेंगे, अवश्य ही पाञ्चाल और पाण्डवोंको मारेंगे, अथवा उनके हाथसे मरकर स्वर्गको जायंगे । (१२—१९)

हे महाबाहो ! अधिक क्या कहैं हम सब प्रकारसे प्रातःकाल तुम्हारी सहायता करेंगे । अपने मामाके ऐसे कल्याणभरे वचन सुन अश्वत्थामाके नेत्र क्रोधसे लाल होगए, और ऐसा वचन बोले, रोगी और क्रोधभरे मनुष्यको, अर्थचिन्ता न करनेवालेको और कामीको निद्रा कहां ? आज हमको भी वही समय आगया है, अब इस युद्धमें केवल मेरा ही चौथा भाग शेष है, इसीसे मेरी निद्रा नष्ट होगई । (२०–२३)

हाय ! द्रोणाचार्य मारे गये, मैंने प्रसङ्ग पाञ्चालोंके ये शब्द अपने कानोंसे सुने

नयनानां सहस्रैश्च विचित्रैरभिभूषितम् ॥ ६ ॥
नैव तस्य वपुः शक्यं प्रवक्तुं वेप एव च।
सर्वथा तु तदालक्ष्य स्फुटेयुरपि पर्वताः ॥ ७ ॥
तस्यास्य नासिकाभ्यां च श्रवणाभ्यां च सर्वशः।
तेभ्यश्चाक्षिसहस्रेभ्यः प्रादुरासन्महार्चिषः ॥ ८ ॥
तथा तेजो मरीचिभ्यः शङ्खचक्रगदाधराः।
प्रादुरासन् हृषीकेशाः शतशोऽथ सहस्रशः ॥ ९ ॥
तदत्यद्भुतमालोक्य भूतं लोकभयङ्करम्।
द्रौणिरव्यथितो दिव्यैरस्त्रवर्षैरवाकिरत् ॥ १० ॥
द्रौणिमुक्ताञ्छरांस्तांस्तु तद्भूतं महदग्रसत्।
उदधेरिव वार्योघान्पावको वडवामुखः ॥ ११ ॥
अग्रसत्तांस्तथा भूतं द्रौणिना प्रहितान् शरान्।
अश्वत्थामा तु संप्रेक्ष्य शरौघांस्तान्निरर्थकान् ॥ १२ ॥
रथशक्तिं समोचासौ दीप्तामग्निशिखामिव।
सा तमाहत्य दीप्ताग्रा रथशक्तिरदीर्यत ॥ १३ ॥
युगमांते सूर्यमाहत्य महोल्केव दिवश्च्युता।

अग्निरूपी नेत्रयुक्त, भयानक, बडी बडी दाढवाला मुख फैलाए, सहस्रों नेत्र खोले एक भूतको देखा। हम उस भूतके शरीरका वर्णन नहीं कर सक्ते, उसको देखकर पर्वतभी फटते थे। (२-७)

अश्वत्थामाको देखते ही उस भूतके आंख, कान और नाकसे आगकी सहस्रों भयानक ज्वाला निकलने लगीं, और उन ज्वालावोंसे सहस्रों शङ्ख, चक्र गदाधारी विष्णु उत्पन्न होगये। उस भयङ्कर भूतको देखकर अश्वत्थामा कुछ न डरे, और सावधान होकर सहस्रों दिव्य बाण उसके ऊपर चलाने लगे। अश्वत्थामाके सब दिव्य बाण उसके शरीरमें जाकर गुप्त होगए। अश्वत्थामा उस अद्भुत कर्मको देखकर विचारने लगे। जैसे वडवाग्नि समुद्रके जलका नाश कर देती है, ऐसे ही मेरे बाण इस भूतके शरीरमें गुप्त और निरर्थक होगये। (८—११)

अनन्तर अश्वत्थामाने जलती हुई अग्निके समान तेजभरी एक सांगी लेकर मारी, तब वह शक्ती उसके शरीरमें लगकर इस प्रकार टूट गई, जैसे प्रलयकालकी बिजली सूर्यमें लगनेसे। अनन्तर चमकते हुए आकाश के

हृद्यं निर्दहन्मेऽद्य राज्यहानि न शाम्यति ।
यथा च निहतः पापैः पिता मम विशेषतः ॥ २४ ॥
प्रत्यक्षमपि ते सर्वं तन्मे मर्माणि कृन्तति ।
कथं हि मादृशो लोके मुहूर्त्तमपि जीवति ॥ २५ ॥
द्रोणो हतेति यद्वाक्यः पञ्चालानां शृणोम्यहम् ।
धृष्टद्युम्नमहत्वा तु नाहं जीवितुमुत्सहे ॥ २६ ॥
स मे पितुर्वधाद्वध्यः पाञ्चाला ये च संगताः ।
विलापो भग्नस्कन्धस्य यस्तु राज्ञो मया श्रुतः ॥ २७ ॥
स पुनर्हृदयं कस्य क्रूरस्यापि न निर्दहेत् ।
कस्य चक्रूणस्यापि नेत्राभ्यामश्रुना व्रजेत् ॥ २८ ॥
नृपतेर्भग्नस्कन्धस्य श्रुत्वा तादृग्वचः पुनः ।
यश्चायं मित्रपक्षो मे मयि जीवति निर्जितः ॥ २९ ॥
शोकं मे वर्धयत्येष वारिवेग इवार्णवम् ।
एकाग्रमनसो ह्यद्य कुतो निद्रा कुतः सुखम् ॥ ३० ॥
वासुदेवार्जुनाभ्यां च तानहं परिरक्षितान् ।
अविषह्यतमान्मन्ये सहेन्द्रेणापि सत्तम ॥ ३१ ॥
न चापि शक्तः संयन्तुं कोपमेनं समुत्थितम् ।

इससे अधिक दुःख और जगत्में क्या होगा ? आपके देखते देखते इन पापियोंने मेरे पिताको कैसे मारा ? यह स्मरण करके मेरा हृदय रातदिन जला करता है, आपके देखते देखते हमारे पिताका जैसा निरादर हुआ, सो स्मरण करके मेरे सारे मर्मस्थान फटे जाते हैं, इस ऐसे मनुष्यको एक मुहूर्त्तभर भी जीना उचित नहीं. मैं बिना धृष्टद्युम्नके मारे जी नहीं सक्ता । (२३–२६)

इसने मेरे पिताको मारा है, इसलिये मैं भी इसे मारूंगा और इसके सब सङ्गियोंको भी मारूंगा देखो जङ्घा टूटे राजा हमारे आगे कैसे रोते थे, जगत्में ऐसा कौन कठोर होगा, कि राजाके वचन सुनकर, जिसका हृदय न जलने लगे ? आंखोंमें आंसू न आजाय ? मेरे जीते जी मित्रका नाश होगया. यह स्मरण करके मेरा शोक ऐसे बढ़ता है, जैसे अधिक जल होनेसे समुद्रकी बाढ़ । मेरा चित्त इस समय एकाग्र है, तब निद्रा और सुख कहां ? (२७–३०)

इन्द्रसहित कौरव जिन्हें रक्षा करते हैं इसलिये टूटने पर भी हृदय भी नहीं

अथ हेमत्सरुं दिव्यं खड्गमाकाशवर्चसम् ॥ १४ ॥
कोशात्समुद्धर्त्तुमथ विलाद्दीप्तमिवोरगम् ।
ततः खड्गवरं धीमान् भूताय प्राहिणोत्तदा ॥ १५ ॥
स तदासाद्य भूतं वै बिलं नकुलवद्ययौ ।
ततः स कुपितो द्रौणिरिंद्रकेतुनिभां गदाम् ॥ १६ ॥
ज्वलंतीं प्राहिणोत्तस्मै भूतं तामपि चाग्रसत् ।
ततः सर्वायुधाभावे वीक्षमाणस्ततस्ततः ॥ १७ ॥
अपश्यत्कृतमाकाशमनाकाशं जनार्दनैः ।
तदद्भुततमं दृष्ट्वा द्रोणपुत्रो निरायुधः ॥ १८ ॥
अब्रवीदतिसन्तप्तः कृपवाक्यमनुस्मरन् ।
ब्रुवतामप्रियं पथ्यं सुहृदां न शृणोति यः ॥ १९ ॥
स शोचत्यापदं प्राप्य यथाऽहमतिवर्त्य तौ ।
शास्त्रदृष्टानविद्वान्यः समतीत्य जिघांसति ॥ २० ॥
स पथः प्रच्युतो धर्मात्कुपथे प्रतिपद्यते ।
शोचामणनृपस्त्रीषु सख्युर्मातुर्गुरोस्तथा ॥ २१ ॥
दीनप्राणजडान्धेषु सुप्तभीतोन्मिनेषु च ।

तं न पश्यामि लोकेऽस्मिन्यो मां कोपान्निवर्त्तयेत् ॥३२॥
तथैव निश्चिता बुद्धिरेषा साधु मता मम।
वार्तिकैः कथ्यमानस्तु मित्राणां मे पराभवः ॥ ३३ ॥
पाण्डवानां च विजयो हृदयं दहतीव मे।
अहं तु कदनं कृत्वा शत्रूणामद्य सौप्तिके ॥
ततो विश्रमिता चैव स्वप्स्ये च विगतज्वरः ॥ ३४ ॥ [१७४]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिके पर्वणि द्रौणिमन्त्रणायां चतुर्थोऽध्यायः ॥४॥

कृप उवाच— शुश्रूषुरपि दुर्मेधाः पुरुषोऽनियतेन्द्रियः।
नालं वेदयितुं कृत्स्नौ धर्मार्थाविति मे मतिः ॥ १ ॥
तथैव तावन्मेधावी विनयं यो न शिक्षते।
न च किञ्चन जानाति सोऽपि धर्मार्थनिश्चयम् ॥ २ ॥
चिरं ह्यपि जडः शूरः पंडितं पर्युपास्य हि।
न स धर्मान्विजानाति दर्वी सूपरसानिव ॥ ३ ॥
मुहूर्त्तमपि तं प्राज्ञः पंडितं पर्युपास्य हि।
क्षिप्रं धर्मान्विजानाति जिह्वा सूपरसानिव ॥ ४ ॥
शुश्रूषुस्त्वेव मेधावी पुरुषो नियतेन्द्रियः।
जानीयादागमान्सर्वान् ग्राह्यं च न विरोधयेत् ॥ ५ ॥

जीत सक्ता, मैं इससे अपने क्रोधको रोक नहीं सकता और जगत्में किसीको ऐसा भी नहीं देखता जो इसे शान्त कर सके। मैंने उस समय मनुष्योंके मुखसे यह सुना है कि मेरे मित्र दुर्योधनका निरादर हुआ इसलिये मैंने आपसे जो कुछ कहा वही निश्चय है, पाण्डवोंकी विजय ही सुनकर मेरा हृदय जला जाता है, अब मैं शत्रुओंका नाश करके ही सावधान होकर सुखसे सोऊंगा। (३०-३४)

सौप्तिकपर्वमें चतुर्थ अध्याय समाप्त।

सौप्तिक पर्वमे ५ञ्चम अध्याय।

कृपाचार्य बोले, मूर्खको कितना ही समुझाओ तौ भी वह नहीं समझता, हमारी बुद्धिमें ऐसा आता है, कि जिस मनुष्यके वशमें इन्द्री नहीं होती, वह पूरी रीतिसे अर्थ और धर्मके जाननेमें समर्थ नहीं होता, इसी प्रकार महाबुद्धिमान भी नम्रताके मारे, दूसरे प्रकारकी शिक्षा ही नहीं सुनता। इसी लिये यह भी पूर्ण रीतिसे धर्म और अर्थके विषयोंको नहीं जान सक्ता। यदि मूर्ख वीर बहुत दिनतक भी पण्डितोंकी सेवा

मत्तोन्मत्तप्रमत्तेषु न शस्त्राणि च पातयेत् ॥ २२ ॥
इत्येवं गुरुभिः पूर्वमुपदिष्टं नृणां सदा।
सोऽहमुत्क्रम्य पन्थानं शास्त्रदृष्टं सनातनम् ॥ २३ ॥
अमार्गेणैवमारभ्य घोरामापदमागतः।
तां चापदं घोरतरां प्रवदन्ति मनीषिणः ॥ २४ ॥
यदुद्यम्य महत्कृत्यं भयादपि निवर्तते।
अशक्तश्चैव तत्कर्तुं कर्मशक्तिबलादिह ॥ २५ ॥
न हि दैवाद्धरीयो वै मानुषं कर्म कथ्यते।
मानुष्यं कुर्वतः कर्म यदि दैवान्न सिध्यति ॥ २६ ॥
स पथः प्रच्युतो धर्माद्विपदं प्रतिपद्यते।
प्रतिज्ञानं ह्यविज्ञानं प्रवदन्ति मनीषिणः ॥ २७ ॥
यदारभ्य क्रियां काञ्चिद्धयादिह निवर्त्तते।
तदिदं दुष्प्रणीतेन भयं मां समुपास्थितम् ॥ २८ ॥
न हि द्रोणसुतः संख्ये निवर्त्तेत कथञ्चन।
इदं च सुमहद्भूतं दैवदंडमिवोद्यतम् ॥ २९ ॥
न चैतदभिजानामि चिन्तयन्नपि सर्वथा।

डरे और सोकर उसी समय उठे तथा पागल, मतवाले और प्रमत्त मनुष्यपर शस्त्र न चलावे। परन्तु मैं सनातन शास्त्र में लिखे धर्मको छोडकर अधर्म करना चाहता था। इसी लिये इस घोर आपत्तिमें पडा। महात्मा उसे ही घोर आपत्ति कहते हैं, कि जो मनुष्य जिस कामको करना चाहे और भयसे उस कामको विना करे लौट आवे। जैसे असमर्थ कर्म नहीं कर सक्ता, वैसेही उद्योगी मनुष्य जब लौटता है, तब वह भी उसीके समान होजाता है। जगत्में प्रारब्धके आगे मनुष्यका कर्म नहीं चलता परन्तु यदि मनुष्य परिश्रम करके अपने कार्यको समाप्त न कर सके और धर्मसे भी नष्ट होजाय, तब आपत्तिमें अवश्य ही पडता है। (२१-२७)

पण्डित मनुष्यको उचित है, कि कामके आरम्भसे पहिले ही उसके बिगडने और सुधरनेके विषयोंको देख ले, नहीं तो पीछे मेरे समान दुःखमें पडकर भयसे कार्य छोडकर निवृत्त होना पडता है, मैंने विना विचारे यह काम किया था, जो हो द्रोणाचार्यका पुत्र युद्धसे नहीं लौटेगा, परन्तु यह भूत [illegible] समान खडा है मैं अत्यन्त विचारने

अनेयस्त्ववसानीयो दुरात्मा पापपूरुषः ।
दिष्टमुत्सृज्य कल्याणं करोति बहुपापकम् ॥ ६ ॥
नाथवन्तं तु सुहृदः प्रतिषेधन्ति पातकात् ।
निवर्त्तते तु लक्ष्मीवान्नालक्ष्मीवान्निवर्तते ॥ ७ ॥
यथा शुचावचैर्वाक्यैः क्षिप्तचित्तो नियम्यते ।
तथैव सुहृदा शक्यो न शक्यस्त्ववसीदति ॥ ८ ॥
तथैव सुहृदं प्राज्ञं कुर्वाणं कर्म पापकम् ।
प्राज्ञाः संप्रतिषेधन्ति यथाशक्ति पुनः पुनः ॥ ९ ॥
स कल्याणे मनः कृत्वा नियम्यात्मानमात्मना ।
कुरु मे वचनं तात येन पश्चान्न तप्यसे ॥ १० ॥
न वधः पूज्यते लोके सुप्तानामिह धर्मतः ।
तथैवापारतज्ञत्राणां विमुक्तरथवाजिनाम् ॥ ११ ॥
ये च ब्रुयुरतत्वारमीति ये च स्युः शरणागताः ।
विमुक्तमूर्धजा ये च ये चापि रुदत्यनाथाः ॥ १२ ॥

कर, तौ भी धर्मको इस प्रकार नहीं जान सक्ता, जैसे करछी भोजनके रसको। और बुद्धिमान उन्हीं पंडितोंके पास क्षणमात्र बैठनेसे भी धर्मको इस प्रकार जान लेता है, जैसे जीभ अन्नके रसोंको। जो धर्म सुननेकी इच्छावाला मनुष्य इन्द्रियोंको वशमें कर लेता है, वह

कर पापसे बचता है, और पापी नहीं। जैसे मित्र अनेक प्रकारके वचन कहकर पागलको समझाते हैं। ऐसे ही साधारण मनुष्यको भी समयपर समझाना चाहिये। जब देखे कि हमारा कोई बुद्धिमान मित्र पाप करता है, तब पंडितको उचित है, कि अपनी शक्तिभर

ध्रुवं येयमधर्म मे प्रवृत्ता कलुषा मतिः ॥ ३० ॥
तस्याः फलमिदं घोरं प्रतिघाताय कल्पते ।
तदिदं दैवविहितं मम संख्ये निवर्त्तनम् ॥ ३१ ॥
नान्यत्र दैवादुत्पातमिह शक्यं कथञ्चन ।
सोऽहमद्य महादेवं प्रपद्ये शरणं विभुम् ॥ ३२ ॥
दैवदंडमिमं घोरं स हि मे नाशयिष्यति ।
कपर्दिनं देवदेवमुमापतिमनामयम् ॥ ३३ ॥
कपालमालिनं रुद्रं भगनेत्रहरं हरम् ।
स हि देवोऽत्यगाद्देवांस्तपसा विक्रमेण च ।
तस्माच्छरणमभ्येमि गिरिजं शूलपाणिनम् ॥ ३४ ॥ [२४८]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिके पर्वणि द्रौणिचिन्तायां षष्ठोऽध्यायः ॥ ६ ॥

सञ्जय उवाच— एवं सञ्चिन्तयित्वा तु द्रोणपुत्रो विशाम्पते ।
अवतीर्य रथोपस्थाद्देवेशं प्रणतः स्थितः ॥ १ ॥

द्रौणिरुवाच— उग्रं स्थाणुं शिवं रुद्रं सर्वमीशानमीश्वरम् ।
गिरिजं परमं देवं भवभावनमीश्वरम् ॥ २ ॥
शितिकण्ठमजं शुभ्रं दक्षमन्युहरं हरम् ।

अद्य स्वप्स्यन्ति पञ्चाला विमुक्तकवचा विभो।
विश्वस्ता रजनीं सर्वे प्रेता इव विचेतसः ॥ १३ ॥
यस्तेषां तदवस्थानां द्रुह्येत पुरुषोऽनृजुः।
व्यक्तं स नरके मज्जेदगाधे विपुलेऽप्लवे ॥ १४ ॥
सर्वास्त्रविदुषां लोके श्रेष्ठस्त्वमसि विश्रुतः।
न च ते जातु लोकेऽस्मिन्सुसूक्ष्ममपि किल्बिषम् ॥१५॥
त्वं पुनः सूर्यसङ्काशः श्वोभूत उदिते रवौ।
प्रकाशे सर्वभूतानां विजेता युधि शात्रवान् ॥ १६ ॥
असम्भावितरूपं हि त्वयि कर्म विगर्हितम्।
शुक्ले रक्तमिव न्यस्तं भवेदिति मतिर्मम ॥ १७ ॥

अश्वत्थामोवाच—एवमेव यथाऽऽत्थ त्वं मातुलेह न संशयः।
तैस्तु पूर्वमयं सेतुः शतधा विदलीकृतः ॥ १८ ॥
प्रत्यक्षं भूमिपालानां भवतां चापि सन्निधौ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ १९ ॥
कर्णश्च पतिते चक्रे रथस्य रथिनां वरः।
उत्तमे व्यसने मग्नो हतो गाण्डीवधन्वना ॥ २० ॥

ऐसे मनुष्योंको मारना धर्म नहीं। इस समय सब पाञ्चाल विश्वास सहित कवच खोलकर प्रेतके समान अचेत सो रहे हैं, जो पापी मूर्ख इस समय उनसे द्रोह करेगा वह अवश्य ही अपार घोर नरकमें जायगा। (७-१४)

हमारी यह इच्छा है कि तुम सब शस्त्र जाननेवाले और प्रसिद्ध वीर हो, तुम्हे जगतमें थोडा भी कलङ्क न लगने पावे। प्रातःकाल होते ही तुम सूर्य के समान तेज धारण करके सब शत्रुओंको जीतियो, यदि तुम सोते पाञ्चालोंको मारोगे तो तुम्हारे जीवनमें ऐसा कलङ्क लग जायगा, जैसे सफेद वस्त्रमें लाल रङ्गका धब्बा। (१५—१७)

अश्वत्थामा बोले, हे मामा! आपने जो कहा वह सब वैसे ही है, इसमें कुछ सन्देह नहीं, परन्तु पाण्डवोंहीने पहिले इस धर्मरूपी पुलको काटकर सैकडों टुकडे कर दिये हैं, अनेक राजा और आपके देखते देखते शस्त्ररहित हमारे पिताको धृष्टद्युम्नने मार डाला। जिस समय महारथ कर्णका पहिया पृथ्वीमें घुस गया था और वे उसके निकालनेमें महापरिश्रम कर रहे थे उसी समय अर्जुनने उन्हें मारडाला, शिखण्डीको आगे

विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३ ॥
श्मशानवासिनं हरं महागणपतिं विभुम् ।
खट्वाङ्गधारिणं रुद्रं जटिलं ब्रह्मचारिणम् ॥ ४ ॥
मनसा सुविशुद्धेन दुष्करेणाल्पचेतसा ।
सोऽहमात्मोपहारेण यक्ष्ये त्रिपुरघातिनम् ॥ ५ ॥
स्तुतं स्तुत्यं स्तूयमानममोघं कृत्तिवाससम् ।
विलोहितं नीलकण्ठमसह्यं दुर्निवारणम् ॥ ६ ॥
शक्रं ब्रह्मसृजं ब्रह्म ब्रह्मचारिणमेव च ।
व्रतवन्तं तपोनिष्ठमनन्तं तपतां गतिम् ॥ ७ ॥
बहुरूपं गणाध्यक्षं त्र्यक्षं पारिषदप्रियम् ।
धनाध्यक्षं क्षितिमुखं गौरीहृदयवल्लभम् ॥ ८ ॥
कुमारपितरं पिङ्गं गोवृषोत्तमवाहनम् ।
तनुवाससमत्युग्रमुमाभूषणतत्परम् ॥ ९ ॥
परं परेभ्यः परमं परं यस्मान्न विद्यते ।
हव्यस्रोत्तमभर्त्तारं दिगन्तं देशरक्षिणम् ॥ १० ॥
हिरण्यकवचं देवं चंद्रमौलिविभूषणम् ।
प्रपद्ये शरणं देवं परमेण समाधिना ॥ ११ ॥

देनेवाले, विहार और प्रकाश करनेवाले, जगत्पावन ईश्वर, नीलकण्ठ, सनातन, व्यापक, दक्षयज्ञविनाशक, भक्तदुःखना, शक्र, जगद्रूप, विरूपाक्ष, अनेक रूपधारी, पार्वतीपति, श्मशानवासी, महाबलवान गणोंके स्वामी, सर्व व्यापक, नरपञ्जर धारी, रुद्र, जटाधारी, ब्रह्मचारी, त्रिपुरासुरनाशक, स्तुतिकरने योग्य, स्तुति किये हुये देवतोंसे स्तुतियोग्य, अनन्त, कृत्तिवासा, विलोहित, नीलकण्ठ, न सहनेयोग्य, दुःख निवारण करने योग्य, हव्य, यज्ञको बनानेवाले, ब्रह्म, ब्रह्मचारी, व्रतधारी, तपस्वी, अपार, तपस्वियोंको फल देनेवाले, अनेक रूपधारी, त्रिनेत्रगणोंके प्यारे, धनके स्वामी जगत्के मुख, पार्वतीके हृदयके प्यारे, कार्त्तिकेयके पिता, उत्तम बैलपर चढनेवाले, सूक्ष्म वस्त्रधारी, पार्वतीको भूषण पहिरानेवाले, उत्तमसे उत्तम, अत्यन्त उत्तम, सबसे उत्तम, उत्तम शस्त्रधारी, सब जगत्के स्वामी, सब दिशा और देशोंके रक्षक, सुवर्ण कवचधारी, और चन्द्रमाको माथेमें धारण करनेवाले भगवान शिवको मैं अत्यन्त श्रद्धायुक्त

तथा शांतनवो भीष्मो न्यस्तशस्त्रो निरायुधः ।
शिखण्डिनं पुरस्कृत्य हतो गाण्डीवधन्वना ॥ २१ ॥
भूरिश्रवा महेष्वासस्तथाप्रायगतो रणे ।
क्षोशतां भूमिपालानां युयुधानेन पातितः ॥ २२ ॥
दुर्योधनश्च भीमेन समेत्य गदया रणे ।
पश्यतां भूमिपालानामधर्मेण निपातितः ॥ २३ ॥
एकाकी बहुभिस्तत्र परिवार्य महारथैः ।
अधर्मेण नरव्याघ्रो भीमसेनेन पातितः ॥ २४ ॥
विलापो भग्नस्कन्धस्य यो मे राज्ञः परिश्रुतः ।
वार्तिकाणां कथयतां स मे मर्माणि कृन्तति ॥ २५ ॥
एवं चाधर्मिकाः पापाः पाञ्चाला भिन्नसेतवः ।
तानेवं भिन्नमर्यादान्किं भवान्न विगर्हति ॥ २६ ॥
पितृहन्तॄनहं हत्वा पाञ्चालान्निशि सौप्तिके ।
कामं कीटः पतङ्गो वा जन्म प्राप्य भवामि वै ॥ २७ ॥
त्वरे चाहमनेनाद्य यदिदं मे चिकीर्षितम् ।
तस्य मे त्वरमाणस्य कुतो निद्रा कुतः सुखम् ॥ २८ ॥
न स जातः पुमाँल्लोके कश्चिन्न भविष्यति ।
यो मे व्यावर्त्तयेदेतां वधे तेषां कृतां मतिम् ॥ २९ ॥

सञ्जय उवाच — एवमुक्त्वा महाराज द्रोणपुत्रः प्रतापवान् ।

इमां चेदापदं घोरां तराम्यद्य सुदुष्कराम्।
सर्वभूतोपहारेण यक्ष्येऽहं शुचिना शुचिम् ॥ १२ ॥
इति तस्य व्यवसितं ज्ञात्वा योगात्सुकर्मणः।
पुरस्तात्काञ्चनी वेदी प्रादुरासीन्महात्मनः ॥ १३ ॥
तस्यां वेद्यां तदा राजंश्चित्रभानुरजायत।
स दिशो विदिशः खं च ज्वालाभिरिव पूरयन् ॥१४॥
दीप्तास्यनयनाश्चात्र नैकपादशिरोभुजाः।
रत्नचित्राङ्गदधराः सस्रुवनकरास्तथा ॥ १५ ॥
द्वीपिशलप्रतीकाशाः प्रादुरासन्महागणाः।
श्वक्षराक्षोष्ट्रमुखाश्च हयगोमायुगोमुखाः ॥ १६ ॥
ऋक्षमार्जारवदना व्याघ्रद्वीपिमुखास्तथा।
काकवक्त्राः शुवमुखाः शुकवक्त्राम्नथैव च ॥ १७ ॥
महाजगरवक्त्राश्च हंसवक्त्राः शिनप्रभाः।
दार्वीघाटमुखाश्चापि चापवक्त्राश्च भारत ॥ १८ ॥
कूर्मनक्रमुखाश्चैव शिशुमारमुखास्तथा।
महामकरवक्त्राश्च तिमिवक्त्राम्नथैव च ॥ १९ ॥
हरिवक्त्राः शौष्कमुखाः कपोतिभमुखास्तथा।

एकान्ते योजयित्वाश्वान्प्रायादभिमुखः परान्॥ ३० ॥
तमब्रूतां महात्मानौ भोजशारद्वतावुभौ।
किमर्थं स्यन्दनो युक्तः किं च कार्यं चिकीर्षितम्॥३१॥
एकसार्थप्रयातौस्वस्त्वया सह नरर्षभ।
समदुःखसुखौ चापि नावां शङ्कितुमर्हसि ॥ ३२ ॥
अश्वत्थामा तु संक्रुद्धः पितुर्वधमनुस्मरन्।
ताभ्यां तथ्यं तथाऽऽचख्यौ यदस्यात्मचिकीर्षितम्॥३३॥
हत्वा शतसहस्राणि योधानां निशितैः शरैः।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ३४ ॥
तं तथैव हनिष्यामि न्यस्तधर्माणमद्य वै।
पुत्रं पाञ्चालराजस्य पापं पापेन कर्मणा ॥ ३५ ॥
कथं च निहतः पापः पाञ्चाल्यः पशुवन्मया।
शस्त्रेण विजिताँल्लोकान्नाप्नुयादिति मे मतिः ॥ ३६ ॥
क्षिप्रं सन्नद्धकवचौ सखड्गावात्तकार्मुकौ।
मामास्थाय प्रतीक्षेतां रथवर्यौ परन्तपौ ॥ ३७ ॥
इत्युक्त्वा रथमास्थाय प्रायादभिमुखः परान्।

अश्वत्थामा उठे और अपने रथमें घोडे जोडकर एकलेही शत्रुवोंकी ओर चल दिये, तब महात्मा कृपाचार्य और कृतवर्मा बोले, हे पुरुषसिंह! आपने अपने रथमें घोडे क्यों जोडे? आपके चित्तमें क्या आया है? हम लोग प्रातःकाल होते ही आपके सङ्ग युद्ध करनेको चलेंगे, और आपके समान ही सुखदुःख भोगेंगे, परन्तु इस समय आप कहां जाते सो कहिये? (३०-३२)

उनके वचन सुन क्रोध भरे अश्वत्थामा अपने पिताके मरनेका स्मरण करके अपनी इच्छा प्रकाशित करने लगे। आप लोग जानते हैं, कि हमारे पिताने अपने तेज बाणोंसे लक्षों वीरोंको मारा था, और पीछे शस्त्र त्यागनेपर धृष्टद्युम्नने उन्हें मार डाला, अब मैं भी उस पापी, अधर्मी, शस्त्ररहित, धृष्टद्युम्नको वैसे ही पाप कर्मसे मारूंगा, मैं उस पापीको विना शस्त्र ही पशुके समान मारूंगा, जिसमे उसे स्वर्ग न हो। आप दोनों महारथ शीघ्र कवच पहिनकर खड्ग और धनुष धारण करके यहां खडे खडे हमारे लौटनेका मार्ग देखो। (३३—३७)

ऐसा कहकर अश्वत्थामाने अपना

पारावतमुखाश्चैव मद्गुवक्त्रास्तथैव च ॥ २० ॥
पाणिकर्णाः सहस्राक्षास्तथैव च महोदराः।
निर्मांसाः काकवक्त्राश्च श्येनवक्त्राश्च भारत ॥२१॥
तथैवाशिरसो राजन् ऋक्षवक्त्राश्च भारत।
प्रदीप्तनेत्रजिह्वाश्च ज्वालावर्णास्तथैव च ॥ २२ ॥
ज्वालाकेशाश्च राजेन्द्र ज्वलद्रोमचतुर्भुजाः।
मेषवक्त्रास्तथैवान्ये तथा छागमुखा नृप ॥ २३ ॥
शङ्खाभाः शङ्खवक्त्राश्च शङ्खवर्णास्तथैव च।
शङ्खमालापरिकराः शङ्खध्वनिसमस्वनाः ॥ २४ ॥
जटाधराः पञ्चशिखास्तथा मुण्डाः कृशोदराः।
चतुर्दंष्ट्राश्चतुर्जिह्वाः शंकुकर्णाः किरीटिनः ॥ २५ ॥
मौञ्जीधराश्च राजेन्द्र तथाऽऽकुञ्चितमूर्धजाः।
उष्णीषिणो मुकुटिनश्चारुवक्त्राः स्वलंकृताः ॥२६॥
पद्मोत्पलापीडधरास्तथा मुकुटधारिणः।

मगर, मछली, कछवे, कबूतर, परेवा, मजुनामक मछलीके समान मुख था। (१६—२०)

किसीके हाथमें कान था, किसीके हजारों नेत्र थे, किसीके बडामारी पेट था, किसीके शरीरमें मांसही नहीं था, किसीके कौवेका, किसीका गृद्धका मुख था, किसीके शिर ही नहीं था, किसीके रीछका ऐसा मुख था, किसीके नेत्र अग्निके समान थे, किसीकी बडी भारी जिह्वा थी, किसीका अग्निके समान रङ्ग था, किसीके नेत्र और बाल अग्निके समान थे, सबके चार चार हाथ थे, किसीका बकरेके समान मुख था, किसीका मेढेके समान मुख था, किसीका मुख शङ्खके समान था, किसीका शरीर शङ्खके समान था, कोई शङ्खकी माला पहिरे था, कोई शङ्ख बजा रहा था, और कोई खड्ग हाथमें लिये था, किसीके जटा थी, किसीके पांच शिखा थीं। कोई शिर मुडाये था, किसीका पतला पेट था, किसीके चार दांत थे, किसीके चार जीभ थीं, किसीके कान छोटे छोटे थे, कोई मूंजकी करधनी पहिरे था, और कोई पगडी बांधे था। (२१-२६)

किसीका बडा सुन्दर मुख था, और कोई सुन्दर आभूषण पहिरे था, किसीके गलेमें कमलकी माला और किसीके गलेमें नीले कमलकी माला थी, कोई मुकुट धारण किये थे, कोई उत्तम महा-

माहात्म्येन च संयुक्ताः शतशोऽथ सहस्रशः॥ २७ ॥
शतघ्नीवज्रहस्ताश्च तथा मुसलपाणयः ।
भुशुण्डीपाशहस्ताश्च दण्डहस्ताश्च भारत ॥ २८ ॥
पृष्टेषु चक्रेषुधयश्चित्रचर्माणोत्कटास्तथा ।
सध्वजाः सपताकाश्च सघण्टाः सपरश्वधाः ॥ २९ ॥
महापाशोद्यतकरास्तथा लगुडपाणयः ।
स्थूणाहस्ताः खड्गहस्ताः सर्पोच्छ्रितकिरीटिनः॥ ३० ॥
महासर्पाङ्गदधराश्चित्राभरणधारिणः ।
रजोध्वजाः पङ्कदिग्धा सर्वे शुक्लाम्बरस्रजः ॥ ३१ ॥
नीलाङ्गाः पिङ्गलाङ्गाश्च मुण्डवक्त्रास्तथैव च ।
भेरीशङ्खमृदङ्गांश्च हर्षरानकगोमुखान् ॥ ३२ ॥
अवादयन्पारिषदाः प्रहृष्टाः कनकप्रभाः ।
गायमानास्तथैवान्ये नृत्यमानास्तथाऽपरे ॥ ३३ ॥
लङ्घयन्तः प्लवन्तश्च वल्गन्तश्च महारथाः ।
धावन्तो जवना मुण्डाः पवनोद्धतमूर्धजाः ॥ ३४ ॥
मत्ता इव महानागा विनदन्तो मुहुर्मुहुः ।
सुभीमा घोररूपाश्च शूलपट्टिशपाणयः ॥ ३५ ॥
नानाविरागवसनाश्चित्रमाल्यानुलेपनाः ।

रथसे भरे थे, ऐसे सहस्रों गण अश्वत्थामाको दिखाई दिये, किसीके हाथमें शतघ्नी. किसीके हाथमें लाठी. किसीके हाथमें दण्डा, किसीके हाथमें भुशुण्डी, किसीके हाथमें परिघ.किसीके हातमें बाण, किसीके घण्टा. किसीके परश्वध. किसीके करती और किसीके सांप था. हाथमें सबके पास ध्वजा और पताका थी, कोई सांपका बाजूबन्द पहने था, और कोई रुधिर लिप्त वस्त्र पहिने था। किसीके फरसे टूटे हुए थे, सब धूल और मिट्टीसे भरे सफेद वस्त्र और माला पहिने नीले और चमके वस्त्रवाले थे. कोई मृदङ्ग, कोई घण्टा, कोई गोमुख बजाते थे. कोई सोनेके समान रङ्ग वाला रूप नाचता था, कोई कूदता था, कोई उछलता था. कोई भागता था, कोई वेगसे दौडता था. किसीके बाल उडते हुए थे. कोई मतवाले हाथीके समान गर्जना करता हुआ बारबार घूमते थे, कोई भूल और दृष्टि हाथमें लेकर भयानक रूप धारण करके दौडते थे.

रत्नचित्राङ्गदधराः समुद्यतकरास्तथा ॥ ३६ ॥
हन्तारो द्विषतां शूराः प्रसह्यासह्यविक्रमाः ।
पातारोऽसृग्वसौघानां मांसांत्रकृतभोजनाः ॥ ३७ ॥
चूडालाः कर्णिकाराश्च प्रहृष्टाः पिठरोदराः ।
अतिह्रस्वातिदीर्घाश्च प्रलम्बाश्चातिभैरवाः ॥ ३८ ॥
विकटाः कालल म्बोष्ठा वृहच्छेफाण्डपिण्डिकाः ।
महार्हनानाविकटा मुण्डाश्च जटिलाः परे ॥ ३९ ॥
सार्केन्दुग्रहनक्षत्रां यां कुर्युस्ते महीतले ।
उत्सहेरंश्च ये हन्तुं भूतग्रामं चतुर्विधम् ॥ ४० ॥
ये च वीतभया नित्यं हरस्य भ्रुकुटीसहाः ।
कामकारकरा नित्यं त्रैलोक्यस्येश्वरेश्वराः ॥ ४१ ॥
नित्यानन्दप्रमुदिता वागीशा वीतमत्सराः ।
प्राप्याष्टगुणमैश्वर्यं येन यास्यन्ति वै स्वयम् ॥ ४२ ॥
येषां विस्मयते नित्यं भगवान्कर्मभिर्हरः ।
मनोवाक्कर्मभिर्युक्तैर्नित्यमाराधितश्च यैः ॥ ४३ ॥
मनोवाक्कर्मभिर्भक्तान्पाति पुत्रानिवौरसान् ।
पिबन्तोऽसृग्वसाश्चान्ये क्षुद्रा ब्रह्मद्विषां सदा ॥ ४४ ॥

कोई अनेक प्रकारके रङ्गे वस्त्र, अनेक प्रकारकी माला, कोई अनेक प्रकारकी गन्धि और रत्नोंके आभूषण किये था, वे सब शत्रुनाशन महापराक्रमी भक्तों-की रक्षा करनेवाले और मांस तथा आन्तका भोजन करनेवाले थे, कोई चुडेल, कोई कर्णिकार और पिठरोदर नामक भूत थे, किसीके बड़े बड़े लिङ्ग थे और किसीके बड़े बड़े अण्डकोश थे, किसीके बड़े बड़े दांत और किसीकी भयानक जटा थीं. उस समय उन्होंने सूर्य, अग्नि, सूर्य, चन्द्रमाके समान पृथ्वी कर दई। (२८–३९)

येही सब गण चारों प्रकारके जगत्का नाश कर सकते हैं, इन्हें कहीं भय नहीं होता, यही शिवकी मौंहको देख सकते हैं। येही जगत्के स्वामी और सब काम करनेमें समर्थ हैं, सब विद्याओंको जाननेवाले हैं, किसीका द्वेष नहीं करते। आठों प्रकारकी ऋद्धी प्राप्त होने पर भी अभिमान नहीं करते, इनका कर्म देखकर शिव भी आश्चर्य करते हैं, यह भी शिवकी सदा आराधना करते हैं, ब्राह्मणोंके वैरियोंका रुधिर पीते हैं।

स्यालस्तव महाराज तत उच्चुक्रुशुर्जनाः ॥ २२ ॥
हताश्वो विरथश्चैव च्छिन्नकेतुश्च मारिष ।
धन्वी धनुर्वरं गृह्य रथाद्भूमावतिष्ठत ॥ २३ ॥
व्यसृजत्सायकांश्चैव स्वर्णपुङ्खाञ्शिलाशितान् ।
छादयामास समरे तव स्यालस्य तं रथम् ॥ २४ ॥
शलभानामिव व्राताञ्शरव्रातान्महारथः ।
रथोपगान्समीक्ष्यैवं विव्यधे नैव सौबलः ॥ २५ ॥
प्रममाथ शरांस्तस्य शरव्रातैर्महायशाः ।
तत्रातुष्यन्त योधाश्च सिद्धाश्चापि दिवि स्थिताः ॥२६॥
सुतसोमस्य तत्कर्म दृष्ट्वाश्रद्धेयमद्भुतम् ।
रथस्थं शकुनिं यस्तु पदातिः समयोधयत् ॥ २७ ॥
तस्य तीक्ष्णैर्महावेगैर्भल्लैः सन्नतपर्वभिः ।
व्यहनत्कार्मुकं राजन्तूणीरांश्चैव सर्वशः ॥ २८ ॥
स च्छिन्नधन्वा विरथः खड्गमुद्यम्य चानदत् ।
वैदूर्योत्पलवर्णाभं दन्तिदन्तमयत्सरुम् ॥ २९ ॥
भ्राम्यमाणं ततस्तं तु विमलाम्बरवर्चसम् ।

हे महाराज ! अनन्तर तुम्हारे साले शकुनिने सुतसोमके घोडे सारथी और रथको काट डाला, तब सब हाहाकार करने लगे ॥ परन्तु महावीर सुतसोम रथ, सारथी और ध्वजा कटनेपर भी धनुष लेकर पृथ्वीपर खडा होगया ॥ श्रुतसोमने पृथ्वीपर खडे होकर तुम्हारे सालेके रथको सुवर्णपङ्खवाले बाणोंसे छा दिया ॥ (२२-२४)

टीडीदलके समान सुतसोमके बाणोंको देखकर भी सुबलपुत्र शकुनि कुछ न डरे और अपने बाणोंसे सुतसोमके सब बाणोंको काट डाला । तब सब योद्धा और आकाशमें खडे सिद्ध बहुत प्रसन्न हुए, नीचे खडे हुए सुतसोम रथमें बैठे हुए शकुनिसे युद्ध करते थे, यह देख सब योद्धा और सिद्धोंने उसकी बडी प्रशंसा की ॥ (२५-२७)

तब शकुनीने अपने तेज बाणोंसे उनके धनुष, रोदे, सब तूणीरोंको काट दिया । खड्ग और रथहीन सुतसोम लहसुनिया और पद्मके समान सुन्दर और हाथीदांतकी मूठवाले खड्गको लेकर गर्जने लगे । उस निर्मल आकाशके समान खड्गको लेकर सुतसोम घुमाने लगे, उस समय उस खड्गका तेज

कालदण्डोपमं सेने सुतसोमस्य धीमतः ॥ ३० ॥
सोऽचरत्सहसा खड्गी मण्डलानि सहस्रशः।
चतुर्दश महाराज शिक्षाबलसमन्वितः ॥ ३१ ॥
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम्।
सम्पातसमुदीर्णं च दर्शयामास संयुगे ॥ ३२ ॥
सौबलस्तु ततस्तस्य शरांश्चिक्षेप वीर्यवान्।
तानापतत एवाशु चिच्छेद परमासिना ॥ ३३ ॥
ततः क्रुद्धो महाराज सौबलः परवीरहा।
प्राहिणोत्सुतसोमाय शरानाशीविषोपमान् ॥ ३४ ॥
चिच्छेद तांस्तु खड्गेन शिक्षया च बलेन च।
दर्शयँल्लाघवं युद्धे तार्क्ष्यतुल्यपराक्रमः ॥ ३५ ॥
तस्य सञ्चरतो राजन्मण्डलावर्तने तदा।
क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद सुप्रभम् ॥ ३६ ॥
स च्छिन्नः सहसा भूमौ निपपात महानसिः।
अर्धमस्य स्थितं हस्ते सुत्सरोस्तत्र भारत ॥ ३७ ॥
छिन्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट्।
प्राविध्यत ततः शेषं सुतसोमो महारथः ॥ ३८ ॥

साक्षात् यमराजके दण्डके सामान दीखता था ॥ (२८-३०)

हे महाराज! शिक्षा और बलसे भरे हुए बुद्धिमान् सुतसोम चौदह प्रकारकी गतियोंसे युद्धमें घूमने लगे। सुतसोमने युद्धमें भ्रान्त, उद्भ्रान्त, आविद्ध, आप्लुत, विप्लुत, सृत, सम्पात, और समुदीर्ण रीतियोंको दिखलाया ॥ सुबलपुत्र शकुनि भी सुतसोमके ऊपर तेज बाण चलाते रहे, परन्तु सुतसोमने खड्गसे उन सब बाणोंको काटदिया ॥ ३१-३३

हे महाराज! तब शत्रुनाशन शकुनिने क्रोध करके विषीले सांपोंके समान बाण चलाये॥ गरुडके समान पराक्रमी सुतसोमने अपने विद्याबल और शीघ्रतासे उन सब बाणोंको काट दिया ॥ हे राजन्! युद्धमें घूमते हुए सुतसोमके प्रकाशमान खड्गको शकुनिने एक तेज क्षुरप्र बाणसे काट दिया ॥ (३४-३६)

हे राजन्! वह खड्ग कट कर आधा पृथ्वीमें गिर पडा और आधा सुतसोमके हाथमें रह गया, हे राजन्! अपने खड्गको कटा हुआ देखकर महारथ सुतसोम छः पग कूदे और उसी आधे

चतुर्विधात्मकं सोमं ये पिबन्ति च सर्वदा ।
श्रुतेन ब्रह्मचर्येण तपसा च दमेन च ॥ ४५ ॥
ये समाराध्य शूलाङ्कं भवसायुज्यमागताः ।
यैरात्मभूतैर्भगवान्पार्वत्या च महेश्वरः ॥ ४६ ॥
महाभूतगणैर्भुङ्क्ते भूतभव्यभवत्प्रभुः ।
नानावादित्रहसितक्ष्वेडितोत्कुष्टगर्जितैः ॥ ४७ ॥
संत्रासयन्तस्ते विश्वमश्वत्थामानमभ्ययुः ।
संस्तुवन्तो महादेवं भाः कुर्वाणाः सुवर्चसः ॥ ४८ ॥
विवर्धयिषवो द्रौणेर्महिमानं महात्मनः ।
जिज्ञासमानास्तत्तेजः सौम्यिकं च दिदृक्षवः ॥ ४९ ॥
भीमोग्रपरिघालातशूलपट्टिशपाणयः ।
घोररूपाः समाजग्मुर्भूतसङ्घाः समन्ततः ॥ ५० ॥
जनयेयुर्भयं ये स्म त्रैलोक्यस्यापि दर्शनात् ।
तान्प्रेक्षमाणोऽपि भयं न चकार महाबलः ॥ ५१ ॥
अथ द्रौणिर्धनुष्पाणिर्बद्धगोधाङ्गुलित्रवान् ।
रक्षयन्नात्मनात्मानमुपायादुपायवित् ॥ ५२ ॥
धनूंषि रुक्मविकृतान्यस्त्राणि निशिताः शराः ।
हविरात्मवतश्चात्मा यस्मिन् भारत कर्मणि ॥ ५३ ॥

अश्वत्थामानमासाद्य शरवर्षैरवाकिरत् ॥ ६१ ॥
तस्यापि शरवर्षाणि चर्मणा प्रतिवार्य सः।
सकुण्डलं शिरः कायात् प्राजमानमुपाहरत् ॥ ६२ ॥
ततो भीष्मनिहन्तारं सहसर्वैः प्रभद्रकैः।
आहनत्सर्वतो वीरं नानाप्रहरणैर्बली ॥ ६३ ॥
शिलीमुखेन चान्येन भ्रुवोर्मध्ये समार्पयत्।
स तु क्रोधसमाविष्टो द्रोणपुत्रो महाबलः ॥ ६४ ॥
शिखण्डिनं समासाद्य द्विधा चिच्छेद सोऽसिना।
शिखण्डिनं ततो हत्वा क्रोधाविष्टः परन्तपः ॥ ६५ ॥
प्रभद्रकगणान्सर्वानभिदुद्राव वेगवान्।
यच्च शिष्टं विराटस्य बलं तु भृशमाद्रवत् ॥ ६६ ॥
द्रुपदस्य च पुत्राणां पाञ्चालानां सुहृदामपि।
चकार कदनं घोरं दृष्ट्वा दृष्ट्वा महाबलः ॥ ६७ ॥
अन्यानन्यांश्च पुरुषानभिसृत्याभिसृत्य च।
न्यकृन्तदसिना द्रौणिरसिमार्गविशारदः ॥ ६८ ॥
कालीं रक्तायतनयनां रक्तमाल्यानुलेपनाम्।
रक्ताम्बरधरामेकां पाशहस्तां कुटुम्बिनीम् ॥ ६९ ॥

पृथ्वीमें गिर गया, तब वीर महारथ श्रुतकीर्त्ति, अश्वत्थामाकी ओर सहस्रों बाण बर्षाने लगे, परन्तु अश्वत्थामाने ढालसे उन सब बाणोंको बचाकर चमकते हुये कुण्डलों सहित श्रुतकीर्त्तिका शिर छेदन किया, तब भीष्मके मारनेवाले शिखण्डीको प्रभद्रकवंशी क्षत्रियोंने खड़ा देख अश्वत्थामा उनकी ओर दौड़े, वीर शिखण्डीने भी अनेक प्रकारके बाण चलाये, परन्तु इष्ट सिद्धि न हुई, तब एक बाण दोनों भौंहके बीचमें मारा, उसके लगनेसे द्रोणपुत्रको बड़ा क्रोध हुआ, और दौड़ कर शिखण्डीको मध्य शरीरसे काट दिया। शत्रुनाशन अश्वत्थामा क्रोधमें भरकर शिखण्डीको मारकर प्रभद्रक सेनाकी ओर वेगसे दौड़े। फिर राजा विराटके बलमें जो बचे थे, जो राजा द्रुपदके बेटे, पोते और मित्र रह गये थे, उन सबको मारडाला। (६०—६९)

फिर और और भी प्रबल प्रधान एकएकको चुनचुनकर [illegible]

ततः सौम्येन मंत्रेण द्रोणपुत्रः प्रतापवान्।
उपहारं महामन्युरथात्मानमुपाहरत् ॥ ५४ ॥
तं रुद्रं रौद्रकर्माणं रौद्रैः कर्मभिरच्युतम्।
अभिष्टुत्य महात्मानमित्युवाच कृताञ्जलिः ॥ ५५ ॥

द्रौणिरुवाच— इममात्मानमद्याहं जातमाङ्गिरसे कुले।
स्वयौ जुहोमि भगवन् प्रतिगृह्णीष्व मां बलिम्॥ ५६ ॥
भवद्भक्त्या महादेव परमेण समाधिना।
अस्यामापदि विश्वात्मन्नुपाकुर्मि तवाग्रतः ॥ ५७ ॥
त्वयि सर्वाणि भूतानि सर्वभूतेषु चासि वै।
गुणानां हि प्रधानानामेकत्वं त्वयि तिष्ठति ॥ ५८ ॥
सर्वभूताश्रय विभो हविर्भूतमवस्थितम्।
प्रतिगृह्णाण मां देव यज्ञशक्त्याः परे मया ॥ ५९ ॥
इत्युक्त्वा द्रौणिरास्थाय तां वेदीं दीप्तपावकाम्।
सन्त्यज्यात्मानमारुद्य कृष्णवर्त्मन्युपाविशत्॥ ६० ॥
तमूर्ध्वबाहुं निश्चेष्टं दृष्ट्वा हव्यिकृपस्थितम्।
अब्रवीद्भगवान्साक्षान्महादेवो हसन्निव ॥ ६१ ॥
सत्यशौचार्जवत्यागैस्तपसा नियमेन च।
क्षान्त्या भक्त्या च धृत्या च बुद्ध्या च वचसा तथा॥६२॥
यथावद्धृमाराद्धः कृष्णेनाक्लिष्टकर्मणा।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते ॥ ६३ ॥

माने भगवान शिवकी उत्तम स्तुतिकरके ऐसा कहा। (४७-५५)

अश्वत्थामा बोले, हे भगवन् शिव! सब जगत् आपमें स्थित है, सब जगत्के गुण आपमें विद्यमान है, मैं अङ्गिराके वंशमें उत्पन्न हुआ, ब्राह्मण हूं, सो अब आपकी भक्ति और योगसे अपने शरीरको अग्निमें जलाता हूं, यदि मैं शत्रुओंको नहीं जीत सकता, तो आप इस बलिको ग्रहण कीजिये। ऐसा कहकर अश्वत्थामा उस जलती हुई अग्निमें घुस गये। (५६-६०)

इनको अग्निमें ऊपरको हाथ किये हुये खड़ा देख साक्षात् शिव हंसकर बोले, हे प्यारे भक्त! मुझे कृष्णने सत्य, पवित्रता, कोमलता, त्याग, तप, नियम, क्षमा, भक्ति, धारणा बुद्धि और वचनसे प्रसन्न किया था, इसलिये उनके समान

दृदृशुः कालरात्रिं ते गायमानामवस्थिताम् ।
नराश्वकुञ्जरान्पाशैर्बद्ध्वा घोरैः प्रतस्थुषीम् ॥ ७० ॥
वहन्तीं विविधान्प्रेतान्पाशबद्धान्विमूर्धजान् ।
तथैव च सदा राजन्न्यस्तशस्त्रान्महारथान् ॥ ७१ ॥
स्वप्ने सुप्तानयन्तीं तां रात्रिष्वन्यासु मारिष ।
ददृशुर्योधमुख्यास्ते घ्नन्तं द्रौणिं च सर्वदा ॥ ७२ ॥
यतः प्रभृति संग्रामः कुरुपाण्डवसेनयोः ।
ततः प्रभृति तां कन्यामपश्यन् द्रौणिमेव च ॥ ७३ ॥
तांस्तु दैवहतान्पूर्वं पश्चाद्द्रौणिर्न्यपातयत् ।
त्रासयन्सर्वभूतानि विनदन् भैरवान् रवान् ॥ ७४ ॥
तदनुस्मृत्य ते वीरा दर्शनं पूर्वकालिकम् ।
इदं तद्धि यमन्यन्त दैवेनोपनिपीडिताः ॥ ७५ ॥
ततस्तेन निनादेन प्रत्यबुद्ध्यन्त धन्विनः ।
शिबिरे पाण्डवेयानां शतशोऽथ सहस्रशः ॥ ७६ ॥
सोऽच्छिनत्कस्यचित्पादौ जघनं चैव कस्यचित् ।
कांश्चिद्बिभेद पार्श्वेषु कालसृष्ट इवान्तकः ॥ ७७ ॥
अत्युग्रनिनदैश्चैव नदद्भिश्च मुहुर्मुहुः ।

मुख और लाल नेत्रवाली, काली लाल माला और लाल चन्दन धारण किये काली वृद्धमें घूम रही है, और कहींसे अनेक मनुष्य और हाथियोंको मार रही है. किसीने यह देखा कि मोते हुए दक्षिणाभिमुख महारथियोंको वही काली कहींसे खींच रही है। किसीको यह दीखने लगा कि वही काली और वही अश्वत्थामा युद्धके आरम्भसे हमारा नाश कर रहे हैं। (६८—७३)

हे राजन् ! इस भय दिखानेवाले स्वप्नसे पहले ही प्रहारक वीर, पांचों

अश्वत्थामाने उनका नाश किया, उस समय अश्वत्थामाके भयानक शब्दसे पाण्डवोंके डेरेके सब मनुष्य घबड़ा रहे थे, कोई वीर अश्वत्थामाके भयानक रूपको देखकर उसे साक्षात यमराज समझते थे। (७४—७५)

अनन्तर उस घोर शब्दसे पाण्डवोंके डेरोंमें सोते हुए सैकड़ों सहस्रों धनुर्धारी वीर जागे, तब अश्वत्थामाने भी अन्तकालके यमराजके समान रथ पाण्डवोंके किसीका पैर, किसी का हाथ, किसीकी कोख और किसीकी जङ्घा काट

कुर्वता तान सम्मानं त्वां च जिज्ञासता मया ।
पाञ्चालाः सहसा गुप्ता मायाश्च बहुशः कृताः॥ ६४ ॥
कृतस्तस्यैव सम्मानः पाञ्चालान् रक्षता मया ।
अभिभूतास्तु कालेन नैषामद्यास्ति जीवितम् ॥ ६५ ॥
एवमुक्त्वा महात्मानं भगवानात्मनस्तनुम् ।
आविवेश ददौ चास्मै विमलं खड्गमुत्तमम् ॥ ६६ ॥
अथाविष्टो भगवता भूयो जज्वाल तेजसा ।
वेगवांश्चाभवद्युद्धे देवसृष्टेन तेजसा ॥ ६७ ॥
तमद्रुग्यानि भूतानि रक्षांसि च समाद्रवन् ।
अभितः शत्रुशिबिरं यान्तं साक्षाद्विभेश्वरम्॥ ६८ ॥ [३१६]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिके पर्वणि
द्रौणिकृतशिबिरार्चने षष्ठोऽध्यायः ॥ ६ ॥

धृतराष्ट्र उवाच—तथा प्रयाते शिबिरं द्रोणपुत्रे महारथे ।
कच्चित्तृपश्च भोजश्च भगवन्तौ न जग्मतुः ॥ १ ॥
कच्चिन्न वारितौ क्षुद्रैरक्षिभिर्नोपलक्षितौ ।
असक्षमिति मन्वानौ न निवृत्तौ महारथौ ॥ २ ॥
कच्चिदुन्सृज्य शिबिरं रक्त्वा सोमकपाण्डवान ।

गजाश्वमथितैश्चान्यैर्मही कीर्णाऽभवत्प्रभो ॥ ७८ ॥
क्रोशतां किमिदं कोऽयं कः शब्दः किं नु किं कृतम् ।
एवं तेषां तथा द्रौणिरन्तकः समपद्यत ॥ ७९ ॥
अपेतशस्त्रसन्नाहान्सन्नद्धान्पाण्डुसृञ्जयान् ।
प्राहिणोन्मृत्युलोकाय द्रौणिः प्रहरतां वरः ॥ ८० ॥
ततस्तच्छस्त्रविन्नस्ता उत्पतन्तो भयातुराः ।
निद्रान्धा नष्टसंज्ञाश्च तत्र तत्र निलिल्यिरे ॥ ८१ ॥
ऊरुस्तम्भगृहीताश्च कृच्छ्रलाभिहतौजसः ।
विनदन्तो भृशं त्रस्ताः समासीदन्परस्परम् ॥ ८२ ॥
ततो रथं पुनर्द्रौणिरास्थितो भीमनिःस्वनम् ।
धनुष्पाणिः शरैरन्यान्प्रेषयद्वै यमक्षयम् ॥ ८३ ॥
पुनरुत्पततश्चापि दूराढपि नरोत्तमान् ।
शूरान्सम्पततश्चान्यान्कालराज्ञै न्यवेदयत् ॥ ८४ ॥
तथैव स्यन्दनाग्रेण प्रमथन्स विधावति ।
शरवर्षैश्च विविधैरवर्षच्छात्रवांस्ततः ॥ ८५ ॥
पुनश्च सुविचित्रेण शतचन्द्रेण चर्मणा ।
तेन चासिवरेणाथ तथाऽचरत सोऽसिना ॥ ८६ ॥

दी, कोई हाथी घोड़ोंकी मृटमें आकर मरगया, कोई कहने लगा, यह क्या है ? यह कौन है ? क्यों एक दारुणी इतना हल्ला हो रहा है ? हेरोंमें क्या होता है ? (७८—७९)

इस प्रकार अश्वत्थामा उन वीरोंके लिये कालरूप होगये शस्त्र चलानेवालों में श्रेष्ठ अश्वत्थामाने कवच और शस्त्र-हित अनेक वीरोंको डटते डटते मार डाला । तब निद्रासे व्याकुल अश्वत्थामाके शस्त्रसे पीड़ित अनेक क्षत्रिय इधर उधर डरसे भागने लगे । किसीका पैर न चला कोई भयसे व्याकुल होगया, इस प्रकार ये सब वीर हाहाकार करने लगे । तब अश्वत्थामा फिर शीघ्रतासे घोर शब्दवाले रथपर चढ़े और बाणोंसे सहस्रों वीरोंको मारने लगे और जिसको अपनी ओर आते देखा उसको मार-डाला । (८०-८३)

कोई रथके पहियेसे आकर मारा गया और किसीको अश्वत्थामाने अनेक प्रकारके हथियोंसे मार डाला, किसीको दूर जाकर गदासे दूसरे और आक्रमण करते हुए मारडाले फिर कोई-

दुर्योधनस्य पदवीं गतौ परमिकां रणे ॥ ३ ॥
पञ्चालैर्निहतौ वीरा काचित्तु स्वपतां क्षितौ ।
काचित्ताभ्यां कृतं कर्म तन्ममाचक्ष्व सञ्जय ॥ ४ ॥

सञ्जय उवाच— तस्मिन्प्रयाते शिबिरं द्रोणपुत्रे महात्मनि ।
कृपश्च कृतवर्मा च शिबिरद्वार्यतिष्ठताम् ॥ ५ ॥
अश्वत्थामा तु तौ दृष्ट्वा यत्नवन्तौ महारथौ ।
प्रहृष्टः शनकै राजन्निदं वचनमब्रवीत् ॥ ६ ॥
यत्तौ भवन्तौ पर्याप्तौ सर्वक्षत्रस्य नाशने ।
किं पुनर्योधशेषस्य प्रसुप्तस्य विशेषतः ॥ ७ ॥
अहं प्रवेक्ष्ये शिबिरं चरिष्यामि च कालवत् ।
यथा न कश्चिदपि वां जीवन्मुच्येत मानवः ॥ ८ ॥
तथा भवद्भ्यां कार्यं स्यादिति मे निश्चिता मतिः ।
इत्युक्त्वा प्राविशद्द्रौणिः पार्थानां शिबिरं महत् ॥९॥
अद्वारेणाभ्यवस्कन्द्य विहाय भयमात्मनः ।
स प्रविश्य महाबाहुरुद्देशज्ञश्च तस्य ह ॥ १० ॥
धृष्टद्युम्नस्य निलयं जनकैरभ्युपागमत् ।

तथा स शिचिरं तेषां द्रौणिराहवदुर्मदः ।
व्यक्षोभयत राजेन्द्र महाह्रदमिव द्विपः ॥ ८७ ॥
उत्पेतुस्तेन शब्देन योधा राजन्विचेतसः ।
निद्रार्त्ताश्च भयार्त्ताश्च व्यधावन्त ततस्ततः ॥ ८८ ॥
विस्वरं चुक्रुशुश्चान्ये बहुबद्धं तथाऽवदन् ।
न च स्म प्रत्यपद्यन्त शस्त्राणि वसनानि च ॥ ८९ ॥
विमुक्तकेशाश्चाप्यन्ये नाभ्यजानन्परस्परम् ।
उत्पतन्तोऽपतन् श्रान्ताः केचित्तत्राभ्रमंस्तदा ॥ ९० ॥
पुरीषमसृजन्केचित्केचिन्मूत्रं प्रसुस्रुवुः ।
बन्धनानि च राजेन्द्र संक्षिप्य तुरगा द्विपाः ॥ ९१ ॥
ममं पर्यपतंश्चान्ये कुर्वन्तो महदाकुलम् ।
तत्र केचिन्नरा भीता व्यलीयन्त महीतले ॥ ९२ ॥
तथैव नाशिपतितानपिंषन्गजवाजिनः ।
तस्मिंस्तथा वर्त्तमाने रक्षांसि मुमुदे तदा ॥ ९३ ॥
हृष्टानि व्यनदद्भूयोमुदा भरतसत्तम ।
स शब्दः पुरितो राजन्भूतसङ्घैर्मुदान्वितैः ॥ ९४ ॥
अपूरयद्दिशः सर्वा दिवं चातिमहान्स्वनः ।
तेषामार्त्तस्वरं श्रुत्वा वित्रस्ता गजवाजिनः ॥ ९५ ॥

को मारने लगे। महावीर अश्वत्थामाने उस होनेको ऐसा व्याकुल कर दिया जैसे मदवाला हाथी तालाबको व्याकुल कर देता है। हे राजन! उस घोर शब्दसे सहस्रों योद्धा उठते थे, परन्तु भय और निद्रासे व्याकुल होकर इधर उधर दौड़ने लगते थे. कोई डरा चकता था और कोई हाहाकार करता था। कोई शस्त्र और वस्त्र लेता था. किसीके बाल खुले थे, कोई इधर उधर दौड़ता था और कोई थककर वहीं ढेर हो जाता था। ८९-९०।

हे राजन! हाथी, घोड़े अपने बन्धन छुटाकर भागते थे, कोई हाथी, घोड़ा मूत्र करता था और कोई मल करता था, कहीं घोड़ा मनुष्य मारे मूर्छामें सोते थे और हाथी घोड़े उनको आकर मार डालते थे। (९१-९३)

हे राजन! उसी समय अनेक भागते और भूत प्रसन्नतासे गाते थे और उस शब्दसे आकाश पूरित होगया था. कोई इधर उधर दौड़ने लगे। उनके चलनेसे और शब्द हुई। उस समय

ते तु कृत्वा महत्कर्म श्रान्ताश्च बलवद्रणे ॥ ११ ॥
प्रसुप्ताश्चैव विध्वस्ताः समेत्य परिधाविताः ।
अथ प्रविश्य तद्वेश्म धृष्टद्युम्नस्य भारत ॥ १२ ॥
पाञ्चाल्यं शयने द्रौणिरपश्यत्सुप्तमन्तिकात् ।
क्षौमावद्धाते महति स्पर्द्धास्तरणसंवृते ॥ १३ ॥
माल्यप्रवरसंयुक्ते धूपैश्चूर्णैश्च वासिते ।
तं शयानं महात्मानं विस्रब्धमकुतोभयम् ॥ १४ ॥
प्राबोधयत पादेन शयनस्थं महीपते ।
सम्बुध्य चरणस्पर्शादुत्थाय रणदुर्मदः ॥ १५ ॥
अभ्यजानादमेयात्मा द्रोणपुत्रं महारथम् ।
तमुत्पतन्तं शयनाद्‌श्वत्थामा महाबलः ॥ १६ ॥
केशेष्वालभ्य पाणिभ्यां निष्पिपेष महीतले ।
सबलं तेन निष्पिष्टः साध्वसेन च भारत ॥ १७ ॥
निद्रया चैव पाञ्चाल्यो नाजक्ष्वोष्टुं तदा ।
तमाक्रम्य पदा राजन् कण्ठे चोरसि चोभयोः ॥ १८ ॥
नदन्तं विरुवन्तं च पशुमारममारयत् ।
तुदन्नश्वत्थामा तु द्रौणिं नातिव्यसामुदान्नत ॥ १९ ॥

मुक्ताः पर्यपतन् राजन्मृद्नन्तः शिबिरे जनम् ।
तैस्तत्र परिधावद्भिश्चरणोद्धीरितं रजः ॥ ९६ ॥
अकरोच्छबिरे तेषां रजन्यां द्विगुणं तमः ।
तस्मिंस्तमसि सञ्जाते प्रमूढाः सर्वतो जनाः ॥ ९७ ॥
नाजानन्पितरः पुत्रान् भ्रातॄन् भ्रातर एव च ।
गजो गजानतिक्रम्य निर्मनुष्या हया हयान ॥ ९८ ॥
अताडयंस्तथाऽभञ्जंस्तथाऽमृद्नंश्च भारत ।
ते भग्नाः प्रपतन्ति स्म निघ्नन्तश्च परस्परम् ॥ ९९ ॥
न्यपातयंस्तथा चान्यान्पातयित्वा तदाऽपिषन् ।
विचेतसः सनिद्राश्च तमसा चावृता नराः ॥ १०० ॥
जघ्नुः स्वानेव तत्राथ कालेनैव प्रचोदिताः ।
त्यक्त्वा द्वाराणि च द्वास्थास्तथा गुल्मानि गौल्मिकाः १०१॥
प्राद्रवन्त यथाशक्ति कान्दिशीका विचेतसः ।
विप्रनष्टाश्च तेऽन्योन्यं नाजानन्त तथा विभो ॥ १०२ ॥
प्रोशन्तस्तान पुत्रेति दैवोपरतचेतसः ।
पलायन्त दिशस्तेषां स्वानप्युत्सृज्य पान्धवान ॥१०३॥
गोत्रनामभिरन्योन्यमाक्रन्दन्त ततो जनाः ।
हाहाकारं च कुर्वाणाः पृथिव्यां शेरते परे ॥ १०४ ॥
तान्बुद्ध्वा रणमध्येऽसौ द्रोणपुत्रो न्यवारयत ।
तत्रापरे वध्यमाना मुहुर्मुहुरचेतसः ॥ १०५ ॥

अन्धकार छागया, तब कोई मनुष्य अपने पिता और भाईको भी न पहिचान सका, हाथी, हाथियोंको और घोडे घोडोंको और दौडे और परस्पर एक दूसरेको मारते थे. कहीं कोई हाथी. घोडा. मनुष्यको पीस देता था. कहीं निद्रा और अन्धकारसे व्याकुल वीर पडे थे कहीं वीर अपने ही वीरोंको मारते थे. कहीं द्वारपाल द्वारोंको छोडकर इधर उधर भागते थे, कहीं गुल्मपाल गुल्मोंको छोडकर इधर उधर भागते थे, कहीं वीर भयसे व्याकुल होकर बाप और बेटोंको बुलाते थे कहीं अपने बान्धवोंको छोडकर वेढा भागते थे, कहीं अपना अपना गोत्रका नाम लेकर उच्च परिचय देते थे, कोई हाहाकार करके पृथ्वीमें गिर जाता था. कोई लडनेको उठता था, उसको

आचार्यपुत्र शस्त्रेण जहि मां मा चिरं कृथाः।
त्वत्कृते सुकृतॉल्लोकान् गच्छेयं द्विपदांवर ॥ २० ॥
एवमुक्त्वा तु वचनं विरराम परंतपः।
सुतः पञ्चालराजस्य आक्रान्तो बलिना भृशम् ॥२१॥
तस्य व्यक्तां तु तां वाचं संश्रुत्य द्रौणिरब्रवीत्।
आचार्यघातिनां लोका न संति कुलपांसन ॥ २२ ॥
तस्माच्छस्त्रेण निधनं न त्वमर्हसि दुर्मते।
एवं ब्रुवाणस्तं वीरं सिंहो मत्तमिव द्विपम् ॥ २३ ॥
मर्मस्वभ्यवधीत् क्रुद्धः पादाष्ठीलैः सुदारुणैः।
तस्य वीरस्य शब्देन मार्यमाणस्य वेश्मनि ॥ २४ ॥
अबुध्यन्त महाराज स्त्रियो ये चास्य रक्षिणः।
ते दृष्ट्वा धर्षयन्तं तमतिमानुषविक्रमम् ॥ २५ ॥
भूतमेवाध्यवस्यंतो न स्म प्रव्याहरन् भयात्।
तं तु तेनाभ्युपायेन गमयित्वा यमक्षयम् ॥ २६ ॥
अध्यतिष्ठत तेजस्वी रथं प्राप्य सुदर्शनम्।
स तस्य भवनाद्राजन्निष्क्रम्यानादयन्दिशः ॥ २७ ॥

किया, तब पाञ्चालराजका शब्द भी बन्द होगया। (१४-१९)

अनन्तर उन्होंने अपने नयनोंसे अश्वत्थामाको चौंना चाहा, परन्तु जब वह भी न कर सके तब कुछ तुतलाते धीरे धीरे बोले, हे गुरुपुत्र, आप यह क्या करते हैं? हमें शस्त्रसे मारिये। हे ब्राह्मणश्रेष्ठ! तब हम आपकी कृपासे वीरलोकको जावेंगे, इस समय रघुनाथन धृष्टद्युम्न इसके सिवाय और कुछ न कह सके वीर पाञ्चालराजपुत्र इतना ही कह कर चुप होगये तब बलवान अश्वत्थामा बोले, हे दुर्बुद्धे! जो लोग गुरुको मारते हैं उन्हें वीर लोक नहीं मिलता, इसलिये तू शस्त्रसे मारने योग्य नहीं, ऐसा कहकर धृष्टद्युम्नके मर्मस्थानोंमें बलसे लात मारने लगे, मरते हुए वीर धृष्टद्युम्नके शब्दसे उनके पास बैठी स्त्रियां और उनकी रक्षा करनेवाले जागे। उन्होंने अपने स्वामीकी ऐसी दशा देख अश्वत्थामाको भूत जाना और भयके मारे कुछ न बोल सकी। इसी प्रकार धृष्टद्युम्नको अश्वत्थामाने मार डाला। (२०—२१)

अनन्तर उस डेरेसे निकल कर वे अश्वत्थामा रथपर बैठकर शीघ्र

शिबिरान्निष्पतन्ति स्म क्षत्रिया भयपीडिताः ।
तांस्तु निष्पतितांस्त्रस्तान् शिबिराज्जीवितैषिणः ॥१०६॥
कृतवर्मा कृपश्चैव द्वारदेशे निजघ्नतुः ।
विस्रस्तयन्त्रकवचान्मुक्तकेशान्कृताञ्जलीन् ॥ १०७ ॥
वेपमानान् क्षितौ भीतान्नैव कांश्चिदमुच्यताम् ।
नामुच्यत तयोः कश्चिन्निष्क्रान्तः शिबिराद्बहिः ॥१०८॥
कृपश्चैव महाराज हार्दिक्यश्चैव दुर्मतिः ।
भृशञ्चैव चिकीर्षतौ द्रोणपुत्रस्य तं प्रियम् ॥ १०९ ॥
त्रिषु देशेषु ददतुः शिबिरस्य हुताशनम् ।
तलः प्रकाशे शिबिरे खड्गेन पितृनन्दनः ॥ ११० ॥
अश्वत्थामा महाराज व्यचरत्कृतहस्तवत् ।
कांश्चिद्रापततो वीरानपरांश्चैव धावतः ॥ १११ ॥
व्यपोजघत खड्गेन प्राणैऽर्द्धिजवरोत्तमः ।
कांश्चिन्नोनाम खड्गेन मध्ये सन्छिद्य वीर्यवान्॥११२॥
अपातयद्द्रोणपुत्रः संरब्धस्त्रिलकाण्डवत् ।
निनदद्भिर्भृशार्त्तैर्नरास्थद्भिरदोत्तमैः ॥ ११३ ॥
पतितैरभवत्कीर्णा मेदिनी भरतर्षभ ।
मानुषाणां महत्सु क्षतेषु पतितेषु च ॥ ११४ ॥
उद्वेष्टन्तवन्त्यानि यन्त्रन्युत्थाय चापतन ।

रथेन शिबिरं प्रायाज्जिघांसुर्द्रौपतो बली ।
अपक्रान्ते ततस्तस्मिन्द्रोणपुत्रे महारथे ॥ २८ ॥
सहितै रक्षिभि. सर्वैः प्राणेदुर्योषितस्तदा ।
राजानं निहतं दृष्ट्वा भृशं शोकपरायणाः ॥ २९ ॥
व्याक्रोशन् क्षत्रियाः सर्वे धृष्टद्युम्नस्य भारत ।
तासां तु तेन शब्देन समीपे क्षत्रियर्षभाः ॥ ३० ॥
क्षिप्रं च समनह्यन्त किमेतादिति चाब्रुवन् ।
स्त्रियस्तु राजन्वित्रस्ता भारद्वाजं निरीक्ष्य ताः ॥ ३१ ॥
अब्रुवन् दीनकण्ठेन क्षिप्रमाद्रवतेति वै ।
राक्षसो वा मनुष्यो वा नैनं जानीमहे वयम् ॥ ३२ ॥
हत्वा पाञ्चालराजानं रथमास्थ्य तिष्ठति ।
ततस्ते योधमुख्याश्च सहसा पर्यवारयन् ॥ ३३ ॥
स तानापततः सर्वान् रुद्रास्त्रेण व्यपोथयत् ।
धृष्टद्युम्नं च हत्वा स तांश्चैवास्य पदानुगान् ॥ ३४ ॥
अपश्यच्छयने सुप्तमौजसमन्तिके ।
तमप्याक्रम्य पादेन कण्ठे घोरमि तेजसा ॥ ३५ ॥
तथैव मारयामास विनर्दन्तमरिंदमम् ।

डेरोंकी ओर शत्रुओंको मारनेको दौडे । अश्वत्थामाके जानेके पीछे स्त्रियोंने देखा कि महाराज मरे पडे है, तब वे सब हाहाकार करके और अत्यन्त शोकसे व्याकुल होकर रोने लगी। तब सब श्रेष्ठ क्षत्रिय जागे और कहने लगे कि यह क्या हुआ ? ऐसा कहकर सब क्षत्रिय युद्धके लिये व्यूह (किला) बनाने लगे । तब द्वारपर जाकर देखा कि कृपाचार्य खडे है. तब सब स्त्री उनको देखकर डरीं, तब सब क्षत्रिय उनसे पूछने लगे कि जिसने महाराज पाञ्चालराजको मारा है और जो रथपर चढकर भागा जाता है, वह क्या कोई राक्षस है वा मनुष्य ? (२८-३३)

ऐसा कहते हुये वे सब वीर अश्वत्थामाको मारने दौडे, परन्तु अश्वत्थामाने रुद्रास्त्रसे उन सबको मार डाला । फिर वहांसे चलकर उसीने डेरेमें पहुंचे और उनको भी सोते ही देखा । फिर उनके भी कपडेसे एक दो और एक दो मुक्केसे धक्का उनको भी वैसे ही मार डाला। शत्रुनाशन उसने वहांसे

सायुधान्साङ्गदान्बाहून्विचकर्त्त शिरांसि च ॥ ११५ ॥
हस्तिहस्तोपमानूरून्हस्तान्पादांश्च भारत ।
पृष्ठच्छिन्नान्पार्श्वच्छिन्नान्शिरश्छिन्नांस्तथाऽपरान् ॥ ११६ ॥
स महात्माऽकरोद् द्रौणिः कांश्चिच्चापि पराङ्मुखान् ।
मध्यदेशे नरानन्यांश्चिच्छेदान्यांश्च कर्णतः ॥ ११७ ॥
अंसदेशे निहत्यान्यान्काये प्रावेशयच्छरः ।
एवं विचरतस्तस्य निघ्नतः सुबहून्नरान् ॥ ११८ ॥
तमसा रजनी घोरा बभौ दारुणदर्शना ।
किञ्चित्प्राणैश्च पुरुषैर्हतैश्चान्यैः सहस्रशः ॥ ११९ ॥
बहुना च गजाश्वेन भूरभूद्भीमदर्शना ।
यक्षरक्षः समाकीर्णं रथाश्वद्विपदारुणं ॥ १२० ॥
क्रुद्धेन द्रोणपुत्रेण सञ्छन्नाः प्रापतन्भुवि ।
भ्रातॄनन्ये पितॄनन्ये पुत्रानन्ये विचुक्रुशुः ॥ १२१ ॥
केचिदूचुर्न तत्क्रुद्धैर्धार्त्तराष्ट्रैः कृतं रणे ।
यत्कृतं नः प्रसुप्तानां रक्षोभिः क्रूरकर्मभिः ॥ १२२ ॥
अस्मान्निध्याद्धि पार्थानामिदं यः कदनं कृतम ।
न चासुरैर्न गंधर्वैर्न यक्षैर्न च राक्षसैः ॥ १२३ ॥
शक्यो विजेतुं धौम्येयो गोप्ता यस्य जनार्दनः ।
ब्रह्मण्यः सत्यवाग्दान्तः सर्वभूतानुकम्पकः ॥ १२४ ॥

किसीकी पीठ फट गई, किसीका मुंह कट गया, इस प्रकार महात्मा अश्वत्थामाने सहस्रों वीरोंको गिरा दिया, वह भयानक अन्धकार रात्रि और भी भयानक दीखने लगी, कहीं न गानेयोग्य शरीरमें शस्त्र लग गया, वह रात्रि भागते हुये हाथी, घोड़े और मनुष्योंसे भयानक दीखने लगी, और कोई भाईको, कोई बापको, और कोई बेटोंको पुकारने लगे और कोई कहने लगा कि क्रोध भरे धृतराष्ट्रके पुत्रोंने हमारे लिये जो नहीं किया था, सो आज सोते समय भयानक राक्षसोंने किया, हाय पांचों पाण्डवोंमेंसे एक भी यहां नहीं है इसी लिये राक्षसोंने हमारा नाश कर दिया, जिनकी रक्षा करनेवाले साक्षात् श्रीकृष्ण हैं उन्हें राक्षस, गन्धर्व और [illegible] भी नहीं जीत सकते ! (११५–१२४)

[illegible] मनुष्योंका कृपा

युधामन्युश्च संप्राप्तो मत्वा तं रक्षसा हतम् ॥ ३६ ॥
गदामुद्यम्य वेगेन हृदि द्रौणिमताडयत् ।
तमाभिद्रुत्य जग्राह क्षितौ चैनमपातयत् ॥ ३७ ॥
विस्फुरन्तं च पशुवत्तथैवैनममारयत् ।
तथा स वीरो हत्वा तं ततोऽन्यान्समुपाद्रवत् ॥ ३८ ॥
संसुप्तानेव राजेन्द्र तत्र तत्र महारथान् ।
स्फुरतो वेपमानांश्च शमितेव पशून्मखे ॥ ३९ ॥
ततो निस्त्रिंशमादाय जघानान्यान् पृथक् पृथक् ।
भागशो विचरन्मार्गानसियुद्धविशारदः ॥ ४० ॥
तथैव गुल्मे संप्रेक्ष्य शयानान्मध्यगौल्मिकान् ।
श्रान्तान् न्यस्तायुधान्सर्वान् क्षणेनैव न्यपोथयत् ॥ ४१ ॥
योधानश्वान् द्विपांश्चैव प्राच्छिनत्स वरासिना ।
रुधिरोक्षितसर्वाङ्गः कालसृष्ट इवान्तकः ॥ ४२ ॥
विस्फुरद्भिश्च तैर्द्रौणिर्निस्त्रिंशस्योद्यमेन च ।
आक्षेपणेन चैवासेस्त्रिधा रक्तोक्षितोऽभवत् ॥ ४३ ॥
तस्य लोहितरक्तस्य दीप्तखड्गस्य युध्यतः ।
अमानुष इवाकारो बभौ परमभीषणः ॥ ४४ ॥
ये त्वजाग्रन्त कौरव्य तेऽपि शब्देन मोहिताः ।

गदा लेकर उठे. और अश्वत्थामाको राक्षस जानकर एक गदा उसकी छातीमें मारी, तौभी अश्वत्थामाने उसके बाल पकड़कर पृथ्वीमें गिरा दिया और पशुके समान मार डाला। (३६-३८)

हे महाराज! तब वहांपर दूसरे दूसरे महारथीके डेरोंमें जाकर सबको सोते ही मारडाला। किसीको काटते हुये मारा, और किसीको दबाते हुये मारडाला। (३९)

शस्त्रयुद्ध जाननेवाले अश्वत्थामाने घूम घूमकर इस प्रकार शत्रुओंको मारा जैसे कोई यज्ञमें पशुओंको मारे। अनन्तर सब गुल्मोंमें घूमकर केवल शस्त्ररहित सोते और थके गुल्मपालकोंको मारा फिर हाथी और घोड़ोंके बन्धन शस्त्रसे काट दिये, उस समय रुधिरमें भीगे अश्वत्थामाका शरीर प्रलयकालके यमराजके समान दीखता था, सब शस्त्रोंसे अश्वत्थामा तीन धारियोंसे रुधिरमें भीगे। सबको मुलाते हुये महादानव रूपसे समान दीखने लगे। (४०-४४)

न च सुप्तं प्रमत्तं वा न्यस्तशस्त्रं कृताञ्जलिम् ।
धावन्तं मुक्तकेशं वा हन्ति पार्थो धनञ्जयः ॥ १२५ ॥
तदिदं नः कृतं घोरं रक्षोभिः क्रूरकर्मभिः ।
इति लालप्यमानाः स्म शेरते बहवो जनाः ॥ १२६ ॥
स्तनतां च मनुष्याणामपरेषां च कूजताम् ।
ततो मुहूर्त्तात्प्राशाम्यत्स शब्दस्तुमुलो महान् ॥१२७॥
शोणितौघपरिक्तायां नक्षुभायां च भूमिप ।
तद्रजस्तुमुलं घोरं क्षणेनान्तरधीयत ॥ १२८ ॥
स चेष्टमानानुद्विग्नाञ्शिक्षितसाहान्सहस्रशः ।
न्यपातयन्नरान् क्रुद्धः पशून्पशुपतिर्यथा ॥ १२९ ॥
अन्योन्यं संपरिष्वज्य शयानान्द्रवतोऽपरान् ।
संलीनान्युध्यमानांश्च सर्वान्द्रौणिरशोषयत् ॥ १३० ॥
द्रवमाणा हुताशेन दह्यमानाश्च तेन ते ।
परस्परं तदा शोधानमभवत्तुमुलं महत् ॥ १३१ ॥
तस्या रजन्यामन्त्यायां पाण्डवानां महाबलम् ।
समग्रमासीत्राजेन्द्र द्रौणिर्यन्निरवेशनम् ॥ १३२ ॥
निशाचराणां सर्वेषां रात्रिः सा क्षयवर्द्धिनी ।

निरीक्ष्यमाणा अन्योन्यं दृष्ट्वा दृष्ट्वा प्रविव्यथुः ॥ ४५ ॥
तद्रूपं तस्य ते दृष्ट्वा क्षत्रियाः शत्रुकर्षिणः ।
राक्षसं मन्यमानास्तं नयनानि न्यमीलयन् ॥ ४६ ॥
स घोररूपो व्यचरत्कालवच्छिबिरे ततः ।
अपश्यद्द्रौपदीपुत्रानवजिघ्रांश्च सोमकान् ॥ ४७ ॥
तेन शब्देन वित्रस्ता धनुर्हस्ता महारथाः ।
धृष्टद्युम्नं हतं श्रुत्वा द्रौपदेया विशाम्पते ॥ ४८ ॥
अवाकिरन शरव्रातैर्भारद्वाजमभीतवत् ।
ततस्तेन निनादेन संप्रबुद्धाः प्रभद्रकाः ॥ ४९ ॥
शिखीमुखैः शिखण्डी च द्रोणपुत्रं समार्दयन् ।
भारद्वाजः स तान् दृष्ट्वा शरवर्षाणि वर्षतः ॥ ५० ॥
ननाद बलवन्नादं जिघांसुस्तान्महारथान् ।
ततः परमसंक्रुद्धः पितुर्वधमनुस्मरन् ॥ ५१ ॥
अवरुह्य रथोपस्थात्त्वरमाणोऽभिदुद्रुवे ।
सहस्रचन्द्रविमलं गृहीत्वा वर्मसंयुगे ॥ ५२ ॥
खड्गं च विमलं दिव्यं जातरूपपरिष्कृतम् ।

हे कुरुकुलश्रेष्ठ ! उस समय जो क्षत्रिय डेरोंमें जागते थे, वेही अश्वत्थामाका स्वरूप देखकर, चुप होकर, आंख मूंदकर लेते थे, और डरके मारे मूर्छित होजाते थे. शत्रुनाशन अश्वत्थामाका रूप देखकर सब लोग उसे राक्षस जानकर डेरोंके द्वारकी ओर चले, वहां जाकर देखा कृपाचार्य खड़े हैं, तब उन्होंने कृपाचार्यके ऊपर बाण वर्षाना आरम्भ किया इतनेमें प्रभद्रकवरी क्षत्रियोंने समाचार पहुंचा तब वे लोग भी पहुंचे. (४५–५२)

आसीन्नरगजाश्वानां रौद्री क्षयकरी भृशम् ॥ १३३ ॥
तत्राहृश्यन्त रक्षांसि पिशाचाश्च पृथग्विधाः ।
खादन्तो नरमांसानि पिबन्तः शोणितानि च॥१३४॥
कराला: पिङ्गलाश्चैव शैलदन्ता रजस्वलाः ।
जटिला दीर्घशङ्खाश्च पञ्चपादा महोदराः ॥ १३५ ॥
पश्चादङ्गुलयो रूक्षा विरूपा भैरवस्वनाः ।
घंटाजालावसक्ताश्च नलिकण्ठा विभीषणाः॥ १३६ ॥
सपुत्रदाराः सक्रूराः सुदुर्दशाः सुनिर्घृणाः ।
विविधानि च रूपाणि तत्राहृश्यन्त रक्षसाम्॥ १३७॥
पीत्वा च शोणितं हृष्टाः प्रानृत्यन्गणशो परे ।
इदं परमिदं मेध्यमिदं स्वाद्विति चाब्रुवन् ॥ १३८ ॥
मेदोमज्जास्थिरक्तानां वसानां च भृशाशिताः ।
परे मांसानि खादन्तः क्रव्यादा मांसजीविनः॥१३९॥
वसाश्चैवापरे पीत्वा पर्यधावन्विकुक्षिकाः ।
नानावक्त्रास्तथा रौद्राः क्रव्यादाः पिशिताशनाः॥१४०॥
अयुतानि च तत्रासन्प्रयुतान्यर्बुदानि च ।
रक्षसां घोररूपाणां मर्तां क्रूरकर्मणाम् ॥ १४१ ॥
मुदितानां वितृप्तानां तस्मिन्मरति वैशसे ।

का नाश करनेवाली थी और मांस खानेवाले भूत और जन्तुओंको प्रसन्नता बढाती थी, तब अनेक प्रकारके राक्षस घूमने लगे, वे मनुष्योंके मांस खाने और रुधिर पीने लगे, कोई भयानक घूमले रङ्गवाला किसीके बडे बडे दांत, कोई धूलमें भरा, किसीके बडी बडी जटा, किसीका बडा मुह, किसीका बडा पेट, किसीके पैरके पञ्जे पीछेको थे. कोई घण्टा बजा रहा था, किसीका नीलाकण्ठ था. कोई महाभयानक था. देखने भयानक निर्दय अनेक रूपधारी राक्षस पुत्र और स्त्रियोंके सहित वहां आए, फिर मनुष्योंका रुधिर पीकर नाचने लगे और कहने लगे कि यह रुधिर बडा स्वादमें श्रेष्ठ और पीने योग्य है, मांस खाने वाले जन्तु भी प्रसन्नता पूर्वक रुधिर पीने लगे, चरबी मांस और वसा खाने लगे । चरबी मज्जा मांस हड्डी अंतडी इनके पुञ्ज लगे, एक प्रकारके मनुष्योंको भक्षण करते राक्षस मनुष्योंको घोर रूप बनाकर और घोर कर्म करके

द्रौपदेयानभिद्रुत्य खड्गेन व्यधमद्बली ॥ ५३ ॥
ततः स नरशार्दूलः प्रतिविन्ध्यं महाहवे ।
कुक्षिदेशेऽवधीद्राजन् स हतो न्यपतद्भुवि ॥ ५४ ॥
प्रासेन विद्ध्वा द्रौणिं तु सुतसोमः प्रतापवान् ।
पुनश्चासिं समुद्यम्य द्रोणपुत्रमुपाद्रवत् ॥ ५५ ॥
सुतसोमस्य सासिं तं बाहुं छित्वा नरर्षभ ।
पुनरप्याहनत्पार्श्वे स भिन्नहृदयोऽपतत् ॥ ५६ ॥
नाकुलिस्तु शतानीको रथचक्रेण वीर्यवान् ।
दोर्भ्यामुत्क्षिप्य वेगेन वक्षस्येनमताडयत् ॥ ५७ ॥
अताडयच्छतानीकं सुरुचकं द्विजस्तु सः ।
स विह्वलो ययौ भूमिं ततोऽस्यापाहरच्छिरः ॥ ५८ ॥
श्रुतकर्मा तु परिघं गृहीत्वा समताडयत् ।
अभिद्रुत्य ययौ द्रौणिं सव्ये स फलके भृशम् ॥ ५९ ॥
स तु तं श्रुतकर्माणमास्ये जघ्ने धरासिना ।
स हतो न्यपतद्भूमौ विमृद्नन् विकृताननः ॥ ६० ॥
तेन शब्देन वीरस्तु श्रुतकीर्तिर्महारथः ।

स्थि अपने रथसे कूदे और अनेक चन्द्रमाके समान प्रकाशित अनेक बिन्दुयुक्त ढाल और सोनेकी मूठवाला चमकता हुआ खड्ग लेकर द्रौपदीके पुत्रोंकी ओर दौड़े, और प्रतिविन्ध्यके कोखमें एक खड्ग मारा, उसके लगतेही वह कटकर पृथ्वीमें गिर गया, उसके गिरतेही प्रतापवान श्रुतसोमने एक प्रास अश्वत्थामाको मारा, और फिर खड्ग लेकर उनकी ओर दौड़े, परन्तु अश्वत्थामाने भी उनके दहिने हाथको काट दिया, फिर बाँये हाथमें उनने एक खड्ग मारा, उसके लगतेही

की उसका हृदय फट गया, और मरकर पृथ्वीमें गिरगया, तब नकुलपुत्र बलवान शतानीकको कुछ शस्त्र न मिला, तब टूटे हुये रथका पहिया उठाकर अश्वत्थामाकी छातीमें वेगसे मारा, तब अश्वत्थामाने वेगसे दौड़कर उसे पृथ्वीमें गिरा दिया, और फिर उसका शिर काट लिया, तब श्रुतकर्माने दौड़कर एक परिघ अश्वत्थामाकी छातीमें मारा, वह परिघ अश्वत्थामाके खड्गसहित दहिने हाथमें लगा। (५०-५९)

तब अश्वत्थामाने झपटकर उसके मुखमें एक खड्ग मारा, वह भी मरकर

समेतानि बहून्यासन् भूतानि च जनाधिप ॥ १४२ ॥
प्रत्यूषकाले शिबिरात्प्रतिगन्तुमियेष सः
नृशोणितावसिक्तस्य द्रौणेरासीदसित्सरुः ॥ १४३ ॥
पाणिना सह संश्लिष्ट एकीभूत इव प्रभो।
दुर्गमां पदवीं गत्वा विरराज जनक्षये ॥ १४४ ॥
युगान्ते सर्वभूतानि भस्म कृत्वेव पावकः।
यथाप्रतिज्ञं तत्कर्म कृत्वा द्रौणागनिः प्रभो ॥ १४५ ॥
दुर्गमां पदवीं गच्छन्पितुरासीद्गतज्वरः।
यथैव संप्रयाते शिबिरे प्राविशन्निशि ॥ १४६ ॥
तथैव हत्वा निःशब्दे निश्चक्राम नरर्षभः।
निष्क्रम्य शिबिरात्तस्मात्ताभ्यां सङ्गम्य वीर्यवान् ॥ १४७ ॥
आचार्यो कर्म तत्सर्वं दृष्टः संहर्षयन्निव।
ताभ्यामाचष्ट तुष्टस्तौ प्रियं प्रियकरौ तदा ॥ १४८ ॥
ताभ्यामनुज्ञातश्चैव विनिकृत्तान्महारथान्।
हत्वा योधसहस्राणि तथैवाप्तोऽस्मि संक्षयान् ॥ १४९ ॥
एवंविधा हि मे रात्रिः सौप्तिकानां जनक्षये।

तच्छित्त्वा सगुणं चापं रणे तस्य महात्मनः ।
पपात धरणीं तूर्णं स्वर्णवज्रविभूषितम् ॥ ३९ ॥
सुतसोमस्ततोऽगच्छच्छ्रुतकीर्तेर्महारथम् ।
सौबलोऽपि धनुर्गृह्य घोरमन्यत्सुदुर्जयम् ॥ ४० ॥
अभ्ययात्पाण्डवानीकं निघ्नञ्शत्रुगणान्बहून् ।
तत्र नादो महानासीत्पाण्डवानां विशाम्पते ॥ ४१ ॥
सौबलं समरे दृष्ट्वा विचरन्तमभीतवत् ।
तान्यनीकानि दृप्तानि शस्त्रवन्ति महान्ति च ॥ ४२ ॥
द्राव्यमाणान्यदृश्यन्त सौबलेन महात्मना ।
यथा दैत्यचमूं राजन्देवराजो ममर्द ह ।
तथैव पाण्डवीं सेनां सौबलेयो व्यनाशयत् ॥ ४३ ॥ [१०३०]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सुतसोमसौबलयुद्धे पञ्चविंशोऽध्यायः ॥२५

सञ्जय उवाच— धृष्टद्युम्नं कृपो राजन्वारयामास संयुगे ।
यथा दृष्ट्वा वने सिंहं शरभो वारयेद्युधि ॥ १ ॥
निरुद्धः पार्षतस्तेन गौतमेन बलीयसा ।
पदात्पदं विचलितुं नाशक्नत्तत्र भारत ॥ २ ॥
गौतमस्य रथं दृष्ट्वा धृष्टद्युम्नरथं प्रति ।

खड्गसे शकुनीका रोदेके सहित धनुष काट दिया। वज्रके समान वह धनुष कट कर पृथ्वीमें गिर गया ॥ (३७-३९)

तब शकुनिने दूसरा धनुष लिया, उतने समयमें सुतसोम दौडकर श्रुतकीर्त्तिके रथ पर चढ गये, शकुनि भी दूसरा धनुष लेकर पाण्डवोंकी सेनाका नाश करने लगे। उस समय पाण्डवोंकी सेनामें घोर शब्द होने लगा ॥ हे राजन्! पाण्डवोंकी सेनामें बेडर शकुनि इस प्रकार घूमने लगे, जैसे दैत्योंकी सेनामें इन्द्र घूमते हैं। शस्त्रधारी पाण्डवोंकी सेना शकुनिके बाणोंसे व्याकुल होकर इधर उधर भागने लगी ॥ (४०-४३)

कर्णपर्वमें पचीस अध्याय समाप्त । [१०३०]

कर्णपर्वमे छब्बीस अध्याय ।

सञ्जय बोले, हे राजन् धृतराष्ट्र ! धृष्टद्युम्नको उसके संग युद्ध करते हुए कृपाचार्यने इस प्रकार रोक दिया, जैसे वनमें सिंहको शरभ रोकता है ॥ हे भारत ! गौतमवंशी बलवान् कृपाचार्यसे निरुद्ध होकर धृष्टद्युम्न युद्धमें एक पग भी चल न सके॥ धृष्टद्युम्नके रथकी ओर कृपाचार्यका रथ आते देख सब त्रस्त

विद्रेसुः सर्वभूतानि क्षयं प्राप्तं च मेनिरे ॥ ३ ॥
तत्रावोचन्विमनसो रथिनः सादिनस्तथा ।
द्रोणस्य निधनान्नूनं संक्रुद्धो द्विपदां वरः ॥ ४ ॥
शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः ।
अपि स्वस्ति भवेदद्य धृष्टद्युम्नस्य गौतमात् ॥ ५ ॥
अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात् ।
अप्ययं ब्राह्मणः सर्वान्न नो हन्यात्समागतान् ॥ ६ ॥
यादृशं दृश्यते रूपमन्तकप्रतिमं भृशम् ।
गमिष्यत्यद्य पदवीं भारद्वाजस्य गौतमः ॥ ७ ॥
आचार्यः क्षिप्रहस्तश्च विजयी च सदा युधि ।
अस्त्रवान्वीर्यसम्पन्नः क्रोधेन च समन्वितः ॥ ८ ॥
पार्षतश्च महायुद्धे विमुखोऽद्याभिलक्ष्यते ।
इत्येवं विविधा वाचस्तावकानां परैः सह ॥ ९ ॥
व्यश्रूयन्त महाराज तयोस्तत्र समागमे ।
विनिःश्वस्य ततः क्रोधात्कृपः शारद्वतो नृप ॥ १० ॥

होगये और सबको निश्चय होगया, कि धृष्टद्युम्न जीते नहीं बचेंगे ॥ (१–३)

उस समय रथ, हाथी और घोडों पर चढे वीर तथा पैदल लोग खिन्न होकर कहने लगे, कि द्रोणाचार्यके मरनेसे मनुष्य श्रेष्ठ कृपाचार्यको क्रोध हुआ है, इसी लिये यह धृष्टद्युम्नसे लडनेको आये हैं। गौतमवंशी महातेजस्वी कृपाचार्य दिव्य अस्त्रोंके जाननेवाले है, ईश्वर इनके हाथसे धृष्टद्युम्नको आज बचावें ॥ ईश्वर कृपा करे, आज यह सब सेना इस ब्राह्मणके हाथसे बचे, क्योंकि यह ब्राह्मण हम सबको मारनेमें समर्थ है ॥ (४—६)

कोई कहने लगा, कि कृपाचार्यका रूप इस समय यमराजके समान हो रहा है, इससे यह धृष्टद्युम्नके हाथसे आज ही द्रोणाचार्यके पास पहुंचेगे ॥ कोई कहने लगा, कि कृपाचार्य धनुर्वेदके जाननेवाले, शीघ्र शस्त्र चलानेवाले, बलवान् और सदा युद्ध जीतनेवाले हैं। इस समय कृपाचार्यको क्रोध भरा देख, धृष्टद्युम्न भागना चाहते हैं। इस प्रकार तुम्हारी और पाण्डवोंकी सेनामें अनेक प्रकारकी बातें होने लगीं। (७–१०)

हे राजेन्द्र ! इन सब बातोंको सुनते हुए महात्मा कृपाचार्यने क्रोधमें भरकर अनेक सांस लिये, फिर धृष्टद्युम्नकी

प्रसुप्तानां प्रमत्तानामासीत्सुभृशदारुणा ॥ १५० ॥
असंशयं हि कालस्य पर्यायो दुरतिक्रमः ।
तादृशा निहता यत्र कृत्वाऽस्माकं जनक्षयम् ॥ १५१ ॥

धृतराष्ट्र उवाच—प्रागेव सुमहत्कर्म द्रौणिरेतन्महारथः ।
नाकरोदीदृशं कस्मान्मत्पुत्रविजये धृतः ॥ १५२ ॥
अथ कस्माद्धते क्षुद्रं कर्मेदं कृतवानसौ ।
द्रोणपुत्रो महात्मा स तन्मे शंसितुमर्हसि ॥ १५३ ॥

सञ्जय उवाच— तेषां नूनं भयान्नासौ कृतवान्कुरुनन्दन ।
असान्निध्याद्धि पार्थानां केशवस्य च धीमतः ॥१५४॥
सात्यकेश्चापि कर्मेदं द्रोणपुत्रेण साधितम् ।
को हि तेषां समक्षं तान् हन्यादपि मरुत्पतिः ॥१५५॥
एतदीदृशकं वृत्तं राजन्सुप्तजने विभो ।
ततो जनक्षयं कृत्वा पाण्डवानां महात्ययम् ॥ १५६ ॥
दिष्ट्या दिष्ट्येति चान्योन्यं समेत्योचुर्महारथाः ।
पर्यष्वजत्ततो द्रौणिस्ताभ्यां सम्प्रति नन्दितः ॥१५७॥
इदं हर्षात्तु सुमहदाददे वाक्यमुत्तमम् ।
पाञ्चाला निहताः सर्वे द्रौपदेयाश्च सर्वशः ॥ १५८ ॥

सेनाका नाश किया था और यही आज इस प्रकार मारे गये, कालकी गतिको कोई नहीं जान सक्ता, यह बड़ी ही कठिन है । (१४६-१५१)

धृतराष्ट्र बोले, हे सञ्जय ! महारथ अश्वत्थामाके यह इच्छा तो थी, कि हमारे पुत्रकी विजय होय, तब उन्होंने पहिले यह कर्म क्यों नहीं किया था ? दुर्योधनके मरनेपर महात्मा द्रोणपुत्रने ऐसा कुकर्म क्यों किया सो तुम हमसे कहो ! (१५२-१५३)

पाण्डवोंके और कृष्णके भयसे अश्वत्थामाने ऐसा नहीं किया था, आज वे पाण्डव, श्रीकृष्ण और सात्यकी सेनामें नहीं थे, इसही लिये अश्वत्थामाने इनको मार डाला । यदि वे लोग होते तो साक्षात इन्द्र भी इन लोगोंको नहीं मार सक्ता था । (१५४-१५६)

हे महाराज ! इस प्रकार वह बीती हुई दारुण रात्रिका नाश हुआ तब सबने हर्षित होके कहने लगे कि बहुत बड़ा, हर्ष महाराज

एवं ते निधनं यातः पुत्रो दुर्योधनो नृप ।
अग्रे गात्वा रणे शूरः पश्चाद्विनिहतः परैः ॥ ५८ ॥
तथैव ते परिष्वक्ताः परिष्वज्य च ते नृपम् ।
पुनः पुनः प्रेक्षमाणाः स्वकानामक्षतं रथान् ॥ ५९ ॥
इत्येवं द्रोणपुत्रस्य निशम्य करुणां गिरम् ।
प्रत्यृषकाले शोकार्त्ताः प्राद्रवन्नगरं प्रति ॥ ६० ॥
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
घोरो विजयनो रौद्रो राजन् दुर्मन्त्रिते तव ॥ ६१ ॥
तव पुत्रे गते स्वर्गं शोकार्त्तस्य ममानघ ।
ऋषिदत्तं प्रनष्टं तद्दिव्यदर्शित्वमद्य वै ॥ ६२ ॥
वैशम्पायन उवाच–इति श्रुत्वा स नृपतिः पुत्रस्य निधनं तदा ।
निःश्वस्य दीर्घमुष्णं च ननश्चिन्तापरोऽभवत् ॥ ६३ ॥[५३८]

इति श्रीमहाभारत शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि
तृतीयं जलप्राणाख्यानं नवमोऽध्यायः ॥ ९ ॥

ऐषीकपर्व ।

वैशम्पायन उवाच–तस्यां रात्र्यां व्यतीतायां पृष्ट्वा पुरुषसत्तम सारथिः ।
आश्वास्य पर्यशात्राय सौप्तिके कथयन् कृतम् ॥ १ ॥
सूत उवाच– द्रौपदेया हता राजन्द्रुपदस्यात्मजैः सह ।

सोमका मत्स्यशेषाश्च सर्वे विनिहता मया।
इदानीं कृतकृत्याः स्म याम तत्रैव मा चिरम्।
यदि जीवति नो राजा तस्मै शंसामहे वयम्॥ १५०॥ [४७५]

इति श्रीमहाभारते० वैशाम्पायनीयां सौप्तिके पर्वणि रात्रियुद्धे पाञ्चालादिवधेऽष्टमोऽध्यायः॥ ८॥

सञ्जय उवाच— ते हत्वा सर्वपाञ्चालान्द्रौपदेयांश्च सर्वशः।
आगच्छन्सहितास्तत्र यत्र दुर्योधनो हतः ॥ १ ॥
गत्वा चैनमपश्यन्त किञ्चित्प्राणं जनाधिपम्।
ततो रथेभ्यः प्रस्कन्द्य परिवव्रुस्तनात्मजम् ॥ २ ॥
तं भग्नसक्थं राजेन्द्र कृच्छ्रप्राणमचेतसम्।
गमन्तं क्षितिरं नक्त्राद्दशगन्वसुधातलेल ॥ ३ ॥
गुरुं समन्ताद्रुधिरः श्वापदैर्नीरदर्शनैः।
शालावृकगणैश्चैव भक्षयद्भिरन्तिकात् ॥ ४ ॥
निवारयन्तं कृपणान श्वापदांश्च क्षितादिगुन्।
विश्रमानं मलां च गुरुशं गाढवेदनम् ॥ ५ ॥
तं दृष्ट्वा तथा दृष्ट्वा भूमौ रुधिरोक्षितम्।
हतशिष्टास्त्रयो वीराः शोकार्ताः पर्यवारयन् ॥ ६ ॥
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः।
तैस्त्रिभिः शोणितादिग्धैर्निःश्वसद्भिर्महारथैः ॥ ७ ॥

द्रौपदीके पुत्र सोमक और बचे हुये पाञ्चालवंशी क्षत्रिय वीर सब, अब हम लोग कृतकृत्य होकर, अब राजाके पास चलकर जायँ। कदाचित वे जीते होंगे, तो इनसे यह सब समाचार कहेंगे। (१५०-१५७)

हे राजेन्द्र! वे सब [पाण्डव] सेना [पाञ्चाल] द्रौपदीके पुत्रोंको मारकर [दुर्योधन] जहाँ पड़ा था, वहाँ गये। तब वे सब [पाण्डव] राजा दुर्योधन पड़े थे, उनको जाकर देखा कि महाराज मरा ही चाहते हैं। तब वे सब [पाण्डव] उनके और राजाके पास गये, उस समय राजा लहूलुहान पड़े थे, उनके शरीरसे रुधिर बहता था, चारों ओर अनेक प्रकार [गीदड़, भेड़िये आदि] मांस खानेवाले जन्तु पड़े थे, और दीखनेमें न आनेवाले [राक्षस] दुर्योधनको घेरे हुये थे, वह [दुर्योधन] उन [जन्तुओं] को, और [राक्षसों] को हटाता था, और [पाण्डव] राजाके पास गये और, वह [दुर्योधन] लम्बी साँस ले रहा था, [पाण्डव] ने

प्रमत्ता निशि विश्वस्ताः स्वपन्तः शिबिरे स्वके ॥ २ ॥
कृतवर्मणा नृशंसेन गौतमेन कृपेण च ।
अश्वत्थाम्ना च पापेन हतं वः शिबिरं निशि ॥ ३ ॥
एतैर्नरगजाश्वानां प्रासशक्तिपरश्वधैः ।
सहस्राणि निकृन्तद्भिर्निःशेषं ते बलं कृतम् ॥ ४ ॥
छिद्यमानस्य महतो वनस्येव परश्वधैः ।
शुश्रुवे सुमहान् शब्दो बलस्य तव भारत ॥ ५ ॥
अहमेकोऽवशिष्टस्तु तस्मात्सैन्यान्महामते ।
मुक्तः कथं चिद्वर्मात्मन् व्यग्राच्च कृतवर्मणः ॥ ६ ॥
तच्छ्रुत्वा वाक्यमशिवं कुन्तीपुत्रो युधिष्ठिरः ।
पपात मध्यां दुर्धर्षः पुत्रशोकसमन्वितः ॥ ७ ॥
पतन्तं तमतिक्रम्य परिजग्राह सात्यकिः ।
भीमसेनोऽर्जुनश्चैव माद्रीपुत्रौ च पाण्डवौ ॥ ८ ॥
लब्धचेतास्तु कौन्तेयः शोकविह्वलया गिरा ।
जित्वा शत्रून् जितः पश्चात्पर्यदेवयदार्तवत् ॥ ९ ॥
दुर्विदा गतिरर्थानामपि ये दिव्यचक्षुषः ।

महाराज ! द्रुपदके पुत्रोंके सहित आपके पांचों पुत्र मारे गये, वे मुझमें विश्वास पूर्वक डेरोंमें सो रहे थे, उसी समय कृतवर्मा, पापी कृपाचार्य और पापी अश्वत्थामाने सबको मारडाला। (१-३)

हे महाराज ! आपकी हाथी, घोड़ा और मनुष्योंसे भरी सेनामें केवल एक मैं ही बचा हूं. उन्होंने प्रास, शक्ति और परशुओंसे हमारी सेनाका नाश कर दिया. उस समय आपकी सेनामें ऐसा शब्द होता था. जैसे कुल्हाड़ीसे कटते हुए वनमें। हे महात्मन् ! मैं किसी प्रकार कृतवर्मासे बचकर भाग आया हूं, उस सब सेनामेंसे केवल मैं ही एकला बचा हूं। (४-६)

सारथीके ऐसे वचन सुन महापराक्रमी महाराज युधिष्ठिर पुत्रशोकसे व्याकुल होकर पृथ्वीमें गिरपड़े, तब उनको गिरते देख सात्यकी, कृष्ण, अर्जुन, नकुल और सहदेव दौड़े और उन्हें पकड़ लिया, तब कुन्तीपुत्र थोड़े समयमें चैतन्य हो और शोकसे व्याकुल होकर ऐसे दीनवचन बोले। (७-८)

हमने पहले शत्रुओंको जीत लिया था, और अब फिर हार गये, दिव्य दृष्टिवाले महात्मा भी समय और हा-

शुशुभे स वृतो राजा वेदी त्रिभिरिवाग्निभिः ।
ते तं शयानं सम्प्रेक्ष्य राजानमतथोचितम् ॥ ८ ॥
अविषह्येन दुःखेन ततस्ते रुरुदुस्त्रयः ।
ततस्तु रुधिरं हस्तैर्मुखान्निर्मृज्य तस्य हि ।
रणे राज्ञः शयानस्य कृपणं पर्यदेवयन् ॥ ९ ॥

कृप उवाच— न दैवस्यातिभारोऽस्ति यदयं रुधिरोक्षितः ।
एकादशचमूभर्त्ता शेते दुर्योधनो हतः ॥ १० ॥
पश्य चामीकराभस्य चामीकरविभूषिताम् ।
गदां गदाप्रियस्येमां समीपे पतितां भुवि ॥ ११ ॥
इयमेनं गदा शूरं न जहाति रणे रणे ।
स्वर्गायापि व्रजन्तं हि न जहाति यशस्विनम् ॥ १२ ॥
पश्येमां सह वीरेण जाम्बूनदविभूषिताम् ।
शयानां शयने हर्म्ये भार्यां प्रीतिमतीमिव ॥ १३ ॥
योऽयं मूर्धाभिषिक्तानामग्रे जातः परन्तपः ।
स हतो ग्रसते पांसून्पश्य कालस्य पर्ययम् ॥ १४ ॥
येनाजौ निहता भूमावशेरत हतद्विषः ।

उस समय इन तीनों रुधिर भीगे वीरोंके बीचमें राजाकी ऐसी शोभा दीखती थी, जैसे तीन अग्नियोंके बीचमें प्रधान अग्नि थी । महाराजको अनुचित रीतिसे पडे देख तीनों वीर सांस लेकर रोने लगे । तब कृपाचार्य उनके पास गये और उनके मुखका रुधिर अपने हाथसे पोंछकर रोकर कहने लगे । आश्चर्य बहुत बडी वस्तु है देखो ग्यारह अक्षौहिणीके स्वामी राजा दुर्योधन आज पृथ्वीमें मूर्च्छित होकर सोते हैं देखो सोनेके समान रङ्गवाले गदाके पास महाराजकी सोनेसे भूषित गदा पृथ्वीमें पडी है, यह गदा इस महात्मा यशस्वी वीरको किसी युद्धमें नहीं छोडती; अब स्वर्ग जाते समय भी इनको नहीं छोडती । (८–१२)

देखो यह सोनेके भूषणवाली गदा इन महात्मा वीरके मृत प्यारी स्त्रीके समान सोती है । हाय ! यही अधुना इन महाराज पहिले राजोंके आगे चलते थे, आज पृथ्वीमें पडे हुये इन्हें खाते है । कैसा बडा विघ्न है । हाय ! जिस दुश्मनके हाथसे मरे हुए बहुतसे शत्रु पृथ्वीमें सोते थे, वही ये आज शत्रुओंके हाथसे मरकर पृथ्वीमें सोते हैं,

जयमाना जयंत्यन्ये जयमाना वयं जिताः ॥ १० ॥
हत्वा भ्रातॄन्वयस्यांश्च पितॄन्पुत्रान्सुहृद्गणान् ।
बन्धूनमात्यान्पौत्रांश्च जित्वा सर्वान् जिता वयम् ॥ ११ ॥
अनर्थो ह्यर्थसङ्काशस्तथाऽनर्थोऽर्थदर्शनः ।
जयोऽयमजयाकारो जयस्तस्मात्पराजयः ॥ १२ ॥
यज्जित्वा तप्यते पश्चाद्यथा दुर्मतिः ।
कथं मन्येत विजयं ततो जिततरः परैः ॥ १३ ॥
येषामर्थाय पापं स्याद्विजयस्य सुहृद्वधैः ।
निर्जितैरप्रमत्तैर्हि विजिता जितकाशिनः ॥ १४ ॥
कर्णिनालीकदंष्ट्रस्य क्षुद्रजिह्मस्य संयुगे ।
चापध्यात्तस्य रौद्रस्य व्यात्तलक्षणधारिणः ॥ १५ ॥
क्षुद्रस्य नरसिंहस्य संग्रामेष्वपलायिनः ।
ये व्यसुञ्चन्त कर्णस्य प्रमादात्ते हता नराः ॥ १६ ॥
रथह्रदं शरघर्मोर्मिमन्तं रत्नाचितं वाहनयाजियुक्तम् ।
शतघ्नशक्तिझषनागसङ्कुलं शरासनावर्तमरिप्लवं नरम् ॥ १७ ॥
संग्रामचन्द्रोदयवेगवेलं द्रोणार्णवं व्यात्तरथेषुमीनम् ।

यौंकी गतिको नहीं जान सक्ते, देखो कोई हारकर हारता है, और हम जीतकर हार गये, भाई, पिता, बन्धु, मित्र, पुत्र और पोतोंको मारकर भी हम लोग पीछे हार गये, अर्थोंको विचारना और देखना भी अनर्थ ही है, हमारी यह विजय भी पराजयके समान होगई जिस विजयको पाकर दुर्बुद्धि राजाको शोच करना पड़े, ऐसे दुर्विचार जिन्हें बधो बढ़ेंगे, वह तो पराजयसे भी अधिक दुःखदायक है, जिन मित्रोंके लिये हम पाप और विजय करनेकी इच्छा करते हैं, वेही हमारे लिये मित्र द्रोह करें गये । (९ — १२)

जिन्होंने बाणरूपी फण, गदारूपी जिह्वा, धनुषरूपी टेढ़े दृढ़ मुख, धनुष टङ्कारूपी घुरघुराहट वाले शूरवीर, कर्णरूपी क्रोधी विषैले सांपके विषको शान्त किया था, वही युद्धमें न भागनेवाले हमारे मित्र तथा हमारी भूलसे मारे गये । हे राजन् बाण तरङ्ग, ढाल रूप, शक्ति और खड्ग मछली, धनुष रूप भँवर वाले तथा रथ रूपी द्वीप वाले, हाथी घोड़े रूपी नौकाओंसे युक्त, शतघ्नी रूपी मगरमच्छ, धनुष रूपी आवर्त वाले, शत्रुरूपी नौकाओंको डुबानेवाले, रत्नोंसे भरे हुए, रथरूपी बाण और घोड़ेरूपी नौकाओंसे युक्त, शतघ्नी शक्ति रूपी झष नाग रूपी मगरमच्छोंसे भरे हुए

स भूमौ निहतः शेते कुरुराजः परैरयम् ॥ १५ ॥
भयान्नमन्ति राजानो यस्य स्म शतसङ्घशः ।
स वीरशयने शेते कव्यादैः परिवारितः ॥ १६ ॥
उपासत द्विजाः पूर्वमर्थहेतोर्गमीश्वरम् ।
उपासते च तं एव कव्यादा मांसहेतवः ॥ १७ ॥
सञ्जय उवाच— तं शयानं कुरुश्रेष्ठं ततो भरतसत्तम ।
अश्वत्थामा समालोक्य करुणं पर्यदेवयत् ॥ १८ ॥
आहुस्त्वां राजशार्दूल सुखं सर्वधनुष्मताम् ।
अनाधृष्यतमं युद्धे शिष्यं सङ्कर्षणस्य च ॥ १९ ॥
कथं शिखण्यभाक्षीद्वीमसेनस्तवानघ ।
अधर्मं कृतिनं नित्यं स च पापात्मनाद्य वै ॥ २० ॥
काको नूनं मद्दाराज लोकोऽभिनवलक्षणः ।
पदमासो नित्यं त्वां च भीमसेनेन संयुगे ॥ २१ ॥
कथं त्वां सर्वधर्मज्ञं क्षुद्रः पापो वृकोदरः ।
निहन्यात्प्रायशस्तज्ज्ञो नूनं कालो दुरत्ययः ॥ २२ ॥
सर्वयुद्धेषु सञ्जग्मे समाश्रयमजामयः ।
कथं त्वां भीमसेनेन निहतं सर्वधर्मिणम् ॥ २३ ॥
इत्येवमश्वत्थामा मुमुचे बाष्पजं शिवः ।

ये तेरुच्चावचशस्त्रनौभिस्ते राजपुत्रा निहताः प्रमादात् ॥ १८ ॥
न हि प्रमादात्परमस्ति काश्चिद्वधो नराणामिह जीवलोके ।
प्रमत्तमर्था हि नरं समन्तात्त्यजन्त्यनर्थाश्च समाविशन्ति ॥ १९ ॥
ध्वजोत्तमाग्रोच्छ्रितधूमकेतुं शरार्चिषं कोपमहासमीरम् ।
महाधनुर्ज्यातलनेमिघोषं तनुत्रनानाविधशस्त्रहोमम् ॥ २० ॥
महाचमूकक्षदवाभिपन्नं महाहवे भीष्ममयाग्निदाहम् ।
ये सेहुरात्तायुधतीक्ष्णवेगं ते राजपुत्रा निहताः प्रमादात् ॥ २१ ॥
न हि प्रमत्तेन नरेण शक्यं विद्या तपः श्रीर्विपुलं यशो वा ।
पश्यांप्रमादेन निहत्य शत्रून्सर्वान्महेन्द्रं सुखमेधमानम् ॥ २२ ॥
इन्द्रोपमान्पार्थिव पुत्रपौत्रान्पश्याविशेषेण हतान्प्रमादात् ।
तीर्त्वा समुद्रं वणिजः समृद्धा मग्नाः क्षुनद्यामिव हेलमानाः ॥२३॥
अमर्षितैर्ये निहताः शयाना निःसंशयं ते त्रिदिवं प्रपन्नाः ।
कृष्णां तु शोचामि कथं नु साध्वी शोकार्णवं साऽद्य विशाल मीता॥२४॥
भ्रातॄंश्च पुत्रांश्च हतान्निशम्य पाञ्चालराजं पितरं च वृद्धम् ।
ध्रुवं विमंज्ञा पतिता पृथिव्यां सा शोच्यते शोककृशाङ्गयष्टिः॥२५॥

राजपुत्र आज हमारी भूलसे मारे गए। (१५-१८)

देखो जगत्में भूलके समान और कोई बुरी बात नहीं है, भूले हुये मनुष्यके सब अभिप्राय नष्ट हो जाते हैं और अनेक अनर्थ उसको घेर लेते हैं। जिन्होंने ऊंची वज्राकृती, भुजा, बाण ज्वाला, क्रोध वायु, धनुष पहिए और तल शब्दरूपी शब्द और अनेक प्रकार के शस्त्र आहुतियुक्त मंत्रस्वरूपी सेना से जलती हुई अग्नि को सदा था, वही राजपुत्र आज भूलसे मारे गये। प्रबल मनुष्य विद्या, तप, लक्ष्मी और यशको नहीं पा सक्ता, देखो शत्रुओंको मारकर इन्द्र, सुखसे राज करते हैं। (१९-२२)

देखो आज ये इन्द्रके समान पराक्रमी राजपुत्र और राजोंके पोते भूलसे सामान्य मनुष्योंके समान इस प्रकार मारे गये, जैसे धनधान्य से भरिपूर समुद्रको पार होकर छोटी नदीमें नाते हुए डूब जांय, हमें यह निश्चय है, कि हमारे सब सम्बन्धी सोते हुये मारे गये, अब हमें कुछ शोच नहीं है, वे सब निश्चय ही स्वर्गको चले गए। हमें केवल पतिव्रता द्रौपदीका शोक है, कि वह अपने भाई, पुत्र और वृद्ध पिताको मारा हुआ सुन किस दशाको प्राप्त होगी? हे [illegible]

य उपेक्षितवान् क्षुद्रं धिक्कृष्णं धिग्युधिष्ठिरम् ॥२४॥
युद्धेष्वपवदिष्यन्ति योधा नूनं वृकोदरम् ।
यावत्स्थास्यन्ति भूतानि निकृत्याद्यासि पातितः ॥२५॥
ननु रामोऽब्रवीद्राजंस्त्वां सदा यदुनन्दनः ।
दुर्योधनसमो नास्ति गदया इति वीर्यवान् ॥ २६ ॥
श्लाघते त्वां हि वार्ष्णेयो राजन्संसत्सु भारत ।
स शिष्यो मम कौरव्यो गदायुद्ध इति प्रभो ॥ २७ ॥
यां गतिं क्षत्रियस्याहुः प्रशस्तां परमर्षयः ।
हतस्याभिमुखस्याजौ प्राप्तस्त्वमसि तां गतिम् ॥ २८ ॥
दुर्योधन न शोचामि त्वामहं पुरुषर्षभ ।
हतपुत्रौ तु शोचामि गान्धारीं पितरं च ते ॥ २९ ॥
भिक्षुकौ विचरिष्येते शोचंतौ पृथिवीमिमाम् ।
धिगस्तु कृष्णं वार्ष्णेयमर्जुनं चापि दुर्मतिम् ॥ ३० ॥
धर्मज्ञमानिनौ यौ त्वां वध्यमानमुपेक्षताम् ।
पाण्डवाश्चापि ते सर्वे किं वक्ष्यन्ति नराधिप ॥ ३१ ॥

मारडाला । इससे हम जानते हैं, कि समयकी गति बडी कठिन है, धर्मसे बुलाकर और धर्म युद्ध आरम्भ करके भीमसेनने आपकी जङ्घा तोड दी, इससे अधिक अधर्म और क्या होगा ? जिसने अधर्मसे मरे हुये आपके शिरमें पैर रखते भीमसेनको देखा उस क्षुद्र, कृष्ण और युधिष्ठिरको धिक्कार है, जब तक पृथ्वीमें मनुष्य रहेंगे तब तक सब वीर भीमसेनकी अवश्य निन्दा करेंगे । (२०-२५)

हे महाराज ! यदुकुलश्रेष्ठ वीर बलराम सदा कहा करते थे कि गदा युद्धमें दुर्योधनके समान कोई वीर नहीं है, बलराम सब सभाओंमें आपकी प्रशंसा किया करते थे, कि राजा दुर्योधन गदायुद्धमें हमारे शिष्य है, हे महाराज ! महामुनियोंने जो क्षत्रियोंके लिये उत्तम गति कही है, युद्धमें मरनेसे आपको वही गति प्राप्त हुई । (२६—२८)

हे पुरुषसिंह दुर्योधन ! हम आपका कुछ शोच नहीं करते परन्तु हमें पुत्रहीन गान्धारी, और आपके पिताका शोच है, वे दोनों वृद्ध होनेसे व्याकुल होकर भिक्षुकके समान पृथ्वीमें घूमेंगे, दुर्बुद्धि कृष्ण और अर्जुनको धिक्कार है, वे धर्मज्ञ कहानेवाले और आप

तच्छोकजं दुःखमपारयन्ती कथं भविष्यत्युचिता सुखानाम् ।
पुत्रक्षयभ्रातृवधप्रणुन्ना प्रदह्यमानेन हुताशनेन ॥ २६ ॥
इत्येवमार्तः परिदेवयन्स राजा कुरूणां नकुलं बभाषे ।
गच्छानयैनामिह मन्दभाग्यां समातृपक्षामिति राजपुत्रीम् ॥२७॥
माद्रीसुतस्तत्परिगृह्य वाक्यं धर्मेण धर्मप्रतिमस्य राज्ञः ।
ययौ रथेनालयमाशु देव्याः पञ्चालराजस्य च यत्र दाराः ॥ २८ ॥
प्रस्थाप्य माद्रीसुतमाजमीढः शोकार्दितस्तैः सहितः सुहृद्भिः ।
रोरूयमाणः प्रययौ सुतानामाघोषनं भूतगणानुकीर्णम् ॥ २९ ॥
स तत्प्रविज्याशिवमुग्ररूपं ददर्श पुत्रान्सुहृदः सर्वांश्च ।
भूमौ शयानान् रुधिरार्द्रगात्रान्विभिन्नदेहान्प्रहृतोत्तमाङ्गान् ॥३०॥
स तांस्तु दृष्ट्वा भृशमार्तरूपो युधिष्ठिरो धर्मभृतां वरिष्ठः ।
उच्चैः प्रचुक्रोश च कौरवाग्र्यः पपात चोर्व्यां सगणो विसंज्ञः ॥३१॥५६९

इति श्रीमहाभारते शत० सांहितेक पर्वणि पञ्चाकपर्वणि युधिष्ठिरविलापवर्णने दशमोऽध्यायः ॥ १० ॥

निश्चय ही वह शोकसे व्याकुल होकर पृथ्वीमें गिर पड़ेगी । आज वह सुख भोगने योग्य द्रौपदी इस शोकसमुद्रके पार कैसे जायगी ? उसकी क्या दशा होगी अपने भाई पुत्रोंको मरा हुआ सुन उसकी कैसी दशा होजायगी जैसे आगमें जलते हुये मनुष्यकी । कुरुकुलके स्वामी महाराज युधिष्ठिर इस प्रकार रोते हुए व्याकुल होकर नकुलसे बोले, तुम जाओ उन

कथं दुर्योधनोऽस्माभिर्हत इत्यनपत्रपाः।
धन्यस्त्वमसि गान्धारे यस्त्वमायोधने हतः ॥ ३२ ॥
प्रायशोऽभिमुखः शत्रून्धर्मेण पुरुषर्षभ।
हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ॥ ३३ ॥
प्रज्ञाचक्षुश्च दुर्धर्षः कां गतिं प्रतिपत्स्यते।
धिगस्तु कृतवर्माणं मां कृपं च महारथम् ॥ ३४ ॥
ये च नं न गताः स्वर्गं त्वां पुरस्कृत्य पार्थिवम्।
नायारं सर्वकामानां रक्षितारं प्रजाहितम् ॥ ३५ ॥
गुरुं नानुगच्छाम त्वां धिगस्मानरराधमान्।
कृतघ्ना नव लोकेषु सम चैव पितुश्च मे ॥ ३६ ॥
सर्वकामान्नरव्याघ्र रत्नानि विविधानि च।
नव प्रमादादस्माभिः समिद्धैः बाह्मणान्भवैः ॥ ३७ ॥
दक्षिणाः क्रतवो मुख्या बहवो भूरिदक्षिणाः।
कृतास्तातं पुरा नः प्रवर्तिष्यामहे कथम् ॥ ३८ ॥
दानेन परमकृत्य त्वं गतः सर्वपार्थिवान्।
यथैव अयो राजन गच्छन्तं परमां गतिम् ॥ ३९ ॥
गच्छं त्वां नानुगच्छामस्तेन धक्ष्यामहे वयम्।
सत्यसंधेना शीलाद्यैः सर्वान्तः सुकृतस्य नः ॥ ४० ॥
हि नाम सदृशं कर्म येन त्वां न व्रजाम वै।

वैशम्पायन उवाच-स दृष्ट्वा निहतान्संख्ये पुत्रान्पौत्रान्सखींस्तथा।
महादुःखपरीतात्मा बभूव जनमेजय ॥ १ ॥
ततस्तस्य महान् शोकः प्रादुरासीन्महात्मनः।
स्मरतः पुत्रपौत्राणां भ्रातॄणां स्वजनस्य ह ॥ २ ॥
तमश्रुपरिपूर्णाक्षं वेपमानमचेतसम्।
सुहृदो भृशसंविग्नाः सांत्वयांचक्रिरे तदा ॥ ३ ॥
ततस्तस्मिन् क्षणे कल्पो रथेनादित्यवर्चसा।
नकुलः कृष्णया सार्धमुपायात्परमार्त्तया ॥ ४ ॥
उपप्लव्यं गता सा तु श्रुत्वा सुमहदप्रियम्।
तदा विनाशं सर्वेषां पुत्राणां व्यथिताऽभवत् ॥ ५ ॥
कम्पमानेव कदली वातेनाभिसमीरिता।
कृष्णा राजानमासाद्य शोकार्त्तान्यपतद्भुवि ॥ ६ ॥
बभूव वदनं तस्याः सहसा शोककर्षितम्।
पुष्करपत्रपलाशाक्ष्यास्तमोग्रस्त इवांशुमान् ॥ ७ ॥
तनम्नां पतितां दृष्ट्वा संरम्भी मरुतोपमः।
बाहुभ्यां परिजग्राह समुत्पत्य वृकोदरः ॥ ८ ॥

सौप्तिक पर्वमें ग्यारह अध्याय।

श्रीवैशम्पायन मुनि बोले, हे राजन् जनमेजय! अपने बेटे, पोते और सम्बन्धियोंको मरा हुआ देखकर महाराज अत्यन्त शोकसे व्याकुल होगये; जब महात्मा युधिष्ठिर बेटे, पोते, भाई और सम्बन्धियोंके शोकसे व्याकुल होकर आंखोंसे आंसू भरकर कांपने लगे तब सब होते हुये मित्र उन्हें समझाने लगे। (१—३)

उसी समय प्रातःकालके सूर्यके समान चमकते हुये, रथपर बैठे हुए द्रौपदीके सहित नकुल आप हूंचे। द्रौपदी पहिले ही उपप्लव (छावनी) को चली गई थी, वहीं अपने पुत्रोंके मरनेका समाचार सुना और व्याकुल होगई, द्रौपदी महाराजके पास आकर और शोकसे व्याकुल होकर इस प्रकार पृथ्वीमें गिर पड़ी जैसे केलेका वृक्ष आंधीसे टूटकर गिर पड़ता है, उस समय फूले हुये कमलके समान नेत्रवाली द्रौपदीका मुख शोकसे व्याकुल होनेके कारण ऐसा होगया जैसा राहुके ग्रहण करनेसे चन्द्रमा। (४—७)

द्रौपदीको पृथ्वीमें पड़ा देख महापराक्रमी भीमसेनने अपने हाथोंसे उठा

दुःखं नूनं कुरुश्रेष्ठ चरिष्याम महीमिमाम् ॥ ४१ ॥
हीनानां नस्त्वया राजन्कुतः शान्तिः कुतः सुखम् ।
गत्वैव तु महाराज समेत्य च महारथान् ॥ ४२ ॥
यथाज्येष्ठं यथाश्रेष्ठं पूजयेर्वचनान्मम ।
आचार्यं पूजयित्वा च केतुं सर्वधनुष्मताम् ॥ ४३ ॥
हतं मयाद्य शंसेथा धृष्टद्युम्नं नराधिप ।
परिष्वजेथा राजानं वाह्लिकं सुमहारथम् ॥ ४४ ॥
सैन्धवं सोमदत्तं च भूरिश्रवसमेव च ।
तथा पूर्वगतानन्यान् स्वर्गे पार्थिवसत्तमान् ॥ ४५ ॥
अस्मद्वाक्यात्परिष्वज्य संपृच्छेस्त्वमनामयम् ॥४६॥
सञ्जय उवाच- इत्येवमुक्त्वा राजानं भग्नस्कन्धमचेतनम् ।
अश्वत्थामा समुद्वीक्ष्य पुनर्वचनमब्रवीत् ॥ ४७ ॥
दुर्योधन जीवसि त्वं वाक्यं श्रोत्रसुखं शृणु ।
सप्त पाण्डवतः शेषा धार्त्तराष्ट्रास्त्रयो वयम् ॥ ४८ ॥
ते चैव भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
अहं च कृतवर्मा च कृपः शारद्वतस्तथा ॥ ४९ ॥

आपके धर्मका स्मरण करेंगे, वह कौनसा कर्म आपका है, जिसका स्मरण हम नहीं करेंगे । (३२—४१)

हे कुरुकुलश्रेष्ठ ! अब हमको जगत्में दुःख ही भोगना शेष है, क्यों कि अब आपके विना हमको सुख और शान्ति कहां ? हे महाराज आप स्वर्गमें जाकर सब महारथियोंसे मिलकर हमारी ओरसे क्रमके अनुसार सबकी पूजा करना. फिर सब धनुषधारियोंमें श्रेष्ठ गुरुजीको प्रणाम करके कहना. कि मैंने धृष्टद्युम्नको मारडाला । फिर महारथी राजा वाह्लिक. भिन्नराज जयद्रथ. सोमदत्त और भूरिश्रवादि स्वर्गमें बैठे राजोंसे मिलकर कुशल प्रश्न करना । (४२-४६)

सञ्जय बोले. जांघ टूटे मूर्च्छित राजासे ऐसा कहकर फिर उनके मुखकी ओर देखकर अश्वत्थामा बोले, हे महाराज दुर्योधन ! अभी आप चौदहो तो जानेको सुख देनेवाले, मेरे वचन सुनिये, अब पाण्डवोंकी सब सेनामें केवल सात मनुष्य शेष हैं और आपकी ओरसे हम तीन बचे हैं, पाण्डवोंकी ओर पांचो पाण्डव, छठे कृष्ण और सातवें सात्यकी, आपकी ओर से हम तीनों हैं और कृतवर्मा (४७-५०)

सा समाश्वासिता तेन भीमसेनेन भामिनी।
रुदती पाण्डवं कृष्णा सा हि भारतमब्रवीत् ॥ ९ ॥
दिष्ट्या राजन्नवाप्येमामखिलां भोक्ष्यसे महीम्।
आत्मजान् क्षत्रधर्मेण संप्रदाय यमाय वै ॥ १० ॥
दिष्ट्या त्वं कुशली पार्थ सत्तमातङ्गगामिनीम्।
अवाप्य पृथिवीं कृत्स्नां सौभद्रं न स्मरिष्यसि ॥ ११ ॥
आत्मजान् क्षत्रधर्मेण श्रुत्वा शूरान्निपातितान्।
उपप्लव्ये मया सार्धं दिष्ट्या त्वं न स्मरिष्यसि॥ १२ ॥
प्रसुप्तानां वधं श्रुत्वा द्रौणिना पापकर्मणा।
शोकस्तपति मां पार्थ हुताशन इवाश्रयम् ॥ १३ ॥
तस्य पापकृतो द्रौणेर्न चेद्य त्वया रणे।
हियते सानुबन्धस्य शुचि विक्रम्य जीवितम् ॥ १४ ॥
हतैव प्रायमासिष्ये तन्निबोधत पाण्डवाः।
न चेत्पास्यत्यसौ द्रौणिः पापस्य कर्मणः ॥ १५ ॥
एवमुक्त्वा ततः कृष्णा पाण्डवं प्रत्युपाविशत्।

लिया और समझाने लगे, तब रोती हुई द्रौपदी महाराजसे बोली, हे पृथ्वीनाथ! आज प्रारब्धसे आप इस सब पृथ्वीके राजा हुए, अब क्षत्रियोंके धर्मके पालनेवाले अपने बेटोंको यमराजको पार्थ जलते हुए मेरे पुत्रोंको सोते हुए मारनेका शोकसे व्याकुल होगई है, सोइ मेरे शरीरको इस प्रकार तपाता है जैसे पास रक्खी हुई अग्नि वस्तुको। (८-१३)

कथं दुर्योधनोऽस्माभिर्हत इत्यनपत्रपाः।
धन्यस्त्वमसि गान्धारे यस्त्वमाशोधने हतः ॥ ३२ ॥
प्रायशोऽभिमुखः शत्रूनधर्मेण पुरुषर्षभ।
हतपुत्रा हि गान्धारी निहतज्ञातिबान्धवा ॥ ३३ ॥
प्रज्ञाचक्षुश्च दुर्धर्षः कां गतिं प्रतिपत्स्यते।
विगम्तु कृतवर्माणं मां कृपं च महारथम् ॥ ३४ ॥
ये चयं न गताः स्वर्गं त्वां पुरस्कृत्य पार्थिवम्।
त्रातारं सर्वकामानां रक्षितारं प्रजाहितम् ॥ ३५ ॥
सङ्गं नानुगच्छाम त्वां विगम्याशरायमान्।
कृतघ्न इव नीर्लज्ज मम चैव पितुश्च मे ॥ ३६ ॥
मणिमानां नरव्याघ्र रत्नानि विविधानि च।
न च प्रमाद्यसे मूर्खैः सहितानर्थवैः ॥ ३७ ॥
आचार्या ऋत्विजो मुख्या गुरवो भूरिदक्षिणाः।
कृतवर्माणमेकं वाप्यं पाण्डवा विप्रकुर्वते ॥ ३८ ॥
वासुदेव परिक्रम्य त्वं गतः सर्वपार्थिवान्।
सर्वेषां त्वं गतिर्नाथ वृष्णीनां परमा मतिः ॥ ३९ ॥
कथं त्वां मानुषाः शक्ता जेतुं नागायणं युधि।
त्वन्मायामोहिता नीता वाक्यैः सुकृतवज्रयैः ॥ ४० ॥
हि नाम सङ्ग्रामे येन त्वं न प्रजाम वै।

युधिष्ठिरं याज्ञसेनी धर्मराजं यशस्विनी ॥ १६ ॥
दृष्ट्वोपविष्टां राजर्षिः पाण्डवो महिषीं प्रियाम् ।
प्रत्युवाच स धर्मात्मा द्रौपदीं चारुदर्शनाम् ॥ १७ ॥
धर्म्य धर्मेण धर्मज्ञे प्राप्तास्ते निधनं शुभे ।
पुत्रास्ते भ्रातरश्चैव तान्न शोचितुमर्हसि ॥ १८ ॥
स कल्याणि वनं दुर्गं द्रौणिरितो गतः
तस्य त्वं पातनं संख्ये कथं ज्ञास्यासि शोभने ॥ १९ ॥

द्रौपद्युवाच— द्रोणपुत्रस्य सहजो मणिः शिरसि मे श्रुतः ।
निहत्य संख्ये तं पापं पश्येयं मणिमाहृतम् ॥ २० ॥
राजन् शिरसि ते कृत्वा जीवेयामिति मे मतिः ।
इत्युक्त्वा पाण्डवं कृष्णा राजानं चारुदर्शना॥ २१ ॥
भीमसेनमथागत्य परमं वाक्यमब्रवीत् ।
त्रातुमर्हसि मां भीम क्षत्रधर्ममनुस्मरन् ॥ २२ ॥
जहि तं पापकर्माणं शम्बरं मघवानिव ।
न हि ते विक्रमे तुल्यः पुमानस्तीह कश्चन ॥ २३ ॥
श्रुतं तन्मर्त्यलोकेषु परमद्युमने यथा ।
द्रौपोऽभ्युक्तं हि पार्थानां नगरे वारणावते ॥ २४ ॥

दुःखं नूनं कुरुश्रेष्ठ चरिष्याम महीमिमाम् ॥ ४१ ॥
हीनानां नस्त्वया राजन्कुतः शान्तिः कुतः सुखम् ।
गत्वैव तु महाराज समेत्य च महारथान् ॥ ४२ ॥
यथाज्येष्ठं यथाश्रेष्ठं पूजयेर्वचनान्मम ।
आचार्यं पूजयित्वा च केतुं सर्वधनुष्मताम् ॥ ४३ ॥
हतं मयाद्य शंसेथा धृष्टद्युम्नं नराधिप ।
परिष्वजेथा राजानं वाह्लिकं सुमहारथम् ॥ ४४ ॥
सैन्धवं सोमदत्तं च भूरिश्रवसमेव च ।
तथा पूर्वगतानन्यान् स्वर्गे पार्थिवसत्तमान् ॥ ४५ ॥
असद्वाक्यात्परिष्वज्य संपृच्छेस्त्वमनामयम् ॥४६॥
सञ्जय उवाच- इत्येवमुक्त्वा राजानं भग्नस्कथमचेतनम् ।
अश्वत्थामा समुद्वीक्ष्य पुनर्वचनमब्रवीत् ॥ ४७ ॥
दुर्योधन जीवसि त्वं वायं श्रोत्रसुखं शृणु ।
सह पाण्डवतः शेषा धार्तराष्ट्रास्त्रयो वयम् ॥ ४८ ॥
ते पञ्च भ्रातरः पञ्च वासुदेवोऽथ सात्यकिः ।
अहं च कृतवर्मा च कृपः शारद्वतस्त्रयः ॥ ४९ ॥

आपके धर्मका स्मरण करेंगे, वह कौनसा कर्म आपका है, जिसका स्मरण हम नहीं करेंगे । (४२—४१)

हे कुरुकुलश्रेष्ठ ! अब हमको जगत्में दुःख ही भोगना शेष है, क्यों कि अब आपके विना हमको सुख और शान्ति कहां ? हे महाराज आप स्वर्गमें जाकर सब महारथियोंसे मिलकर हमारी ओरसे क्रमके अनुसार सबकी पूजा करना. फिर सब धनुषधारियोंमें श्रेष्ठ गुरुजीको प्रणाम करके कहना, कि मैंने धृष्टद्युम्नको मारडाला । फिर महाबल राजा वाह्लिक, सिन्धुराज जयद्रथ, सोमदत्त और भूरिश्रवादि स्वर्गमें बैठे राजोंसे मिलकर कुशल प्रश्न करना । (४२-४६)

सञ्जय बोले, जांघ टूटे मूर्च्छित राजासे ऐसा कहकर फिर उनके मुखकी ओर देखकर अश्वत्थामा बोले, हे महाराज दुर्योधन ! अभी आप जीते हो तो हमको मुख देनेवाले, मेरे वचन सुनिये. अब पाण्डवोंकी सब सेनाके केवल सात मनुष्य शेष हैं और हमतीन बचे हैं, पांडव पांच भाई और वासुदेव कृष्ण, सात्यकि, मैं कृतवर्मा और कृपाचार्य ये तीन (४७-४९)

हिडिम्बवधर्जने चैव तथा त्वमभवो गतिः ।
तथा विराटनगरे कीचकेन भृशार्दिताम् ॥ २५ ॥
मामप्युद्धृतवान्कृच्छ्रात्पालोमीं मघवानिव ।
यथैतान्यकृथाः पार्थ महाकर्माणि वै पुरा ॥ २६ ॥
तथा द्रौणिमसित्रघ्नं विनिहत्य सुखी भव ।
तस्या बहुविधं दुःखं निशम्य परिदेवितम् ॥ २७ ॥
न चामर्षत कौन्तेयो भीमसेनो महाबलः ।
स काञ्चनविचित्राङ्गमारुरोह महारथम् ॥ २८ ॥
आदाय सचिरं चित्रं समार्गणगुणं धनुः ।
नकुलं सारथिं कृत्वा द्रोणपुत्रवधे धृतः ॥ २९ ॥
विस्फार्य सशरं चापं तूर्णमश्वानचोदयत् ।
ते हयाः पुरुषव्याघ्र चोदिता वातरंहसः ॥ ३० ॥
वेगेन त्वरिता जग्मुर्हरयः शीघ्रगामिनः ।
शिबिरात्स्वाद्विनिर्गत्य स रथस्य पदमन्वगात् ॥ ३१ ॥ [३००]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां [illegible] पर्वणि
द्रौणिवधार्थं भीमसेनगमने [illegible] ॥ ३१ ॥

वैशम्पायन उवाच-तस्मिन्प्रयाते दुर्धर्षे यदूनामृषभस्तदा ।

अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ॥ १ ॥
एष पाण्डव ते भ्राता पुत्रशोकपरायणः ।
जिघांसुद्रौणिमाक्रन्दे एक एवाभिधावति ॥ २ ॥
भीमः प्रियस्ते सर्वेभ्यो भ्रातृभ्यो भरतर्षभ ।
तं कृच्छ्रगतमद्य त्वं कस्मान्नाभ्युपपद्यसे ॥ ३ ॥
यत्तदाऽऽचष्ट पुत्राय द्रोणः परपुरञ्जयः ।
अस्त्रं ब्रह्मशिरो नाम दहेत पृथिवीमपि ॥ ४ ॥
तन्महात्मा महाभागः केतुः सर्वधनुष्मताम् ।
प्रत्यपादयदाचार्यः प्रीयमाणो धनञ्जयम् ॥ ५ ॥
तं पुत्रोप्येक एवैनमन्वयाच्चदमर्षणः ।
ततः प्रोवाच पुत्राय नातिहृष्टमना इव ॥ ६ ॥
विदितं चापलं ह्यासीदात्मजस्य दुरात्मनः ।
सर्वधर्मविदाचार्यः सोऽन्वकाङ्क्षत्स्वसुतं ततः ॥ ७ ॥
परमापद्गतेनापि न मम तात त्वया रणे ।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥ ८ ॥
इत्युक्तवान्गुरुः पुत्रं द्रोणः पश्चादथोक्तवान् ।

पार्षतं चार्दयामास निश्चेष्टं सर्वमर्मसु ।
स हन्यमानः समरे गौतमेन महात्मना ॥ ११ ॥
कर्त्तव्यं न स जानाति मोहेन महता वृतः ।
तमब्रवीत्ततो यन्ता कच्चित्क्षेमं तु पार्षत ॥ १२ ॥
ईदृशं व्यसनं युद्धे न ते दृष्टं मया क्वचित् ।
दैवयोगात्तु ते बाणा नापतन्मर्मभेदिनः ॥ १३ ॥
प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वतः ।
व्यवर्तये रथं तूर्णं नदीवेगमिवार्णवात् ॥ १४ ॥
अवध्यं ब्राह्मणं मन्ये येन ते विक्रमो हतः ।
धृष्टद्युम्नस्ततो राजञ्शनकैरब्रवीद्वचः ॥ १५ ॥
मुह्यते मे मनस्तात गात्रस्वेदश्च जायते ।
वेपथुश्च शरीरे मे रोमहर्षश्च सारथे ॥ १६ ॥
वर्जयन्ब्राह्मणं युद्धे शनैर्याहि यतोऽर्जुनः ।
अर्जुनं भीमसेनं वा समरे प्राप्य सारथे ॥ १७ ॥
क्षेममद्य भवेदेवमेषा मे नैष्ठिकी मतिः ।
ततः प्रायान्महाराज सारथिस्त्वरयन्हयान् ॥ १८ ॥
यतो भीमो महेष्वासो युयुधे तव सैनिकैः ।

सन्धियोंमें अनेक बाण मारे, उस समय धृष्टद्युम्न ऐसे मोहित हुए,कि कुछ न कर सके, तब उनके सारथीने कहा । हे महाराज कुमार ! आप कुशलसे तो है ? हमने इससे पहले किसी युद्धमें ऐसी आपकी दशा नहीं देखी थी, आज हमारी प्रारब्धसे आपके शरीरमें मर्मभेदी बाण नहीं लगे रहे है । ब्राह्मणश्रेष्ठ कृपाचार्य आपके मर्म स्थानोंमें बाण मार रहे है । इस लिये हमारी इच्छा यह है, कि जैसे समुद्रको प्राप्त होकर नदीका वेग पीछे हटता है, तैसे ही आपके रथको युद्धमे लौटावें । ब्राह्मण अवध्य है इसीलिये आपका बल नष्ट होगया । (१०-१५)

सारथीके ऐसे वचन सुन धृष्टद्युम्न धीरसे बोले, हे सारथी ! मेरी बुद्धि नष्ट होगयी, मन घबडा रहा है, शरीर पसीनेसे भीजा जाता है, रोवें खडे हुए जाते हैं और अङ्ग कांप रहे है । हे सारथे ! तुम हमारे रथको इस ब्राह्मणके रथसे बचाकर जहां अर्जुन वा भीमसेन हों वहां लेचलो । हमको निश्चय है कि भीमसेन या अर्जुनके पास जानेहीसे हमारा कल्याण होगा । (१५—१८)

प्रद्रुतं च रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष ॥ १९ ॥
किरञ्शरशतान्येव गौतमोऽनुययौ तदा।
शङ्खं च पूरयामास मुहुर्मुहुररिन्दमः ॥ २० ॥
पार्षतं त्रासयामास महेन्द्रो नमुचिं यथा।
शिखण्डिनं तु समरे भीष्ममृत्युं दुरासदम् ॥ २१ ॥
हार्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः।
शिखण्डी तु समासाद्य हृदिकानां महारथम् ॥ २२ ॥
पञ्चभिर्निशितैर्भल्लैर्जत्रुदेशे समाहनत्।
कृतवर्मा तु संक्रुद्धो भित्त्वा षष्ट्या पतत्रिभिः ॥ २३ ॥
धनुरेकेन चिच्छेद हसन्राजन्महारथः।
अथान्यद्धनुराय द्रुपदस्यात्मजो बली ॥ २४ ॥
तिष्ठ तिष्ठेति संक्रुद्धो हार्दिक्यं प्रत्यभाषत।
ततोऽस्य नवतिं बाणान्रुक्मपुङ्खान्सुतेजनान् ॥ २५ ॥
प्रेषयामास राजेन्द्र तेऽस्याभ्रश्यन्त वर्मतः।
वितथांस्तान्समालक्ष्य पतितांश्च महीतले ॥ २६ ॥
क्षुरप्रेण सुतीक्ष्णेन कार्मुकं चिच्छिदे भृशम्।
अथैनं छिन्नधन्वानं भग्नशृङ्गमिवर्षभम् ॥ २७ ॥

धृष्टद्युम्नके ऐसे वचन सुन सारथीने घोडोंको शीघ्र हांका, थोडे समयमें जहां भीमसेन युद्ध कर रहे थे, वहां जा पहुंचे। हे राजन्! धृष्टद्युम्नको भागते देख शत्रुनाशन कृपाचार्य बाण छोडते और शङ्ख बजाते उनके पीछे दौडे, कृपाचार्यने धृष्टद्युम्नको इस प्रकार डराया जैसे इन्द्रने नमुचिको। (१८—२१)

अनन्तर भीष्मके मारनेवाले महापराक्रमी शिखण्डीको हार्दिक्य युद्धमें निवारण करने लगे, शिखण्डीने कृतवर्माके जत्रुदेशमें पांच तेज बाण चलाये, महारथ कृतवर्माने हंसकर उन सब बाणोंको अपने साठ बाणोंसे काट दिया और एक बाणसे शिखण्डीका धनुष काटदिया। तब बलवान् शिखण्डीने क्रोध करके दूसरा धनुष धारण किया, और कृतवर्मासे खडा रह! कहके शिखण्डीने सोनेके पङ्खवाले नव्वे तेज बाण कृतवर्माकी ओर चलाये, वे बाण कृतवर्माके कवचमें लगकर पृथ्वीमें गिर गये। २१—२६

शिखण्डीने अपने बाणोंको विफल होकर पृथ्वीमें गिरते देख एक तीक्ष्ण क्षुरप्र बाणसे कृतवर्माका धनुष काट दिया।

न त्वं जातु सतां मार्गं स्यातेति पुरुषर्षभ ॥ ९ ॥
स तदाज्ञाय दुष्टात्मा पितुर्वचनमप्रियम् ।
निराशः सर्वकल्याणैः शोकात्पर्यचरन्महीम् ॥ १० ॥
ततस्तदा कुरुश्रेष्ठ वनस्थे त्वयि भारत ।
अवसद् द्वारकामेत्य वृष्णिभिः परमार्चितः ॥ ११ ॥
स कदाचित्समुद्रान्ते वसन् द्वारवतीमनु ।
एकैकं समागम्य मामुवाच हसन्निव ॥ १२ ॥
यत्तदुग्रं तपः कृष्ण चरन्सत्यपराक्रमः ।
अगस्त्याद्भारताचार्यः प्रत्यपद्यत मे पिता ॥ १३ ॥
अस्त्रं ब्रह्मशिरो नाम देवगन्धर्वपूजितम् ।
तद्ध्य मयि दाशार्ह यथा पितरि मे तथा ॥ १४ ॥
अमत्तस्तदुपादाय दिव्यमस्त्रं यदुत्तम ।
ममाप्यस्त्रं प्रयच्छ त्वं चक्रं रिपुहणं रणे ॥ १५ ॥
स राजन्प्रीयमाणेन मयाऽप्युक्तः कृताञ्जलिः ।
याचमानः प्रयत्नेन मत्तोऽस्त्रं भरतर्षभ ॥ १६ ॥
देवदानवगन्धर्वमनुष्योरगपत्तगाः ।

जीवितान्तकरं घोरं व्यसृजत्त्वरयान्वितः ।
स तेनाभिहतो राजन्मूर्च्छामाशु समाविशत् ॥ ३६ ॥
ध्वजयष्टिं च सहसा शिश्रिये कश्मलावृतः ।
अपोवाह रणात्तूर्णं सारथी रथिनां वरम् ॥ ३७ ॥
हार्दिक्यशरसन्तप्तं निःश्वसन्तं पुनः पुनः ।
पराजिते ततः शूरे द्रुपदस्यात्मजे प्रभो ।
व्यद्रवत्पाण्डवी सेना व्यधमाना समन्ततः ॥३८॥ [१०६८]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सकुलयुद्धे षड्विंशोऽध्यायः ॥ २६ ॥

सञ्जय उवाच— श्वेताश्वोऽथ महाराज व्यधमत्तावकं बलम् ।
यथा वायुः समासाद्य तूलराशिं समन्ततः ॥ १ ॥
प्रत्युद्ययुस्त्रिगर्त्तास्तं शिबयः कौरवैः सह ।
शाल्वाः संशप्तकाश्चैव नारायणबलं च तत् ॥ २ ॥
सत्यसेनश्चन्द्रदेवो मित्रदेवः सुतञ्जयः ।
सौश्रुतिश्चित्रसेनश्च मित्रवर्मा च भारत ॥ ३ ॥
त्रिगर्त्तराजः समरे भ्रातृभिः परिवारितः ।
पुत्रैश्चैव महेष्वासैर्नानाशस्त्रविशारदैः ॥ ४ ॥
व्यसृजन्त शरव्रातान्किरन्तोऽर्जुनमाहवे ।

शत्रुनाशन शिखण्डीके शरीरमें मारा, उस बाणके लगनेसे महारथ शिखण्डी-को मूर्च्छा होगयी, और वह ध्वजा के बांसको पकडकर बैठ गया, तब सारथी ने उनके रथको शीघ्रतासे युद्धसे हटा दिया ॥ कृतवर्मा के बाणोंसे पीडित होकर शिखण्डी बार बार सांस लेने लगे, हे महाराज ! द्रुपदके पुत्र महारथ शिखण्डीको युद्धसे हटता हुआ देखकर पाण्डवोंकी सेना इधर उधर भागने लगी ॥ (३४-३८) [१०६८]

कर्णपर्वमें छब्बीस अध्याय समाप्त ।

कर्णपर्वमें सताईस अध्याय।

सञ्जय बोले, हे राजन् धृतराष्ट्र ! जैसे वायु रुईको उडाता है, तैसे ही अर्जुनने तुम्हारी सेनाको मारना और भगाना आरम्भ किया ॥ उनसे लडनेके लिये त्रिगर्त्त, शिबी, कौरव, शाल्व, संशप्तक और नारायणी सेनाके वीर चले। हे भारत! सत्यसेन, चन्द्रदेव, मित्रदेव, सुतञ्जय, सौश्रुति, चित्रसेन, मित्रवर्मा और त्रिगर्त्त देशका राजा अपने भाई और पुत्रोंके सहित अर्जुनसे युद्ध करनेको आये॥ १-४

वे सब युद्धविद्याके जाननेवाले महा

न समा मम वीर्यस्य शतांशेनापि पिण्डिताः॥ १७ ॥
इदं धनुरियं शक्तिरिदं चक्रमियं गदा।
यद्यदिच्छसि चेदस्त्रं मत्तस्तत्तद्ददामि ते ॥ १८ ॥
यच्छक्तोपि समुद्यन्तुं प्रयोक्तुमपि वारणे।
तद्गृहाण विनाऽस्त्रेण यन्मे दातुमभीप्ससि ॥ १९ ॥
स सुनाभं सहस्रारं वज्रनाभमयस्मयम्।
चक्रे चक्रं महाभागो मत्तः स्पर्धन्मया सह ॥ २० ॥
गृहाण चक्रमित्युक्तो मया तु तदनन्तरम्।
जग्राहोत्पत्य सहसा चक्रं सव्येन पाणिना ॥ २१ ॥
न चैनमशकत्स्थानात्समञ्चालयितुमप्युत।
अथैनं दक्षिणेनापि ग्रहीतुमुपचक्रमे ॥ २२ ॥
सर्वयत्नबलेनापि गृह्णन्नेवमिदं ततः।
ततः सर्वबलेनापि यदैनं न शशाक ह ॥ २३ ॥
उद्धन्तुं वा चालयितुं द्रौणिः परमदुर्मनाः।
कृत्वा यत्नं परिश्रान्तः सन्यवर्तत भारत ॥ २४ ॥
निवृत्तमनसं तस्मादभिप्रायाद्विचेतसम्।
अब्रवीन्मां पुनर्विप्रमश्वत्थामानमच्युतम् ॥ २५ ॥
यः सदैव मनुष्येषु प्रमाणं परमं गतः।

मागते एक मागके समान मी हो, जो हो यह धनुष, यह चक्र, यह शक्ती और यह गदा रक्खी है, जो तुम चाहो सो ले लो हम देते हैं, तुम जिस शस्त्रको उठा सको और चलाने चला सको, उसे ले लो; और उसके बदलेमें जो शस्त्र तुम देना चाहते हो, सो हम नहीं देते (१६—१९)

प्रसन्न होकर उठे और बाँये हाथसे उठाने लगे। परन्तु जगमा भी स्थानसे न उठा सके तब दहिना हाथ लगाकर उठाने लगे, परन्तु सब बल और सब पराक्रम करके हार गये, परन्तु चक्र न उठा। जब वे उसको उठा वा हिला न सके, तब बहुत ही मनोंमें मन दौड़ा भकका बैठ गये। (२०—२५)

तथेतरान्महाराज यतमानान्महारथान् ।
पञ्चभिः पञ्चभिर्बाणैरेकैकं प्रत्यवारयत् ॥ १४ ॥
सत्यसेनस्तु संक्रुद्धस्तोमरं व्यसृजन्महत् ।
समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च ॥ १५ ॥
स निर्भिद्य भुजं सव्यं माधवस्य महात्मनः ।
अयस्मयो हेमदण्डो जगाम धरणीं तदा ॥ १६ ॥
माधवस्य तु विद्धस्य तोमरेण महारणे ।
प्रतोदः प्रापतद्धस्ताद्रश्मयश्च विशाम्पते ॥ १७ ॥
वासुदेवं विभिन्नाङ्गं दृष्ट्वा पार्थो धनञ्जयः ।
क्रोधमाहारयत्तीव्रं कृष्णं चेदमुवाच ह ॥ १८ ॥
प्रापयाश्वान्महाबाहो सत्यसेनं प्रति प्रभो ।
यावदेनं शरैस्तीक्ष्णैर्नयामि यमसादनम् ॥ १९ ॥
प्रतोदं गृह्य सोऽन्यत्तु रश्मीनपि यथा पुरा ।
वाहयामास तानश्वान्सत्यसेनरथं प्रति ॥ २० ॥
विष्वक्सेनं तु निर्भिन्नं दृष्ट्वा पार्थो धनञ्जयः ।
सत्यसेनं शरैस्तीक्ष्णैर्वारयित्वा महारथः ॥ २१ ॥
ततः सुनिशितैर्भल्लै राज्ञस्तस्य महच्छिरः ।

बाणों से मार कर यमलोक में पहुंचा दिया, और सब महारथोंको पांच पांच बाणोंसे निवारण किया ॥ (१२—१४)

अत्यन्त क्रुद्ध सत्यसेनने सिंहके समान गर्जके एक भारी तोमर श्रीकृष्णके उद्देश्यसे मारा ॥ वह सोनेके दण्डवाला लोहेका तोमर श्रीकृष्णके बाएं हाथको छेदकर पृथ्वीमें चला गया ॥ हे पृथ्वीनाथ! महात्मा श्रीकृष्णके हाथमें तोमर लगनेसे घोडोंकी राम और चाबुक छूट गया ॥ (१५—१७)

कृष्णको अत्यन्त व्याकुल देखकर अर्जुनको बहुत क्रोध हुआ और कृष्णसे बोले, हे कृष्ण ! तुम हमारे घोडोंको शीघ्र सत्यसेनके रथके पास ले चलो; मैं इस दुष्टको अपने बाणोंसे अभी मारूंगा ॥ (१८—१९)

अर्जुनका वचन सुन श्रीकृष्णने दूसरा कोडा लिया और रास पकडकर घोडोंको सत्यसेनकी ओर हांका ॥ महारथ अर्जुनने कृष्णके हाथमे घाव देख सत्यसेनके ऊपर अनेक बाण चलाये, अर्जुनने अपने तेज भल्ल बाणोंसे उस राजाके शिरको कुण्डल सहित पृथ्वी पर गिरा

गाण्डीवधन्वा श्वेताश्वः कपिप्रवरकेतनः ॥ २६ ॥
यः साक्षाद्देवदेवेशं गिरिकण्ठमुमापतिम् ।
द्वन्द्वयुद्धे पराजिष्णुस्तोषयामास शङ्करम् ॥ २७ ॥
यस्मात्प्रियतरो नास्ति समान्यः पुरुषो भुवि ।
नादेयं यस्य मे किंचिदपि दाराः सुतास्तथा ॥ २८ ॥
तेनापि सुहृदा ब्रह्मन्पार्थेनाक्लिष्टकर्मणा ।
नोक्तपूर्वमिदं वाक्यं यस्त्वं मामभिभाषसे ॥ २९ ॥
ब्रह्मचर्यं महद्घोरं तीर्त्वा द्वादशवार्षिकम् ।
हिमवत्पार्श्वमाप्याथ यो मया तपसार्जितः ॥ ३० ॥
समानव्रतचारिण्यां रुक्मिण्यां योऽन्वजायत ।
सनत्कुमाररतेजस्वी प्रद्युम्नो नाम मे सुतः ॥ ३१ ॥
तेनाप्येतन्महद्दिव्यं चक्रमप्रतिमं रणे ।
न प्रार्थितमभून्मह्यं यद्दिवं प्रार्थितं त्वया ॥ ३२ ॥
रामेणानिच्छतैतत्तु पूर्वं यदुवनं महत् ।
न गदेन न साम्बेन यद्दिवं प्रार्थितं त्वया ॥ ३३ ॥
द्वारकायामभिप्रायैर्वृष्णयन्धकसात्वतैः ।
नोक्तपूर्वमिदं जातु यद्दिवं प्रार्थितं त्वया ॥ ३४ ॥
भारतार्थाय वस्तस्य मानिनः सर्वमादवैः ।

गदानां परिघाणां च शक्तितोमरपट्टिशैः ॥ ३१ ॥
शतघ्नीनां सचक्राणां भुजानां चोरुभिः सह ।
कण्ठसूत्राङ्गदानां च केयूराणां च मारिष ॥ ३२ ॥
हाराणामथ निष्काणां तनुत्राणां च भारत ।
छत्राणां व्यजनानां च शिरस्त्राणां मुकुटैः सह ॥ ३३ ॥
अश्रूयत महाञ्शब्दस्तत्र तत्र विशाम्पते ।
सकुण्डलानि स्वक्षीणि पूर्णचन्द्रनिभानि च ॥ ३४ ॥
शिरांस्युर्व्यामदृश्यन्त ताराजालमिवाम्बरे ।
सुस्रग्वीणि सुवासांसि चन्दनेनोक्षितानि च ॥ ३५ ॥
शरीराणि व्यदृश्यन्त निहतानां महीतले ।
गन्धर्वनगराकारं घोरमायोधनं तदा ॥ ३६ ॥
निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः ।
हस्तिभिः पतितैश्चैव तुरङ्गैश्चाभवन्मही ॥ ३७ ॥
अगम्यरूपा समरे विशीर्णैरिव पर्वतैः ।
नासीच्चक्रपथस्तत्र पाण्डवस्य महात्मनः ॥ ३८ ॥
निघ्नतः शात्रवान्भल्लैर्हस्त्यश्वं चास्यतो महत् ।

परिघ, शक्ति, चक्र, पट्टिश और तोमरोंसे घोडे हाथी और वीरोंके हाथ पैर मांडी, और शरीरके भूषण कट कट कर पृथ्वीमें गिरने लगे। कहीं शतघ्नियोंसे मर कर अनेक वीर पृथ्वीमें गिरने लगे। तब कहीं हार कहीं पंखे कहीं सिरोंके सहित मुकुट कट कर गिर गये। (२९-३३)

हे पृथ्वीनाथ! उस युद्धमें कहीं वीरोंके घोर शब्द सुनाई देने लगे। अनेक अच्छे कुण्डल युक्त पूर्णचन्द्रके समान प्रकाशमान शिर इस प्रकार पृथ्वीमें दीखने लगे, जैसे आकाशमें तारे दीखते हैं। अच्छी माला और वस्त्रोंसे युक्त चन्दनसे लिप्त मृत योद्धाओंके अनेक शरीर रणभूमिमें पडे हुए दीखने लगे। उससे युद्ध भूमि गन्धर्वोंके नगरके समान शोभित हुई ॥ (३४-३६)

अनेक राजपुत्र और अनेक क्षत्री तथा अनेक हाथी घोडे मर कर पृथ्वीमें गिर गये ॥ इससे विशीर्ण पर्वतोंके समान वह युद्धभूमि अगम्य हो गई। उस समय महात्मा अर्जुनके रथ चलनेको मार्ग न रहा ॥ हे राजन्! जब हाथी, घोडे और वीरोंको मारते हुए अर्जुन युद्धभूमिमें घूमने लगे तब जैसे स्वामीका नाश होनेसे उनके अनन्य

चक्रेण रथिनां श्रेष्ठ कं नु तात युयुत्ससे ॥ ३५ ॥
एवमुक्तो मया द्रौणिर्मामिदं प्रत्युवाच ह ।
प्रयुज्य भवते पूजां योत्स्ये कृष्ण त्वया सह ॥ ३६ ॥
प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।
अजेयः स्यामिति विभो सत्यमेतद्ब्रवीमि ते ॥ ३७ ॥
त्वत्तोऽहं दुर्लभं काममनवाप्यैव केशव ।
प्रतियास्यामि गोविंद शिवेनाभिवदस्व माम् ॥ ३८ ॥
एतत्सुभीमं भीमानामृषभेण त्वया धृतम् ।
चक्रमप्रतिचक्रेण भुवि नान्योऽभिपद्यते ॥ ३९ ॥
एतावदुक्त्वा द्रौणिर्मां गुरुयानश्वान्धनानि च ।
आदायोपययौ काले रत्नानि विविधानि च ॥ ४० ॥
स संरम्भी दुरात्मा च चपलः क्षुर एव च ।
नेदं चास्त्रं ब्रह्मशिरस्तस्माद्रक्ष्यो वृकोदरः ॥ ४१ ॥ [६४१]

इति श्रीमन्महाभारते आदिपर्वणि सौप्तिकपर्वान्तर्गते ऐषीके पर्वणि
पूर्वभारतेऽश्वत्थामवधे द्वादशाऽध्यायः ॥ १२ ॥

वैशम्पायन उवाच-एवमुक्त्वा वृषांश्रेष्ठः सर्वयादवनन्दनः ।

आदरका सत्कार किया। हे महाराज! इस चक्रको आप लेकर कौनसे महारथी से युद्ध करेंगे? सो कहो। हमारे ऐसे वचन सुन अर्जुनने हमसे कहा। (३५—३६)

हे कृष्ण! हम यह चक्र लेकर आपकी पूजा करके आपहीसे युद्धकरेंगे। हम आपसे सत्य कहते हैं कि, हमलोगोंने इससे देवता और दानवोंके पूजित चक्र मांगा था, और यह भी कहा था कि, हमें कोई न जीत सके, परन्तु यह दुर्लभ काम हमको बिना मिले न हुआ, इसलिये हम प्रसन्नतापूर्वक आप से जानेकी आज्ञा मांगते हैं, आप सब भयानकोंमें भी भयानक हैं, हमी लिये हम भयानक चक्रको कोई नहीं जीत सका कहकर हमारे दिये हुए रथ, घोड़े, धन और अनेक प्रकारके रत्न लेकर अश्वत्थामा अपने घरको गये। वही अश्वत्थामा अत्यन्त पापी चञ्चल और दुष्ट है, और ब्रह्मशिर शस्त्रको जानता भी है, इसलिये भीमसेनको इससे बचाना चाहिये। (३५—४१)[६४१]

[illegible]

[illegible]

[illegible]

दुर्योधनाय चिक्षेप त्रयोदश शिलाशितान् ॥ ४ ॥
चतुर्भिश्चतुरो वाहांस्तस्य हत्वा महारथः।
पञ्चमेन शिरः कायात्सारथेश्च समाक्षिपत् ॥ ५ ॥
षष्ठेन तु ध्वजं राज्ञः सप्तमेन तु कार्मुकम्।
अष्टमेन तथा खड्गं पातयामास भूतले ॥ ६ ॥
पञ्चभिर्नृपतिं चापि धर्मराजोऽर्दयद्भृशम्।
हताश्वात्तु रथात्तस्मादवप्लुत्य सुतस्तव ॥ ७ ॥
उत्तमं व्यसनं प्राप्तो भूमावेवावतिष्ठत।
तं तु कृच्छ्रगतं दृष्ट्वा कर्णद्रौणिकृपादयः ॥ ८ ॥
अभ्यवर्त्तन्त सहसा परीप्सन्तो नराधिपम्।
अथ पाण्डुसुताः सर्वे परिवार्य युधिष्ठिरम् ॥ ९ ॥
अन्वयुः समरे राजंस्ततो युद्धमवर्त्तत।
ततस्तूर्यसहस्राणि प्रावाद्यन्त महामृधे ॥ १० ॥
ततः किलकिलाशब्दाः प्रादुरासन्महीपते।
यत्राभ्यगच्छन्समरे पञ्चालाः कौरवैः सह ॥ ११ ॥
नरा नरैः समाजग्मुर्वारणा वरवारणैः।
रथाश्च रथिभिः सार्धं हयाश्च हयसादिभिः ॥ १२ ॥
द्वन्द्वान्यासन्महाराज प्रेक्षणीयानि संयुगे।

बाण दुर्योधनकी ओर चलाए॥ महारथ युधिष्ठिरने चार बाणोंसे चारों घोडोंको मारडाला और पाचवें बाणसे सारथीको मारडाला, छठेसे ध्वजा, सातवेंसे धनुष, आठवेंसे खड्गको काटकर पृथ्वीपर गिरा दिया॥ और पांच बाण धर्मराजने तुम्हारे पुत्रके शरीरमें मारे। तुम्हारे पुत्र टूटे रथसे उतरे, बहुत दुःखी होकर भूमिपर खडे होगये। (४-८)

राजा दुर्योधनको ऐसे दुःखमे पडा देख अश्वत्थामा, कृपाचार्य और कर्ण आदिक वीरोंने राजा दुर्योधनको चारों ओरसे घेर लिया, इसी प्रकार सब पाण्डवोंने राजा युधिष्ठिरको घेर लिया। हे राजन्! तब सबसे उनका घोर युद्ध होने लगा, तब अनेक प्रकारके बाजे युद्धमें बजने लगे, जहांपर पाञ्चाल और कौरवोंका घोर युद्ध होरहा था, वहां कौरव और पञ्चालोंने घोर शब्द किया॥ (८-११)

मनुष्य मनुष्यसे, हाथी हाथीसे, रथ रथसे, घुडसवार घुडसवारोंसे युद्ध करने

सर्वायुधवरोपेतमारुरोह रथोत्तमम् ॥ १ ॥
युक्तं परमकाम्बोजैरतुरगैर्हेममालिभिः ।
आदित्योदयवर्णस्य धुरं रथवरस्य तु ॥ २ ॥
दक्षिणामवहच्छैव्यः सुग्रीवः सव्यतोऽभवत् ।
पार्ष्णिवाहौ तु तस्यास्तां मेघपुष्पबलाहकौ ॥ ३ ॥
विश्वकर्मकृता दिव्या रत्नधातुविभूषिता ।
उच्छ्रितैव रथे माया ध्वजयष्टिरदृश्यत ॥ ४ ॥
वैनतेयः स्थितस्तस्यां प्रभामण्डलरश्मिवान् ।
तस्य सव्यतः केतुर्भुजगारिरदृश्यत ॥ ५ ॥
अथारोहद्रथश्रेष्ठः केतुः सर्वधनुष्मताम् ।
अर्जुनः सव्यकर्मा च कुरुराजो युधिष्ठिरः ॥ ६ ॥
अशोभेतां महात्मानौ राजार्हमभितः स्थितौ ।
रथस्थं शार्ङ्गधन्वानमश्विनाविव वासवम् ॥ ७ ॥
तावुपारोप्य दाशार्हः स्यन्दनं लोकपूजितम् ।
प्रतोदेन जवोपेतान्परमाश्वानचोदयत् ॥ ८ ॥
ते हयाः सर्वतोरेणुं पृथिव्या न्यन्तनोत्तदा ।
आस्थितं पाण्डवेयाभ्यां यदूनामुदधेश्च यत् ॥ ९ ॥
यतां शार्ङ्गधन्वानमश्वानां शीघ्रगामिनाम् ।
शुश्रुवे सिन्धुराजान् शब्दः पक्षिणां पतनादिव ॥ १० ॥

साश्वारोहांश्च तुरगान्विषाणैर्विन्ध्यधू रुषा।
अपरे चिक्षिपुर्वेगात्प्रगृह्यातिबलास्तदा ॥ २२ ॥
पादातैराहता नागा विवरेषु समन्ततः।
चक्रुरार्त्तस्वरं घोरं दुद्रुवुश्च दिशो दश ॥ २३ ॥
पदातीनां तु सहसा प्रद्रुतानां महाहवे।
उत्सृज्याभरणं तूर्णमबबधू रणाजिरे ॥ २४ ॥
निमित्तं मन्यमानास्तु परिणाम्य महागजाः।
जगृहुर्विभिदुश्चैव चित्राण्याभरणानि च ॥ २५ ॥
तांस्तु तत्र प्रसक्तान्वै परिवार्य पदातयः।
हस्त्यारोहान्निजघ्नुस्ते महावेगा बलोत्कटाः ॥ २६ ॥
अपरे हस्तिभिर्हस्तैः खं विक्षिप्ता महाहवे।
निपतन्तो विषाणाग्रैर्भृशं विद्धाः सुशिक्षितैः ॥ २७ ॥
अपरे सहसा गृह्य विषाणैरेव सूदिताः।
सेनान्तरं समासाद्य केचित्तत्र महागजैः ॥ २८ ॥
क्षुण्णगात्रा महाराज विक्षिप्य च पुनः पुनः।
अपरे व्यजनानीव विभ्राम्य निहता मृधे ॥ २९ ॥
पुरःसराश्च नागानामपरेषां विशाम्पते।
शरीराण्यतिविद्धानि नत्रतत्र रणाजिरे ॥ ३० ॥
प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे।

चढे हुए मनुष्यके सहित घोडेको अपने सूंडसे दूर फेंक दिया ॥ (१९-२२)

इसी प्रकार पैदलोंने अवसर पाकर हाथियोंको विद्ध किया। तब वे चिल्लाते हुए चारों ओरको भागे, जब पैदललोग दूसरोंके भूषण उतारकर भागने लगे, तब यह अच्छा निमित्त देख बडे हाथी पर चढे हुए वीर उनको पकडकर उन के नाना प्रकारने अलंकार लेने लगे, और उनको मारने लगे ॥ तब महाबलवाले पैदल वीरोंने भी हाथीयोंको घेर कर उनके ऊपरके वीरोंको मारना आरंभ किया ॥ (१३-२६)

अनेक शिक्षित हाथियोंने अपनी शूंडसे मनुष्योंको पकडकर आकाशमें फेंक दिया, और गिरते समय दांतसे चीर दिया ॥ अनेक हाथियोंने सेनाके बीचमें घुमकर मनुष्योंके पेट दांतसे चीर दिये, अनेक मनुष्योंको हाथियोंने पङ्खेके समान घुमाके मार डाला, अनेक

ते समाच्छन्नरव्याघ्राः क्षणेन भरतर्षभ ।
भीमसेनं महेष्वासं समनुद्रुत्य वेगिताः ॥ ११ ॥
क्रोधदीप्तं तु कौन्तेयं द्विषदर्थे समुद्यतम् ।
नाशक्नुवन्वारयितुं समेत्यापि महारथाः ॥ १२ ॥
स तेषां प्रेक्षतामेव श्रीमतां दृढधन्विनाम् ।
ययौ भागीरथीतीरं हरिभिर्भूशवेगितैः ॥ १३ ॥
यत्र स्म शृणुते द्रौणिः पुत्रहन्ता महात्मनाम् ।
स ददर्श महात्मानमुदक्कान्ते यशस्विनम् ॥ १४ ॥
कृष्णद्वैपायनं शान्तमासीनमृषिभिः सह ।
नं चैव क्रूरकर्माणं धृताक्तं कृष्णचीरिणम् ॥ १५ ॥
रजसा ध्वस्तमार्गीनं ददर्श द्रौणिमन्तिके ।
तमभ्यधावत्कौन्तेयः प्रगृह्य सशरं धनुः ॥ १६ ॥
भीमसेनो महाबाहुस्तिष्ठ तिष्ठेति चाब्रवीत् ।
स दृष्ट्वा भीमधन्वानं प्रगृहीतशरासनम् ॥ १७ ॥
भ्रातरं पृष्ठतश्चास्य जनार्दनरथं स्थितौ ।
व्यथितात्माऽभवद्द्रौणिः प्राप्तं घोरमवेत्य सः ॥ १८ ॥
स लक्षितमहीनात्मा परमास्त्रमचिन्तयत् ।

समासक्तस्य चान्येन अविज्ञातस्तथापरः ॥ ४० ॥
जहार समरे प्राणान्नानाशस्त्रैरनेकधा।
संसक्तेषु च योधेषु वर्तमाने च संकुले ॥ ४१ ॥
कबन्धान्युत्थितानि स्युः शतशोऽथ सहस्रशः।
शोणितैः सिच्यमानानि शस्त्राणि कवचानि च॥ ४२ ॥
महारागानुरक्तानि वस्त्राणीव चकाशिरे।
एवमेतन्महद्युद्धं दारुणं शस्त्रसंकुलम् ॥ ४३ ॥
उन्मत्तगङ्गाप्रतिमं शब्देनापूरयज्जगत्।
नैव स्वे न परे राजन्विज्ञायन्ते शरातुराः ॥ ४४ ॥
योद्धव्यमिति युध्यन्ते राजानो जयगृद्धिनः।
स्वान्स्वे जघ्नुर्महाराज परांश्चैव समागतान् ॥ ४५ ॥
उभयोः सेनयोर्वीरैर्व्याकुलं समपद्यत।
रथैर्भग्नैर्महाराज वारणैश्च निपातितैः ॥ ४६ ॥
हयैश्च पतितैस्तत्र नरैश्च विनिपातितैः।
अगम्यरूपा पृथिवी क्षणेन समपद्यत ॥ ४७ ॥
क्षणेनासीन्महीपाल क्षतजौघप्रवर्तिनी।

घूसेसे मारता था, कोई किसीके बाल पकडकर खींचता था, कोई किसीसे बाहुयुद्ध कर रहा था, कोई अपनेसे अधिक बलवान् शत्रुके सङ्ग युद्ध कर रहा था। उस घोर युद्धमें कोई अनेक प्रकारके शस्त्रोंसे अपने शत्रुके शरीरके टुकडे कर रहा था, उस युद्धमें सहस्रों कबन्ध नाच रहे थे, रुधिरमें भीगे हुए अनेक शस्त्र और कवच भूमिमें पडे हुए थे। वे कवच लाल रंगे हुए वस्त्रोंके समान हो रहे थे। (३९-४३)

यह घोर युद्ध इस प्रकार हुआ, उस समय इस युद्धमें ऐसा घोर शब्द उठा जैसे पहाडोंमें घूमती हुई गङ्गाका। उस समय यह किसीको नहीं जान पडता था, कि यह हमारी सेनाका मनुष्य है, वा दूसरीका, उस समय राजा लोग अपने तथा दूसरेकी सेनासे विजयके लिये लड रहे थे, किन्तु अपने और परायेको नहीं पहचानते थे, हे राजन्! दोनों सेना भागते और गिरते हुए रथ हाथियोंसे व्याकुल होगई थीं, मरे हुए हाथी और मनुष्योंके गिरनेसे वह भूमि क्षणभरमें जाने योग्य नहीं रहीं थी॥(४३-४७)

उस युद्धमें क्षण मात्रमें रुधिरकी नदी बहने लगी। पाञ्चालोंको कर्ण और

जग्राह च स चैषीकां द्रौणिः सव्येन पाणिना ॥१९॥
स तामापद्मासाद्य दिव्यमस्त्रमुदैरयत् ।
अदृश्यमाणस्ताञ्छरान्दिव्यायुधधरान् स्थितान् ॥२०॥
अपाण्डवायेति रुषा व्यसृजद्दारुणं वचः ।
इत्युक्त्वा राजशार्दूल द्रोणपुत्रः प्रतापवान् ॥ २१ ॥
सर्वलोकप्रमोहार्थं तदस्त्रं प्रमुमोच ह ।
ततस्तस्यामिषीकायां पावकः समजायत ।
प्रधक्ष्यन्निव लोकांस्त्रीन्कालान्तकयमोपमः ॥ २२ ॥ [६६३]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिकपर्वान्तर्गत
ऐषीके पर्वणि ब्रह्मशिरोऽस्त्रत्यागे त्रयोदशोऽध्यायः ॥ १३ ॥

वैशम्पायन उवाच इङ्गितेनैव दाशार्हस्तमभिप्रायमाहितः ।
द्रौणेर्बुद्ध्वा महाबाहुरर्जुनं प्रत्यभाषत ॥ १ ॥
अर्जुनार्जुन यद्दिव्यमस्त्रं ते हृदि वर्त्तते ।
द्रोणोपदिष्टं तत्रायं कालः सम्प्रति पाण्डव ॥ २ ॥
आत्मनामात्मनश्चैव परित्राणाय भारत ।
विसृजैतत्प्रदीप्ताग्निज्वालामालासमन्वितम् ॥ ३ ॥

दुर्योधनः समालक्ष्य धर्मराजं युधिष्ठिरम् ॥ ६ ॥
प्रोवाच सूतं त्वरितो याहि याहीति भारत।
तत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः ॥ ७ ॥
ध्रियमाणातपत्त्रेण राजा राजति दंशितः।
स सूतश्चोदितो राज्ञा राज्ञः स्यन्दनमुत्तमम् ॥ ८ ॥
युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे।
ततो युधिष्ठिरः क्रुद्धः प्रभिन्न इव कुञ्जरः ॥ ९ ॥
सारथिं चोदयामास याहि यत्र सुयोधनः।
तौ समाजग्मतुर्वीरौ भ्रातरौ रथसत्तमौ ॥ १० ॥
समेत्य च महावीरौ संरब्धौ युद्धदुर्मदौ।
ववर्षतुर्महेष्वासौ शरैरन्योन्यमाहवे ॥ ११ ॥
ततो दुर्योधनो राजा धर्मशीलस्य मारिष।
शिलाशितेन भल्लेन धनुश्चिच्छेद संयुगे ॥ १२ ॥
तं नामृष्यत संक्रुद्धो ह्यवमानं युधिष्ठिरः।
अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः ॥ १३ ॥
अन्यत्कार्मुकमादाय धर्मपुत्रश्चमूमुखे।
दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च ॥ १४ ॥

तब तुम्हारे पुत्र दुर्योधनने विषैले सांपके समान क्रोध करके और दूसरे रथपर बैठ धर्मराजसे युद्ध करना आरम्भ किया, अनन्तर दुर्योधनने अपने सारथीसे कहा चलो चलो हमारे रथको शीघ्र युधिष्ठिरके पास पहुंचाओ, जहां सफेद छत्र धारण किये युधिष्ठिर खडे हैं, वहीं हमारे रथको ले चलो। (५-८)

राजाके वचन सुन सारथीने दुर्योधनके उत्तम घोडोंको महाराज धर्मराज की ओर हांका, महाराज युधिष्ठिर जो मतवाले हाथीके समान खडे थे, अपनी ओर दुर्योधनको आते देख अपने सारथीसे कहा तुम शीघ्र हमारे रथको दुर्योधनकी ओर हांको; थोडे समयमें दोनों रथ पास आगये; तब ये दोनों महारथ और महाधनुर्द्धारी राजा एक दूसरे पर बाणोंकी वर्षा करने लगे॥ (८-११)

तब राजा दुर्योधनने शिलापर घिसे हुए अपने तेज बाणोंसे धर्मात्मा युधिष्ठिरका धनुष काट दिया। राजा युधिष्ठिर अपने इस अपमानको क्षमा न कर सके और क्रोधके मारे नेत्र लाल होगये, उन्होंने दूसरा धनुष लेकर सब सेनाके

केशवेनैवमुक्तोऽथ पाण्डवः परवीरहा।
अवातरद्रथात्तूर्णं प्रगृह्य सशरं धनुः ॥ ४ ॥
पूर्वमाचार्यपुत्राय ततोऽनन्तरमात्मने।
भ्रातृभ्यश्चैव सर्वेभ्यः स्वस्तीत्युक्त्वा परन्तपः ॥ ५ ॥
देवताभ्यो नमस्कृत्य गुरुभ्यश्चैव सर्वशः।
उन्ममर्ज शिवं भ्यागन्नस्त्रमस्त्रेण शाम्यताम् ॥ ६ ॥
ततस्तद्रथं सहसा गृष्टं गाण्डीवधन्वना।
प्रजज्वाल महार्चिष्मद्युगान्तानलसन्निभम् ॥ ७ ॥
तेन द्रोणसुतस्य तद्रथं तिग्मतेजसः।
प्रजज्वाल महाज्वालं तेजोमण्डलसंवृतम् ॥ ८ ॥
निर्घाता महतश्चासन्पेतुरुल्काः सहस्रशः।
सकम्पं च भुवानां सर्वेषां समजायत ॥ ९ ॥
सजलाम्बुधरं व्योम ज्वालामालाकुलं भृशम्।
बभाज न सती कृष्णा सपर्णेवाचलद्रुमा ॥ १० ॥
ते स्वप्नेनर्षी लोकांस्त्रातवन्तौ सनातनौ।
सर्षीसङ्घौ तत्र ददृशुःसामानुत्तमा ॥ ११ ॥
नारदः सर्वभूतात्मा भरतानां पितामहः।

तामापतन्तीं सहसा धर्मराजः शितैः शरैः ॥ २३ ॥
त्रिभिश्चिच्छेद सहसा तं च विव्याध पञ्चभिः ।
निपपात ततः साथ स्वर्णदण्डा महास्वना ॥ २४ ॥
निपतन्ती महोल्केव व्यराजच्छिखिसन्निभा ।
शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशाम्पते ॥ २५ ॥
नवभिर्निशितैर्भल्लैर्निजघान युधिष्ठिरम् ।
सोऽतिविद्धो बलवता शत्रुणा शत्रुतापनः ॥ २६ ॥
दुर्योधनं समुद्दिश्य बाणं जग्राह सत्वरः ।
समाधत्त च तं बाणं धनुर्मध्ये महाबलः ॥ २७ ॥
चिक्षेप च महाराज ततः क्रुद्धः पराक्रमी ।
स तु बाणः समासाद्य तव पुत्रं महारथम् ॥ २८ ॥
व्यामोहयत राजानं धरणीं च ददार ह ।
ततो दुर्योधनः क्रुद्धो गदामुद्यम्य वेगितः ॥ २९ ॥
विधित्सुः कलहस्यान्तं धर्मराजमुपाद्रवत् ।
तमुद्यतगदं दृष्ट्वा दण्डहस्तमिवान्तकम् ॥ ३० ॥
धर्मराजो महाशक्तिं प्राहिणोत्तव सूनवे ।
दीप्यमानां महावेगां महोल्कां ज्वलितामिव ॥ ३१ ॥

शक्तिको धर्मराज युधिष्ठिरने अपने तीन तेज बाणोंसे काटा और पांच बाण दुर्योधनकी ओर चलाये। (२०-२४)

वह सोनेके दण्डवाली शक्ति उन बाणोंसे कटकर पृथ्वीमें गिर गई, हे पृथ्वीनाथ! वह शक्ति कटकर बडी उल्का और अग्निके समान गिर गई। जब तुम्हारे पुत्रने अपनी शक्तिको निष्फल देखा, तब युधिष्ठिरके शरीरमें नौ बाण मारे, शत्रुनाशन युधिष्ठिर बलवान् शत्रुके बाण लगनेसे क्रोधमें भर गये, और एक घोर बाण अपने तूणीरमे निकाल कर धनुष पर चढाया, फिर पराक्रमी युधिष्ठिरने क्रोधमें भरकर और धनुष खींच कर एक बाण छोडा, वह बाण राजा दुर्योधनके शरीरको छेद कर पृथ्वीको छेदगया। (२४—२९)

उसके लगनेसे राजा दुर्योधनको मूर्च्छा होगयी तब मूर्च्छा जागने पर दुर्योधनने महा क्रोध किया। अनन्तर इस युद्धको समाप्त करनेके लिये एक गदा लेकर युधिष्ठिरकी ओर दौडे, दण्डधारी यमराजके समान दुर्योधनको आते देख धर्मराज युधिष्ठिरने जलती हुई

उभौ शमयितुं वीरौ भारद्वाजधनञ्जयौ ॥ १२ ॥
तौ मुनी सर्वधर्मज्ञौ सर्वभूतहितैषिणौ ।
दीप्तयोरस्त्रयोर्मध्ये स्थितौ परमतेजसौ ॥ १३ ॥
तदन्तरमधाधृष्यावुपगम्य यशस्विनौ ।
आस्तामृषिवरौ तत्र ज्वलिताविव पावकौ ॥ १४ ॥
प्राणभृद्भिरनाधृष्यौ देवदानवसंमतौ ।
अस्त्रतेजः शमयितुं लोकानां हितकाम्यया ॥ १५ ॥
ऋषी ऊचतुः— नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः ।
नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन ।
किमिदं साहसं वीरौ कृतवन्तौ महाद्भुतम् ॥ १६ ॥ [६७९]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सौप्तिकपर्वान्तर्गतैषीके पर्वणि अर्जुनास्त्रत्यागे चतुर्दशोऽध्यायः ॥ १४ ॥

वैशम्पायन उवाच-दृष्ट्वैव नरशार्दूल तावग्निसमतेजसौ ।
सञ्जहार शरं दिव्यं त्वरमाणो धनञ्जयः ॥ १ ॥
उवाच भरतश्रेष्ठ तावृषी प्राञ्जलिस्तदा ।
प्रमुक्तमस्त्रमस्त्रेण शाम्यतामिति वै मया ॥ २ ॥

देखा । फिर वीर अश्वत्थामा और अर्जुन उसको शान्त करने लगे । सब धर्मोंके जाननेवाले, सब जगत्के कल्याण चाहनेवाले, महातेजस्वी नारद और व्यासमुनि दोनों जलते हुए अस्त्रोंके बीचमें खड़े होगए, उन दोनों जलते हुये ना-

ऐसे वचन बोले । पहिले समयमें भी अस्त्रविद्या जाननेवाले अनेक महारथी हुये हैं, परन्तु किसीने मनुष्योंके लिये इस अस्त्रको नहीं छोड़ा, हे वीरो ! तुमने ऐसा साहस क्यों किया ? (१२–१६)

[६७९]

शितपरश्वधसासिपट्टिशैरिषुभिरनेकविधैश्च सूदिताः ।
द्विरदरथहया महाहवे वरपुरुषैः पुरुषाश्च वाहनैः ॥ ३ ॥
कमलदिनकरेन्दुसन्निभैः सितदशनैः सुमुखाक्षिनासिकैः ।
रुचिरमुकुटकुण्डलैर्मही पुरुषशिरोभिरुपस्तृता बभौ ॥ ४ ॥
परिघमुसलशक्तितोमरैर्नखरभुशुण्डिगदाशतैर्हताः ।
द्विरदनरहयाः सहस्रशो रुधिरनदीप्रवहास्तदाभवन् ॥ ५ ॥
प्रहतरथनराश्वकुञ्जरं प्रतिभयदर्शनमुल्बणव्रणम् ।
तदहितहतमाबभौ बलं पितृपतिराष्ट्रमिव प्रजाक्षये ॥ ६ ॥
अथ तव नरदेव सैनिकास्तव च सुताः सुरसूनुसन्निभाः ।
अमितबलपुरःसरा रणे कुरुवृषभाः शिनिपुत्रमभ्ययुः ॥ ७ ॥
तदतिरुधिरभीममाबभौ पुरुषवराश्वरथद्विपाकुलम् ।
लवणजलसमुद्धतस्वनं बलमसुरामरसैन्यसप्रभम् ॥ ८ ॥
सुरपतिसमविक्रमस्ततस्त्रिदशवरावरजोपमं युधि ।
दिनकरकिरणप्रभैः पृषत्कै रवितनयोऽभ्यहनच्छिनिप्रवीरम् ॥ ९ ॥

अनेक हाथी, घोड़े और मनुष्योंको वीरोंने परश्वध, पट्टिश, खड्ग और अनेक प्रकारके बाणोंसे मार डाला। इसी प्रकार वाहनोंने मनुष्योंको और मनुष्योंने वाहनोंको मार डाला ॥ (१-३)

कमल, सूर्य और चन्द्रके समान सुन्दर मुखवाले, दांत, मुकुट और कुण्डल सहित कटे हुए शिरोंसे पृथ्वी भर गई ॥ सहस्रों हाथी, नर और घोडे परिघ, मूसल, शक्ति तोमर और नखोंसे कटकर पृथ्वीमें गिर गये और युद्धमें रुधिरकी नदी बहने लगी ॥ जैसे प्रलय कालमें यम राजकी पुरी भयानक होती है, वैसे ही मरे हुए हाथी, घोडे, रथ और मनुष्योंसे वह रणभूमि भयानक मालूम होने लगी ॥ (४—६)

हे नरदेव ! इसके पश्चात् तुम्हारे सब सैनिक और देवपुत्रके समान तुम्हारे सब पुत्र अमितबल कर्णको आगे करके शिनिपुत्र सात्यकिसे युद्ध करनेको चले ॥ तब उस युद्धमें रुधिरकी नदी बह निकली और समुद्रके समान शब्द होने लगा, अनन्तर वे दोनों सेना देवता और राक्षसोंकी सेनाके समान युद्ध करने लगीं ॥ घोडे हाथी, और मनुष्योंसे भरी वह सेना समुद्रके समान गर्जने लगी; अनन्तर इन्द्र और उपेन्द्रके समान पराक्रमी कर्णने सूरज किरणके समान प्रकाशमान बाणोंसे शिनिकुलमें श्रेष्ठ सात्यकिको मारना आरंभ किया ॥ (७-९)

अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्पयत् ।
कृतवर्मा तु संक्रुद्धो मार्गणैः क्षतविक्षतः ॥ २८ ॥
ववाम रुधिरं गात्रैः कुम्भवक्त्रादिवोदकम् ।
रुधिरेण परिक्लिन्नः कृतवर्मा त्वराजत ॥ २९ ॥
वर्षेण क्लेदितो राजन्यथा गैरिकपर्वतः ।
अथान्यद्धनुरादाय समार्गणगुणं प्रभुः ॥ ३० ॥
शिखण्डिनं बाणगणैः स्कन्धदेशे व्यताडयत् ।
स्कन्धदेशस्थितैर्बाणैः शिखण्डी तु व्यराजत ॥ ३१ ॥
शाखाप्रशाखाविपुलः सुमहान्पादपो यथा ।
तावन्योन्यं भृशं विद्ध्वा रुधिरेण समुक्षितौ ॥ ३२ ॥
अन्योन्यशृङ्गाभिहतौ रेजतुर्वृषभाविव ।
अन्योन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ ॥ ३३ ॥
रथाभ्यां चेरतुस्तत्र मण्डलानि सहस्रशः ।
कृतवर्मा महाराज पार्षतं निशितैः शरैः ॥ ३४ ॥
रणे विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः ।
ततोऽस्य समरे बाणं भोजः प्रहरतां वरः ॥ ३५ ॥

और उनके शरीरमें अस्सी बाण मारे । धनुष कटनेसे कृतवर्मा टूटे सींगवाले बैलके समान खडे रह गये, अनन्तर हाथ पैर और हृदयमे घाव होनेसे कृतवर्माको अत्यन्त क्रोध हुआ, कृतवर्माके शरीरसे इस प्रकार रुधिर बहने लगा जैसे फूटे घडेसे पानी बहता है। कृतवर्माके शरीरसे इस प्रकार रुधिर बहा जैसे वर्षामें भीगनेने गेरुके पहाडसे झरने बहते है ॥ (२६—३०)

अनन्तर कृतवर्माने दूसरे धनुषपर रोदा चढाकर शिखण्डीके कन्धेमें बाण मारे, उन बाणोंके लगनेसे अनेक शाखा युक्त वृक्षके समान शिखण्डी दीखने लगे, तब ये दोनों वीर एक दूसरेको विद्ध करके रुधिरसे भीग गये, ये दोनों महारथ एक दूसरेके मारनेका उपाय करने लगे । उस समय इन दोनोंके शरीरसे ऐसा रुधिर बहा, जैसे सींगोंके प्रहारसे विद्ध होनेसे दो बैलोंके शरीरसे बहे । हे महाराज ! एक दूसरेके वधकी इच्छा करनेवाले इन दोनोंके रथ अनेक प्रकारकी गतियोंसे युद्धमें घूमने लगे । (३०-३४)

अनन्तर कृतवर्माने सोनेके पङ्खवाले सत्तर शिलापर घिसे हुए तीक्ष्ण बाण शिखण्डीकी ओर चलाये, एक बाण

सादिनोऽश्वांश्च पत्तींश्च शरैर्निन्ये यमक्षयम् ॥ १७ ॥
तमन्तकमिव क्रुद्धमनिवार्यं महारथम् ।
दुर्योधनोऽभ्ययादेको निघ्नन्बाणैरजिह्मगैः ॥ १८ ॥
तस्यार्जुनो धनुः सूतमश्वान्केतुं च सायकैः ।
हत्वा सप्तभिरेकेन च्छत्रं चिच्छेद पत्त्रिणा ॥ १९ ॥
नवमं च समाधाय व्यसृजत्प्राणघातिनम् ।
दुर्योधनायेषुवरं तं द्रौणिः सप्तधाच्छिनत् ॥ २० ॥
ततो द्रौणेर्धनुश्छित्वा हत्वा चाश्वरथाञ्शरैः ।
कृपस्यापि तदत्युग्रं धनुश्चिच्छेद पाण्डवः ॥ २१ ॥
हार्दिक्यस्य धनुश्छित्वा ध्वजं चाश्वांस्तदावधीत् ।
दुःशासनस्येष्वसनं छित्त्वा राधेयमभ्ययात् ॥ २२ ॥
अथ सात्यकिमुत्सृज्य त्वरन्कर्णोऽर्जुनं त्रिभिः ।
विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं पुनः पुनः ॥२३॥
न ग्लानिरासत्कर्णस्य क्षिपतः सायकान्बहून् ।
रणे विनिघ्नतः शत्रून्क्रुद्धस्येव शतक्रतोः ॥ २४ ॥
अथ सात्यकिरागत्य कर्णं विद्ध्वा शितैः शरैः ।

अर्जुनने मारडाला ॥ कालके समान क्रोधी अर्जुनको आते हुए देख कोई वीर रोक न सका । परन्तु तब अकेले दुर्योधन घोर शस्त्र छोडते हुए अर्जुनकी ओर आये ॥ (१६-१८)

अर्जुनने सात बाणोंसे उनके घोडे सारथीको मार धनुषको काट रथको तोड डाला और एक बाणसे छत्र भी काट दिया ॥ फिर घोर नौवा बाण दुर्योधनका प्राण नाश करनेको छोडा परन्तु उस बाणको अश्वत्थामाने बीचही में सप्तधा काट डाला ॥ अर्जुनने अश्वत्थामाके घोडे सारथी और रथको काट कर कृपाचार्यके अति उग्र धनुषको काट दिया ॥ (१९-२१)

फिर कृतवर्माकी ध्वजाको काट कर घोडोंको मार दिया, अनन्तर दुःशासनके धनुषको काटकर कर्णसे युद्ध करनेको चले गये ॥ कर्णने सात्यकिको छोडकर अर्जुनकी ओर तीन बाण चलाये, और कृष्णके शरीरमें बीस बाण मारे ॥ जिस प्रकार युद्ध करते हुए क्रुद्ध इन्द्र नहीं थकते, वैसेही बार बार बाण चलाते और शत्रुओंको मारते कर्ण भी न थके ॥ (२२-२४)

तब सात्यकिने दौडके कर्णके शरीर

अभ्यवर्त्तन्त सहसा वार्योघा इव सागरम् ॥ ५ ॥
ते त्वर्जुनं समासाद्य योधाः शतसहस्रशः ।
अगच्छन्विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ॥ ६ ॥
ते हन्यमानाः समरे नाजहुः पाण्डवं रणे ।
हन्यमाना महाराज शलभा इव पावकम् ॥ ७ ॥
सत्यसेनस्त्रिभिर्बाणैर्विव्याध युधि पाण्डवम् ।
मित्रदेवस्त्रिषष्ट्या तु चन्द्रसेनस्तु सप्तभिः ॥ ८ ॥
मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि सप्तभिः ।
शत्रुञ्जयस्तु विंशत्या सुशर्मा नवभिः शरैः ॥ ९ ॥
स विद्धो बहुभिः सङ्ख्ये प्रतिविव्याध तान्नृपान् ।
सौश्रुतिं सप्तभिर्विध्वा सत्यसेनं त्रिभिः शरैः ॥ १० ॥
शत्रुञ्जयं च विंशत्या चन्द्रदेवं तथाष्टभिः ।
मित्रदेवं शतेनैव श्रुतसेनं त्रिभिः शरैः ॥ ११ ॥
नवभिर्मित्रवर्माणं सुशर्माणं तथाष्टभिः ।
शत्रुञ्जयं च राजानं हत्वा तत्र शिलाशितैः ॥ १२ ॥
सौश्रुतेः सशिरस्त्राणं शिरः कायादपाहरत् ।
त्वरितश्चन्द्रदेवं च शरैर्निन्ये यमक्षयम् ॥ १३ ॥

धनुषधारी वीर अर्जुनके ऊपर इस प्रकार बाण वर्षाने लगे, जैसे मेघ इकट्ठे होकर पर्वतपर जल वर्षाते हैं ॥ अर्जुनके पास आते ही वे सहस्रों योधा इस प्रकार शान्त होगये, कि जैसे गरुडको देख सांप ॥ हे महाराज ! जैसे पतङ्ग जलने पर भी अग्निको नहीं छोडते वैसेही उन वीरोंने मरने पर भी अर्जुनको नहीं छोडा ॥ (५-७)

सत्यसेनने तीन, मित्रदेवने तिरसठ, चन्द्रसेनने सात, मित्रवर्माने तिहत्तर, सौश्रुतिने सात, शत्रुञ्जयने चौवीस और सुशर्माने नौ बाण चलाये, इस प्रकार अनेक वीरोंसे विद्ध होकर अर्जुनने भी उन सब राजाओंको अपने बाणोंसे विद्ध किया । सौश्रुतिके शरीरमें सात, सत्य सेनके तीन, शत्रुंजयके बीस, चन्द्रदेवके आठ, मित्रदेवके आठ, और श्रुतसेनके ऊपर एकसौ बाण मारे ॥ (८-११)

मित्रवर्माके शरीरमें नौ, सुशर्माके आठ तथा राजा शत्रुञ्जयको अनेक तीक्ष्ण बाणोंसे मारकर फिर सौश्रुतिके शिरको शिरस्त्राणके सहित काटकर पृथ्वी पर गिरा दिया । फिर चंद्रदेवको भी अनेक

दिशः खं चैव भूमिं च प्रावृणोच्छरवृष्टिभिः ॥ ३३ ॥
मुसलानीव सम्पेतुः परिघा इव चेपवः।
शतघ्न्य इव चाप्यन्ये वज्राण्युग्राणि चापरे ॥ ३४ ॥
तैर्वध्यमानं तत्सैन्यं सपत्त्यश्वरथद्विपम्।
निमीलिताक्षमत्यर्थं बभ्राम च ननाद च ॥ ३५ ॥
निष्कैवल्यं तदा युद्धं प्रापुरश्वनरद्विपाः।
हन्यमानाः शरैरार्त्तास्तदा भीताः प्रदुद्रुवुः ॥ ३६ ॥
त्वदीयानां तदा युद्धे संसक्तानां जयैषिणाम्।
गिरिमस्तं समासाद्य प्रत्यपद्यत भानुमान् ॥ ३७ ॥
तमसा च महाराज रजसा च विशेषतः।
न किञ्चित्प्रत्यपश्याम शुभं वा यदि वाशुभम्॥ ३८ ॥
ते त्रस्यन्तो महेष्वासा रात्रियुद्धस्य भारत।
अपयानं ततश्चक्रुः सहिताः सर्वयोधिभिः ॥ ३९ ॥
कौरवेष्वपयातेषु तदा राजन्दिनक्षये।
जयं सुमनसः प्राप्य पार्थाः स्वशिबिरं ययुः ॥ ४० ॥
वादित्रशब्दैर्विविधैः सिंहनादैः सगर्जितैः।
परानुपहसन्तश्च स्तुवन्तश्चाच्युतार्जुनौ ॥ ४१ ॥

दिया; और सब दिशा आकाश और भूमि पूरित कर दीं॥ कोई बाण मूशल के समान, कोई परिघके समान तथा कोई शतघ्नी और तेज वज्रके समान चले ॥ (३०—३४)

अर्जुनके बाणोंसे व्याकुल होकर कौरवोंकी सेना आंख बन्दकर घूमने और चिल्लाने लगी; तब यह युद्ध घोर रूपसे हुआ। अनेक हाथी,घोडे, मनुष्य मरने गिरने और भयसे भागने लगे॥ इस प्रकार तुम्हारी ओरके योद्धा लोग विजयकी इच्छासे युद्ध कर रहे थे, उसी समय भगवान् सूर्य अस्ताचल पर पहुंच गये॥ हे राजन्! उससमय अन्धकार और धूलसे हम कुछ शुभ और अशुभ न देख सके॥ तब तेरे ओरके सब महाधनुर्धर वीरोंने रात्रि युद्धसे डरकर सेनाको पीछे हटाया ॥ (३५–३९)

उस रात्रिके समय कौरवोंके जानेके पश्चात् जययुक्त पाण्डवोंने प्रसन्न मनसे अपने अपने शिबिरमें प्रवेश किया, जानेके समय सब वीरोंसे बाजे बजाये,वीर लोग गर्जकर कौरवोंको नींदने लगे। हे पृथ्वी नाथ! सेनाके लौटते समय

कुण्डलोपचितं कायाच्चकर्त्त पृतनान्तरे ॥ २२ ॥
तन्निकृत्य शितैर्बाणैर्मित्रवर्माणमाक्षिपत् ।
वत्सदन्तेन तीक्ष्णेन सारथिं चास्य मारिष ॥ २३ ॥
ततः शरशतैर्भूयः संशप्तकगणान्बली ।
पातयामास संक्रुद्धः शतशोऽथ सहस्रशः ॥ २४ ॥
ततो रजतपुङ्खेन राजञ्शीर्षं महात्मनः ।
मित्रसेनस्य चिच्छेद क्षुरप्रेण महारथः ॥ २५ ॥
सुशर्माणं सुसंक्रुद्धो जत्रुदेशे समाहनत् ।
ततः संशप्तकाः सर्वे परिवार्य धनञ्जयम् ॥ २६ ॥
शस्त्रौघैर्ममृदुः क्रुद्धा नादयन्तो दिशो दश ।
अभ्यर्दितस्तु तज्जिष्णुः शक्रतुल्यपराक्रमः ॥ २७ ॥
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे महारथः ।
ततः शरसहस्राणि प्रादुरासन्विशाम्पते ॥ २८ ॥
ध्वजानां छिद्यमानानां कार्मुकाणां च मारिष ।
रथानां सपताकानां तूणीराणां युगैः सह ॥ २९ ॥
अक्षाणामथ चक्राणां योक्त्राणां रश्मिभिः सह ।
कूबराणां वरूथानां पृषत्कानां च संयुगे ॥ ३० ॥
अश्वानां पततां चापि प्रासानामृष्टिभिः सह ।

दिया ॥ उसको मार कर मित्रवर्मासे युद्ध करने चले और एक वत्सदन्त तीक्ष्ण बाणसे उसके सारथीका सिर काट लिया॥ फिर अर्जुनने अपने बाणोंसे सहस्रों संशप्तकोंका वध किया ॥ (२०—२४)

अनन्तर महारथ अर्जुनने चांदीके पङ्खवाले, तेज क्षुरप्र बाणसे मित्रसेनका सिर काट लिया ॥ फिर सुशर्माके हृदयमें क्रोध करके बाण मारे तब सब संशप्तकोंने अर्जुनको चारों ओरसे घेर लिया; क्रोध करके दस दिशाओंको नादित करते हुए अनेक शस्त्र चलाने लगे; हे पृथ्वीनाथ ! उनके शस्त्रोंसे व्याकुल होकर इन्द्र तुल्य पराक्रमी अर्जुनने इन्द्रास्त्र चलाया, तब उस अस्त्रसे सहस्रों बाण निकलने लगे ॥ (२५-२८)

उन बाणोंसे ध्वजा धनुष तूणीर और पताका सहित अनेक रथ कटने लगे। किसी रथके पहिये, किसीकी धुरी, किसीकी अक्ष, किसीकी लगाम, किसीकी चक्र आदि कट गई ॥ कहीं घोड़े मर कर गिरने लगे। कहीं प्रास, ऋष्टि, गदा,

न ते निन्द्याः प्रशस्यास्ते यत्ते चक्रुर्ब्रवीहि तत् ।
ततो दुर्योधनः सूत पश्चात्किमकरोत्तदा ॥ ५ ॥
सञ्जय उवाच— हतप्रहतविध्वस्ता विवर्मायुधवाहनाः ।
दीनस्वरा दूयमानाः मानिनः शत्रुनिर्जिताः ॥ ६ ॥
शिबिरस्थाः पुनर्मन्त्रं मन्त्रयन्ति स्म कौरवाः ।
भग्नदंष्ट्रा हतविषाः पादाक्रान्ता इवोरगाः ॥ ७ ॥
तानब्रवीत्ततः कर्णः क्रुद्धः सर्प इव श्वसन् ।
करं करेण निष्पीड्य प्रेक्षमाणस्तवात्मजम् ॥ ८ ॥
यत्तो दृढश्च दक्षश्च धृतिमानर्जुनस्तदा ।
सम्बोधयति चाप्येनं यथाकालमधोक्षजः ॥ ९ ॥
सहसास्त्रविसर्गेण वयं तेनाद्य वञ्चिताः ।
श्वस्त्वहं तस्य सङ्कल्पं सर्वं हन्ता महीपते ॥ १० ॥
एवमुक्तस्तथेत्युक्त्वा सोऽनुजज्ञे नृपोत्तमान् ।
तेऽनुज्ञाता नृपाः सर्वे स्वानि वेश्मानि भेजिरे ॥ ११ ॥

हम पाण्डवोंकी निन्दा नहीं करते, क्यों कि वे प्रशंसाके योग्य ही हैं, उन पाण्डवोंने तब क्या किया तथा सेना लौटनेके पश्चात् दुर्योधन और कर्णने क्या किया? सो हमसे कहो ॥ (१–५)

सञ्जय बोले, हे राजन्! जिस समय मरनेसे बचे शस्त्र रहित तुम्हारी सेनाके वीर शत्रुओंके हाथसे पराजित होकर युद्धसे हटे, तब दीन वाणीसे परस्पर बात करते हुए डेरोंको चले, सब सेनाको डेरोंमें सुलाकर प्रधान कौरव लोग एक डेरेमें इकट्ठे हुए और विषके दांत टूट जानेके कारण विषरहित हुए तथा लात मारे हुए सापोंके समान सम्मति करने लगे ॥ (६–७)

उन सबके बीचमें क्रोधी सांपके समान सांस लेते हुए हाथसे हाथ मीजते और तुम्हारे पुत्र दुर्योधनकी ओर देखते हुए कर्ण बोले, अर्जुन स्वभाव हीसे धनुष विद्याके जाननेवाले और महा पराक्रमी है। तिस पर भी कृष्ण उनको समय समय पर उपदेश करते हैं। इसी लिये आज हम लोग युद्धको नहीं जीत सके, परन्तु प्रातःकाल होते ही हम अर्जुनके सब अभिमानको तोड देंगे ॥ (८–१०)

कर्णके ऐसे वचन सुन दुर्योधनने कहा कि बहुत अच्छा। इसके पश्चात् सब मन्त्री और राजोंको जानेकी आज्ञा दी। वे सब लोग दुर्योधनकी आज्ञा पाकर अपने अपने डेरोंपर चलेगये ॥

स्वानुगा इव सीदन्ति रथचक्राणि मारिष ॥ ३९ ॥
चरतस्तस्य संग्रामे तस्मिंल्लोहितकर्दमे ।
सीदमानानि चक्राणि सञ्जहुस्तुरगा भृशम् ॥ ४० ॥
श्रमेण नहता युक्ता मनोमारुतरंहसः ।
वध्यमानं तु सत्सैन्यं पाण्डुपुत्रेण धन्विना ॥ ४१ ॥
प्रायशो विमुखं सर्वं नावतिष्ठत भारत ।
ताञ्जित्वा समरे जिष्णुः संशप्तकगणान्बहून् ।
विरराज तदा पार्थो विधूमोऽग्निरिव ज्वलन् ॥४२॥ [१११०]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सप्तविंशोऽध्यायः ॥२७॥

सञ्जय उवाच— युधिष्ठिरं महाराज विसृजन्तं शरान्बहून् ।
स्वयं दुर्योधनो राजा प्रत्यगृह्णादभीतवत् ॥ १ ॥
तमापतन्तं सहसा तव पुत्रं महारथम् ।
धर्मराजो हतं विद्ध्वा तिष्ठ तिष्ठेति चाब्रवीत् ॥ २ ॥
स तु तं प्रतिविव्याध नवभिर्निशितैः शरैः ।
सारथिं चास्य भल्लेन भृशं क्रुद्धोऽभ्यताडयत् ॥ ३ ॥
ततो युधिष्ठिरो राजन्स्वर्णपुङ्खाञ्शिलीमुखान् ।

सेवकभी प्राणत्याग करते है उसी प्रकार वहां रथोंके नष्ट होनेसे उनके चक्र भी नष्ट होने लगे ॥ (३७-३९)

जिस समय अर्जुन उस रुधिर भरे घोर युद्धमें घूम रहे थे, तब उनको कहीं मार्गभी नहीं मिलता था, उस समय महारथ अर्जुनके मन और वायुके समान वेगवाले घोडे युद्धभूमिमें चल नहीं सक्ते थे । हे महाराज! पाण्डुपुत्र अर्जुनने उस सेनाको इसप्रकार जीत लिया, और इस प्रकार शोभित हुए जैसे धूमरहित अग्नि शोभित होती है। (४०-४२) [१११०]

कर्णपर्वमें सतार्इस अध्याय समाप्त ।

कर्णपर्वमें अठार्इस अध्याय ।

सञ्जय बोले, हे राजन् धृतराष्ट्र ! अनेक बाण छोडते हुए राजा युधिष्ठिरसे निडर राजा दुर्योधन युद्ध करनेको गये ॥ तुम्हारे महारथ पुत्रको आते देख राजा युधिष्ठिरने शीघ्रतासे उसे विद्ध करके कहा खडा रह! खडा रह॥ तब राजा दुर्योधनने अत्यन्त क्रुद्ध होकर अपने तेज नौ बाणोंसे राजा युधिष्ठिरको विद्ध करके एक भल्ल बाणसे उसके सारथिको विद्ध किया ॥ (१-३)

हे राजन् ! तब युधिष्ठिरने सोनेके पङ्खवाले, शिलापर घिसे हुए तीक्ष्ण तेरह

तस्य शस्त्राणि घोराणि विक्रमश्च महात्मनः ।
कर्णमाश्रित्य संग्रामे मत्तो दुर्योधनो नृपः ॥ २० ॥
दुर्योधनं ततो दृष्ट्वा पाण्डवेन भृशार्दितम् ।
पराक्रान्तान्पाण्डुसुतान्दृष्ट्वा चापि महारथः ॥ २१ ॥
कर्णमाश्रित्य संग्रामे मन्दो दुर्योधनः पुनः ।
जेतुमुत्सहते पार्थान्सपुत्रान्सहकेशवान् ॥ २२ ॥
अहो बत महद्दुःखं यत्र पाण्डुसुतान्रणे ।
नातरद्रभसः कर्णो दैवं नूनं परायणम् ॥ २३ ॥
अहो द्यूतस्य निष्ठेयं घोरा सम्प्रति वर्तते ।
अहो तीव्राणि दुःखानि दुर्योधनकृतान्यहम् ॥ २४ ॥
सोढा घोराणि बहुशः शल्यभूतानि सञ्जय ।
सौबलं च तदा तात नीतिमानिति मन्यते ॥ २५ ॥
कर्णश्च रभसो नित्यं राजा तं चाप्यनुव्रतः ।
यदेवं वर्तमानेषु महायुद्धेषु सञ्जय ॥ २६ ॥
अश्रौषं निहतान्पुत्रान्नित्यमेव विनिर्जितान् ।
न पाण्डवानां समरे कश्चिदास्ति निवारकः ॥ २७ ॥

सक्ते हैं। क्योंकि कर्णका बाहुवीर्य इन्द्र और विष्णुके समान है॥ महात्मा कर्णके शस्त्र तथा पराक्रम बडा घोर है। इन्हींके भरोसे दुर्योधन उन्मत्तके समान बैठा रहता है॥ पाण्डवोंसे पीडित दुर्योधनको देखकर और पाण्डवोंका बल बढा हुआ देखकर महारथ कर्णने क्या किया? सो कहो ॥ (१९—२१)

हमें यही आश्चर्य होता है कि मूर्ख दुर्योधन कर्णका आश्रय लेकर पुत्र बान्धव और कृष्णके सहित पाण्डवोंको जीतना चाहता है॥ हमें यह स्मरण करके बहुत दुःख होता है, कि तेजस्वी कर्ण भी पाण्डवोंको युद्धमें न जीत सके। इसमें प्रारब्ध ही प्रधान है। हाय! यह उसी जुएका फल है। (२२–२४)

हे तात! मै दुर्योधनके दिये हुए अनेक दुःख सह रहा हूं, वे दुःख मेरे हृदयमें घावके समान लगे हुए है, मूर्ख दुर्योधनने उस समय शकुनिको नीति जाननेवाला समझा था, हे सञ्जय! कर्ण सदासे तेज स्वभाववाला है और दुर्योधन उसीकी बातको मानता है, इसीसे यह घोर युद्ध हुआ। हे सञ्जय! हम रोज सुनते हैं कि आज हमारे इतने पुत्र मरे और इतने हारे, परन्तु यह कभी

विविधान्यप्यचिन्त्यानि शस्त्रयन्त्युत्तमानि च ॥ १३ ॥
ते शूराः समरे सर्वे चित्रं लघु च सुष्ठु च ।
अयुध्यन्त महावेगाः परस्परवधैषिणः ॥ १४ ॥
अन्योन्यं समरे जघ्नुर्योधव्रतमनुष्ठिताः ।
नहि ते समरं चक्रुः पृष्ठतो वै कथञ्चन ॥ १५ ॥
मुहूर्त्तमेव तद्युद्धमासीन्मधुरदर्शनम् ।
तत उन्मत्तवद्राजन्निर्मर्यादमवर्त्तत ॥ १६ ॥
रथी नागं समासाद्य दारयन्निशितैः शरैः ।
प्रेषयामास कालाय शरैः सन्नतपर्वभिः ॥ १७ ॥
नागा हयान्समासाद्य विक्षिपन्तो बहून्रणे ।
दारयामासुरत्युग्रं तत्र तत्र तदा तदा ॥ १८ ॥
हयारोहाश्च बहवः परिवार्य हयोत्तमान् ।
तलशब्दरवांश्चक्रुः सस्पर्तन्तस्ततस्ततः ॥ १९ ॥
धावमानांस्ततस्तांस्तु द्रवमाणान्महागजान् ।
पार्श्वतः पृष्ठतश्चैव निजघ्नुर्हयसादिनः ॥ २० ॥
विद्राव्य च बहूनश्वान्नागा राजन्मदोत्कटाः ।
विषाणैश्चापरे जघ्नुर्वसृक्चुश्चापरे भृशम् ॥ २१ ॥

लगे, हे राजन् ! यह घोर द्वन्द्व युद्ध ऐसा प्रेक्षणीय हुआ जिसमें असंख्य अचिन्त्य शस्त्र चले ॥ वे महाबलवान् योद्धा लोग एक दूसरेको मारनेके लिये शीघ्र हलके हाथोंसे और सुन्दरतासे शस्त्र चलाने लगे ॥ (१२—१४)

एक दूसरेको मारने लगा, और वे लोग सामने खडे युद्ध करते रहे, किसीने भी पीछे हटनेकी इच्छा न की ॥ हे राजन् ! थोडे समय यह युद्ध मर्यादासे होता रहा पीछे किसीको कुछ ध्यान न रहा , सब मर्यादा छोड कर लडने लगे ॥ तब रथमें बैठा वीर अपने तेज बाणोंसे हाथीपर बैठे वीरोंको मारने लगा ॥ हाथी घोडोंको पकडकर अपनी सूंडसे विदीर्ण करके मारने लगे ॥ १५-१८

घोडोंपर चढे वीर अच्छे घोडोंको चारों ओरसे घेर कर ताली बजाने लगे, तब वे घोडे डरके दौडने लगे। उस समय उन दौडते हुए घोडे और हाथियोंको आगे पीछे और दहने बायेंसे घोडोंपर चढे वीर मारने लगे। इसी प्रकार मतवाले हाथियोंने अपने दातोंसे अनेक घोडोंको मार डाला ॥ किसी हाथीने

बहुत्वान्मम कार्याणां तथा पार्थस्य भारत।
नाभूत्समागमो राजन्मम चैवार्जुनस्य च ॥ ३६ ॥
इदं तु मे यथाप्रज्ञं शृणु वाक्यं विशाम्पते।
अनिहत्य रणे पार्थं नाहमेष्यामि भारत ॥ ३७ ॥
हतप्रवीरे सैन्येऽस्मिन्मयि चावस्थिते युधि।
अभियास्यति मां पार्थः शक्रशक्तिविनाकृतम् ॥ ३८ ॥
ततः श्रेयस्करं यच्च तन्निबोध जनेश्वर।
आयुधानां च मे वीर्यं दिव्यानामर्जुनस्य च ॥ ३९ ॥
कार्यस्य महतो भेदे लाघवे दूरपातने।
सौष्ठवे चास्त्रपाते च सव्यसाची न मत्समः ॥ ४० ॥
प्राणे शौर्येऽथ विज्ञाने विक्रमे चापि भारत।
निमित्तज्ञानयोगे च सव्यसाची न मत्समः ॥ ४१ ॥
सर्वायुधमहामात्रं विजयं नाम तद्धनुः।
इन्द्रार्थं प्रियकामेन निर्मितं विश्वकर्मणा ॥ ४२ ॥
येन दैत्यगणान्राजञ्जितवान्वै शतक्रतुः।
यस्य घोषेण दैत्यानां व्यामुह्यन्त दिशो दश ॥ ४३ ॥

साथ युद्ध करनेको जाते हैं, हम उसको आज युद्धमें मारेंगे या वही हमको मारेगा ॥ हे राजन् ! हमारे और अर्जुनके सिर बहुत कामोंका भार है, इसीसे हमारा और उसका कलह युद्ध नहीं हुआ था, हे भारत ! आज हम प्रतिज्ञा करके जाते हैं, कि विना अर्जुनके मारे नहीं लौटेंगे ॥ (३४-३७)

हे राजन् ! जब मै उनकी सेनाके वीरोंको मारूंगा। तब मुझे इन्द्रकी दी हुई शक्तिसे रहित जानकर अर्जुन युद्ध करनेको आवेंगे ॥ हे राजन् ! उस समय मेरे और अर्जुनके दिव्य बाणोंकी शक्तिको आप देखियेगा। उस समय आपको निश्चय होगा कि बाणोंको शीघ्र चलाना, दूर चलाना, ठीक लक्ष पर मारना और सुन्दरतासे चलानेमें अर्जुन हमारे समान नहीं है ॥ यह भी आपको निश्चय हो जायगा, कि अर्जुन शरीरबल, तेज, युद्धविद्या शकुन और ज्ञानमें हमारे समान नहीं है ॥ (३८-४१)

जो विश्वकर्माने इन्द्रको प्रसन्न करनेके लिये बनाया था, जो सब शस्त्रोंमें श्रेष्ठ है, जिसके शब्दसे राक्षस मोहित होते थे, जिसको धारण करके इन्द्रने अनेक दानवोंको मारा था, वही विजय

निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ॥ ३१ ॥
निगृह्य च गजाः केचित्पार्श्वस्थैर्भृशदारुणैः ।
रथाश्वसादिभिस्तत्र सम्भिन्ना न्यपतन्भुवि ॥ ३२ ॥
सहयाः सादिनस्तत्र तोमरेण महामृधे ।
भूमावमृद्नन्वेगेन सचर्माणं पदातिनम् ॥ ३३ ॥
तथा सावरणान्कांश्चित्तत्रतत्र विशाम्पते ।
रथान्नागाः समासाद्य परिगृह्य च मारिष ॥ ३४ ॥
व्याक्षिपन्सहसा तत्र घोररूपे भयानके ।
नाराचैर्निहताश्चापि गजाः पेतुर्महाबलाः ॥ ३५ ॥
पर्वतस्येव शिखरं वज्ररुग्णं महीतले ।
योधा योधान्समासाद्य मुष्टिभिर्व्यहनन्युधि ॥ ३६ ॥
केशेष्वन्योन्यमाक्षिप्य चिक्षिपुर्बिभिदुश्च ह ।
उद्यम्य च भुजानन्ये निक्षिप्य च महीतले ॥ ३७ ॥
पदा चोरः समाक्रम्य स्फुरतोऽपाहरच्छिरः ।
पतंश्चापरो राजन्विजहारासिना शिरः ॥ ३८ ॥
जीवतश्च तथैवान्यः शस्त्रं काये न्यमज्जयत् ।
मुष्टियुद्धं महच्चासीद्योधानां तत्र भारत ॥ ३९ ॥
तथा केशग्रहश्चोग्रो बाहुयुद्धं च भैरवम् ।

हाथियोंके महावत मरकर पृथ्वीमें गिर गये, अनेक हाथियोंकी सूंडमें और सिरमें शक्ति और प्राम लगी ॥२७ ३१

अनेक हाथी चलते हुए, रथ और घोडोंकी रगडसे मर गये, अनेक घोडोंपर चढे वीर घोडोंके महित पृथ्वीपर गिरकर मर गये, उनके गिरनेमे नीचे खडे पैदल भी मर गये, कहीं वस्त्रोंके सहित रथोंको हाथीने अपने पैरोंमे पीस दिया ॥ कहीं रथोंको उठाकर ऊपरको फेंक दिया, कहीं महाबल हाथी बाणोंसे मरकर पृथ्वीमें गिर गये ॥ (३२–३५)

युद्धमें पडे हाथी ऐसे दीखते थे, जैसे कटे पर्वतोंके शिखर । कहीं दो वीर घूसोंसे लड रहे थे। कोई किसीके बाल पकडकर खींचता था । कोई किसीके थप्पड मारता था और किसीको फेंक देता था ॥ कोई छातीपर पैर रखकर शत्रुका शिर काटता था; कोई भूमिमें गिरते हुए शत्रुको मार रहा था ॥३६–३८

हे भारत ! कोई जीते हुए शत्रुके पेटमें कटार मारता था । कोई किसीको

अवश्यं तु मया वाच्यं येन हीनोऽस्मि फाल्गुनात् ॥५१॥
ज्या तस्य धनुषो दिव्या तथाक्षय्ये महेषुधी।
सारथिस्तस्य गोविन्दो मम तादृङ् न विद्यते॥ ५२ ॥
तस्य दिव्यं धनुः श्रेष्ठं गाण्डीवमजितं युधि।
विजयं च महद्दिव्यं ममापि धनुरुत्तमम् ॥ ५३ ॥
तत्राहमधिकः पार्थाद्धनुषा तेन पार्थिव।
येन चाप्यधिको वीरः पाण्डवस्तन्निबोध मे ॥ ५४ ॥
रश्मिग्राहश्च दाशार्हः सर्वलोकनमस्कृतः।
अग्निदत्तश्च वै दिव्यो रथः काञ्चनभूषणः ॥ ५५ ॥
अच्छेद्यः सर्वतो वीर वाजिनश्च मनोजवाः।
ध्वजश्च दिव्यो द्युतिमान्वानरो विस्मयङ्करः ॥ ५६ ॥
कृष्णश्च स्रष्टा जगतो रथं तमभिरक्षति।
एतैर्द्रव्यैरहं हीनो योद्धुमिच्छामि पाण्डवम् ॥ ५७ ॥
अयं तु सदृशः शौरेः शल्यः समितिशोभनः।
सारथ्यं यदि मे कुर्याद् ध्रुवस्ते विजयो भवेत्॥ ५८॥
तस्य मे सारथिः शल्यो भवत्वसुकरः परैः।
नाराचान्गार्ध्रपत्रांश्च शकटानि वहन्तु मे ॥ ५९ ॥

मुझे अवश्य कहना चाहिये। अर्जुनके धनुषकी डोरी दिव्य है और उसके दो तूणीर अक्षय है, तथा कृष्ण अर्जुनके सारथी है, वैसा हमारा नहीं है॥ जैसे अर्जुनका दिव्य गाण्डीव धनुष युद्धमे अजित है, वैसा ही मेरा भी विजय धनुष दिव्य, बडा और उत्तम है॥ मैं इस धनुषके कारण अर्जुनसे श्रेष्ठ हूं। परन्तु अर्जुन जिससे श्रेष्ठ है सो सुनो। ५१ ५४

अर्जुनके सारथी सर्वलोक पूजित श्रीकृष्ण है, और अग्निका दिया हुआ सुवर्ण भूषित रथ दिव्य और सब ओरसे अच्छेद्य है, तथा अर्जुनके घोडे मनके समान शीघ्र चलते हैं और उनकी दिव्य ध्वजापर भयङ्कर बन्दर रहता है, जगत्कर्त्ता कृष्ण उनके रथकी रक्षा करते हैं, हम इन सब सामग्रियोंसे हीन है, तौ भी अर्जुनसे युद्ध करनेका साहस रखते है॥ (५५–५७)

राजा शल्य कृष्णके समान घोडे हांकने जानते है, यदि ये मेरे सारथी बनें तो निश्चयही आपका विजय होगा॥ आज राजा शल्य हमारे सारथी बनें और गिद्धपङ्ख लगे बाणोंसे भरे छकडे

पञ्चालानहनत्कर्णस्त्रिगर्त्ताश्च धनञ्जयः ॥ ४८ ॥
भीमसेनः कुरून्राजन्हरत्यनीकं च सर्वशः ।
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः ।
अपराह्णे गते सूर्ये काक्षतां विपुलं यशः ॥ ४९ ॥ [११५९]

इति श्रीमहाभारते० शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सकुलयुद्धेऽष्टाविंशोऽध्यायः ॥ २८ ॥

धृतराष्ट्र उवाच- अतितीव्राणि दुःखानि दुःसहानि बहूनि च ।
त्वत्तोऽहं सञ्जयाश्रौषं पुत्राणां चैव संक्षयम् ॥ १ ॥
यथा त्वं मे कथयसे यथा युद्धमवर्त्तत ।
न सन्ति सूत कौरव्या इति मे निश्चिता मतिः ॥ २ ॥
दुर्योधनश्च विरथः कृतस्तत्र महारथः ।
धर्मपुत्रः कथं चक्रे तस्य वा नृपतिः कथम् ॥ ३ ॥
अपराह्णे कथं युद्धमभवल्लोमहर्षणम् ।
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि सञ्जय ॥ ४ ॥
सञ्जय उवाच— संसक्तेषु तु सैन्येषु वध्यमानेषु भागशः ।
रथमन्यं समास्थाय पुत्रस्तव विशाम्पते ॥ ५ ॥
क्रोधेन महता युक्तः सविषो भुजगो यथा ।

त्रिगर्तोंको अर्जुन मारने लगे, इसी प्रकार भीमसेन भी कौरवोंकी गजसेना का नाश करने लगे । हे महाराज ! इस प्रकार यह कौरव और पाण्डवोंकी सेना में घोर युद्ध हुआ, इस प्रकार यश प्राप्त करने की इच्छासे वीरोंने दोपहर युद्ध किया ॥ (४८-४९) [११५९]

कर्णपर्वमें अट्ठाईस अध्याय समाप्त ।

कर्णपर्वमें उनतीस अध्याय ।

धृतराष्ट्र बोले, हे सञ्जय ! हमने तुम्हारे मुखसे न सहने योग्य अनेक दुःखकी बातें सुनी, यह भी सुना कि हमारे पुत्रोंका नाश होता जाता है, जैसा युद्ध हुआ वैसाही हमसे तुमने कहा । हे सूत ! हमें यह निश्चय है कि इस युद्धमें सब कौरवोंका नाश होजायगा ॥ महारथ धर्मराज युधिष्ठिरने दुर्योधनका रथ काट दिया था, उस युद्धमें धर्मराज युधिष्ठिर और दुर्योधनने क्या किया सो हमसे कहो; हे सञ्जय ! इस घोर युद्धमें दोपहर के पश्चात् क्या हुआ सो भी हमसे कहो; क्योंकि तुम इस विषयको अच्छी प्रकार जानते हो ? (१—४)

सञ्जय बोले, हे पृथ्वीनाथ ! जब धर्मराज युधिष्ठिर तुम्हारी सेनाको मारने लगे, और दुर्योधनका रथ कट गया,

सर्वथा पाण्डवान्सङ्ख्ये विजेष्ये वै समागतान् ॥ ६८॥
न हि मे समरे शक्ताः समुद्यातुं सुरासुराः।
किमु पाण्डुसुता राजन्रणे मानुषयोनयः ॥ ६९ ॥
सञ्जय उवाच— एवमुक्तस्तव सुतः कर्णेनाहवशोभिना।
सम्पूज्य सम्प्रहृष्टात्मा ततो राधेयमब्रवीत् ॥ ७० ॥
दुर्योधन उवाच- एवमेतत्करिष्यामि यथा त्वं कर्ण मन्यसे।
सोपासङ्गा रथाः साश्वाः स्वनुयास्यन्ति संयुगे ॥७१ ॥
नाराचान्गार्ध्रपत्रांश्च शाकटानि वहन्तु ते।
अनुयास्याम कर्ण त्वां वयं सर्वे च पार्थिवाः ॥ ७२ ॥
सञ्जय उवाच— एवमुक्त्वा महाराज तव पुत्रः प्रतापवान्।
अभिगम्याब्रवीद्राजा मद्रराजमिदं वचः ॥ ७३ ॥ [१३१२]

इति श्रीमहा० शतसाहस्र्यां साहितायां वैयासिक्यां कर्णपर्वणि कर्णदुर्योधनसंवादे एकत्रिंशोऽध्याय ॥३१॥

सञ्जय उवाच— पुत्रस्तव महाराज मद्रराजं महारथम्।
विनयेनोपसङ्गम्य प्रणयाद्वाक्यमब्रवीत् ॥ १ ॥
सत्यव्रत महाभाग द्विषतां तापवर्धन।
मद्रेश्वर रणे शूर परसैन्यभयङ्कर ॥ २ ॥

देखेंगे, हम निश्चय युद्धमें प्राप्त हुए पांचों वीर पाण्डवोंको जीतेंगे ॥ हे राजन्! युद्धमें मेरे आगे देवता और राक्षस भी नहीं ठहर सकते, फिर मनुष्य योनिमें उत्पन्न हुए पाण्डवोंकी तो बातही क्या है ? (६६-६९)

सञ्जय बोले, युद्धमें शोभायमान महा पराक्रमी राधापुत्रके वचन सुनकर हंसकर दुर्योधन बोले, हे कर्ण! तुम जो कहते हो हम वैसा ही करेंगे, तुम्हारे सङ्ग अनेक रथ घोडों सहित रहेंगे। हे कर्ण! छकडोंमें भरे हुए नाराच तथा गृध्रपंखवाले और भी अनेक बाण तुम्हारे सङ्ग रहेंगे और हम सब राजा लोग तुम्हारे पीछे रहेंगे, हे राजन्! कर्णसे ऐसे कहकर प्रतापी दुर्योधन मद्रराज शल्यसे ऐसा वचन बोले ॥ (७०-७३) [१३१२]

कर्णपर्वमें इकतीस अध्याय समाप्त।

कर्णपर्वमें बत्तीस अध्याय।

सञ्जय बोले, हे राजन्! राजा दुर्योधन महारथ शल्यके पास जाकर विनयपूर्वक उन्हें प्रसन्न करके ऐसा वचन बोले, हे सत्यव्रत! हे महाभाग! आपसे सब शत्रु कांपते हैं; हे मद्रराज! आप युद्धमें शूर और शत्रुओंकी सेनाको भय देनेवाले हैं। हे बोलने वालोंमें श्रेष्ठ!

अथान्यद्धनुरादाय प्राविध्यत युधिष्ठिरम् ।
तावन्योन्यं सुसंक्रुद्धौ शस्त्रवर्षाण्यसृजताम् ॥ १५ ॥
सिंहाविव सुसंरब्धौ परस्परजिगीषया ।
जघ्नतुस्तौ रणेऽन्योन्यं नर्दमानौ वृषाविव ॥ १६ ॥
अन्तरं मार्गमाणौ च चेरतुस्तौ महारथौ ।
ततः पूर्णायतोत्सृष्टैः शरैस्तौ तु कृतव्रणौ ॥ १७ ॥
विरेजतुर्महाराज किंशुकाविव पुष्पितौ ।
ततो राजन्विमुञ्चतौ सिंहनादान्मुहुर्मुहुः ॥ १८ ॥
तलयोश्च तथा शब्दान्धनुषश्च महाहवे ।
शङ्खशब्दरवांश्चैव चक्रतुस्तौ नरेश्वरौ ॥ १९ ॥
अन्योन्यं तौ महाराज पीडयाञ्चक्रतुर्भृशम् ।
ततो युधिष्ठिरो राजा पुत्रं तव शरैस्त्रिभिः ॥ २० ॥
आजघानोरसि क्रुद्धो वज्रवेगैर्दुरासदैः ।
प्रतिविव्याध तं तूर्णं तव पुत्रो महीपतिः ॥ २१ ॥
पञ्चभिर्निशितैर्बाणैः स्वर्णपुङ्खैः शिलाशितैः ।
ततो दुर्योधनो राजा शक्तिं चिक्षेप भारत ॥ २२ ॥
सर्वपारसवीं तीक्ष्णां महोल्कामतिमां तदा ।

आगे दुर्योधनकी ध्वजा और धनुषको काट दिया, दुर्योधनभी दूसरा धनुष लेकर धर्मराजको विद्ध करने लगे। १२-१५

वे दोनों अपनी विजयकी इच्छासे सिंहके समान गर्जने लगे और एक दूसरेके ऊपर बाणोंकी वर्षा करने लगे, और मतवारे लडनेवाले दो बैलोंके समान एक दूसरेको मारनेके लिये समय देखने लगा॥ तब दोनोंके शरीरमें बाणोंके घाव होगये, हे राजन्! रुधिर बहनेसे उन दोनोंकी ऐसी शोभा बढी जैसे फूले हुए कचनारकी। वे दोनों राजा कभी धनुष टङ्कारते थे,कभी शङ्ख बजाते थे; वे दोनों राजा अपने बाणोंसे एक दूसरेको पीडा देने लगे। (१५–२०)

सोनेके विचित्र नगरमें महात्मा तारकाक्ष, चांदीके नगरमें कमलाक्ष और लोहेके नगरमें विद्युन्माली राजा हुआ। ये तीनों दैत्यराजा अपने अस्त्रोंके तेजसे तीनों लोकका राज्य करने लगे, और मदमत्त होकर कहने लगे, कि हमसे और दूसरा प्रजापति कौन है ? इनके सङ्ग लक्षों करोडों और दानवभी आगये, सब देवतोंसे हारे मांसभक्षी दानव इन तीनोंके पास आकर रहने लगे ॥ (२१-२४)

ये सब दानव बडे ऐश्वर्यकी इच्छासे त्रिपुरदुर्गमें निवासके लिये आये थे इन सबको मय राक्षस इच्छानुसार भोग देता था। उस त्रिपुरका आश्रय करके सब निर्भयतासे रहते थे, और उस त्रिपुरवासियोंके चित्तमें जो जो अभिलाषा उत्पन्न होती थी, उसको मय राक्षस अपनी मायासे पूर्ण करता था ॥ (२५—२७)

तारकाक्षका हरि नाम एक महाबल-

ततः स्थाणुर्महाराज शूलधृक् क्रोधमूर्छितः ॥ ९८ ॥
त्रस्तानि सर्वभूतानि त्रैलोक्यं भूः प्रकम्पते ।
निमित्तानि च घोराणि तत्र सन्दधतः शरम् ॥ ९९ ॥
तस्मिन्सोमाग्निविष्णूनां क्षोभेण ब्रह्मरुद्रयोः ।
स रथो धनुषः क्षोभादतीव ह्यवसीदति ॥ १०० ॥
ततो नारायणस्तस्माच्छरभागाद्विनिःसृतः ।
वृषरूपं समास्थाय उज्जहार महारथम् ॥ १०१ ॥
सीदमाने रथे चैव नर्दमानेषु शत्रुषु ।
स सम्भ्रमात्तु भगवान्नादं चक्रे महाबलः ॥ १०२ ॥
वृषभस्य स्थितो मूर्ध्नि हयपृष्ठे च मानद ।
तदा स भगवान्रुद्रो निरैक्षद्दानवं पुरम् ॥ १०३ ॥
वृषभस्यास्थितो रुद्रो हयस्य च नरोत्तम ।
स्तनांस्तदाशातयत खुरांश्चैव द्विधाकरोत् ॥ १०४ ॥
ततः प्रभृति भद्रं ते गवां द्वैधीकृताः खुराः ।
हयानां च स्तना राजंस्तदाप्रभृति नाभवन् ॥ १०५ ॥
पीडितानां बलवता रुद्रेणाद्भुतकर्मणा ।
अथाधिज्यं धनुः कृत्वा शर्वः सन्धाय तं शरम् ॥१०६॥
युक्त्वा पाशुपतास्त्रेण त्रिपुरं समचिन्तयत् ।
तस्मिंस्थिते महाराज रुद्रे विधृतकार्मुके ॥ १०७ ॥

क्रोधसे हाथमें शूल धारण किया, तब तीनों लोक कांपने लगे, और घोर अशकुन होने लगे ॥ अग्नि, चन्द्रमा और विष्णु तथा ब्रह्मा और शिवके क्षोभसे वह रथ नीचे दबनेलगा ॥ (९७-१००)

जब विष्णु वृषरूप धारण कर उस बाणसे निकले, तब वह रथ नीचेको दबने लगा और दानव नाचने लगे। तब शिव वेगसे गर्जने लगे। बैलके शिर और घोडोंकी कमर पर बैठ शिवने दानवोंके नगरको देखा, हे नरोत्तम! शिव बैल घोडे दोनों पर चढे थे, उन्होंने बैलके खुरको बीचमें काट दिया, उसी दिनसे गौके खुर फटे रहते है। इसी प्रकार शिवने घोडोंके स्तन काट दिये उस दिनसे घोडे स्तनहीन होते है ॥ (१०१–१०५)

अद्भुत कर्म करनेवाले शिवके बलसे घोडे पीडित होगये। तब शिवने धनुष पर उस बाणको चढाया और पाशुपत

पीड्यमानेषु लोकेषु ततः शक्रो मरुद्गृतः ॥ ३६ ॥
पुराण्यायोधयाञ्चक्रे वज्रपातैः समन्ततः ।
नाशकत्तान्यभेद्यानि यदा भेत्तुं पुरन्दरः ॥ ३७ ॥
पुराणि वरदत्तानि धात्रा तेन नराधिप ।
तदा भीतः सुरपतिर्मुक्त्वा तानि पुराण्यथ ॥ ३८ ॥
तैरेव विबुधैः सार्धं पितामहमरिन्दम ।
जगामाथ तदाख्यातुं विप्रकारं सुरेतरैः ॥ ३९ ॥
ते तत्त्वं सर्वमाख्याय शिरोभिः सम्प्रणम्य च ।
वधोपायमपृच्छन्त भगवन्तं पितामहम् ॥ ४० ॥
श्रुत्वा तद्भगवान्देवो देवानिदमुवाच ह ।
ममापि सोऽपराध्नोति यो युष्माकमसौम्यकृत् ॥ ४१ ॥
असुरा हि दुरात्मानः सर्व एव सुरद्विषः ।
अपराध्यन्ति सततं ये युष्मान्पीडयन्त्युत ॥ ४२ ॥
अहं हि तुल्यः सर्वेषां भूतानां नात्र संशयः ।
अधार्मिकास्तु हन्तव्या इति मे व्रतमाहितम् ॥ ४३ ॥
एकेषुणा विभेद्यानि तानि दुर्गाणि नान्यथा ।
न च स्थाणुमृते शक्तो भेत्तुमेकेषुणा पुरः ॥ ४४ ॥

इस प्रकार जब सब लोक पीडित होने लगे तब इन्द्र मरुत् आदि देवतोंको सङ्ग लेकर त्रिपुरासुरसे लडने चले, वहां जाकर वज्रसे अनेक दिन लडते रहे, परन्तु राक्षसोंका नाश न हुआ, न नगरोंको तोड सके। तब इन्द्रने जाना, कि ये नगर ब्रह्माके वरदानसे टूट नहीं सकते, ऐसा जानकर इन्द्र भयसे लौट आये, हे शत्रुनाशन ! इन्द्र उन्ही देवतोंके सहित सब दैत्योंका समाचार कहनेको ब्रह्माके निकट गये ॥ (३६-३९)

उन्होंने जाकर भगवान् ब्रह्माको सिरसे प्रणाम किया और त्रिपुरासुरके मारनेका यत्न पूछा ॥ देवतोंके वचन सुन ब्रह्माने कहा, कि जिन्होंने तुम लोगोंका अपराध किया है, वे हमारे भी अपराधी हैं; दुष्ट दानव सदा देवतोंका अपराध करते हैं, इस लिये हमारे भी अपराधी हैं, इसमें संशय नहीं, कि मैं सब जगत्को समान समझता हूं। परन्तु अधर्मी को मारना ही हमारा प्रण है ॥ (४०-४३)

जो कोई एक बाणसे उन तीनों नगरोंको नाश करे वही उनको मार सक्ता

तुष्टुवुर्वाग्भिरग्र्याभिः स्थाणुमप्रतिमौजसम्॥ ११६ ॥
तेऽनुज्ञाता भगवता जग्मुः सर्वे यथागतम्।
कृतकामाः प्रयत्नेन प्रजापतिमुखाः सुराः ॥ ११७ ॥
एवं स भगवान्देवो लोकस्रष्टा महेश्वरः।
देवासुरगणाध्यक्षो लोकानां विदधे शिवम ॥ ११८ ॥
यथैव भगवान्ब्रह्मा लोकधाता पितामहः।
सारथ्यमकरोत्तत्र रुद्रस्य परमोऽव्ययः ॥ ११९ ॥
तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः।
संयच्छतु हयानस्य राधेयस्य महात्मनः ॥ १२० ॥
त्वं हि कृष्णाच्च कर्णाच्च फाल्गुनाच्च विशेषतः।
विशिष्टो राजशार्दूल नास्ति तत्र विचारणा ॥ १२१ ॥
युद्धे ह्ययं रुद्रकल्पस्त्वं च ब्रह्मसमो नये।
तस्माच्छक्तो भवाञ्जेतुं मच्छत्रूंस्तानिवासुरान्॥१२२॥
यथा शल्याद्य कर्णोऽयं श्वेताश्वं कृष्णसारथिम्।
प्रमथ्य हन्यात्कौन्तेयं तथा शीघ्रं विधीयताम्॥१२३॥
त्वयि मद्रेश राज्याशा जीविताशा तथैव च।
विजयश्च तथैवाद्य कर्णसाचिव्यकारितः ॥ १२४ ॥
त्वयि कर्णश्च राज्यं च वयं चैव प्रतिष्ठिताः।

होकर महातेजस्वी शिवकी स्तुति करने लगे ॥ अनन्तर शिवकी आज्ञा लेकर कृतकार्य ब्रह्मादिक देवता अपने अपने घर चले गये ॥ (११४–११७)

इस प्रकार देवता असुर और मनुष्योंके स्वामी जगत्कर्त्ता शिवने त्रिपुरासुरको मारा। जिस प्रकार अविनाशी जगत्कर्त्ता भगवान् ब्रह्माने शिवके घोडे हांके थे, इसी प्रकार आप भी महात्मा राधापुत्रके घोडे हांकिये ॥ (११८-१२०)

हे राजश्रेष्ठ शल्य! इसमें संशय नहीं है, कि तुम कृष्ण, कर्ण और अर्जुनसे भी अधिक हैं ॥ यह कर्ण युद्धमें रुद्रके समान पराक्रमी है, और तुम ब्रह्माके समान है, इस लिये तुम असुरोंके समान मेरे शत्रुको जीतने में समर्थ है। हे शल्य! अब तुम ऐसा विधान करो, कि जिससे कृष्ण सारथिके सहित अर्जुनको कर्ण मार सकेंगे ॥ (१२१–१२३)

हे राजेन्द्र! आपहीमे हमें राज्य और जीवनकी आशा है। आपहीको सारथी बनाकर कर्ण युद्धमें विजय पावेंगे।

तान्स्वस्तिवादेनाभ्यर्च्य समुत्थाप्य च शङ्करः॥ ५३ ॥
ब्रूत ब्रूतेति भगवान्स्मयमानोऽभ्यभाषत ।
त्र्यम्बकेणाभ्यनुज्ञातास्ततस्ते स्वस्थचेतसः ॥ ५४ ॥
नमो नमो नमस्तेऽस्तु प्रभो इत्यब्रुवन्वचः ।
नमो देवाधिदेवाय धन्विने वनमालिने ॥ ५५ ॥
प्रजापतिमखघ्नाय प्रजापतिभिरीड्यते ।
नमः स्तुताय स्तुत्याय स्तूयमानाय शम्भवे ॥ ५६ ॥
विलोहिताय रुद्राय नीलग्रीवाय शूलिने ।
अमोघाय मृगाक्षाय प्रवरायुधयोधिने ॥ ५७ ॥
अर्हाय चैव शुद्धाय क्षयाय कथनाय च ।
दुर्वारणाय क्राथाय ब्रह्मणे ब्रह्मचारिणे ॥ ५८ ॥
ईशानायाप्रमेयाय नियन्त्रे चर्मवाससे ।
तपोरथाय पिङ्गाय व्रतिने कृत्तिवाससे ॥ ५९ ॥
कुमारापित्रे त्र्यक्षाय प्रवरायुधधारिणे ।
प्रपन्नार्तिविनाशाय ब्रह्मद्विट्सङ्घघातिने ॥ ६० ॥

देवताओं और ऋषियोंने शिवको शिरसे प्रणाम किया । (४८–५३)

शिवने उनको उठाकर कुशल पूछा, शिवजीने हंस कर कहा तुम लोग अपने आनेका प्रयोजन कहो । तब देवतोंने त्र्यम्बककी आज्ञा सुनकर सावधान होकर कहा, कि हे प्रभो ! आप देवतोंके देवता हैं इसलिये हम आपको बार बार प्रणाम करते हैं । हम लोग वनमाला और धनुषधारी शिवको प्रणाम करते है । हम स्तुति करने योग्य, स्तुतिकिये हुए, स्तुति किये जानेवाले, दक्षकी यज्ञ नाश करनेवाले, प्रजापतियोंके द्वारा स्तुति करने योग्य आपको प्रणाम करते हैं ॥(५४ ५६)

लाल वर्ण, रुद्र, नीलकण्ठ,शूलधारी, अमोघ, मृगनेत्र और उत्तम शस्त्रोंसे युद्ध करनेवाले आपकी स्तुति करते है ॥ योग्य, शुद्ध, और विध्वंस करनेवाले, कथन, दुःखसे निवारण करने योग्य, वध करनेवाले ब्रह्मरूपी आपको प्रणाम करते हैं ॥ जगत्स्वामी अनन्तर जगत्को नियमसे चलानेवाले, चर्मधारी, तप करनेवाले, व्रतधारी, पिंग और गजचर्मधारी शिवको प्रणाम करते है ॥ (५७–५९)

स्वामीकार्त्तिकके पिता,त्रिनेत्र, उत्तम शस्त्रधारी, शरणागत दुखियोंका दुःख नाश करनेवाले और ब्राह्मणोंके वैरियोंको नाश करनेवाले, शिवको प्रणाम करते

प्रत्युवाच महात्मानं शिरसावनतः प्रभुम् ॥ १३३ ॥
यदा जानाति देवेशः पात्रं मामस्त्रधारणे ।
तदा शुश्रूषवेऽस्त्राणि भवान्मे दातुमर्हति ॥ १३४ ॥

दुर्योधन उवाच- ततः स तपसा चैव दमेन नियमेन च ।
पूजोपहारबलिभिर्होममन्त्रपुरस्कृतैः ॥ १३५ ॥
आराधयितवाञ्शर्वं बहून्वर्षगणांस्तदा ।
प्रसन्नश्च महादेवो भार्गवस्य महात्मनः ॥ १३६ ॥
अब्रवीत्तस्य बहुशो गुणान्देव्याः समीपतः ।
भक्तिमानेष सततं मयि रामो दृढव्रतः ॥ १३७ ॥
एवं तस्य गुणान्प्रीतो बहुशोऽकथयत्प्रभुः ।
देवतानां पितॄणां च समक्षमरिसूदन ॥ १३८ ॥
एतस्मिन्नेव काले तु दैत्या ह्यासन्महाबलाः ।
तैस्तदा दर्पमोहाद्यैरबाध्यन्त दिवौकसः ॥ १३९ ॥
ततः सम्भूय विबुधास्तान्हन्तुं कृतनिश्चयाः ।
चक्रुः शत्रुवधे यत्नं न शेकुर्जेतुमेव तान् ॥ १४० ॥
अभिगम्य ततो देवा महेश्वरमुमापतिम् ।
प्रासादयंस्तदा भक्त्या जहि शत्रुगणानिति ॥१४१॥
प्रतिज्ञाय ततो देवो देवतानां रिपुक्षयम् ।

प्रणाम कर बोले, हे देव! यदि आप हमें अस्त्र ग्रहण करनेके लिये योग्य समझें तो अस्त्र दीजिये ॥ (१३३-१३४)

दुर्योधन बोले, तब परशुराम नियम, दम, तप, होम, मन्त्र और बलिदानोंसे अपनी आत्माको पवित्र करने लगे, तब महात्मा परशुराम फिर बलि, होम और मन्त्रोंसे पूजा करने लगे। इस प्रकार बहुत दिन तपस्या करनेसे शिव बहुत प्रसन्न हुए, तब शिवने पार्वतीसे इनकी प्रशंसा करके कहा कि, परशुराम मेरा पूरा भक्त और विश्वासी है, इसी प्रकार देवता और पितरोंके आगे भी शिवने उनके गुण वर्णन किये ॥ १३५-१३८

उसी समय दानवोंका बहुत बल बढ गया था, उन्होंने अपने बल और अभिमानसे सब देवतोंको जीत लिया ॥ तब सब देवतोंने मिलकर उनके मारने के यत्न किये, परन्तु मार नहीं सके ॥ तब सब देवता शिवके पास गये और उन्हें प्रसन्न करके कहने लगे, कि हे देव! आप हमारे शत्रुओंका नाश

त्वत्प्रसादाज्जगत्सर्वं सुखमैधत मानद ।
शरण्यस्त्वं हि लोकेश ते वयं शरणं गताः ॥ ५ ॥

स्थाणुरुवाच— हन्तव्याः शत्रवः सर्वे युष्माकमिति मे मतिः ।
न त्वेक उत्सहे हन्तुं बलस्था हि सुरद्विषः ॥ ६ ॥
ते यूयं संहताः सर्वे मदीयेनार्धतेजसा ।
जयध्वं युधि ताञ्शत्रून्संहता हि महाबलाः ॥ ७ ॥

देवा ऊचुः— अस्मत्तेजोबलं यावत्तावद् द्विगुणमाहवे ।
तेषामिति हि मन्यामो दृष्टतेजोबला हि ते ॥ ८ ॥

श्रीभगवानुवाच- वध्यास्ते सर्वतः पापा ये युष्मास्वपराधिनः ।
मम तेजोबलार्धेन सर्वान्निघ्नत शात्रवान् ॥ ९ ॥

देवा ऊचुः— विभर्तु भवतोऽर्धं तु न शक्ष्यामो महेश्वर ।
सर्वेषां नो बलार्धेन त्वमेव जहि शात्रवान् ॥ १० ॥

श्रीभगवानुवाच- यदि शक्तिर्न वः काचिद्विभर्त्तुं मामकं बलम् ।
अहमेतान्हनिष्यामि युष्मत्तेजोर्धवृंहितः ॥ ११ ॥
ततस्तथेति देवेशस्तैरुक्तो राजसत्तम ।
अर्धमादाय सर्वेषां तेजसाभ्यधिकोऽभवत् ॥ १२ ॥

कृपासे जब जगत्को सुख होता है, आप शरण आयेकी रक्षा करते है; इस लिये हम लोग आपकी शरण है ॥ (१-५)

शिवजी बोले, हम तुम्हारे शत्रुओंको मारेंगे, परन्तु वे लोग बहुत सेनाके सहित रहते है । इस लिये हम अकेले नहीं मार सक्ते ॥ तुम लोग इकट्ठे होकर हमारे आधे तेजसे उन सब दानवोंको मार डालो । क्यों कि एकता से युक्त होनेवाले ही महाबली होते है ॥ (६-७)

देवता बोले, हम लोगोंने दानवोंका बल देखा है । हमारे बलसे उनका बल दूना है ॥ (८)

तब शिवजी बोले, जिन्होंने आपका अपराध किया है, वे सब मरनेके योग्य है । इसलिये हमारे आधे तेजसे उन सबको मार डालिये ॥ (९)

तब देवता बोले, हम लोग आपके आधे तेजको सम्हाल नहीं सक्ते, इस लिये आपही हम लोगोंके आधे तेजसे शत्रुओंका नाश कीजिये ॥ तब शिवजी फिर बोले, यदि तुम लोग हमारे आधे तेजको नहीं धारण कर सक्ते हो, तो हम ही तुम्हारे आधे तेजसे उनका नाश करेंगे ॥ (१०-११)

हे राजश्रेष्ठ ! तब देवतोंने शिवके

स दानवैः क्षततनुर्जामदग्न्यो द्विजोत्तमः ॥ १५० ॥
संस्पृष्टः स्थाणुना सद्यो निर्व्रणः समजायत।
प्रीतश्च भगवान्देवः कर्मणा तेन तस्य वै ॥ १५१ ॥
वरान्प्रादाद्बहुविधान्भार्गवाय महात्मने।
उक्तश्च देवदेवेन प्रीतियुक्तेन शूलिना ॥ १५२ ॥
निपातात्तव शस्त्राणां शरीरे याभवद्रुजा।
तया ते मानुषं कर्म व्यपोढं भृगुनन्दन ॥ १५३ ॥
गृहाणास्त्राणि दिव्यानि मत्सकाशाद्यथेप्सितम्।
दुर्योधन उवाच- ततोऽस्त्राणि समस्तानि वरांश्च मनसेप्सितान्॥ १५४ ॥
लब्ध्वा बहुविधान्रामः प्रणम्य शिरसा भवम्।
अनुज्ञां प्राप्य देवेशाज्जगाम स महातपाः ॥ १५५ ॥
एवमेतत्पुरावृत्तं तदा कथितवान्ऋषिः।
भार्गवोऽपि ददौ दिव्यं धनुर्वेदं महात्मने ॥ १५६ ॥
कर्णाय पुरुषव्याघ्र सुप्रीतेनान्तरात्मना।
वृजिनं हि भवेत्किञ्चिद्यदि कर्णस्य पार्थिव ॥ १५७ ॥
नास्मै ह्यस्त्राणि दिव्यानि प्रादास्यद्भृगुनन्दनः।

डाला, और उन दानवोंके बाणोंसे परशुरामके शरीरमें भी बहुत घाव लगे॥ तब परशुराम शिवके पास गये। शिवने उनके सब घाव स्पर्शमात्रसे ही अच्छे कर दिये ॥ (१४९-१५१)

भृगुकुलोत्पन्न परशुरामके उस कर्मसे भगवान् शिव प्रसन्न हुए और उनको अनेक प्रकारके वरदान दिये, तब शूलधारी शिवने प्रसन्न होकर कहा, कि हे भृगुनन्दन ! दानवोंके शस्त्र लगनेसे जो तुम्हारे शरीरमें घाव हुए थे, उनको देखनेसे निश्चय हुआ कि तुमने अमानुष कर्म किया है। अब तुम अपनी इच्छानुसार हमसे दिव्य अस्त्र ग्रहण करो। (१५१-१५४)

दुर्योधन बोले, हे राजन् शल्य ! तब शिवने परशुरामको सब अस्त्र और इच्छानुसार वर दान दिये। महा तपस्वी परशुराम शिवसे वरदान और अस्त्र पाकर शिवको प्रणाम करके और उनकी आज्ञा ले, अपने घरको चले गये। इस दिव्य कथाको एक मुनिने हमारे पितासे कहा था। परशुरामने वही धनुष प्रसन्न हो पुरुषसिंह कर्णको दिया है। कोई ऐसा अस्त्र नहीं है, जो परशुरामने कर्णको नहीं दिया हो ! (१५४-१५७)

ईषा नक्षत्रवंशश्च युगः कृतयुगोऽभवत् ॥ २१ ॥
कूबरश्च रथस्यासीद्वासुकिर्भुजगोत्तमः ।
अपस्करमधिष्ठाने हिमवान्विन्ध्यपर्वतः ॥
उदयास्तावधिष्ठाने गिरी चक्रुः सुरोत्तमाः ॥ २२ ॥
समुद्रमक्षमसृजन्दानवालयमुत्तमम् ।
सप्तर्षिमण्डलं चैव रथस्यासीत्परिष्करः ॥ २३ ॥
गङ्गा सरस्वती सिन्धुर्धुरमाकाशमेव च ।
उपस्करो रथस्यासन्नापः सर्वाश्च निम्नगाः ॥ २४ ॥
अहोरात्रं कलाश्चैव काष्ठाश्च ऋतवस्तथा ।
अनुकर्ष ग्रहा दीप्ता वरूथं चापि तारकाः ॥ २५ ॥
धर्मार्थकामसंयुक्तं त्रिवेणुं दारु बन्धुरम् ।
ओषधीर्वीरुधश्चैव घण्टाः पुष्पफलोपगाः ॥ २६ ॥
सूर्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे ।
पक्षौ पूर्वापरौ तत्र कृते रात्र्यह्नी शुभे ॥ २७ ॥
दशनागपतीनीषां धृतराष्ट्रसुखांस्तदा ।
योक्त्राणि चक्रुर्नागांश्च निःश्वसन्तो महोरगान् ॥२८॥
द्यां युगं युगचर्माणि संवर्तकबलाहकान् ।
कालपृष्ठोऽथ नहुषः कर्कोटकधनञ्जयौ ॥ २९ ॥

की कील, सतयुग धुरी, रथका कूबर और पीछेका काष्ठ नागराज वासुकी बने, उसका जुआ विन्ध्याचल और हिमाचल बने । उदयाचल और अस्ताचल उसका मार्ग बना; दानवोंके स्थान सातों समुद्र रथ बांधनेकी उत्तम रस्सी बनी, सप्तऋषियोंका मण्डल पहियोंकी हाल; गङ्गा, सिन्धु, सरस्वती और आकाश धुरी और जल रथ बांधनेकी छोटी छोटी रस्सी बने ॥ (२०-२४)

रात, दिन, वसंत, ग्रीष्म, वर्षा, [illegible]

हेमन्त, शिशिर, काल और [illegible] खटीला बने । तारे [illegible] जाल बने; धर्म, अर्थ [illegible] तीन बांस बने; [illegible] वृक्ष घण्टा [illegible] रात दिन [illegible]

यथा देवैर्महाराज ईश्वरादधिको वृतः।
तथा भवानपि क्षिप्रं रुद्रस्येव पितामहः ॥ ४ ॥
नियच्छ तुरगान्युद्धे राधेयस्य महाद्युते।
मयाप्येतन्नरश्रेष्ठ बहुशो नरसिंहयोः ॥ ५ ॥
कथ्यमानं श्रुतं दिव्यमाख्यानमतिमानुषम्।
यथा च चक्रे सारथ्यं भवस्य प्रपितामहः ॥ ६ ॥
यथासुराश्च निहता इषुणैकेन भारत।
कृष्णस्य चापि विदितं सर्वमेतत्पुरा ह्यभूत ॥ ७ ॥
यथा पितामहो जज्ञे भगवान्सारथिस्तदा।
अनागतमतिक्रान्तं वेद कृष्णोऽपि तत्त्वतः ॥ ८ ॥
एतदर्थं विदित्वापि सारथ्यमुपजग्मिवान्।
स्वयम्भूरिव रुद्रस्य कृष्णः पार्थस्य भारत ॥ ९ ॥
यदि हन्याच्च कौन्तेयं सूतपुत्रः कथञ्चन।
दृष्ट्वा पार्थं हि निहतं स्वयं योत्स्यति केशवः ॥ १० ॥
शङ्खचक्रगदापाणिर्धक्ष्यते तव वाहिनीम्।
न चापि तस्य क्रुद्धस्य वार्ष्णेयस्य महात्मनः ॥ ११ ॥
स्थास्यते प्रत्यनीकेषु कश्चिदत्र नृपस्तव।
सञ्जय उवाच— तं तथा भाषमाणं तु मद्रराजमरिन्दमः ॥ १२ ॥

अधिक गुणवान् जानकर उनका सारथी बनाया है। जैसे ब्रह्माने शिवके घोडे हांके थे, तैसे ही आप भी महातेजस्वी राधापुत्रके घोडे हांकिये ॥ (१-५)

शल्य बोले, हे नरश्रेष्ठ! जैसे ब्रह्माने शिवके घोडे हांके थे, सो कथा मैंने भी बहुत बार सुनी थी। जैसे शिवने सब राक्षसोंको एक बाणसे मारा था, ये भी हम जानते हैं। जैसे भगवान् ब्रह्मा शिवके सारथी बने थे, इस कथाको कृष्ण भी अच्छी भांतिसे जानते है। क्यों कि कृष्ण भूत भविष्य सबको जानते हैं। और यही जान कर कृष्ण अर्जुनके सारथी बने है। वे दोनों ब्रह्मा और शिवके समान मिले है ॥ (५-९)

यदि अर्जुनको कर्ण मार डालेंगे, तब कृष्ण आप ही युद्ध करने लगेंगे। अर्जुनके मरनेके पश्चात् महात्मा कृष्ण शङ्ख, चक्र और गदा लेकर तुम्हारी सेनाको नाश करेंगे। हे राजन् कृष्णको क्रोध भरे देख, कोई तुम्हारी सेनाका वीर युद्धमें खडा न रहेगा ॥ (१०—१२)

रेजुरध्वर्युमध्यस्था ज्वलन्त इव पावकाः ।
कल्पं तु तं रथं दृष्ट्वा विस्मिता देवताभवन् ॥ ३९ ॥
सर्वलोकस्य तेजांसि दृष्ट्वैकस्थानि मारिष ।
युक्तं निवेदयामासुर्देवास्तस्मै महात्मने ॥ ४० ॥
एवं तस्मिन्महाराज कल्पिते रथसत्तमे ।
देवैर्मनुजशार्दूल द्विषतामभिमर्दने ॥ ४१ ॥
स्वान्यायुधानि मुख्यानि न्यदधाच्छङ्करो रथे ।
ध्वजयष्टिं वियत्कृत्वा स्थापयामास गोवृषम् ॥ ४२ ॥
ब्रह्मदण्डः कालदण्डो रुद्रदण्डस्तथा ज्वरः ।
परिस्कन्दा रथस्यासन्सर्वतोदिशमुद्यताः ॥ ४३ ॥
अथर्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः ।
ऋग्वेदः सामवेदश्च पुराणं च पुरःसराः ॥ ४४ ॥
इतिहासयजुर्वेदौ पृष्ठरक्षौ बभूवतुः ।
दिव्या वाचश्च विद्याश्च परिपार्श्वचराः स्थिताः ॥४५॥
स्तोत्रादयश्च राजेन्द्र वषट्कारस्तथैव च ।
ओङ्कारश्च मुखे राजन्नतिशोभाकरोऽभवत् ॥ ४६ ॥
विचित्रमृतुभिः षड्भिः कृत्वा संवत्सरं धनुः ।

विजलीसे शोभित मेघ उस रथकी पताका बना ॥ (३४—३८)

उस रथके बीचमें जलती हुई अग्निके समान तेजस्वी यज्ञ करानेवाले ऋषि बैठे । रथको देख सब देवता आश्चर्यमें आगये॥ सब जगत्के तेजको एक स्थानमें इकट्ठा देख देवतोंने महात्मा शिवसे कहा, हे पुरुषसिंह शल्य ! देवतोंके वचन सुन और रथको तैयार देख देवतोंके सहित शिव उस रथपर बैठे और दिव्य शस्त्रोंको पास रख लिया । फिर आकाशको ध्वजाका यांस मानकर उस पर बैलको बिठा दिया ॥ (३९-४२)

ब्रह्मदण्ड, रुद्रदण्ड, कालदण्ड और सब ज्वर चारो ओरसे सब दिशाओंको प्रकाशित करते हुए रथकी रक्षा करने लगे ॥ अथर्वा और अङ्गिरा मुनि रथके पहियोंके रक्षक बने । ऋग्वेद, सामवेद और पुराण आगे चलने लगे। इतिहास यजुर्वेद पीछेसे रथकी रक्षा करने लगे, उत्तम वाणी और सब विद्या पास बैठीं। हे राजेन्द्र शल्य ! स्तोत्र वषट्कार और ओंकार शिव के मुख में शोभित होगये ॥ (४३ – ४६)

असकृन्निर्जिताः सङ्ख्ये स्मयमानेन संयुगे ।
तं कथं पाण्डवा युद्धे विजेष्यन्ति महारथम् ॥ २१ ॥
यो हन्यात्समरे क्रुद्धो वज्रहस्तं पुरन्दरम् ।
त्वं च सर्वास्त्रविद्वीरः सर्वविद्यास्त्रपारगः ॥ २२ ॥
बाहुवीर्येण ते तुल्यः पृथिव्यां नास्ति कश्चन ।
त्वं शल्यभूतः शत्रूणामविषह्यः पराक्रमे ॥ २३ ॥
ततस्त्वमुच्यसे राजञ्शल्य इत्यरिसूदन ।
तव बाहुबलं प्राप्य न शेकुः सर्वसात्वताः ॥ २४ ॥
तव बाहुबलाद्राजन्किं तु कृष्णो बलाधिकः ।
यथा हि कृष्णेन बलं धार्यं वै फाल्गुने हते ॥ २५ ॥
तथा कर्णात्ययीभावे त्वया धार्यं महद्बलम् ।
किमर्थं समरे सैन्यं वासुदेवो न्यवारयत् ॥ २६ ॥
किमर्थं च भवान्सैन्यं न हनिष्यति मारिष ।
त्वत्कृते पदवीं गन्तुमिच्छेयं युधि मारिष ।
सोदराणां च वीराणां सर्वेषां च महीक्षिताम् ॥ २७ ॥
शल्य उवाच— यन्मां ब्रवीषि गान्धारे अग्रे सैन्यस्य मानद ।
विशिष्टं देवकीपुत्रात्प्रीतिमानस्म्यहं त्वयि ॥ २८ ॥

जीता है । इन महारथ कर्णको पाण्डव लोग किस प्रकार जीत सकेंगे ? (१७ २१)

सब विद्या और शस्त्रोंके जाननेवाले कर्ण आपको सारथी बनाकर वज्रधारी इन्द्रको भी जीत सक्ते हैं । आपके समान पृथ्वी पर बलवान् और शस्त्र विद्या जाननेवाला दूसरा कोई नहीं है । आप शत्रुओंके हृदयमें कांटेके समान दुःख देते है, हे राजन् ! इसीलिये आपका नाम शल्य है । आपके पराक्रम के आगे कोई यादव युद्धमें नहीं ठहर सकते,आपके आगे कृष्ण क्या है? २१–२५

जैसे अर्जुनकी आपत्तिके समय कृष्ण सेनाको स्थिर रखते हैं, तैसे ही आप भी कर्णकी आपत्तिके समय हमारी सेनाकी रक्षा कीजियेगा ॥ आप पाण्डवोंकी सेनाको क्यों नहीं मारेंगे ? हम आपही की कृपासे राज्य पानेकी इच्छा करते है । हम अपने वीर भाई और राजोंके सहित आपकी कृपासे सुख भोगनेकी इच्छा करते है ॥ (२५—२७)

शल्य बोले, हे प्रिय गान्धारीपुत्र ! तुम जो सब सेनाके आगे हमें कृष्णसे अच्छा कहते हो, इसीसे हम तुम्हारे

जङ्गमाजङ्गमं राजञ्शुशुभेऽद्भुतदर्शनम् ॥ ५५ ॥
दृष्ट्वा तु तं रथं युक्तं कवची सशरासनी ।
बाणमादाय तं दिव्यं सोमविष्ण्वग्निसम्भवम् ॥ ५६ ॥
तस्य राजंस्तदा देवाः कल्पयाञ्चक्रिरे प्रभो ।
पुण्यगन्धवहं राजञ्श्वसनं देवसत्तमम् ॥ ५७ ॥
तमास्थाय महादेवस्त्रासयन्दैवतान्यपि ।
आरुरोह तदा यत्तः कम्पयन्निव मेदिनीम् ॥ ५८ ॥
तमारुरुक्षुं देवेशं तुष्टुवुः परमर्षयः ।
गन्धर्वा देवसङ्घाश्च तथैवाप्सरसां गणाः ॥ ५९ ॥
ब्रह्मर्षिभिः स्तूयमानो वन्द्यमानश्च वन्दिभिः ।
तथैवाप्सरसां वृन्दैर्नृत्यद्भिर्नृत्यकोविदैः ॥ ६० ॥
स शोभमानो वरदः खड्गी बाणी शरासनी ।
हसन्निवाब्रवीद्देवान्सारथिः को भविष्यति ॥ ६१ ॥
तमब्रुवन्देवगणा यं भवान्संनियोक्ष्यते ।
स भविष्यति देवेश सारथिस्ते न संशयः ॥ ६२ ॥
तानब्रवीत्पुनर्देवो मत्तः श्रेष्ठतरो हि यः ।
तं सारथिं कुरुध्वं मे स्वयं सञ्चिन्त्य मा चिरम् ॥ ६३ ॥
एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना ।

उसी शिवके शरीरोंमें सब जगत् स्थित है । हे राजन् ! सब चर और अचर उसीसे स्थिर है; उस रथको देखकर शिवने कवच पहना और धनुष पर वही दिव्य विष्णु, चन्द्रमा और अग्निरूपी बाण चढाए ॥ हे राजन् ! फिर देवतोंने उत्तम सुगन्ध भरे वायुको शिवके पास भेजा ॥ अनन्तर शिव देवतोंको भी डराते और पृथ्वीको कंपाते हुए उस रथ पर बैठे ॥ (५५-५८)

रथपर बैठे हुए शिवकी देवता, गन्धर्व, अप्सरा और सिद्ध स्तुति करने लगे। नाचने वाली अप्सरा गन्धर्व और ब्रह्मऋषियोंकी स्तुति सुनते हुए खड्ग, धनुष और कवचधारी वर दान देनेवाले शिवजीने हंसकर देवतोंसे कहा, कि सारथी कौन बनेगा ? (५९-६१)

देवता बोले, हे देवराज ! आप जिसको सारथी बनाना चाहें वही आपके रथको हांकेगा ॥ तब शिवने कहा तुम लोग आप ही हममे श्रेष्ठ देवका विचार कर सारथी बनाओ ॥ (६२-६३)

शल्य कर्णोऽर्जुनेनाद्य योद्धव्यमिति मन्यते ॥ ३७ ॥
तस्य त्वं पुरुषव्याघ्र नियच्छ तुरगान्युधि।
कर्णो हत्वेतरान्सर्वान्फाल्गुनं हन्तुमिच्छति ॥ ३८ ॥
तस्याभीषुग्रहे राजन्प्रयाचे त्वां पुनः पुनः।
पार्थस्य सचिवः कृष्णो यथाभीषुग्रहो वरः।
तथा त्वमपि राधेयं सर्वतः परिपालय ॥ ३९ ॥

सञ्जय उवाच— ततः शल्यः परिष्वज्य सुतं ते वाक्यमब्रवीत्।
दुर्योधनमामित्रघ्नं प्रीतो मद्राधिपस्तदा ॥ ४० ॥

शल्य उवाच— एवं चेन्मन्यसे राजन्गान्धारे प्रियदर्शन।
तस्मात्ते यत्प्रियं किञ्चित्तत्सर्वं करवाण्यहम् ॥ ४१ ॥
यत्राऽस्मि भरतश्रेष्ठ योग्यः कर्माणि कर्हिचित्।
तत्र सर्वात्मना युक्तो वक्ष्ये कार्यं परन्तप ॥ ४२ ॥
यत्तु कर्णमहं ब्रूयां हितकामः प्रियाप्रिये।
मम तत्क्षमतां सर्वं भवान्कर्णश्च सर्वशः ॥ ४३ ॥

कर्ण उवाच— ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः।
तथा नित्यं हिते युक्तो मद्रराज भवस्व नः ॥ ४४ ॥

वाणीसे कहने लगे। हे शल्य! अब कर्ण अर्जुनसे युद्ध करनेको जाते है। हे राजन्! कर्णकी इच्छा है, कि पाण्डवोंके सब वीरोंको मारकर अर्जुनको मारें, इस लिये आप उनके घोडोंको हांके। जैसे कृष्ण अर्जुनके सारथी और मन्त्री हैं, तैसे ही आप भी कर्णके सारथी बनो, हम यह भिक्षा आपसे बार बार मांगते हैं; जैसे कृष्ण अर्जुनकी रक्षा करते हैं; तैसे ही आप भी राधापुत्र की रक्षा कीजिये ॥ (३७—३९)

सञ्जय बोले, तब राजा शल्य बहुत प्रसन्न होकर और दुर्योधनको आलिंगन देकर बोले, हे गान्धारीपुत्र! यदि तुम्हारी ऐसी ही इच्छा है, तो तुम्हें प्रसन्न करनेके लिये हम सब कुछ करेंगे। हे भरतकुलश्रेष्ठ! हम जिस कामको कर सकते है सो तुम प्रसन्न होकर हमसे कह दिया करो, और युद्ध में जो हम कर्णके हितकी इच्छासे कठोर या कोमल वचन कहै उसको तुम और कर्ण क्षमा करना ॥ (४०–४३)

कर्ण बोले, हे मद्रराज! जैसे शिवके ब्रह्मा और कुन्तीपुत्र अर्जुनके कृष्ण सारथी है, वैसे ही तुम नित्य हमारे सारथी बनो ॥ (४४)

त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम् ॥ ७२ ॥
त्वं हि सर्वगुणैर्युक्तो दैवतेभ्योऽधिकः प्रभो ।
स रथं तूर्णमारुह्य संयच्छ परमान्हयान् ॥ ७३ ॥
जयाय त्रिदिवेशानां वधाय त्रिदशद्विषाम् ।
इति ते शिरसा गत्वा त्रिलोकेशं पितामहम् ।
देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम् ॥ ७४ ॥

पितामह उवाच- नात्र किञ्चिन्मृषा वाक्यं यदुक्तं त्रिदिवौकसः ।
संयच्छामि हयानेष युध्यतो वै कपर्दिनः ।
ततः स भगवान्देवो लोकस्रष्टा पितामहः ॥ ७५ ॥
सारथ्ये कल्पितो देवैरीशानस्य महात्मनः ।
तस्मिन्नारोहति क्षिप्रं स्यन्दने लोकपूजिते ॥ ७६ ॥
शिरोभिरगमन्भूमिं ते हया वातरंहसः ।
आरुह्य भगवान्देवो दीप्यमानः स्वतेजसा ॥ ७७ ॥
अभीपून्हि प्रतोदं च सञ्जग्राह पितामहः ।
तत उत्थाय भगवांस्तान्हयाननिलोपमान् ॥ ७८ ॥
वभाषे च तदा स्थाणुमारोहेति सुरोत्तमः ।
ततस्तमिषुमादाय विष्णुसोमाग्निसम्भवम् ॥ ७९ ॥
आरुरोह तदा स्थाणुर्धनुषा कम्पयन्परान् ।

आपके सिवाय किसीको सारथी नहीं देखते हैं । आप सब देवतोंमें श्रेष्ठ और जगत्के स्वामी हैं, इस लिये आपही शिवके घोडोंको हांकिये ! आपके सारथी बननेसे देवतोंकी विजय और दानवोंका नाश होगा । (७१—७४)

हमने सुना है, कि देवतोंके वचन सुन ब्रह्मा सारथी बननेको प्रसन्न होगये ॥ (७४)

ब्रह्मा बोले, हे देवताओ ! जो तुमने कहा उसको हम मानते हैं ! अब हम युद्ध करते हुए, शिवके घोडोंको हांकेंगे तब सब जगत्के कर्त्ता भगवान् ब्रह्मा देवतोंकी प्रार्थनासे लोकपूजित शिवके सारथी बने, ब्रह्माके बैठते हुए सब घोडोंने प्रणाम किया । तब तेजस्वी शिवजी भी रथ पर बैठे ॥ (७५-७७)

तब भगवान् ब्रह्माने कोडा और रास हाथमें लेकर उन वायुके समान वेग वाले घोडोंको उठाया । तब शिव ने ब्रह्मासे कहा. तुम भी रथमें बैठो । तब शिवने विष्णु, चद्रमा और अग्नि-

उवाच राजन्संग्रामेऽभ्युपिते पर्युपस्थिते ॥ ४ ॥
कर्णस्य यच्छ संग्रामे मद्रराज हयोत्तमान् ।
त्वयाभिगुप्तो राधेयो विजेष्यति धनञ्जयम् ॥ ५ ॥
इत्युक्तो रथमास्थाय तथेति प्राह भारत ।
शल्येऽभ्युपगते कर्णः सारथिं सुमनाब्रवीत् ॥ ६ ॥
त्वं सूत स्यन्दनं मह्यं कल्पयेत्यसकृत्त्वरन् ।
ततो जैत्रं रथवरं गन्धर्वनगरोपमम् ॥ ७ ॥
विधिवत्कल्पितं भद्रं जयेत्युक्त्वा न्यवेदयत् ।
तं रथं रथिनां श्रेष्ठः कर्णोऽभ्यर्च्य यथाविधि ॥ ८ ॥
सम्पादितं ब्रह्मविदा पूर्वमेव पुरोधसा ।
कृत्वा प्रदक्षिणं यत्नादुपस्थाय च भास्करम् ॥ ९ ॥
सपीपस्थं मद्रराजमारोह त्वमथाब्रवीत् ।
ततः कर्णस्य दुर्धर्षं स्यन्दनप्रवरं महत् ॥ १० ॥
आरुरोह महातेजाः शल्यः सिंह इवाचलम् ।
ततः शल्याश्रितं दृष्ट्वा कर्णः स्वं रथमुत्तमम् ॥ ११ ॥
अध्यतिष्ठद्यथाम्भोदं विद्युद्वन्तं दिवाकरः ।
तावेकरथमारूढावादित्याग्निसमत्विषौ ॥ १२ ॥

वचन सुन पराक्रमी दुर्योधन बोले, हे राजन् शल्य ! प्रातःकाल होते ही आपको युद्धमें जाना होगा। अब प्रातःकाल होगया आप राधापुत्रके घोडे हांकिये। ये आपसे रक्षित होकर युद्धमें अर्जुनको जीतेंगे ॥ ऐसा कहकर दुर्योधनने शल्यको कर्णका रथ दिखा दिया और शल्यने घोडोंकी रास पकडली, तब कर्णने शल्यसे कहा। हे सारथे ! तुम हमारे रथको शीघ्र ठीक करो ॥ (४-७)

तब शल्यने गन्धर्व नगरके समान विशाल रथको ठीक करके कर्णसे कहा कि रथ तैयार है। तब महारथ कर्णने विधिपूर्वक उस रथकी पूजा की और वेद जाननेवाले पुरोहितकी आज्ञानुसार सूर्यको प्रणाम कर उस रथपर बैठे और पास खडे शल्यसे कहा तुम भी बैठो, तब शल्य उस घोर रूपी रथ पर बैठे। ७ १०

महातेजस्वी शल्य इस प्रकार रथपर चढे जैसे सिंह पर्वतके शिखरपर चढता है; कर्ण शल्यको अपने रथपर बैठा देख बहुत प्रसन्न हुए और बिजलीके सहित मेघके ऊपर दीखनेवाले सूर्यके समान शोभित होने लगे; एक रथपर बैठे कर्ण

तुष्टमासीज्जगत्सर्व देवताश्च नरोत्तम ॥ ८९ ॥
ऋषयस्तत्र देवेशं स्तुवन्तो बहुभिः स्तवैः ।
तेजश्चास्मै वर्धयन्तो राजन्नासन्पुनः पुनः ॥ ९० ॥
गन्धर्वाणां सहस्राणि प्रयुतान्यर्बुदानि च ।
वादयन्ति प्रयाणेऽस्य वाद्यानि विविधानि च ॥ ९१ ॥
ततोऽधिरूढे वरदे प्रयाते चासुरान्प्रति ।
साधुसाध्विति विश्वेशः स्वयमानोऽभ्यभाषत॥ ९२ ॥
याहि देव यतो दैत्याश्चोदयाश्वानतन्द्रितः ।
पश्य बाह्वोर्बलं मेऽद्य निघ्नतः शात्रवान्रणे ॥ ९३ ॥
ततोऽश्वांश्चोदयामास मनोमारुतरंहसः ।
येन तत्त्रिपुरं राजन्दैत्यदानवरक्षितम् ॥ ९४ ॥
पिबद्भिरिव चाकाशं तैर्हयैर्लोकपूजितैः ।
जगाम भगवान्क्षिप्रं जघान त्रिदिवौकसाम् ॥ ९५ ॥
प्रयाते रथमास्थाय त्रिपुराभिमुखे भवे ।
ननाद सुमहानादं वृषभः पूरयन्दिशः ॥ ९६ ॥
वृषभस्यास्य निनदं श्रुत्वा भयकरं महत् ।
विनाशमगमंस्तत्र तारकाः सुरशत्रवः ॥ ९७ ॥
अपरेऽवस्थितास्तत्र युद्धायाभिमुखास्तदा ।

के गुण वर्णन करने लगे । जगत्के सुख देनेवाले शिवके चलनेमे सब जगत् शान्त और देवता प्रसन्न हुए ॥ हे राजन् ! अनेक ऋषियोंने शिवका तेज बढानेको अनेक स्तोत्र बनाये । अनेक गन्धर्व अनेक प्रकारके बाजे बजाने लगे ॥ (८७—९१)

जब वरदान देनेवाले शिव दानवोंको मारने चले, तब सब देवता साधु साधु कहने लगे ॥ शिवने ब्रह्मासे कहा, हे देवराज ! तुम सावधान होकर जहां दैत्य है वहां घोडोंको हांको और शत्रुओंको मारते हुए हमारे बाहुबलको देखो ॥ तब ब्रह्माने वायु और मनके समान शीघ्र चलनेवाले घोडे आकाशको उडते हुएके समान शीघ्र चलाए और दानवोंके नगर में पहुंचे । मार्गमें शिवका बैल अपने शब्दसे दशों दिशाओंको पूरित करने लगा ॥ (९२—९६)

बैलका भयङ्कर शब्द सुनकर कोई दानव मर गये और कई दानव युद्ध करनेको भी खडे होगये ॥ जब शिवने

भीमसेनं च राधेय माद्रीपुत्रौ यमावपि ।
जयश्च तेऽस्तु भद्रं ते प्रयाहि पुरुषर्षभ ॥ २१ ॥
पाण्डुपुत्रस्य सैन्यानि कुरु सर्वाणि भस्मसात् ।
ततस्तूर्यसहस्राणि भेरीणामयुतानि च ॥ २२ ॥
वाद्यमानान्यरोचन्त मेघशब्दो यथा दिवि ।
प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः ॥ २३ ॥
अभ्यभाषत राधेयः शल्यं युद्धविशारदम् ।
चोदयाश्वान्महाबाहो यावद्धन्मि धनञ्जयम् ॥ २४ ॥
भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरम् ।
अद्य पश्यतु मे शल्य बाहुवीर्यं धनञ्जयः ॥ २५ ॥
अस्यतः कङ्कपत्राणां सहस्राणि शतानि च ।
अद्य क्षेप्स्याम्यहं शल्य शरान्परमतेजनान् ॥ २६ ॥
पाण्डवानां विनाशाय दुर्योधनजयाय च ।
शल्य उवाच— सूतपुत्र कथं नु त्वं पाण्डवानवमन्यसे ॥ २७ ॥
सर्वास्त्रज्ञान्महेष्वासान्सर्वानेव महाबलान् ।
अनिवर्तिनो महाभागानजय्यान्सत्यविक्रमान् ॥ २८ ॥
अपि सन्तनयेयुर्ये भयं साक्षाच्छतक्रतोः ।

नकुल, सहदेव इनमेंसे किसी एकको मार डालो, इनके मरनेहीमे हमारी विजय होगी। ईश्वर तुम्हारा कल्याण करै, तुम युद्ध करो पाण्डवोंकी सब सेनाको भस्म करो। उसी समय जैसे आकाशमें मेघ गरजते है तैसेही सेनामें अनेक भेरे और नगाडे बजने लगे ॥ (२०-२३)

महारथ कर्णने दुर्योधनके वचनको स्वीकार किया। फिर बुद्धिमान् शल्यसे बोले, हे महाबाहो! आप हमारे घोडोंको शीघ्र हाको हम युधिष्ठिर, भीम, अर्जुन, नकुल और सहदेवको मारेंगे। हे शल्य! आज सहस्रों बाण छोडते मेरे बाहुबल को अर्जुन देखे। हे शल्य! आज हम पाण्डवोंका नाश और दुर्योधनकी विजयके लिये तीक्ष्ण बाण चलावेंगे। (२३-२७)

शल्य बोले, हे सुतपुत्र! सब शस्त्र जाननेवाले महापराक्रमी बलवान् पाण्डवोंकी निन्दा क्यों करता है? सब पाण्डव कभी युद्धमें नहीं हटते, वे महापराक्रमी और बलवान् है; उन्हें कोई नहीं जीत सकता, वे साक्षात् इन्द्रसे भी नहीं भय करते। हे राधापुत्र! जब तू मेघ और

तुष्टमासीज्जगत्सर्व देवताश्च नरोत्तम ॥ ८९ ॥
ऋषयस्तत्र देवेशं स्तुवन्तो बहुभिः स्तवैः ।
तेजश्चास्मै वर्धयन्तो राजन्नासन्पुनः पुनः ॥ ९० ॥
गन्धर्वाणां सहस्राणि प्रयुतान्यर्बुदानि च ।
वादयन्ति प्रयाणेऽस्य वाद्यानि विविधानि च ॥ ९१ ॥
ततोऽधिरूढे वरदे प्रयाते चासुरान्प्रति ।
साधुसाध्विति विश्वेशः स्वयमानोऽभ्यभाषत॥ ९२ ॥
याहि देव यतो दैत्याश्चोदयाश्वानतन्द्रितः ।
पश्य बाह्वोर्बलं मेऽद्य निघ्नतः शात्रवान्रणे ॥ ९३ ॥
ततोऽश्वांश्चोदयामास मनोमारुतरंहसः ।
येन तत्त्रिपुरं राजन्दैत्यदानवरक्षितम् ॥ ९४ ॥
पिबद्भिरिव चाकाशं तैर्हयैर्लोकपूजितैः ।
जगाम भगवान्क्षिप्रं जयाय त्रिदिवौकसाम् ॥ ९५ ॥
प्रयाते रथमास्थाय त्रिपुराभिमुखे भवे ।
ननाद सुमहानादं वृषभः पूरयन्दिशः ॥ ९६ ॥
वृषभस्यास्य निनदं श्रुत्वा भयकरं महत् ।
विनाशमगमंस्तत्र तारकाः सुरशत्रवः ॥ ९७ ॥
अपरेऽवस्थितास्तत्र युद्धायाभिमुखास्तदा ।

के गुण वर्णन करने लगे । जगत्के सुख देनेवाले शिवके चलनेमे सब जगत् शान्त और देवता प्रसन्न हुए ॥ हे राजन् ! अनेक ऋषियोंने शिवका तेज बढानेको अनेक स्तोत्र बनाये । अनेक गन्धर्व अनेक प्रकारके बाजे बजाने लगे ॥ (८७—९१)

जब वरदान देनेवाले शिव दानवोंको मारने चले, तब सब देवता साधु साधु कहने लगे ॥ शिवने ब्रह्मासे कहा, हे देवराज ! तुम सावधान होकर जहां दैत्य है वहां घोडोंको हांको और शत्रुओंको मारते हुए हमारे बाहुबलको देखो ॥ तब ब्रह्माने वायु और मनके समान शीघ्र चलनेवाले घोडे आकाशको उडते हुएके समान शीघ्र चलाए और दानवोंके नगर में पहुंचे । मार्गमें शिवका बैल अपने शब्दसे दशों दिशाओंको पूरित करने लगा ॥ (९२—९६)

बैलका भयङ्कर शब्द सुनकर कोई दानव मर गये और कई दानव युद्ध करनेको भी खडे होगये ॥ जब शिवने

भीमसेनं च राधेय माद्रीपुत्रौ यमावपि।
जयश्च तेऽस्तु भद्रं ते प्रयाहि पुरुषर्षभ ॥ २१ ॥
पाण्डुपुत्रस्य सैन्यानि कुरु सर्वाणि भस्मसात्।
ततस्तूर्यसहस्राणि भेरीणामयुतानि च ॥ २२ ॥
वाद्यमानान्यरोचन्त मेघशब्दो यथा दिवि।
प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः ॥ २३ ॥
अभ्यभाषत राधेयः शल्यं युद्धविशारदम्।
चोदयाश्वान्महाबाहो यावद्धन्मि धनञ्जयम् ॥ २४ ॥
भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरम्।
अद्य पश्यतु मे शल्य बाहुवीर्यं धनञ्जयः ॥ २५ ॥
अस्यतः कङ्कपत्राणां सहस्राणि शतानि च।
अद्य क्षेप्स्याम्यहं शल्य शरान्परमतेजनान् ॥ २६ ॥
पाण्डवानां विनाशाय दुर्योधनजयाय च।
शल्य उवाच— सूतपुत्र कथं नु त्वं पाण्डवानवमन्यसे ॥ २७ ॥
सर्वास्त्रज्ञान्महेष्वासान्सर्वानेव महाबलान्।
अनिवर्तिनो महाभागानजय्यान्सत्यविक्रमान् ॥ २८ ॥
अपि सन्तनयेयुर्यं भयं साक्षाच्छतक्रतोः।

नकुल, सहदेव इनमेंसे किसी एकको मार डालो, इनके मरनेहीसे हमारी विजय होगी। ईश्वर तुम्हारा कल्याण करै, तुम युद्ध करो पाण्डवोंकी सब सेनाको भस्म करो। उसी समय जैसे आकाशमें मेघ गरजते हैं तैसेही सेनामें अनेक भेरे और नगाडे बजने लगे ॥ (२०-२३)

महारथ कर्णने दुर्योधनके वचनको स्वीकार किया। फिर बुद्धिमान् शल्यसे बोले, हे महाबाहो! आप हमारे घोडोंको शीघ्र हाको हम युधिष्ठिर, भीम, अर्जुन, नकुल और सहदेवको मारेंगे। हे शल्य! आज सहस्रों बाण छोडते मेरे बाहुबल को अर्जुन देखे। हे शल्य! आज हम पाण्डवोंका नाश और दुर्योधनकी विजयके लिये तीक्ष्ण बाण चलावेंगे। (२३-२७)

शल्य बोले, हे सुतपुत्र! सब शस्त्र जाननेवाले महापराक्रमी बलवान् पाण्डवोंकी निन्दा क्यों करता है? सब पाण्डव कभी युद्धमें नहीं हटते, वे महापराक्रमी और बलवान् हैं; उन्हें कोई नहीं जीत सकता, वे साक्षात् इन्द्रसे भी नहीं भय करते। हे राधापुत्र! जब तू मेघ और

पुराणि तानि कालेन जग्मुरेवैकतां तदा ।
एकीभावं गते चैव त्रिपुरत्वमुपागते ॥ १०८ ॥
बभूव तुमलो हर्षो देवतानां महात्मनाम् ।
ततो देवगणाः सर्वे सिद्धाश्च परमर्षयः ॥ १०९ ॥
जयेति वाचो मुमुचुः संस्तुवन्तो महेश्वरम् ।
ततोऽग्रतः प्रादुरभूत्त्रिपुरं निघ्नतोऽसुरान् ॥ ११० ॥
अनिर्देश्योग्रवपुषो देवस्यासह्यतेजसः ।
स तद्विकृष्य भगवान्दिव्यं लोकेश्वरो धनुः ॥ १११ ॥
त्रैलोक्यसारं तमिषुं सुमोच त्रिपुरं प्रति ।
उत्सृष्टे वै महाभाग तस्मिन्निषुवरे तदा ॥ ११२ ॥
महानार्तस्वरो ह्यासीत्पुराणां पततां भुवि ।
तान्सोऽसुरगणान्दग्ध्वा प्राक्षिपत्पश्चिमार्णवे॥ ११३ ॥
एवं तु त्रिपुरं दग्धं दानवाश्चाप्यशेषतः ।
महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा ॥ ११४ ॥
स चात्मक्रोधजो वह्निर्हाहेत्युक्त्वा निवारितः ।
मा कार्षीर्भस्मसाल्लोकानिति त्र्यक्षोऽब्रवीच्च तम्॥११५॥
ततः प्रकृतिमापन्ना देवा लोकास्त्वधर्षयः ।

मन्त्रसे युक्त करके त्रिपुरासुरकी चिन्ता करी । हे महाराज ! जब शिवने धनुष चढाया तब वे तीनों नगर इकट्टे होगये। उसी दिनसे उसका नाम त्रिपुर हुआ, तब सब देवता सिद्ध और महाऋषि बहुत प्रसन्न हुए और जय जय कहने लगे । (१०६–११०)

जब असुरोंके मारनेवाले, घोर रूपधारी असह्य तेजवाले शिवजीके पास वे त्रिपुर आये तब महा तेजस्वी शिवने अपने दिव्य धनुषको खींचा । हे महाभाग ! तब शिवने त्रिपुरासुरकी ओर वह तीनों लोकोमें श्रेष्ठ बाण चलाया। उस बाणके छूटते ही वे तीनों नगर नष्ट होगये, और घोर शब्द होने लगा, तब शिवने उन तीनों नगरोंके दैत्योंको भस्म करके पश्चिमके समुद्रमें डालदिया॥११०-११३

शिवने त्रिपुरासुरको मार तीन लोकके कल्याणके लिये तब सब दानवोंको मार डाला, फिर अपने क्रोधसे उत्पन्न हुई अग्निसे कहा तुम हमारे पास चले आओ। तीनों लोकोंको भस्म मत करो । ऐसे कहकर अग्निको अपने पास बुला लिया॥ अनन्तर सब देवता और ऋषि सावधान

अलं मनुष्यस्य सुखाय वर्तितुं तथा हि युद्धे निहतः परैर्गुरुः ॥ १९॥
हुताशनादित्यसमानतेजसं पराक्रमे विष्णुपुरन्दरोपमम् ।
नये बृहस्पत्युशनोः सदा समं न चैनमस्त्रं तदुपास्तदुःसहम् ॥२०॥
सम्प्राक्रुष्टं रुदितस्त्रीकुमारे पराभूते पौरुषे धार्तराष्ट्रे ।
मया कृत्यमिति जानामि शल्य प्रयाहि तस्माद् द्विषतामनीकम्॥२१॥
यत्र राजा पाण्डवः सत्यसन्धो व्यवस्थितो भीमसेनार्जुनौ च ।
वासुदेवः सात्यकिः सृञ्जयाश्च यमौ च कस्तान्विषहेन्मदन्यः ॥ २२ ॥
तस्मात्क्षिप्रं मद्रपते प्रयाहि रणे पञ्चालान्पाण्डवान्सृञ्जयांश्च ।
तान्वा हनिष्यामि समेत्य सङ्ख्ये यास्यामि वा द्रोणपथा यमाय ॥२३॥
नत्वेवाहं न गमिष्यामि मध्ये तेषां शूराणामिति मां शल्य विद्धि ।
मित्रद्रोहो मर्षणीयो न मेऽयं त्यक्त्वा प्राणाननुयास्यामि द्रोणम् ॥२४ ॥
प्राज्ञस्य मूढस्य च जीविन्तान्ते नास्ति प्रमोक्षोऽन्तकसत्कृतस्य ।
अतो विद्वन्नभियास्यामि पार्थान्दिष्टं न शक्यं व्यतिवर्तितुं वै ॥ २५ ॥
कल्याणवृत्तः सततं हि राजा वैचित्रवीर्यस्य सुतो ममासीत् ।

रक्षा करनेमें समर्थ नहीं हैं। इन सब गुणोंसे भरे हुए साक्षात् गुरु द्रोणाचार्य ही शत्रुओंके हाथसे मारे गये! (१७-१९

वह तेजमें अग्नि, पराक्रममें विष्णु और इन्द्र, नीतिमें बृहस्पति और शुक्रके समान थे। वह भी घोर शस्त्रसे न बच सके॥ इस समय दुर्योधनकी सेनाके वीरोंकी स्त्रियां और लडके रोरहे हैं, और दुर्योधनका कुछ उपाय नहीं चलता, इसलिये हमारे रथको पाण्डवोंकी सेनामें ले चलो, हम सबको मारेंगे॥ जिस सेनामें साक्षात् धर्मराज युधिष्ठिर, भीमसेन, अर्जुन, नकुल, सहदेव, सात्यकि, श्रीकृष्ण और साक्षात् धृष्टद्युम्न खडे हों, वहां हमारे सिवाय और दूसरा कौन जा सक्ता है? (२०-२२)

इसलिये, हे शल्य! तुम हमारे रथको शीघ्र सृञ्जय, पाञ्चाल और पाण्डवोंकी ओर हांको। या तो मै इन सबको मारूंगा, या द्रोणाचार्यके समान मैं भी मर जाऊंगा॥ मै अपने मित्र दुर्योधनके द्रोहियों पर क्षमा नहीं कर सक्ता, इस लिये रथको शीघ्र हांको! यातो हम ही उन्हें मारेंगे, या मर जायंगे॥ हे विद्वान्! मूर्ख और पण्डित दोनों ही यमराजके यहां जाते है और इसे उलट फेरको देख भी नहीं सक्ते; इसलिये आज पाण्डवोंसे युद्ध करनेको जाते है॥ (२३-२५)

विचित्रवीर्यपुत्र धृतराष्ट्रके पुत्र राजा दुर्योधन सदा हमारा कल्याण करते

विजयश्चैव संग्रामे संयच्छाद्य हयोत्तमान् ॥ १२५ ॥
इमं चाप्यपरं भूय इतिहासं निबोध मे !
पितुर्मम सकाशे यद्ब्राह्मणः प्राह धर्मवित् ॥ १२६ ॥
श्रुत्वा चैतद्वचश्चित्रं हेतुकार्यार्थसंहितम् ।
कुरु शल्य विनिश्चित्य मा भूदत्र विचारणा॥ १२७ ॥
भार्गवाणां कुले जातो जमदग्निर्महायशाः ।
तस्य रामेति विख्यातः पुत्रस्तेजोगुणान्वितः॥ १२८॥
स तीव्रं तप आस्थाय प्रसादयितवान्भवम् ।
अस्त्रहेतोः प्रसन्नात्मा नियतः संयतेन्द्रियः ॥ १२९ ॥
तस्य तुष्टो महादेवो भक्त्या च प्रशमेन च ।
हृद्गतं चास्य विज्ञाय दर्शयामास शङ्करः ॥ १३० ॥
महेश्वर उवाच— राम तुष्टोऽस्मि भद्रं ते विदितं मे तवेप्सितम् ।
कुरुष्व पूतमात्मानं सर्वमेतदवाप्स्यसि ॥ १३१ ॥
दास्यामि ते तदास्त्राणि यदा पूतो भविष्यसि ।
अपात्रमसमर्थं च दहन्त्यस्त्राणि भार्गव ॥ १३२ ॥
इत्युक्तो जामदग्न्यस्तु देवदेवेन शूलिना ।

तुम्हारे बलसे हम, कर्ण और हमारा राज्य स्थिर है; इस लिये आप कर्णके घोडे हांकिये ॥ अब हम आपसे एक दूसरा इतिहास कहते है, यह हमारे पितासे एक ब्राह्मणने कहा था । इस प्रयोजन भरे इतिहासको सुनकर आप विना विचारे कर्णके सारथी बनिये ॥ (१२४–१२७)

भार्गवके कुलमें जमदग्नि नाम एक मुनि हुए, उनके महातेजस्वी जगत्प्रसिद्ध परशुराम नामक पुत्र हुआ, परशुराम अपनी इन्द्रियोंको वशमें करके अस्त्रोंके लिये शिवका घोर तप करने लगे, उनकी भक्ति और नियमसे प्रसन्न होकर तथा अतःकरणका अभिप्राय जानकर शिव प्रगट हुए ॥ (१२८–१३०)

शिवजी बोले, हे परशुराम ! हम तुम्हारा अभिप्राय जानकर प्रगट हुए, अब तुम अपनी आत्माको पवित्र करो, तुम्हारा प्रयोजनभी सिद्ध होगा ॥ हे भार्गव ! जब तुम पवित्र होजाओगे, तब हम तुम्हें शस्त्र देंगे, क्योंकि अयोग्य और सामर्थ्य हीन मनुष्यको अस्त्र भस्म कर देते है ॥ (१३१–१३२)

शूलधारी देवताओंके देवता महात्मा शिव के वचन सुन परशुराम शिर से

यदुसदनमुपेन्द्रपालितं त्रिदशमिवामरराजरक्षितम् ।
प्रसभमतिविलोडय को हरेत्पुरुषवरावरजामृतेऽर्जुनात् ॥ ३४ ॥
त्रिभुवनविभुमीश्वरेश्वरं क इह पुमान्भवमाह्वयेद्युधि ।
मृगवधकलहे ऋतेऽर्जुनात्सुरपतिवीर्यसमप्रभावतः ॥ ३५ ॥
असुरसुरमहोरगान्नरान्गरुडपिशाचसयक्षराक्षसान् ।
इषुभिरजयदग्निगौरवात्स्वभिलषितं च हविर्ददौ जयः ॥ ३६ ॥
स्मरसि ननु यदा परैर्हृतः स च धृतराष्ट्रसुतोऽपि मोक्षितः ।
दिनकरसदृशैः शरोत्तमैर्युधा कुरुषु बहून्विनिहत्य तानरीन् ॥ ३७ ॥
प्रथममपि पलायिते त्वयि प्रियकलहा धृतराष्ट्रसूनवः ।
स्मरसि ननु यदा प्रमोचिताः स्वचरगणानवजित्य पाण्डवैः ॥ ३८ ॥
समुदितबलवाहनाः पुनः पुरुषवरेण जिताः स्थ गोग्रहे ।
सगुरुगुरुसुताः सभीष्मकाः किमु न जितः स तदा त्वयार्जुनः ॥३९॥
इदमपरमुपस्थितं पुनस्तव निधनाय सुयुद्धमद्य वै ।
यदि न रिपुभयात्पलायसे समरगतोऽद्य हतोऽसि सूतज ॥ ४० ॥
सञ्जय उवाच— इति बहुपरुषं प्रभाषति प्रमनसि मद्रपतौ रिपुस्तवम् ।

के सिवाय ऐसा कौन वीर है जो देवतोंके सहित इन्द्रसे रक्षित स्वर्गके समान यादवोंके घरसे सुभद्राको ला सक्ता ? ऐसा कौन वीर है, जो एक हरिनके लिये देवोंके देव शिवका निरादर करके उनसे युद्ध करे, यह बल इन्द्रके समान अर्जुनमें ही है ॥ (३३-३५)

देवता, राक्षस, पिशाच, गरुड और सर्पोंको मारकर उन्होंने अग्निको तृप्त किया, क्या तुम्हें यह स्मरण नहीं है ? जब गन्धर्वोंने कौरवोंको मारकर दुर्योधनको पकड लिया था, तब अर्जुनने सूर्यकी किरणोंके समान अपने तेज बाणोंसे उन्हें मारकर दुर्योधनको छुडाया था, जब धृतराष्ट्रके पुत्र आप ही युद्ध करने लगे, और वहां पकडे गये, तब पाण्डवोंने उन्हें छुडाया ॥ (३६-३८)

क्या तुम्हें स्मरण नहीं है, कि जब तुम लोग विराट नगर पर चढे थे, तब एकले अर्जुनने भीष्म, द्रोणाचार्य और तुम्हें जीत लिया था; तुमने तभी अर्जुनको क्यों नहीं मारा ? हे सूतपुत्र ! अब तुम्हारे मरनेके लिये दूसरा युद्ध आगया, यदि आज तुम डरकर नहीं भागोगे, तो यहीं मर जाओगे ॥ (३९-४०)

सञ्जय बोले; महाप्रतापी मद्रराज शल्यके ऐसे कठोर वचन सुन, शत्रुनाशन कुरुसेनापति कर्ण बोले, सच सच

रामं भार्गवमाहूय सोऽभ्यभाषत शङ्करः ॥ १४२ ॥
रिपून्भार्गव देवानां जहि सर्वान्समागतान् ।
लोकानां हितकामार्थं मत्प्रीत्यर्थं तथैव च ॥ १४३ ॥
एवमुक्तः प्रत्युवाच त्र्यम्बकं वरदं प्रभुम् ।
राम उवाच— का शक्तिर्मम देवेश अकृतास्त्रस्य संयुगे ॥ १४४ ॥
निहन्तुं दानवान्सर्वान्कृतास्त्रान्युद्धदुर्मदान् ।
महेश्वर उवाच— गच्छ त्वं मदनुज्ञातो निहनिष्यसि शात्रवान् ॥ १४५ ॥
विजित्य च रिपून्सर्वान्गुणान्प्राप्स्यसि पुष्कलान् ।
एतच्छ्रुत्वा तु वचनं प्रतिगृह्य च सर्वशः ॥ १४६ ॥
रामः कृतस्वस्त्ययनः प्रययौ दानवान्प्रति ।
अभ्यधावद्दैवगत्यूंस्तान्महादर्पबलान्वितान् ॥ १४७ ॥
मम युद्धं प्रयच्छध्वं दैत्या युद्धमदोत्कटाः ।
प्रेषितो देवदेवेन वो विजेतुं महासुराः ॥ १४८ ॥
इत्युक्ता भार्गवेणाथ दैत्या युद्धं प्रचक्रमुः ।
स तान्निहत्य समरे दैत्यान्भार्गवनन्दनः ॥ १४९ ॥
वज्राशनिसमस्पर्शैः प्रहारैरेव भार्गवः ।

कीजिये ॥ (१३९-१४१)

तब शिवने प्रतिज्ञा की, कि हम तुम्हारे शत्रुओंका नाश करेंगे। अनन्तर परशुरामसे कहा, हे भार्गव! तुम देवतोंके शत्रुओंको मारो, इनके मारनेसे जगत्की और हमारी प्रसन्नता होगी ॥ शिवके वचन सुन परशुराम त्रिनेत्रधारी शिवजीसे बोले, हे वरदायक देवराज! विना अस्त्र जाने हमारी क्या शक्ति है जो हम महा शस्त्रधारी दानवोंसे युद्ध करने जायंगे। (१४२-१४५)

शिवजी बोले, हे परशुराम! तुम हमारी आज्ञासे युद्ध करने जाओ, तुम सब दानवोंका नाश कर सकेंगे इससे तुम्हें बहुत गुण प्राप्त होंगे। शिवके ऐसे वचन सुन परशुरामने स्वीकार किया ॥ अनन्तर स्वस्तिवाचन कराकर परशुराम युद्ध करनेको चले, और दानवोंसे बोले, हे अभिमानसे भरे हुए मतवाले दानवो! तुम लोग हमारे सङ्गमें युद्ध करो, हमें तुम लोगोंको जीतनेके लिये भगवान् शिवने भेजा है। १४५-१४८

उनके ऐसे वचन सुन दैत्य युद्ध करने लगे ॥ तब उन सबको युद्धमें मारकर भृगुकुलश्रेष्ठ परशुरामने उन सबको अपने वज्रके समान बाणोंसे मार

शतं ग्रामवरांश्चैव दद्यामर्जुनदर्शिने ।
तथा तस्मै पुनर्दद्यां श्वेतमश्वतरीरथम् ॥ ५ ॥
युक्तमञ्जनकेशीभिर्यो मे ब्रूयाद्धनञ्जयम् ।
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ ६ ॥
अन्यं वास्मै पुनर्दद्यां सौवर्णं हस्तिषड्गवम् ।
तथाप्यस्मै पुनर्दद्यां स्त्रीणां शतमलंकृतम् ॥ ७ ॥
श्यामानां निष्ककण्ठीनां गीतवाद्यविपश्चिताम् ।
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ ८ ॥
तस्मै दद्यां शतं नागाञ्शतं ग्रामाञ्शतं रथान् ।
सुवर्णस्य च मुख्यस्य हयाञ्ज्याणां शतं शतान् ॥ ९ ॥
ऋद्धया गुणैः सुदान्तांश्च धुर्यवाहान्सुशिक्षितान् ।
तथा सुवर्णशृङ्गीणां गोधेनूनां चतुःशतम् ॥ १० ॥
दद्यां तस्मै सवत्सानां यो मे ब्रूयाद्धनञ्जयम् ।
न चेत्तदभिमन्येत पुरुषोऽर्जुनदर्शिवान् ॥ ११ ॥
अन्यदस्मै वरं दद्यां श्वेतान्पञ्चशतान्हयान् ।
हेमभाण्डपरिच्छन्नान्सुमृष्टमणिभूषणान् ॥ १२ ॥
सुदान्तानपि चैवाहं दद्यामष्टादशापरान् ।
रथं च शुभ्रं सौवर्णं दद्यां तस्मै स्वलंकृतम् ॥ १३ ॥

उसपर भी वह प्रसन्न न हो, तो कांस्य-की दौहनी सहित सौ गौ दूंगा ॥ (१-४)

यदि इससे भी वह प्रसन्न न हो तो सौ गांव और अंजनके समान केशवाली खचरिओंका सफेद रथ दूंगा ॥ यदि अर्जुनको दिखानेवाला मनुष्य इसपर भी न प्रसन्न हो, तो उसे मै हाथीके समान छः बैलवाला छकडा सोनेसे भर-कर दूंगा और आभूषण पहने सौ स्त्री दूंगा ॥ (५—७)

अर्जुनको दिखलानेवाले मनुष्यको नाचने गानेमें निपुण कण्ठमें सोनेका आभूषण धारण किये श्यामवर्णकी सोलह वर्षकी अनेक स्त्री दूंगा । सौ हाथी, सौ ग्राम, सौ रथ और सुवर्ण भूषित सौ घोडे दूंगा ॥ वे घोडे ऋद्धि और गुणसे भरे, सुशिक्षित और रथ ले चलनेमें समर्थ होंगे । अर्जुनके दिखलानेवालेको चार सौ सुवर्ण शृङ्गवाली सवत्स गायें दूंगा ॥ यदि इसपर भी प्रसन्न न हो तो सुन्दर रत्न और सुवर्णसे भूषित पांच सौ सफेद घोडे दूंगा ॥ (८—१२)

नापि सूतकुले जातं कर्ण मन्ये कथञ्चन ॥ १५८ ॥
देवपुत्रसहं मन्ये क्षत्रियाणां कुलोद्भवम् ।
विसृष्टमवबोधार्थं कुलस्येति मातिर्मम ॥ १५९ ॥
सर्वथा न ह्ययं शल्य कर्णः सूतकुलोद्भवः ।
सकुण्डलं सकवचं दीर्घबाहुं महारथम् ॥ १६० ॥
कथमादित्यसदृशं भृगौ व्याघ्रं जनिष्यति ।
यथा ह्यस्य भुजौ पीनौ नागराजकरोपमौ ॥ १६१ ॥
वक्षः पश्य विशालं च सर्वशत्रुनिबर्हणम ।
नत्वेष प्राकृतः काश्चित्कर्णो वैकर्त्तनो वृषः ॥ १६२ ॥
महात्मा ह्येष राजेन्द्र रामशिष्यः प्रतापवान् ॥१६३॥ [१६०४]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि त्रिपुरवधोपाख्याने चतुस्त्रिंशोऽध्यायः॥४३॥

दुर्योधन उवाच- एवं स भगवान्देवः सर्वलोकपितामहः ।
सारथ्यमकरोत्तत्र ब्रह्मा रुद्रोऽभवद्रथी ॥ १ ॥
रथिनोऽप्यधिको वीर कर्त्तव्यो रथसारथिः ।
तस्मात्त्वं पुरुषव्याघ्र नियच्छ तुरगान्युधि ॥ २ ॥
यथा देवगणैस्तत्र वृत्तो यत्नात्पितामहः ।
तथास्माभिर्भवान्यत्नात्कर्णादभ्यधिको वृतः ॥ ३ ॥

जब कर्णमें कोई दोष होता तो भृगु-नन्दन परशुराम उसे शस्त्रास्त्र नहीं देते। इससे हम कर्णको सूतपुत्रभी नहीं मानते। हमें यह निश्चय है, कि कर्ण हमारे शत्रु-ओंके मारनेके लिये क्षत्रियोंके कुलमें देवताके वीर्यसे उत्पन्न हुए है। हे शल्य! महाबाहु महारथ कर्ण कवच और कुण्ड-लसहित उत्पन्न हुए, इससे ये कदापि सूतपुत्र नहीं है ॥ (१५८-१६०)

देखिये कर्णके हाथ मतवाले हाथीके सूंडके समान है। सूर्यके समान तेजस्वी सिंहपुत्रको हरिणी कैसे उत्पन्न कर सक्ती है? देखो शत्रुनाशन कर्णकी छाती कितनी ऊंची है! हे राजेन्द्र! प्रतापी कर्ण साधारण मनुष्य नहीं है। ये परशुरामके शिष्य और महा प्रतापी है॥ (१६१-१६३) [१६०४]

कर्णपर्वमें पैंतीस अध्याय समाप्त।

कर्णपर्वमें छत्तीस अध्याय।

दुर्योधन बोले, इस प्रकार भगवान् सर्वलोककर्त्ता ब्रह्माने शिवके घोडे हांके थे, और शिवने अधिक गुणवाले ब्रह्माको अपना सारथी बनाया था। वैसे ही हम लोगोंने आपको कर्णसे

दध्मौ सागरसम्भूतं सुस्वरं शङ्खमुत्तमम् ॥ २२ ॥
ता वाचः सूतपुत्रस्य तथा युक्ता निशम्य तु।
दुर्योधनो महाराज संहृष्टः सानुगोऽभवत् ॥ २३ ॥
ततो दुन्दुभिनिर्घोषो मृदङ्गानां च सर्वशः।
सिंहनादः सवादित्रः कुञ्जराणां च निःस्वनः ॥२४॥
प्रादुरासीत्तदा राजन्सैन्येषु पुरुषर्षभ।
योधानां सम्प्रहृष्टानां तथा समभवत्स्वनः ॥ २५ ॥
तथा प्रहृष्टे सैन्ये तु प्लवमानं महारथम्।
विकत्थमानं च तदा राधेयमरिकर्षणम्॥
मद्रराजः प्रहस्येदं वचनं प्रत्यभाषत ॥ २६ ॥ [१७५६]

इति श्रीमद्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कर्णावलेपेऽष्टत्रिंशोऽध्यायः॥ ३८ ॥

शल्य उवाच— मा सूतपुत्र दानेन सौवर्णं हस्तिषड्गवम्।
प्रयच्छ पुरुषायाद्य द्रक्ष्यसि त्वं धनञ्जयम् ॥ १ ॥
बाल्यादिह त्वं त्यजसि वसु वैश्रवणो यथा।
अयत्नेनैव राधेय द्रष्टास्यद्य धनञ्जयम् ॥ २ ॥
परान्सृजसि यद्वित्तं किञ्चित्त्वं बहु मूढवत्।
अपात्रदाने ये दोषास्तान्मोहान्नावबुध्यसे ॥ ३ ॥

इत्यादि ॥ (१७-२१)

ऐसे वचन कहकर कर्णने समुद्रसे उत्पन्न हुआ उत्तम शब्दवाला शङ्ख बजाया ॥ (२२)

हे महाराज! कर्णके सब वचन सुन दुर्योधन अपने भाईयोंके साथ बहुत प्रसन्न हुए। तब नगाडे, मृदङ्ग और अनेक भेर बजने लगे; हाथी घोडे और वीर गर्जने लगे ॥ महाराज पुरुषसिंह! तब सब वीर प्रसन्न होकर गर्जने लगे ॥ जब इसप्रकार सेना प्रसन्न हुई और शत्रु नाशन कर्ण गर्जने लगे, तब मद्रराज शल्य हंसकर कर्णसे बोले॥ (२३-२६)

कर्णपर्वमें अडतीस अध्याय समाप्त। [१७५६]

कर्णपर्वमें उनतालिस अध्याय।

हे सूतपुत्र! तुम काहेको बैल, छकडे और हाथी दान करोगे? अर्जुन आप ही तुम्हारे पास आ जावेंगे ॥ हे राधापुत्र! तुम तो जन्महीसे कुबेरके समान दानी हो, परन्तु अब तुम बिना दानके ही अर्जुनको देख लोगे॥ तुम जो मूर्खके समान बातें कर रहेहो, सो अपात्रदानमें

प्रत्युवाच महाबाहुरदीनात्मा सुतस्तव ।
मावमंस्था महाबाहो कर्ण वैकर्त्तनं रणे ॥ १३ ॥
सर्वशस्त्रभृतां श्रेष्ठं सर्वशास्त्रार्थपारगम् ।
यस्य ज्यातलनिर्घोषं श्रुत्वा भयकरं महत् ॥ १४ ॥
पाण्डवेयानि सैन्यानि विद्रवन्ति दिशो दश ।
प्रत्यक्षं ते महाबाहो यथा रात्रौ घटोत्कचः ॥ १५ ॥
मायाशतानि कुर्वाणो हतो मायापुरस्कृतः ।
न चातिष्ठत बीभत्सुः प्रत्यनीके कथञ्चन ॥ १६ ॥
एतांश्च दिवसान्सर्वान्भयेन महताबृतः ।
भीमसेनश्च बलवान्धनुष्कोट्याभिचोदितः ॥ १७ ॥
उक्तश्च संज्ञया राजन्मूढ औदरिको यथा ।
माद्रीपुत्रौ तथा शूरौ येन जित्वा महारणे ॥ १८ ॥
कमप्यर्थं पुरुस्कृत्य न हतौ युधि मारिष ।
येन वृष्णिप्रवीरस्तु सात्यकिः सात्वतां वरः ॥ १९ ॥
निर्जित्य समरे शूरो विरथश्च बलात्कृतः ।
सृञ्जयाश्चेतरे सर्वे धृष्टद्युम्नपुरोगमाः ॥ २० ॥

सञ्जय बोले, हे शत्रुनाशन ! ऐसे वचन सुन महा पराक्रमी दुर्योधन बोले, हे महाबाहो ! आप युद्धमें कर्णका निरादर न कीजियेगा, क्योंकि कर्ण सब शस्त्रधारियोंमें श्रेष्ठ और शास्त्रको जानने वाले है । जिसके धनुषके घोर शब्दको सुनकर पाण्डवोंकी सेना चारों ओर को भागने लगती है । हे महाबाहो ! देखो उस दिन रात्रिके युद्धमें घटोत्कच किस प्रकार भागा था, उसने सैकडों माया करी, तोभी कर्णने अनेक माया प्रगट कर उसे मारा है ॥ (१३—१६)

अर्जुन भी कर्णसे युद्ध नहीं कर सक्ते, अर्जुन इनसे सदा डरते है । भीमसेनको जीत कर इन्होंने धनुषके कोनेसे पकड लिया था और मूढ और औदरिक कहके उनका अपमान किया था । हे राजेन्द्र ! इन्होंने महारथी नकुल और सहदेवको दरिद्रके समान जीत लिया था और किसी विशेष कारणसे उन्हें जीता छोड दिया था ! इन्होंने यदुकुलश्रेष्ठ महापराक्रमी सात्यकिको जीतकर रथ हीन कर दिया था । इन्होंने महारथ धृष्टद्युम्नका रथ काट दिया था, और उनके सहित सब सृञ्जयवंशी क्षत्रियोंको जीत लिया था । इन्होंने सबको युद्धमें

त्वं तु मित्रमुखः शत्रुर्मा भीषयितुमिच्छासि ॥ ११ ॥
न मामस्मादभिप्रायात्काश्चिदद्य निवर्तयेत् ।
अपीन्द्रो वज्रमुद्यम्य किमु मर्त्यः कथञ्चन ॥ १२ ॥
सञ्जय उवाच— इति कर्णस्य वाक्यान्ते शल्यः प्राहोत्तरं वचः ।
चुकोपयिषुरत्यर्थं कर्ण मद्रेश्वरः पुनः ॥ १३ ॥
यदा वै त्वां फाल्गुनवेगयुक्ता ज्याचोदिता हस्तवता विसृष्टाः ।
अन्वेतारः कङ्कपत्त्राः शिताग्रास्तदा तप्स्यस्यर्जुनस्यानुयोगात् ॥ १४ ॥
यदा दिव्यं धनुरादाय पार्थः प्रतापयन्पृतनां सव्यसाची ।
त्वां मर्दयिष्यन्निशितैः पृषत्कैस्तदा पश्चात्तप्स्यसे सूतपुत्र॥ १५ ॥
बालश्चन्द्रं मातुरङ्के शयानो यथा काश्चित्प्रार्थयतेऽपहर्तुम् ।
तद्वन्मोहाद् द्योतमानं रथस्थं सम्प्रार्थयस्यर्जुनं जेतुमद्य ॥ १६ ॥
त्रिशूलमाश्रित्य सुतीक्ष्णधारं सर्वाणि गात्राणि विघर्षसि त्वम् ।
सुतीक्ष्णधारोपमकर्मणा त्वं युयुत्ससे योऽर्जुनेनाद्य कर्ण ॥ १७ ॥
क्रुद्धं सिंहं केसरिणं बृहन्तं बालो मूढः क्षुद्रमृगस्तरस्वी ।
समाह्वयेत्तद्वदेतत्तवाद्य समाह्वानं सूतपुत्रार्जुनस्य ॥ १८ ॥

बलसे अर्जुनसे युद्ध करना चाहते हैं। तुम भीतरसे शत्रु और ऊपरसे मित्र होकर हमें डराना चाहते हो ॥ ऐसी ऐसी बातें कहकर साक्षात् वज्रधारी इन्द्र भी हमें नहीं लौटा सकते, फिर मनुष्यकी तो सामर्थ ही क्या है ? (११-१२)

सञ्जय बोले, हे राजन्! कर्णके वचन सुन मद्रराज शल्य कर्णको बहुत कोप-युक्त करनेके लिये बोले, हे कर्ण ! जिस समय महाबाहु अर्जुनके धनुषसे छूटे हुए अति शीघ्र चलानेवाले तीक्ष्ण, कंक पत्र युक्त बाण तुम्हारी ओर चलेंगे, तब तुम अर्जुनके मिलापसे पश्चात्ताप करने लगोगे ॥ हे सूतपुत्र ! जिस समय दिव्य धनुष धारण करके अर्जुन तुम्हें तेज बाणोंसे मारेंगे, तब तुम पछताओगे॥ जैसे कोई माताकी गोदमें सोया बालक चन्द्रमाके प्राप्त करनेकी इच्छा करता है, तैसेही तुम रथमें बैठनेवाले,तेजस्वी अर्जुन के मारनेकी इच्छा करते हो॥ १३-१६

हे कर्ण ! तुम जो तीक्ष्ण धारवाले शस्त्रके समान पराक्रमी अर्जुनसे युद्ध की इच्छा करते हो वह तेरा कर्म तीक्ष्ण धारवाले त्रिशूलसे अपने देहका घर्षण करनेके समान भयंकर है ॥ हे सूतपुत्र कर्ण ! हिरनका मूर्ख बच्चा जैसे केसर युक्त महापराक्रमी सिंहको युद्ध करनेके लिये बुलावे, तैसे ही तू भी बलवान्

एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः ।
युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे ॥ २९ ॥
समयश्च हि मे वीर काश्चिद्वैकर्तनं प्रति ।
उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य सन्निधौ ॥ ३० ॥
सञ्जय उवाच— तथेति राजन्पुत्रस्ते सह कर्णेन मारिष ।
अब्रवीन्मद्रराजानं सर्वक्षत्रस्य सन्निधौ ॥ ३१ ॥
सारथ्यस्याभ्युपगमाच्छल्येनाश्वासितस्तदा ।
दुर्योधनस्तदा हृष्टः कर्णं तमभिपस्वजे ॥ ३२ ॥
अब्रवीच्च पुनः कर्ण स्तूयमानः सुतस्तव ।
जहि पार्थान्रणे सर्वान्महेन्द्रो दानवानिव ॥ ३३ ॥
स शल्येनाभ्युपगते हयानां संनियच्छने ।
कर्णो हृष्टमना भूयो दुर्योधनमभाषत ॥ ३४ ॥
नातिहृष्टमना ह्येष मद्रराजोऽभिभाषते ।
राजन्मधुरया वाचा पुनरेनं ब्रवीहि वै ॥ ३५ ॥
ततो राजा महाप्राज्ञः सर्वास्त्रकुशलो बली ।
दुर्योधनोऽब्रवीच्छल्यं मद्रराजं महीपतिम् ॥ ३६ ॥
पूरयन्निव घोषेण मेघगम्भीरया गिरा ।

ऊपर प्रसन्न है ॥ हे वीर ! अब हम तेरी इच्छाके अनुसार अर्जुनसे युद्ध करते हुए महात्मा राधापुत्रके सारथी बनते है; परन्तु हम कर्णसे एक प्रतिज्ञा करा-ना चाहते है। हमारी जो इच्छा होगी सो हम इन्हें कहेंगे ॥ (२८-३०)

सञ्जय बोले, हे महाराज ! शल्यके ऐसे वचन सुन कर्णके सहित दुर्योधनने सब क्षत्रियोंके समीप उनके वचनका स्वीकार किया । शल्यके द्वारा सारथ्यका स्वीकार होनेपर दुर्योधन बहुत प्रसन्न हुए और कर्णसे मिले, फिर कर्णकी प्रशंसा करके बोले, जैसे इन्द्र दानवोंको जीतते है, ऐसे ही तुम सब पाण्डवोंको जीतो ॥ (३१—३३)

कर्ण यह सुनकर कि शल्य हमारे सारथी बनेंगे, बहुत प्रसन्न हुए और दुर्योधनसे बोले, हे राजन् ! शल्य प्रसन्न होकर नहीं बोलते, इस लिये आप उन्हें मीठी वाणीसे फिर प्रसन्न कीजिये ॥ तब सब अस्त्रोंके जाननेवाले बुद्धिमान महा पराक्रमी राजा दुर्योधन मद्रराज शल्यसे बोले ॥ (३४—३६)

राजा दुर्योधन मेघके समान गम्भीर

कामतोयप्रदं लोके नरपर्जन्यसर्जुनम् ॥ २६ ॥
यथा च स्वगृहस्थः श्वा व्याघ्रं वनगतं भषेत्।
तथा त्वं भषसे कर्ण नरव्याघ्रं धनञ्जयम् ॥ २७ ॥
शृगालोऽपि वने कर्ण शशैः परिवृतो वसन्।
मन्यते सिंहमात्मानं यावत्सिंहं न पश्यति ॥ २८ ॥
तथा त्वमपि राधेय सिंहमात्मानमिच्छसि।
अपश्यञ्शत्रुदमनं नरव्याघ्रं धनञ्जयम् ॥ २९ ॥
व्याघ्रं त्वं मन्यसेऽऽत्मानं यावत्कृष्णौ न पश्यसि।
समास्थितावेकरथे सूर्याचन्द्रमसाविव ॥ ३० ॥
यावद्गाण्डीवघोषं त्वं न शृणोषि महाहवे।
तावदेव त्वया कर्ण शक्यं वक्तुं यथेच्छसि ॥ ३१ ॥
रथशब्दधनुःशब्दैर्नादयन्तं दिशो दश।
नर्दन्तमिव शार्दूलं दृष्ट्वा क्रोष्टा भविष्यसि ॥ ३२ ॥
नित्यमेव शृगालस्त्वं नित्यं सिंहो धनञ्जयः।
वीरप्रद्वेषणान्मूढ तस्मात्क्रोष्टेव लक्ष्यसे ॥ ३३ ॥
यथाखुः स्याद्विडालश्च श्वा व्याघ्रश्च बलाबले।
यथा शृगालः सिंहश्च यथा च शशकुञ्जरौ ॥ ३४ ॥

समान युद्ध करनेके लिये बुलाता है ॥ (२४—२६)

जैसे घरमें बैठा कुत्ता शेरकी ओर भोंकता है, तैसे ही तू पुरुषसिंह अर्जुनको युद्ध करनेको पुकारता है ॥ जैसे सिंहको विना देखे वनमें बैठा स्यार खरगोशोंके बीचमें सिंह बनता है, तैसे ही तुम कौरवोंके बीचमें गर्ज रहे हो। हे राधापुत्र ! इसी प्रकारसे तुम भी पुरुषसिंह अर्जुनको विना देखे सिंह बन गये हो, तुम तभी तक सिंह बन रहे हो, कि जबतक एक रथपर बैठे हुए सूर्य और चन्द्रमाके समान कृष्ण और अर्जुनको नहीं देखते ॥ (२७—३०)

जबतक तुम गाण्डीवका शब्द नहीं सुनते, तबतक जो इच्छा हो सो बको ॥ अभी तो तुम सिंह बन रहे हो, पर धनुष और रथका शब्द करते हुए अर्जुनको देखते ही स्यार होजाओगे ॥ हे मूर्ख ! तू मदाका स्यार अर्जुन सदा सिंह है ॥ इसी लिये तू मुझे स्यार समान दीख पडता है ॥ बलमें जैसे मूंसा और बिलार, कुत्ता और शेर, जैसे स्यार और सिंह; खरगोश और मतवाला हाथी;

शल्य उवाच— आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः ।
अनाचरितमार्याणां वृत्तमेतच्चतुर्विधम् ॥ ४५ ॥
यत्तु विद्वन्प्रवक्ष्यामि प्रत्ययार्थमहं तव ।
आत्मनः स्तवसंयुक्तं तन्निबोध यथातथम् ॥ ४६ ॥
अहं शक्रस्य सारथ्ये योग्यो मातलिवत्प्रभो ।
अप्रमादात्प्रयोगाच्च ज्ञानविद्याचिकित्सनैः ॥ ४७ ॥
ततः पार्थेन संग्रामे युध्यमानस्य तेऽनघ ।
वाहयिष्यामि तुरगान्विद्धि वरो भव सूतज ॥ ४८ ॥ [१६५२]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि
शल्यसारथ्यस्वीकारे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

दुर्योधन उवाच- अयं ते कर्ण सारथ्यं मद्रराजः करिष्यति ।
कृष्णाद्भ्यधिको यन्ता देवेशस्येव मातलिः ॥ १ ॥
यथा हरिहयैर्युक्तं संगृह्णाति स मातलिः ।
शल्यस्तथा तवाद्यायं संयन्ता रथवाजिनाम् ॥ २ ॥
योधे त्वयि रथस्थे च मद्रराजे च सारथौ ।
गतासुरिव निश्चेताः शल्यस्याभिमुखोऽपतत् ।
राजापि भूयो नाजघ्ने कर्ण पार्थहितेप्सया ॥ २२ ॥
ततो हाहाकृतं सर्वं धार्तराष्ट्रबलं महत् ।
विवर्णमुखमभवद्दृष्ट्वा कर्णं तथागतम् ॥ २३ ॥
सिंहनादश्च सञ्जज्ञे क्ष्वेलाः किलकिलास्तथा ।

लगनेसे महाराज युधिष्ठिरको ऐसा क्रोध चढा जैसे अग्निमें घी डालने पर अग्नि बढती है ॥ क्रोध चढे महाराजका स्वरूप ऐसा दीखने लगा, मानो जगत् का नाश करनेके लिये प्रलय कालके संवर्तक अग्निने देह धारण किया है ॥ १६-१७

तब महाराज युधिष्ठिरने अपने भारी धनुष पर टङ्कार देकर ऐसा घोर बाण चढाया जिसने पर्वतों को भी काट सके ॥ तब महाराजने कर्णको मारनेके लिये उस बाणको चढाते समय बाणको खींचा तो धनुषके बीचका भाग मण्डलाकार होगया ॥ १८ ॥ तब महाराजने कर्णको मारनेकी इच्छासे यमदण्डके समान भयङ्कर बाण छोडा ॥ १९ ॥ वह बाण वज्र और अशनिके समान शब्द करता हुआ बडे वेगसे कर्णके बायें पार्श्वमें महारथ कर्णको लगा ॥ २० ॥ उस बाणके लगनेसे कर्ण अत्यन्त पीडित होकर मूर्छित होगया, उसके शरीरके सब अङ्ग ढीले पड गये, धनुष हाथसे छूट गया और वह मूर्छा खाकर रथसे गिर गया, उस समय कर्णकी ऐसी दशा हो गई, मानो प्राण निकल गया ॥ परन्तु महाराजने अर्जुनकी प्रतिज्ञा पूरी होनेके लिये कर्णको नहीं मारा ॥ १८-२२

कर्णको मरा हुआ जान तुम्हारे पुत्र और सेनाके सब वीर हाहाकार करने लगे, और कर्णको ऐसी दशामें देखकर दुर्योधनकी सेनाके

न्यहनत्पाण्डवो युद्धे तापयंस्तव वाहिनीम् ॥ ५० ॥
प्रताप्यमानं सूर्येण भीमेन च महात्मना।
तव सैन्यं संचुकोच चर्माग्नावाहितं यथा ॥ ५१ ॥
ते भीमभयसन्त्रस्तास्तावका भरतर्षभ।
विहाय समरे भीमं दुद्रुवुर्वै दिशो दश ॥ ५२ ॥
रथाः पञ्चशताश्चान्ये हादिनश्चर्मवर्मिणः।
भीममभ्यद्रवन्घ्नन्तः शरपूगैः समन्ततः ॥ ५३ ॥
तान्स पञ्चशतान्वीरान्सपताकध्वजायुधान्।
पोथयामास गदया भीमो विष्णुरिवासुरान् ॥ ५४ ॥
ततः शकुनिनिर्दिष्टाः सादिनः शूरसम्मताः।
त्रिसाहस्राऽभ्ययुर्भीमं शक्त्यृष्टिप्रासपाणयः ॥ ५५ ॥
प्रत्युद्गम्य जवेनाशु साश्वारोहांस्तदारिहा।
विविधान्विचरन्मार्गान्गदया समपोथयत् ॥ ५६ ॥
तेषामासन्महाञ्छब्दस्ताडितानां च सर्वशः।
अश्मभिर्विध्यमानानां नगानामिव भारत ॥ ५७ ॥
एवं सुबलपुत्रस्य त्रिसाहस्रान्हयोत्तमान्।

के सहित सौ रथ और सैकडो पैदलोंका नाश किया। तब तुम्हारी सेना बहुत डरने लगी ॥ जैसे अग्निमें पडनेसे चमडा जलता है, तैसेही भीमसेन और सूर्यके तेजसे तुम्हारी सेना जलने लगी ॥ (४९-४१)

हे भरतकुलसिंह! अनन्तर तुम्हारी सेना भीमसेनके भयसे सब ओरको भागने लगी ॥ अनन्तर पांच सौ चर्म वेष्टित घोर शब्दवाले रथ और अनेक वीर बाण चलाते हुए भीमसेनकी ओर दौडे। जैसे विष्णु दानवोंको मारते हैं तैसे ही भीमसेनने अपनी गदासे उन पांच सौ रथियोंको पताका, ध्वजा और आयुधोंके सहित मारडाला ॥ (५२-५४)

अनन्तर शकुनिकी आज्ञासे शक्ति, और भाले लिये तीन सहस्र घुडचढे वीर भीमसेनकी ओर दौडे, अनन्तर शत्रु नाशन भीमसेन भी उनपर दौडे, और अनेक प्रकारकी गतियोंसे संचार करके उनको मारने लगे ॥ हे भारत! जैसे पहाडोंपर पत्थर गिरनेका शब्द होता है तैसे ही इन वीरोंके मरने और गिरनेका शब्द होने लगा ॥ (५५-५७)

इस प्रकार शकुनिके तीन सहस्र घुडचढों को मारडाला, इतने समयमें

सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च ।
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः ॥ ३३ ॥
यमौ च भीमसेनश्च शिशुपालस्य चात्मजः ।
कारूषा मत्स्यशेषाश्च केकयाः काशिकोसलाः ॥ ३४ ॥
एते च त्वरिता वीरा वसुषेणमताडयन् ।
जनमेजयश्च पाञ्चाल्यः कर्ण विव्याध सायकैः॥ ३५ ॥
वाराहकर्णनाराचैर्नालीकैर्निशितैः शरैः ।
वत्सदन्तैर्विपाठैश्च क्षुरप्रैश्चटकामुखैः ॥ ३६ ॥
नानाप्रहरणैश्चोग्रै रथहस्त्यश्वसादिभिः ।
सर्वतोऽभ्यद्रवत्कर्णं परिवार्य जिघांसया ॥ ३७ ॥
स पाण्डवानां प्रवरैः सर्वतः समभिद्रुतः ।
उदीरयन्ब्राह्ममस्त्रं शरैरापूरयन्दिशः ॥ ३८ ॥
ततः शरमहाज्वालो वीर्योष्मा कर्णपावकः ।
निर्दहन्पाण्डववनं वीरः पर्यचरद्रणे ॥ ३९ ॥
स सन्धाय महास्त्राणि महेष्वासो महामनाः ।
प्रहस्य पुरुषेन्द्रस्य शरैश्चिच्छेद कार्मुकम् ॥ ४० ॥

लिये पाण्डवोंकी सेनाके प्रधान वीर क्रोध करके कर्णके ऊपर बाण वर्षाते दौड़े ॥ सात्यकि, चेकितान, युयुत्सु, पाण्ड्य, धृष्टद्युम्न, शिखण्डी और द्रौपदीके पुत्र और प्रभद्रक, नकुल, सहदेव, भीमसेन और शिशुपालका पुत्र सहदेव, कारूष, मत्स्य, केकय, काशी, कोशल आदि सब क्षत्री शीघ्रता करके महाराजके पास पहुंचे और वसुषेणके ऊपर बाण चलाने लगे । (३३-३६)

इस समय पांचाल देशीय जनमेजयने शीघ्र पहुंचकर, वाराहकर्ण नामक बाण कर्णकी ओर चलाने लगे तब दन्त, विपाठ, क्षुरप्र, चटकामुख आदि अनेक प्रकारके शस्त्र हाथी घोड़े और रथोंपर चढ़े वीर कर्णकी ओर चलाने लगे ॥ (३५-३७)

इस प्रकार पाण्डवोंके प्रधान वीरोंसे घिरकर कर्ण भी ब्रह्म अस्त्रको विधिसे अनेक अस्त्र चलाते रहे ॥ तब बाणरूपी ज्वाला और पराक्रम रूपी उष्णतासे युक्त कर्णरूपी अग्नि चारों ओर घूमकर पाण्डव रूपी वनको जलाने लगी ॥ अनन्तर महापराक्रमी महाधनुर्धारी कर्णने हंसकर अनेक प्रकारके दर्पसे महाराजका धनुष काट दिया । (३८-४०)

प्राज्ञासिष्म वयं ते वा शरैर्मुक्तैः सहस्रशः।
मध्याह्ने तपतो राजन्भास्करस्य महाप्रभाः ॥ ६७ ॥
हताः सर्वाः शरौघैस्तैः कर्णपाण्डवयोस्तदा।
सौबलं कृतवर्माणं द्रौणिमाधिरथिं कृपम् ॥ ६८ ॥
संसक्तान्पाण्डवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः।
तेषामापततां शब्दस्तीव्र आसीद्विशाम्पते ॥ ६९ ॥
उद्वृत्तानां यथा वृष्ट्या सागराणां भयावहः।
ते सेने भृशसंसक्ते दृष्ट्वान्योन्यं महाहवे ॥ ७० ॥
हर्षेण महता युक्ते परिगृह्य परस्परम्।
ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे ॥ ७१ ॥
तादृशं न कदाचिद्धि दृष्टपूर्वं न च श्रुतम्।
बलौघस्तु समासाद्य बलौघं सहसा रणे ॥ ७२ ॥
उपासर्पत वेगेन वार्योघ इव सागरम्।
आसीन्निनादः सुमहान्बाणौघानां परस्परम् ॥ ७३ ॥
गर्जतां सागरौघाणां यथा स्यान्निःस्वनो महान्।
ते तु सेने समासाद्य वेगवत्यौ परस्परम् ॥ ७४ ॥

दीखने लगा। उनके धनुषसे छूटे हुए सहस्रों बाणोंसे आकाश ऐसा छागया, कि उससे सूर्यकी प्रभा दिशा और उपादिशा कुछ भी दीख नहीं पडता था। (६४-६७)

हे राजन्! जिस समय दो पहर हुआ तब दोनों ओरके वीरोंके असंख्य बाणोंसे प्रखर सूर्यकी प्रभा छिप गयी। इस मे हमें और पाण्डवोंको कुछभी न दीखा, अर्थात् बाणोंमे अन्धकार होगया। उस समय भीमसेनसे शकुनि कृतवर्मा, अश्वत्थामा और कृपाचार्यको युद्ध करते देख सब कौरव लौटे। हे पृथ्वीनाथ! उन सबके लौटते हुए घोर शब्द होने लगा॥ जैसे वृष्टिसे दो समुद्र बढकर घोर शब्द करते हुए मिलते हैं, ऐसे ही ये दोनों सेना युद्ध करनेको भिडीं, उस दोपहरमें दोनों सेना प्रसन्न होकर युद्ध करने लगीं॥ (६७-७१)

जैसा यह घोर युद्ध हुआ वैसा न कभी देखा न सुना था दोनों सेना समुद्रके समान लडने लगीं। जैसे शब्द करती नदी समुद्रमें जा मिलती है; तैसेही तुम्हारी सेना पाण्डवोंकी सेनामे जा मिली। तब दोनों ओरसे बाणोंका घोर शब्द होने लगा॥ हे पृथ्वीनाथ! जैसे

ततो राज्ञाभ्यनुज्ञाताः पाण्डवानां महारथाः ॥ ६६ ॥
भीमसेनमुखाः सर्वे पुत्रांस्ते प्रत्युपाद्रवन् ।
अभवत्तुमुलः शब्दो योधानां तत्र भारत ॥ ६७ ॥
रथहस्त्यश्वपत्तीनां शस्त्राणां च ततस्ततः ।
उत्तिष्ठत प्रहरत प्रैताभिपततेति च ॥ ६८ ॥
हनि हुवाणा ह्यन्योन्यं जघ्नुर्योधा महारणे ।
अभ्रच्छायेव तत्रासीच्छरवृष्टिभिरम्बरे ॥ ६९ ॥
समावृतैर्नरवरैर्निघ्नद्भिरितरेतरम् ।
विपताकध्वजच्छत्रा व्यश्वसूतायुधा रणे ॥ ७० ॥
व्यङ्गाङ्गावयवाः पेतुः क्षितौ क्षीणाः क्षितीश्वराः ।
प्रवणादिव शैलानां शिखराणि द्विपोत्तमाः ॥ ७१ ॥
सारोहा निहताः पेतुर्वज्राभिन्ना इवाद्रयः ।
छिन्नभिन्नविपर्यस्तैर्वर्मालङ्कारभूषणैः ॥ ७२ ॥
सारोहारतुरगाः पेतुर्हतवीराः सरस्वजः ।
विप्रविद्धायुधाश्चैव विरथाश्च रथैर्हताः ॥ ७३ ॥

सेनाको भागते देख क्रोध करके अपने सब वीरोंसे बोले, ये क्या होरहा है ? मारो मारो उन्हें मारो । महाराजकी आज्ञा सुनते ही भीमसेन आदि महारथ तुम्हारे पुत्रों से युद्ध करने को लौटे । (६२-६७)

हे भारत ! उस समय दोनों ओरसे दौड़ी पड़े, वीर और शस्त्रोंका घोर शब्द होने लगा । इस घोर युद्धमें एक दूसरेसे कहने लगा आओ, इसे चलाओ, युद्ध करो, चारों ओर यही शब्द होता था । वीर गर्जने और लड़ने लगे, उस समय बाण मेघके समान आकाशमें छा गये ॥ (६८-६९)

एक वीर दूसरेको मारने लगा । अनेक राजा, ध्वजा, पताका, छत्र और सारथियोंसे हीन होगये ॥ अनेक राजोंके शरीर कट गए, अनेक मरकर पृथ्वीमें ऐसे गिर गये, जैसे टूटे हुए पर्वतके शिखर नीचले भागमें गिरते हैं ॥ जैसे पर्वत वज्रके लगनेसे गिरते हैं, ऐसे हाथी महावतके सहित होकर गिर गये । जिनका कवच और माला आदि आभूषण टूटकर पृथ्वीमें गिर पड़े हैं, ऐसे घोड़े वीरोंके सहित मरकर पृथ्वीमें गिरे । (७०-७३)

अनेक रथमें बैठे वीर हाथोंके सहित रथोंसे गिर पड़े, अनेक वज्रपातके समान

प्राज्ञासिष्म वयं ते वा शरैर्मुक्तैः सहस्रशः।
मध्याह्ने तपतो राजन्भास्करस्य महाप्रभाः ॥ ६७ ॥
हताः सर्वाः शरौघैस्तैः कर्णपाण्डवयोस्तदा।
सौबलं कृतवर्माणं द्रौणिमाधिरथिं कृपम् ॥ ६८ ॥
संसक्तान्पाण्डवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः।
तेषामापततां शब्दस्तीव्र आसीद्विशाम्पते ॥ ६९ ॥
उद्वृत्तानां यथा वृष्ट्या सागराणां भयावहः।
ते सेने भृशसंसक्ते दृष्ट्वान्योन्यं महाहवे ॥ ७० ॥
हर्षेण महता युक्ते परिगृह्य परस्परम्।
ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे ॥ ७१ ॥
तादृशं न कदाचिद्धि दृष्टपूर्वं न च श्रुतम्।
बलौघस्तु समासाद्य बलौघं सहसा रणे ॥ ७२ ॥
उपासर्पत वेगेन वार्योघ इव सागरम्।
आसीन्निनादः सुमहान्बाणौघानां परस्परम् ॥ ७३ ॥
गर्जतां सागरौघाणां यथा स्यान्निःस्वनो महान्।
ते तु सेने समासाद्य वेगवत्यौ परस्परम् ॥ ७४ ॥

दीखने लगा। उनके धनुषसे छूटे हुए सहस्रों बाणोंसे आकाश ऐसा छागया, कि उससे सूर्यकी प्रभा दिशा और उपादिशा कुछ भी दीख नहीं पडता था। (६४-६७)

हे राजन्! जिस समय दो पहर हुआ तब दोनों ओरके वीरोंके असंख्य बाणोंसे प्रखर सूर्यकी प्रभा छिप गयी। इस मे हमें और पाण्डवोंको कुछभी न दीखा, अर्थात् बाणोंमे अन्धकार होगया। उस समय भीमसेनसे शकुनि कृतवर्मा, अश्वत्थामा और कृपाचार्यको युद्ध करते देख सब कौरव लौटे। हे पृथ्वीनाथ! उन सबके लौटते हुए घोर शब्द होने लगा॥ जैसे वृष्टिमे दो समुद्र बढकर घोर शब्द करते हुए मिलते हैं, ऐसे ही ये दोनों सेना युद्ध करनेको भिडीं, उस दोपहरमें दोनों सेना प्रसन्न होकर युद्ध करने लगीं॥ (६७-७१)

जैसा यह घोर युद्ध हुआ वैसा न कभी देखा न सुना था दोनों सेना समुद्रके समान लडने लगीं। जैसे शब्द करती नदी समुद्रमें जा मिलती है;तैसेही तुम्हारी सेना पाण्डवोंकी सेनासे जा मिली। तब दोनों ओरसे बाणोंका घोर शब्द होने लगा॥ हे पृथ्वीनाथ! जैसे

गजाश्वनरदेहान्सा व्युवाह पतितान्बहून् ॥ ८२ ॥
नराश्वगजसम्बाधे नराश्वगजसादिनाम् ।
लोहितोदा महाघोरा मांसशोणितकर्दमा ॥ ८३ ॥
नराश्वगजदेहानां वहन्ती भीरुभीषणा ।
तस्याः पारमपारं च व्रजन्ति विजयैषिणः ॥ ८४ ॥
गाधेन चोत्प्लवन्तश्च निमज्ज्योन्मज्ज्य चापरे ।
ते तु लोहितदिग्धाङ्गा रक्तवर्मायुधाम्बराः ॥ ८५ ॥
सस्नुस्तस्यां प्लुश्चार्यां मम्लुश्च भरतर्षभ ।
रथानश्वान्नरान्नागानायुधाभरणानि च ॥ ८६ ॥
वसनान्यथ वर्माणि वध्यमानान्हतानपि ।
भूमिं खं द्यां दिशश्चैव प्रायः पश्याम लोहितम्॥ ८७ ॥
लोहितस्य तु गन्धेन स्पर्शेन च रसेन च ।
रूपेण चातिरक्तेन शब्देन च विसर्पता ॥ ८८ ॥
विषादः सुमहानासीत्प्रायः सैन्यस्य भारत ।
तत्तु विप्रहतं सैन्यं भीमसेनमुखास्तदा ॥ ८९ ॥
भूयः समाद्रवन्वीराः सात्यकिप्रमुखास्तदा ।
तेषामापततां वेगमविषह्यं निरीक्ष्य च ॥ ९० ॥
पुत्राणां ते महासैन्यमासीद्राजन्पराङ्मुखम् ।

पोंके और मनुष्योंके शरीर गहने लगे ॥ (७९—८६)

दोनों तटपर हाथी, घोड़े और मनुष्योंके मांसका कीचड़ होगया । उसके दोनों तटपर खड़े होकर विजयकी इच्छा से अनेक क्षत्रियोंको मारकर बहाने लगे। अनेक वीर तिरने लगे, अनेक डूबने लगे । उस नदीमें जानेसे वीरोंके कपड़े सबके और सब लाल होगये। अनेक वीर उसमें स्नान करने लगे । कोई जलपान करने लगे और कोई उसे देखकर सिंह होगये । उस समय हमने रथ, अश्व, नर, हाथी, आयुध, आभरण, वस्त्र, शस्त्र, कवच मारेजानेवाले और मृत पुरुष तथा भूमि, आकाश तारे और दशों दिशा लाल ही लाल देखीं । (८३--८७)

हे भारत ! वहां रुधिरके शब्द, गन्ध, स्पर्श, रूप और रससे दोनों सेना घबड़ाने लगीं । उस समय सात्यकि, भीमसेन और धृष्टद्युम्न आदि वीर तुम्हारी सेनाकी ओर लौटे । (८८—९०)

हे राजन् ! उस समय न सहने योग्य

गदानां परिघाणां च कणपानां च क्षिप्यताम् ।
प्रासानां भिन्दिपालानां भुशुण्डीनां च सर्वशः ॥ ३ ॥
सम्पातं चानुपश्याम संग्रामे भृशदारुणे ।
शलभा इव सम्पेतुः शरवृष्टयः समन्ततः ॥ ४ ॥
नागान्नागाः समासाद्य व्यधमन्त परस्परम् ।
हया हयांश्च समरे रथिनो रथिनस्तथा ॥ ५ ॥
पत्तयः पत्तिसङ्घांश्च हयसङ्घांश्च पत्तयः ।
पत्तयो रथमातङ्गान्रथा हस्त्यश्वमेव च ॥ ६ ॥
नागाश्च समरे व्यङ्गं ममृदुः शीघ्रगा नृप ।
वध्यतां तत्र शूराणां क्रोशतां च परस्परम् ॥ ७ ॥
घोरमायोधनं जज्ञे पशूनां वैशसं यथा ।
रुधिरेण समास्तीर्णा भाति भारत मेदिनी ॥ ८ ॥
शक्रगोपगणाकीर्णा प्रावृषीव यथा धरा ।
यथा वा वाससी शुक्ले महारञ्जनरञ्जिते ॥ ९ ॥
बिभृयाद्युवती श्यामा तद्वदासीद्वसुन्धरा ।
मांसशोणितचित्रेव शातकुम्भमयीव च ॥ १० ॥

और पदातियोंके झुण्ड परस्पर युद्ध करने लगे॥ दोनों ओरसे गदा, परिघ, कृणप, प्रास, भिन्दिपाल और भुशुण्डी चलने लगे ॥ (१-३)

हे राजन्! हमें उस घोर युद्धमें शस्त्रके शिवा और कुछ न सूझा। चारों ओर बाणोंकी वृष्टि टीडीदलके समान दीखने लगी ॥ हाथी हाथीसे, घोडे घोडोंसे, रथी रथीसे और पदाति पदातियोंसे लडने लगे। थोडे समयके पश्चात् हाथीपर चढे वीर पैदलोंसे, पैदल घोडेवालोंसे और घोडेवाले रथियोंसे युद्ध करने गले ॥ (४-६)

हे राजन्! शीघ्र चलनेवाले हाथी अपने दांत, सूंड और पैरोंसे अनेक मनुष्योंको मारने लगे। हे भारत! मरते पुकारते और युद्ध करते हुए वीरोंका घोर शब्द होने लगा, वीरोंने मनुष्योंको पशुओंके समान मार डाला। थोडे समयमें वह पृथ्वी मांस और रुधिरसे भर गई ॥ जैसे वर्षामें पृथ्वी वीरबहुटियोंसे लाल हो जाती है और जैसे वस्त्रको लाल रङ्गसे रङ्ग देते हैं, वैसे ही उस युद्धमें सब लाल होगये। जैसे सोलहवर्षकी स्त्री लाल कपडे पहनकर शोभित होती है; मांस और रुधिरसे

भीमसेनरथं प्राप्य समसज्जन्त वाजिनः ॥ ६ ॥
दृष्ट्वा कर्णं समायान्तं भीमः क्रोधसमन्वितः ।
मतिं चक्रे विनाशाय कर्णस्य भरतर्षभ ॥ ७ ॥
सोऽब्रवीत्सात्यकिं वीरं धृष्टद्युम्नं च पार्षतम् ।
यूयं रक्षत राजानं धर्मात्मानं युधिष्ठिरम ॥ ८ ॥
संशयान्मुक्तो मुक्तं कथञ्चित्प्रेक्षतो मम ।
अग्रतो मे कृतो राजा छिन्नसर्वपरिच्छदः ॥ ९ ॥
दुर्योधनस्य प्रीत्यर्थं राधेयेन दुरात्मना ।
अन्तमद्य गमिष्यामि तस्य दुःखस्य पार्षत ॥ १० ॥
हन्तारमद्य रणे कर्णं स वा मां निहनिष्यति ।
संग्रामेण सुघोरेण सत्यमेतद्ब्रवीमि ते ॥ ११ ॥
राजानमद्य भवतां न्यासभूतं ददानि वै ।
तस्य संरक्षणे सर्वे यतध्वं विगतज्वराः ॥ १२ ॥
एवमुक्त्वा महाबाहुः प्रायाद्राधिरथिं प्रति ।
सिंहनादेन महता सर्वाः सन्नादयन्दिशः ॥ १३ ॥
दृष्ट्वा त्वरितमायान्तं भीमं युद्धाभिनन्दिनम् ।
सूतपुत्रश्चोदयाञ्चक्रे वाहानामीश्वरो विभुः ॥ १४ ॥

शल्य उवाच- पश्य कर्ण महाबाहुं संक्रुद्धं पाण्डुनन्दनम् ।

भीमसेनकी ओर चले ॥ (४—६)

हे भरतकुलसिंह ! कर्णको अपनी ओर आते देख भीमसेनने महा क्रोध किया । और इसके मारनेका विचार करने लगे ॥ अनन्तर उन्होंने महावीर सात्यकि और सेनापति धृष्टद्युम्नसे कहा कि, तुम दोनों महाराज युधिष्ठिरकी रक्षा करो, मैं आज बहुत क्रोध हुआ हूं, आज इसने दुर्योधनके प्रसन्नताके लिये महाराजको बहुत दुःख दिया था । परन्तु [illegible] मैं इसको मार कर इस दुःखके पार जाऊंगा ॥ (७—१०)

आज इस घोर युद्धमें हम कर्णको मारेंगे, या वही हमको मारेगा; अब हम महाराजकी रक्षका भार तुम्हारे ऊपर देते हैं । तुम सब सावधान होकर महाराजकी रक्षा करो । महाबाहु भीमसेन ऐसा कहकर अपने रथमें बैठे हुए शत्रुओंको दलित करते हुए कर्णके पास चले, महाराजकी भीमसेनको अपने ऊपर [illegible] कर्णने देखा ॥ (११—१४)

अपरे प्राद्रवन्नागाः शल्यार्ता व्रणपीडिताः ।
प्रतिमानैश्च कुम्भैश्च पेतुरुर्व्यां महाहवे ॥ १९ ॥
विनेदुः सिंहवच्चान्ये नदन्तो भैरवान्रवान् ।
बभ्रमुर्बहवो राजंश्चुक्रुशुश्चापरे गजाः ॥ २० ॥
हयाश्च निहता बाणैर्हेमभाण्डविभूषिताः ।
निषेदुश्चैव मम्लुश्च बभ्रमुश्च दिशो दश ॥ २१ ॥
अपरे कृष्यमाणाश्च विचेष्टन्तो महीतले ।
भावान्बहुविधांश्चक्रुस्ताडिताः शरतोमरैः ॥ २२ ॥
नरास्तु निहता भूमौ क्रूजन्तस्तत्र मारिष ।
दृष्ट्वा च बान्धवानन्ये पितॄनन्ये पितामहान् ॥ २३ ॥
धावमानान्परांश्चान्ये दृष्ट्वान्ये तत्र भारत ।
गोत्रनामानि ख्यातानि शशंसुरितरेतरम् ॥ २४ ॥
तेषां छिन्ना महाराज भुजाः कनकभूषणाः ।
उद्वेष्टन्ते विचेष्टन्ते पतन्ते चोत्पतन्ति च ॥ २५ ॥
निपतन्ति तथैवान्ये स्फुरन्ति च सहस्रशः ।
वेगांश्चान्ये रणे चक्रुः पञ्चास्या इव पन्नगाः ॥ २६ ॥
ते भुजा भोगिभोगाभाश्चन्दनाक्ता विशाम्पते ।
लोहितार्द्रा भृशं रेजुस्तपनीयध्वजा इव ॥ २७ ॥

व्याकुल होकर भागने लगे, किसीका सूंड और किसीका शिर कटकर गिर गया ॥ कोई हाथी घूमने कोई सिंहके समान गर्जने और कोई भागने लगे ॥ (१७-२०)

घोडे सोनेके साज सहित मरने, भागने, गिरने और घूमने लगे ॥ अनेक बाण और तोमरोंसे पीडित होकर और पृथ्वीमें गिरकर पैर पीटने लगे ॥ अनेक वीर पृथ्वीमें गिरकर चिल्लाने लगे, कोई अपने बाप, भाई, बेटे, दादाको मरा देख रोने लगे ॥ कोई दूसरेको पकडकर खींचने लगा, कोई भागतेके पीछे भागने लगा और कोई अपने गोत्र और नामकी प्रशंसा करने लगा ॥ (२१-२४)

हे राजन् ! किसीका भूषण सहित हाथ कटकर पृथ्वीमें गिर गया, कोई मरकर तडफने लगा। कोई गिरकर उठा और फिर लडने लगा ॥ कोई वेगसे पांच मुखवाले सांपके समान हाथसे शस्त्र चलाने लगे ॥ हे राजन् ! वे सांपके फणोंके समान चंदन लगे हुए रक्तसे भीगे हुए हाथ गिरकर ऐसे शोभित हुए

सोऽद्य संग्रामशिरसि सन्नद्धः क्रोधमूर्छितः ॥ २३ ॥
किं करोत्यतदण्डेन मृत्युनापि व्रजेद्रणम् ।
चिरकालाभिलषितो ममायं तु मनोरथः ॥ २४ ॥
अर्जुनं समरे हन्यां मां वा हन्याद्धनञ्जयः ।
स मे कदाचिद्ध्रुवं भवेद्भीमसमागमात् ॥ २५ ॥
निहते भीमसेने वा यदि वा विरथीकृते ।
अभियास्यति मां पार्थस्तन्मे साधु भविष्यति ॥२६॥
अत्र यन्मन्यसे प्राप्तं तच्छीघ्रं सम्प्रधारय ।
एतच्छ्रुत्वा तु वचनं राधेयस्यामितौजसः ॥ २७ ॥
उवाच वचनं शल्यः सूतपुत्रं तथागतम् ।
अभियाहि महाबाहो भीमसेन महाबलम् ॥ २८ ॥
निरस्य भीमसेनं तु ततः प्राप्स्यसि फाल्गुनम् ।
यस्ते कामोऽभिलषितश्चिरात्प्रभृति हृद्गतः ॥ २९ ॥
स वै समुपतस्थते कर्ण सत्यमेतद्ब्रवीमि ते ।
एवमुक्ते ततः कर्णः शल्यं पुनरभाषत ॥ ३० ॥
हन्यादर्जुनं संख्ये मां वा हन्याद्धनञ्जयः ।
युद्धे मनः समाधाय याहि यत्र वृकोदरः ॥ ३१ ॥

वही भीमसेन आज क्रोध करके हमसे युद्ध करनेको आये है ॥ यदि साक्षात् यमराज भी दण्ड लेकर उसके सहायक आवे तो भी वह उसके साथ युद्ध करेगा ॥ (२२-२४)

मेरी बहुत दिनसे इच्छा थी कि अर्जुन चाहे मुझे मारे चाहे मै अर्जुनको मारू, दूसरेसे युद्ध करनेसे क्या लाभ है। भीमसेनके मरनेसे अथवा इनका रथ टूटनेसे अर्जुन हमसे युद्ध करनेको आवेंगे, सो मेरे लिये अच्छा ही होगा इसमें जो आपकी सम्मति हो सो हमसे कहिये, हम वैसा ही करेंगे ॥ (२४-२७)

कर्णके वचन सुन शल्य बोले, हे कर्ण ! हमारी ये ही सम्मति है, कि तुम भीमसेनसे युद्ध करो, भीमसेनको मार कर तुम अर्जुनसे युद्ध कर सकोगे यही तुम्हारी बहुत दिनसे इच्छा थी, सो हे कर्ण ! भीमसेनके मरते ही अर्जुन तुमसे युद्ध करनेको आवेंगे । शल्यके वचन सुनते ही कर्ण बोले, हम अर्जुनको युद्धसे मारेंगे, या वह हमको मारेंगे, जो हो पर तुम युद्धमें इच्छासे भीमसेनके रथकी ओर रथ हांको ॥ (२८-३१)

पीत्वा च शोणितं तत्र वसां पीत्वा च भारत॥ ३६ ॥
मेदोमज्जावसामत्तास्तृप्ता मांसस्य चैव ह ।
धावमानाः स्म दृश्यन्ते काकगृध्रबकास्तथा ॥ ३७ ॥
शूरास्तु समरे राजन्भयं त्यक्त्वा सुदुस्त्यजम् ।
योधव्रतं समासाद्य चक्रुः कर्माण्यभीतवत् ॥ ३८ ॥
शरशक्तिसमाकीर्णे क्रव्यादगणसंकुले ।
व्यचरन्त रणे शूराः ख्यापयन्तः स्वपौरुषम् ॥ ३९ ॥
अन्योन्यं आवयन्ति स्म नामगोत्राणि भारत ।
पितृनामानि च रणे गोत्रनामानि वा विभो ॥ ४० ॥
आवयाणाश्च बहवस्तत्र योधा विशाम्पते ।
अन्योन्यमवमृद्नन्तः शक्तितोमरपट्टिशैः ॥ ४१ ॥
वर्त्तमाने तथा युद्धे घोररूपे सुदारुणे ।
व्यषीदत्कौरवी सेना भिन्ना नौरिव सागरे ॥ ४२ ॥ [२५२९]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सकुलयुद्धे द्विपञ्चाशत्तमोऽध्याय ॥५२॥

सञ्जय उवाच— वर्त्तमाने तथा युद्धे क्षत्रियाणां निमज्जने ।
गाण्डीवस्य महाघोषः श्रूयते युधि मारिष ॥ १ ॥
संशप्तकानां कदनमकरोद्यत्र पाण्डवः ।

हे भारत ! रुधिर और चर्बी पीकर अनेक पिशाची गीत गा गा कर नाचने लगीं, कौवे, गिद्ध, बगुले मांस रुधिर और चर्बी खाकर आकाशमें प्रसन्न होकर उडने लगे ॥ (३४–३७)

हे राजन् ! क्षत्री भयको छोडकर उस युद्धमें घोर कर्म करने लगे । वीर लोग उस शक्ति और बाणोंसे भरे हुए, गिद्ध,स्यार और कौओंसे शोभित युद्धमें बेडर होकर अपना पराक्रम प्रकाशित करने लगे ॥ हे पृथ्वीनाथ ! सब वीर अपने अपने पिता और गोत्रका नाम पुकार कर युद्ध करते थे ॥ और वे सब वीर शक्ति, तोमर और पट्टिश चलाते थे ॥ हे राजन् ! इस प्रकार यह घोर युद्ध होनेसे तुम्हारी सेना इस प्रकार घबडायी। कि जैसे समुद्रमें डूबती हुई नाव-के मनुष्य घबडाते हैं ॥ (३८-४२) २५२९

कर्णपर्वमें यावन अध्याय समाप्त ।

कर्णपर्वमें तिरपन अध्याय ।

सञ्जय बोले, हे राजन् ! जब क्षत्रि-योंका नाश करनेवाला, यह घोर युद्ध हो रहा था, तहां गाण्डिवका शब्द सुनायी दिया ॥ जहां अर्जुन कोसल-

सोऽन्यत्कार्मुकमादाय सूतपुत्रं वृकोदरः ॥ ४० ॥
राजन्मर्मसु मर्मज्ञो विव्याध निशितैः शरैः ।
ननाद बलवन्नादं कम्पयन्निव रोदसी ॥ ४१ ॥
तं कर्णः पञ्चविंशत्या नाराचेन समार्पयत् ।
मदोत्कटं वने दृप्तमुल्काभिरिव कुञ्जरम् ॥ ४२ ॥
ततः सायकभिन्नाङ्गः पाण्डवः क्रोधमूर्छितः ।
संरम्भामर्षताम्राक्षः सूतपुत्रवधेप्सया ॥ ४३ ॥
स कार्मुकं महावेगं भारसाधनमुत्तमम् ।
गिरीणामपि भेत्तारं सायकं समयोजयत् ॥ ४४ ॥
विकृष्य बलवच्चापमाकर्णादतिमारुतिः ।
तं मुमोच महेष्वासः क्रुद्धः कर्णजिघांसया ॥ ४५ ॥
स विसृष्टो बलवता बाणो वज्राशनिस्वनः ।
अदारयद्रणे कर्णं वज्रवेगो यथाचलम् ॥ ४६ ॥
स भीमसेनाभिहतः सूतपुत्रः कुरूद्वह ।
निषसाद रथोपस्थे विसंज्ञः पृतनापतिः ॥ ४७ ॥
ततो मद्राधिपो दृष्ट्वा विसंज्ञं सूतनन्दनम् ।
अपोवाह रथेनाजौ कर्णमाहवशोभिनम् ॥ ४८ ॥
ततः पराजिते कर्णे धार्तराष्ट्रीं महाचमूम् ।

लेकर कर्णके मर्म स्थानोंमें अनेक बाण मारे और गर्जने लगे । उनके गर्जनेसे पृथ्वी और आकाश कांपने लगी. जैसे आग जलाकर मतवाले हाथीको मारते हैं. तैसे ही कर्णने भीमसेनके शरीरमें पचीस बाण मारे ॥ (३९-४३)

उन बाणोंके लगनेसे भीमसेनके शरीरसे रुधिर बहने लगा. और कर्णको मारनेके लिये उन्होंने नेत्र कर लिये; अनन्तर उन्होंने पर्वतको भी भेदनेवाला एक महाघोर बाण धनुष पर चढाया । महा धनुषधारी भीमसेनने क्रोध करके धनुषको कान तक खींचा और कर्णके मारनेको बाण छोडा, वह बाण बलवान् भीमसेनके धनुषसे छूट कर कर्णके हृदयमें इस प्रकार घुस गया जैसे वज्र पर्वतमें घुस जाता है " (४३-४६,

हे कुरुकुलश्रेष्ठ ! तब भीमसेनके बाण लगनेसे तुरंत सेनापति कर्ण मूर्छा खाकर रथके बिच बैठ गया. महायोद्धाओंको भी मोहित देख सारथि उसको रणसे हटा लिया. कर्णके दायिक

नानापुष्पसमाकीर्णं यथा चैत्ररथं वनम् ।
प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम ॥ ११ ॥
अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव ।
परिवव्रुस्ततः सर्वे पाण्डवस्य महारथम् ॥ १२ ॥
निगृह्य तं प्रचुक्रुशुर्वध्यमानाः शितैः शरैः ।
ते हयान्रथचक्रे च रथेषां चापि मारिष ॥ १३ ॥
निग्रहीतुमुपाक्रामन्क्रोधाविष्टाः समन्ततः ।
निगृह्य तं रथं तस्य योधास्ते तु सहस्रशः ॥ १४ ॥
निगृह्य बलवत्सर्वे सिंहनादमथानदन् ।
अपरे जगृहुश्चैव केशवस्य महाभुजौ ॥ १५ ॥
पार्थमन्ये महाराज रथस्थं जगृहुर्मुदा ।
केशवस्तु ततो बाहू विधुन्वन्व्रणमूर्धनि ॥ १६ ॥
पातयामास तान्सर्वान्दुष्टहस्तीव हस्तिपान् ।
ततः क्रुद्धो रणे पार्थः संवृतस्तैर्महारथैः ॥ १७ ॥
निगृहीतं रथं दृष्ट्वा केशवं चाप्यभिद्रुतम् ।
रथारूढांस्तु सुबहून्पदातींश्चाप्यपातयत् ॥ १८ ॥

तब उसकी ऐसी शोभा बढी जैसे अनेक फुलोंसे भरे हुए चैत्ररथ नामक वनकी होती है ।(७-११)

तब वे सब सचेत होकर अर्जुनके रथकी ओर दौडे और जैसे मेघ पर्वत पर जल वर्षाते है, ऐसे ही अर्जुनके ऊपर बाण वर्षाने लगे ।। उस समय उन वीरोंनें अर्जुनके बडे रथको चारों ओरसे घेर लिया । वे वीर अर्जुनके तीक्ष्ण बाणोंसे पीडित होते थे, तौ भी क्रोधसे व्याप्त होकर कोई रथके घोडे, कोई रथचक्र, कोई रथकी धुरी पकडके अर्जुनके रथको चारों ओरसे रुद्ध करने लगे। कोई सिंहके समान गर्जने लगा और किसीने कृष्ण के दोनों हाथ जा कर पकड लिये ॥ (११—१५)

हे महाराज ! कोई क्रोध करके अर्जुनके रथमें घुस गये, और उनके हाथ पकड लिये । जब कृष्ण और अर्जुनके ये हाथ पकडते थे, तो झटका देकर वे उन्हें गिरा देते थे। जैसे मतवाला हाथी अनेक हाथियोंको मार डालता है, तैसेही इन दोनों वीरोंने अनेक वीरोंको मारकर गिरा दिया । तब उन महारथोंसे घिरने पर अर्जुनको बडा क्रोध हुआ । अपने रथको घिरा और कृष्णको व्याकुल देख

धनुर्ग्राहो दुर्मदश्च जलसन्धः शलः सहः ॥ ८ ॥
एते रथैः परिवृता वीर्यवन्तो महाबलाः ।
भीमसेनं समासाद्य समन्तात्पर्यवारयन् ॥ ९ ॥
ते व्यमुञ्चञ्छरव्रातान्नानालिङ्गान्समन्ततः ।
स तैरभ्यर्द्यमानस्तु भीमसेनो महाबलः ॥ १० ॥
तेषामापततां क्षिप्रं सुतानां ते जनाधिप ।
रथैः पञ्चदशैः सार्द्धं पञ्चाशद्धनद्रथान् ॥ ११ ॥
विविंशतिस्तु ततः क्रुद्धो भल्लेनापाहरच्छिरः ।
भीमसेनो महाराज तत्पपात हतं भुवि ॥ १२ ॥
सकुण्डलशिरस्त्राणं पूर्णचन्द्रोपमं तथा ।
तं दृष्ट्वा निहतं शूरं भ्रातरः सर्वतः प्रभो ॥ १३ ॥
अभ्यद्रवन्त समरे भीमं भीमपराक्रमम् ।
ततोऽपराभ्यां भल्लाभ्यां पुत्रयोस्ते महाहवे ॥ १४ ॥
जहार समरे प्राणान्भीमो भीमपराक्रमः ।
तौ धरामनुपप्येतां वातरुग्णाविव द्रुमौ ॥ १५ ॥
विकटश्च सुदुर्धर्षौ देवपुत्रोपमौ नृप ।
ततस्तु त्वरितो भीमः प्रार्थं निन्ये यमक्षयम् ॥ १६ ॥

कवची, पाशी, नन्द, उपनन्द, दुष्प्रधर्ष, सुषाढ, वातवेग, सुवर्चा, धनुर्ग्राह, दुर्मद, जलसन्ध, शल और सह ये सब महा रथ तुम्हारे पुत्र भीमसेनके पास आये, और उन्हें चारो ओरसे घेर लिया और वे चारो ओरसे भीमसेनके ऊपर बाण चलाने लगे । (६— १०)

इनके बाणोंसे पीडित होकर महा पराक्रमी भीमसेनने अपने बाणोंसे तुम्हारे पंद्रह रथोंके साथ पचास रथियोंको मार डाला ॥ हे राजेन्द्र ! इनके अनन्तर भीमसेनने एक बाणसे विविंशतिका मस्तक तुम्हारे पुत्रका सिर काट लिया । हे पृथ्वीनाथ ! जिस समय विविंशतिका चन्दन लगा सिर टोपके सहित पृथ्वीपर गिरा तब तुम्हारे पुत्रोंने महा क्रोध कर महा पराक्रमी भीमसेनकी ओर अनेक बाण चलाये । तब भीमसेनने दो बाणोंसे तुम्हारे दो पुत्रोंके सिर काट लिये, वे दोनों इस प्रकार पृथ्वी पर गिरे जैसे आंधीसे दो वृक्ष गिर जाते हैं । (११—१५)

इस प्रकार देवपुत्रके समान पराक्रमी विकट और अति दुर्धर्ष दो भाइयोंको भीमसेनने यमलोक भेज दिया । हे

आयुधानि च सर्वाणि विसृष्टुमुपचक्रमुः ॥ २७ ॥
ते बद्धाः पादबन्धेन न शेकुश्चाष्टितुं नृप।
ततस्तानवधीत्पार्थः शरैः सन्नतपर्वभिः ॥ २८ ॥
सर्वयोधा हि समरे भुजगैर्वेष्टिताऽभवन्।
यानुद्दिश्य रणे पार्थः पादबन्धं चकार ह ॥ २९ ॥
ततः सुशर्मा राजेन्द्र गृहीतां वीक्ष्य वाहिनीम्।
सौपर्णमस्त्रं त्वरितः प्रादुश्चक्रे महारथः ॥ ३० ॥
ततः सुपर्णाः सम्पेतुर्भक्षयन्तो भुजङ्गमान्।
ते वै विदुद्रुवुर्नागा दृष्ट्वा तान्खचरान्नृप ॥ ३१ ॥
बभौ बलं तद्विमुक्तं पादबन्धाद्विशाम्पते।
मेघवृन्दाद्यथा मुक्तो भास्करस्तापयन्प्रजाः ॥ ३२ ॥
विप्रमुक्तास्तु ते योधाः फाल्गुनस्य रथं प्रति।
ससृजुर्वाणसङ्घांश्च शस्त्रसङ्घांश्च मारिष ॥ ३३ ॥
विविधानि च शस्त्राणि प्रत्यविध्यन्त सर्वशः।
तां महास्त्रमयीं वृष्टिं संछिद्य शरवृष्टिभिः ॥ ३४ ॥
न्यवधीष ततो योधान्वासविः परवीरहा।
सुशर्मा तु ततो राजन्बाणेनानतपर्वणा ॥ ३५ ॥

छोड दिया, और शस्त्र भी फेंक दिये ॥ (२५– २७)

हे राजन्! वे बन्धे हुए वीर कुछ भी न कर सके, तब अर्जुनने अपने नतपर्व बाणोंसे उन्हें मारना आरम्भ किया॥ अर्जुनने जिन योद्धाओंकी ओर नागास्त्र बाण चलाया था, वे सब सांपोंसे बंध गये ॥ हे राजन्! महारथ सुशर्माने अपनी सेनाको इस आपत्तिमें पडा देख गरुडास्त्र बाण चलाया ॥ उसके चलाते ही अनेक गरुड उत्पन्न होगये। और सांपोंको खाने लगे; गरुडोंको देख सब सांप इधर उधर भाग गये ॥ (२८-३१)

हे पृथ्वीनाथ! जैसे मेघोंसे छूटकर सूर्य चारों ओर प्रकाश करने लगता है, ऐसे ही तुम्हारी सेना सांपोंसे छूट कर प्रकाश करने लगी। उन सांपोंसे छूटते ही वे सब योधा अर्जुनके रथकी ओर बाण और अनेक प्रकारके शस्त्र चलाने लगे। उस आठों दिशामें छाई हुई बाणवर्षाको अर्जुनने अपने बाणोंसे काट दिया, और अनेक वीरोंको मार डाला। (३२–३५)

तब राजा सुशर्माने एक तेजबाण

विव्याध परमास्त्रज्ञो भल्लैः सन्नतपर्वभिः ।
आहनत् स महाबाहुर्भीमो भीमपराक्रमः ॥ २६ ॥
आकर्णपूर्णैर्विशिखैः कर्णं विव्याध सप्तभिः ।
ततः कर्णो महाराज आशीविष इव श्वसन् ॥ २७ ॥
शरवर्षेण महता छादयामास पाण्डवम् ।
भीमोऽपि तं शरव्रातंश्छादयित्वा महारथम् ॥ २८ ॥
पश्यतां कौरवेयाणां विननर्द महाबलः ।
ततः कर्णो भृशं क्रुद्धो दृढमादाय कार्मुकम् ॥ २९ ॥
भीमं विव्याध दशभिः कङ्कपत्रैः शिलाशितैः ।
कार्मुकं चास्य चिच्छेद भल्लेन निशितेन च ॥ ३० ॥
ततो भीमो महाबाहुर्हेमपट्टविभूषितम् ।
परिघं घोरमादाय मृत्युदण्डमिवापरम् ॥ ३१ ॥
कर्णस्य निधनाकांक्षी चिक्षेपातिबलो नदन् ।
तमापतन्तं परिघं वज्राशनिसमस्वनम् ॥ ३२ ॥
चिच्छेद बहुधा कर्णः शरैराशीविषोपमैः ।
ततः कार्मुकमादाय भीमो दृढतरं तदा ॥ ३३ ॥

अनन्तर कर्णने क्रोध करके भीमसेनकी ओर लोहेके नौ भल्ल बाण चलाये, शस्त्र जाननेवाले कर्णके बाण लगनेसे महापराक्रमी भीमसेनने कान तक खींच कर कर्णके शरीरमें सात बाण मारे, उन बाणोंके लगनेसे महा पराक्रमी कर्ण बिषीले सांपके समान सांस लेने गर्जने लगे । तब कर्णने महा क्रोध करके एक दृढ धनुष हाथमें लिया और भीमसेनके शरीरमें तेज दश बाण मारे, और एकमें उनका धनुष काट दिया ॥ (२८—३०)

चतुर्दशसहस्राणि यानि शिष्टानि भारत ॥ ४४ ॥
रथानामयुतं चैव त्रिसाहस्राश्च दन्तिनः।
ततः संशप्तका भूयः परिवव्रुर्धनञ्जयम् ॥ ४५ ॥
मर्तव्यमिति निश्चित्य जयं वाप्यनिवर्तनम्।
तत्र युद्धं महच्चासीत्तावकानां विशाम्पते।
शूरेण बलिना सार्ध पाण्डवेन किरीटिना ॥ ४६ ॥ [२५७५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सकुलयुद्धे त्रिपञ्चाशत्तमोऽध्याय ॥ ५३ ॥

सञ्जय उवाच— कृतवर्मा कृपो द्रौणिः सूतपुत्रश्च मारिष।
उलूकः सौबलश्चैव राजा च सह सोदरैः ॥ १ ॥
सीदमानां चमूं दृष्ट्वा पाण्डुपुत्रभयार्दिताम्।
समुज्जह्रुः स वेगेन भिन्नां नावमिवार्णवे ॥ २ ॥
ततो युद्धमतीवासीन्मुहूर्त्तमिव भारत।
भीरूणां त्रासजननं शूराणां हर्षवर्धनम् ॥ ३ ॥
कृपेण शरवर्षाणि प्रतिमुक्तानि संयुगे।
सृञ्जयांश्छादयामासुः शलभानां व्रजा इव ॥ ४ ॥
शिखण्डी च ततः क्रुद्धो गौतमं त्वरितो ययौ।
ववर्ष शरवर्षाणि समन्ताद् द्विजपुङ्गवम् ॥ ५ ॥

धुआं रहित अग्निके समान बढ गया। चौदह सहस्र पदाति दश सहस्र रथ और तीन हजार हाथी इतने योद्धा संशप्तकोंमें शेष रह गये॥ तब ये सब इकट्ठे होकर अर्जुन पर दौड। हे पृथ्वीनाथ! उन्होंने निश्चय कर लिया, कि हमें एक दिन अवश्य ही मरना है। सो या तो मरेंगे, या विजय करेंगे। तब उनके सङ्ग अर्जुनका घोर युद्ध होने लगा, महात्मा पराक्रमी अर्जुन भी उनके सङ्ग घोर युद्ध करने लगे॥ (४३–४६) [२५७५]

कर्णपर्वमें तिरपन अध्याय समाप्त।

कर्णपर्वमें चौवन अध्याय।

सञ्जय बोले, हे राजन्! कृतवर्मा, कृपाचार्य, अश्वत्थामा, कर्ण, उलूक, शकुनि और अपने भाइयों समेत राजा दुर्योधनने अर्जुनकी भयसे अपनी सेनाको व्याकुल और समुद्रमें डूबती हुई नावके समान देखकर युद्ध करना आरंभ किया॥ तब यह घोर युद्ध होने लगा, उनको देखकर कायर डरने और वीर प्रसन्न होने लगे॥ (१–३)

कृपाचार्यने अपने बाणोंसे टीडीदलके समान छूट हुए सृञ्जयवंशी क्षत्रियोंको

ततो मुहूर्त्ताद्राजेन्द्र नातिक्रुच्छ्राद्धसन्निव ।
विरथं भीमकर्माणं भीमं कर्णश्चकार ह ॥ ४२ ॥
विरथो भरतश्रेष्ठ प्रहसन्ननिलोपमः ।
गदां गृह्य महाबाहुरपतत्स्यन्दनोत्तमात् ॥ ४३ ॥
अवप्लुत्य च वेगेन तव सैन्यं विशाम्पते ।
व्यधमद्गदया भीमः शरन्मेघानिवानिलः ॥ ४४ ॥
नागान्सप्तशतान्राजन्नीषादन्तान्प्रहारिणः ।
व्यधमत्सहसा भीमः क्रुद्धरूपः परन्तपः ॥ ४५ ॥
दन्तवेष्टेषु नेत्रेषु कुम्भेषु च कटेषु च ।
सर्मस्वपि च मर्मज्ञस्तान्नागानवधीद्बली ॥ ४६ ॥
ततस्ते प्राद्रवन्भीताः प्रतीपं प्रहिताः पुनः ।
महामात्रैरतमावव्रर्मेघा इव दिवाकरम् ॥ ४७ ॥
तान्स सप्तशतान्नागान्सारोहायुधकेतनान् ।
भृशमिष्टो गदया जघ्ने वज्रेणेन्द्र इवाचलान् ॥ ४८ ॥
ततः सुबलपुत्रस्य नागानतिबलान्पुनः ।
पोथयामास कौन्तेयो द्विपश्चाशदरिन्दमः ॥ ४९ ॥
तथा रथशतं साग्रं पत्तींश्च शतशोऽपरान् ।

भीमसेनका धनुष काट दिया और हमते हंसते महा पराक्रमी भीमसेनका रथ भी काट दिया ॥ (३९-४२)

अनन्तर महाबाहु भीमसेन हंसते हुए गदा हाथमें लेकर बहुत शीघ्रतासे रथसे कूदे और तुरङ्गी सेनाको गदासे मार कर इस प्रकार भगाने लगे जैसे आंधी आकाशके मेघोंको भगाती है। शत्रुनाशन भीमने क्रोध करके महाबल और वीर्यसे सहित वेदज्ञाने सात सौ हाथियोंको मार डाला। कर्म जाननेवाले महाबली भीमसेनने हाथियोंके दांत, दृष्टि, शिर, पसली और सब मर्म तोड डाले, अनन्तर शेष हाथी भीमसेनके आगेसे भागने लगे। उस हाथियोंकी सेनामें भीमसेनकी ऐसी शोभा हुई जैसे मेघोंमें सूर्यकी। भूमिमें खडे भीमसेनने अपनी गदासे महाबल, घोडा और जम्बारियोंके सहित उन सातसो हाथियोंको इस प्रकार मार कर गिरा दिया जैसे इन्द्र वज्रसे पर्वतोंको गिरा देते हैं ॥ (४३-४८)

अनन्तर शत्रुनाशन भीमसेन दुर्योधनकी सेनासे घिरे, और बहुत हाथियोंको मारा। इसी प्रकार घोडोंसे

सपुत्रं सहसैन्यं च द्रोणपुत्रो न्यवारयत् ॥ १४ ॥
नकुलं सहदेवं च त्वरमाणौ महारथौ।
प्रतिजग्राह ते पुत्रः शरवर्षेण वारयन् ॥ १५ ॥
भीमसेनं करूषांश्च केकयान्सह सृञ्जयैः।
कर्णो वैकर्त्तनो युद्धे वारयामास भारत ॥ १६ ॥
शिखण्डिनस्ततो बाणान्कृपः शारद्वतो युधि।
प्राहिणोत्त्वरया युक्तो दिधक्षुरिव मारिष ॥ १७ ॥
ताञ्छरान्प्रेषितांस्तेन समन्तात्स्वर्णभूषितान्।
चिच्छेद खड्गमाविध्य भ्रामयंश्च पुनः पुनः ॥ १८ ॥
शतचन्द्रं च तच्चर्म गौतमस्तस्य भारत।
व्यधमत्सायकैस्तूर्णं तत उच्चुक्रुशुर्जनाः ॥ १९ ॥
स विचर्मा महाराज खड्गपाणिरुपाद्रवत्।
कृपस्य वशमापन्नो मृत्योरास्यमिवातुरः ॥ २० ॥
शारद्वतशरैर्ग्रस्तं क्लिश्यमानं महाबलः।
चित्रकेतुसुतो राजन्सुकेतुस्त्वरितो ययौ ॥ २१ ॥
विकिरन्ब्राह्मणं युद्धे बहुभिर्निशितैः शरैः।

तब कृपाचार्यसे युद्ध करनेके लिये पुत्र और बहुत सेनाके सहित महाराज युधिष्ठिर आये, परन्तु अश्वत्थामाने उन्हें भी रोक रक्खा ॥ तब शिखण्डीकी रक्षा करनेके लिये महापराक्रमी नकुल और सहदेव चले, परन्तु उनमे राजा दुर्योधन युद्ध करने लगे ॥ (१३-१५)

हे भारत! कारूप, सृञ्जय और कैकयदेशकी सेनाके सहित भीमसेनको कर्णने रोक दिया ॥ तब चारों दिशाओंको भस्म करते हुए अग्निके समान कृपाचार्यने शिखण्डीके मारनेके [illegible] बाण चलाने आरं [illegible] चारों ओ

उन सोनेके पङ्खवाले बाणोंको आते हुए देख शिखण्डीने अपने खड्गसे काट दिया और खड्गको घुमाने लगे ॥ तब कृपाचार्यने अपने बाणोंसे सौचन्द्रचिन्ह युक्त शिखण्डीकी प्रकाशमान ढालको काट दिया, तब पाण्डवोंकी सेनामें हाहाकार होने लगा ॥ (१६-१९)

तब केवल खड्ग ही लेकर और उपाय रहित शिखण्डी कृपाचार्यकी ओर इस प्रकार दौंडे जैसे रोगी मृत्युकी ओर जाता है ॥ कृपाचार्य के वशमें पडे हुए शिखण्डीको अत्यन्त व्याकुल देख राजा चित्रकेतु [illegible] सुकेतु दौंडे ॥ महा-

हत्वान्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात् ॥ ५८ ॥
कर्णोऽपि समरे राजन्धर्मपुत्रमरिन्दमम् ।
स शरैश्छादयामास सारथिं चाप्यपातयत् ॥ ५९ ॥
ततः स प्रद्रुतः संख्ये रथं दृष्ट्वा महारथः ।
अन्वधावत्किरन्बाणैः कङ्कपत्रैरजिह्मगैः ॥ ६० ॥
राजानमभिधावन्तं शरैरावृत्य रोदसी ।
क्रुद्धः प्रच्छादयामास शरजालेन मारुतिः ॥ ६१ ॥
सन्निवृत्तस्ततस्तूर्णं राधेयः शत्रुकर्शनः ।
भीमं प्रच्छादयामास समन्तान्निशितैः शरैः ॥ ६२ ॥
भीमसेनरथव्यग्रं कर्ण भारत सात्यकिः ।
अभ्यर्दयदमेयात्मा पाण्डिग्रहणकारणात् ॥ ६३ ॥
अभ्यवर्तत कर्णस्तमर्दितोऽपि शरैर्भृशम् ।
तावन्योन्यं समासाद्य वृषभौ सर्वधन्विनाम् ॥ ६४ ॥
विरुजन्तौ शरान्दीप्तान्विभ्राजेतां मनस्विनौ ।
नाभ्यां विगति राजेन्द्र विततं भीमदर्शनम् ॥ ६५ ॥
क्रौञ्चपृष्ठारुणं रौद्रं बाणजालं व्यदृश्यत ।
नैव सूर्यप्रभा राजन दिशः प्रतिबभासिरे ॥ ६६ ॥

उनका सारथी दूसरा रथ ले आया अनन्तर उस रथपर चढ़कर और क्रोध करके कर्णकी ओर दौड़े ॥ इस बीचमें कर्णने अपने बाणोंसे धर्मराज युधिष्ठिरको ढक लिया और उनके सारथीको मार-सेनके रथकी ओर दौड़ते हुए कर्णके ऊपर महापराक्रमी सात्यकि बाण बर्षाने लगे और भीमसेनकी पृष्ठ रक्षा करने लगे ॥ (६१—६३)

धृष्टद्युम्नं तु समरे संनिवार्य महारथः।
कृतवर्माब्रवीद्धृष्टस्तिष्ठ तिष्ठेति भारत ॥ ३१ ॥
तदभूत्तुमुलं युद्धं वृष्णिपार्षतयो रणे।
आमिषार्थे यथा युद्धं श्येनयोः क्रुद्धयोर्नृप ॥ ३२ ॥
धृष्टद्युम्नस्तु समरे हार्दिक्यं नवभिः शरैः।
आजघानोरसि क्रुद्धः पीडयन्हृदिकात्मजम् ॥ ३३ ॥
कृतवर्मा तु समरे पार्षतेन हृढाहतः।
पार्षतं सरथं साश्वं छादयामास सायकैः ॥ ३४ ॥
सरथश्छादितो राजन्धृष्टद्युम्नो न दृश्यते।
मेघैरिव परिच्छन्नो भास्करो जलधारिभिः ॥ ३५ ॥
विधूय तं बाणगणं शरैः कनकभूषणैः।
व्यरोचत रणे राजन्धृष्टद्युम्नः कृतव्रणः ॥ ३६ ॥
ततस्तु पार्षतः क्रुद्धः शस्त्रवृष्टिं सुदारुणाम्।
कृतवर्माणमासाद्य व्यसृजत्पृतनापतिः ॥ ३७ ॥
तामापतन्तीं सहसा शस्त्रवृष्टिं सुदारुणाम्।
शरैरनेकसाहस्रैर्हार्दिक्योऽवारयद्युधि ॥ ३८ ॥
दृष्ट्वा तु वारितां युद्धे शस्त्रवृष्टिं दुरासदाम्।
कृतवर्माणमासाद्य वारयामास पार्षतः ॥ ३९ ॥

धृष्टद्युम्नको कृतवर्माने रोककर कहा खडे रहो! खडे रहो! जैसे मांसके लिये क्रोध करके दो बाज लडते हैं तैसे ही कृतवर्मा और धृष्टद्युम्नका युद्ध होने लगा ॥ (३०-३२)

धृष्टद्युम्नने क्रोध करके हृदीकपुत्र कृतवर्माके हृदयमें नौ बाण मारे, धृष्टद्युम्न के बाण लगनेसे कृतवर्मा को बहुत क्रोध हुआ और उन्होंने अपने बाणोंसे सारथी और घोडोंके सहित उनके रथको ढका दिया॥ जैसे वर्षते हुए मेघोंमें छिपकर सूर्य नहीं दिखायी देते है तैसे ही उन बाणोंके बीचमें धृष्टद्युम्न छिप गये॥ धृष्टद्युम्नके शरीरमें अनेक घाव होगये, परन्तु उन्होंने इन सब बाणोंको अपने बाणोंसे काट दिया ॥ (३३-३६)

अनन्तर सेनापति धृष्टद्युम्नने क्रोध करके कृतवर्माकी ओर हजारों बाण चलाये॥ उस घोर बाणधारा को कृतवर्माने सहस्रों बाणोंसे काट दिया॥ अपनी घोर बाणधाराको कटी देख धृष्टद्युम्नने कृतवर्माकी ओर अनेक

एकीभावमनुप्राप्ते नद्यावित्र समागमे ।
ततः प्रवृत्ते युद्धं घोररूपं विशाम्पते ॥ ७५ ॥
कुरूणां पाण्डवानां च लिप्सतां सुमहद्यशः ।
शूराणां गर्जतां तत्र सविच्छेदकृता गिरः ॥ ७६ ॥
श्रूयन्ते विविधा राजन्नामान्युद्दिश्य भारत ।
यस्य यद्धि रणे व्यङ्गं पितृतो मातृतोऽपि वा ॥ ७७ ॥
कर्मतः शीलतो वापि स तच्छ्रावयते युधि ।
तान्दृष्ट्वा समरे शूरांस्तर्जमानान्परस्परम् ॥ ७८ ॥
अभवन्मे मतिर्राजन्नेषामस्तीति जीवितम् ।
तेषां दृष्ट्वा तु युद्धानां वपुष्यग्नितेजसाम् ॥ ७९ ॥
अभवन्मे भयं तीव्रं कथमेतद्भविष्यति ।
ततस्ते पाण्डवा राजन्कौरवाश्च महारथाः ॥ ८० ॥
ततक्षुः सायकैस्तीक्ष्णैर्निघ्नन्तो हि परस्परम् ॥ ८१ ॥[२४८७]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सङ्कुलयुद्धे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

सञ्जय उवाच— क्षत्रियास्ते महाराज परस्परवधैषिणः ।
अन्योन्यं समरे जघ्नुः कृतवैराः परस्परम् ॥ १ ॥
रथैश्च रथिनश्चैव नरैश्च समवस्थितैः ।
गजैश्च महाराज संसक्ताश्च परस्परम् ॥ २ ॥

तेन च्छन्नं नभो राजन्बाणजालेन भास्वता।
अभ्रच्छायेव सञ्जज्ञे बाणरुद्धे नभस्तले ॥ ६ ॥
नत्राश्चर्यमपश्याम बाणभूते तथाविधे।
न स्म सम्पतते भूतं किञ्चिदेवान्तरिक्षगम् ॥ ७ ॥
सात्यकिर्यतमानस्तु धर्मराजश्च पाण्डवः।
तथेतराणि सैन्यानि न स्म चक्रुः पराक्रमम् ॥ ८ ॥
लाघवं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः।
व्यस्मयन्त महाराज न चैनं प्रत्युदीक्षितुम् ॥ ९ ॥
शेकुस्ते सर्वराजानस्तपन्तमिव भास्करम्।
वध्यमाने ततः सैन्ये द्रौपदेया महारथाः ॥ १० ॥
सात्यकिर्धर्मराजश्च पञ्चालाश्चापि सङ्गताः।
त्यक्त्वा मृत्युभयं घोरं द्रौणायनिमुपाद्रवन् ॥ ११ ॥
सात्यकिः सप्तविंशत्या द्रौणिं विध्वा शिलीमुखैः।
पुनर्विव्याध नाराचैः सप्तभिः स्वर्णभूषितैः ॥ १२ ॥
युधिष्ठिरस्त्रिसप्तत्या प्रतिविन्ध्यश्च सप्तभिः।
श्रुतकर्मा त्रिभिर्बाणैः श्रुतकीर्तिश्च सप्तभिः ॥ १३ ॥

कुलश्रेष्ठ ! सोनेके पङ्खवाले वितान (शामियाना) के समान वे बाण छा गये ॥ (१-५)

हे, राजन् ! उन बाणोंके छोडनेसे आकाश इस प्रकार छा गया जैसे मेघ छा जाते हैं ॥ हम लोगोंने वही ऐसा आश्चर्य देखा, कि उन बाणोंके छानेसे कोई आकाशकी वस्तु पृथ्वीमें नहीं गिरती थी ॥ अनेक यत्न करनेपर भी सात्यकि महाराज युधिष्ठिर और भी सब वीर अश्वत्थामासे पार न पासके ॥ हे महाराज ! द्रोणपुत्रकी शीघ्रताको देख सब महारथ आश्चर्य करने लगे। उस समय कोई अश्वत्थामाकी ओर देख नहीं सकता था ॥ राजा लोग अश्वत्थामाकी ओर इस प्रकार न देख सके, जैसे दो पहरके समयके सूर्यको कोई नहीं देख सकता। (६-१०)

इस प्रकार अपनी सेनाको मरते देख द्रौपदीके पांचों महारथ पुत्र, सात्यकि, महाराज युधिष्ठिर और सब पाञ्चालदेशके वीर मृत्युका भय छोडकर अश्वत्थामाकी ओर दौडे ॥ सात्यकिने अश्वत्थामाके शरीरमें सत्ताइस बाण मार कर फिर सुवर्ण भूषित सात बाण मारे ॥ युधिष्ठिरने तिहत्तर, प्रतिविन्ध्यने सात, श्रुत-

एकीभावमनुप्राप्ते नद्याविव समागमे ।
ततः प्रववृते युद्धं घोररूपं विशाम्पते ॥ ७५ ॥
धृत्स्णां पाण्डवानां च लिप्सतां सुमहद्यशः ।
शूराणां गर्जतां तत्र सविच्छेदकृता गिरः ॥ ७६ ॥
श्रूयन्ते विविधा राजन्नामान्युद्दिश्य भारत ।
यस्य यद्धि रणे क्यङ्ग पितृतो मातृतोऽपि वा ॥ ७७ ॥
कर्मतः शीलतो वापि स तच्छ्रावयते युधि ।
तान्दृष्ट्वा त्वरे शूरांस्तर्जमानान्परस्परम् ॥ ७८ ॥
अभवन्मे मती राजन्नेषामस्तीति जीवितम् ।
तेषां दृष्ट्वा तु युद्धानां वपूंष्यग्निनेतजसाम् ॥ ७९ ॥
अभवन्मे भयं तीव्रं कथमेतद्भविष्यति ।
ततस्ते पाण्डवा राजन्धार्तराष्ट्राश्च हृष्टवाः ॥ ८० ॥
ततक्षुः सायकैस्तीक्ष्णैर्निघ्नन्तो हि परस्परम् ॥ ८१ ॥[२४८७]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सप्तदशदिवसयुद्धे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

सञ्जय उवाच— क्षत्रियास्ते महाराज परस्परवधैषिणः ।
अन्योन्यं समरे जघ्नुः कृतवैराः परस्परम् ॥ १ ॥
रथैश्च रथिनश्चैव नरैश्च समन्ततः ।
गजैश्च महाराज संसक्तार्थं परम्परम् ॥ २ ॥

दो नदी एकमें मिल जाती है, तैसे ही ये दोनों सेना मिलकर घोर युद्ध करने लगी ॥ पाण्डव और धार्तराष्ट्रोंकी सेनाके वीर अपने यशके लिये गर्जने और युद्ध करने लगे ॥ (७२-७५)

यह निश्चय होगया कि अब जगत्में कोई नहीं बचेगा और मुझे यह भय भी हुआ कि इसका क्या होगा ? अनन्तर महारथ पाण्डव और धार्तराष्ट्र अपने तेज दाखाने एक दूसरेको मारने लगे ॥ ७६-८१

सात्यकिस्तु ततः क्रुद्धो द्रौणेः प्रहरतो रणे ॥ २२ ॥
अर्धचन्द्रेण तीक्ष्णेन धनुश्चिच्छेदानदद् भृशम् ।
छिन्नधन्वा ततो द्रौणिः शक्त्या शक्तिमतां वरः ॥२३॥
सारथिं पातयामास शैनेयस्य रथाद् द्रुतम् ।
अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान् ॥ २४ ॥
शैनेयं शरवर्षेण च्छादयामास भारत ।
तस्याश्वाः प्रद्रुताः सङ्ख्ये पतिते रथसारथौ ॥ २५ ॥
तत्र तत्रैव धावन्तः समदृश्यन्त भारत ।
युधिष्ठिरपुरोगास्तु द्रौणिं शस्त्रभृतां वरम् ॥ २६ ॥
अभ्यवर्षन्त वेगेन विसृजन्तः शिताञ्छरान् ।
आगच्छमानांस्तान्दृष्ट्वा क्रुद्धरूपान्परन्तपः ॥ २७ ॥
प्रहसन्प्रतिजग्राह द्रोणपुत्रो महारणे ।
ततः शरशतज्वालः सेनाकक्षं महारथः ॥ २८ ॥
द्रौणिर्ददाह समरे कक्षमग्निर्यथा वने ।
तद्बलं पाण्डुपुत्रस्य द्रौणपुत्रप्रतापितम् ॥ २९ ॥
चुक्षुभे भरतश्रेष्ठ तिमिनेव नदीमुखम् ।
दृष्ट्वा चैव महाराज द्रोणपुत्रपराक्रमम् ॥ ३० ॥
निहतान्मेनिरे सर्वान्पाण्डून्द्रोणसुतेन वै ।

धारण करके अश्वत्थामाके शरीरमें सत्तर बाण मारे। अनन्तर सात्यकि युद्ध करते हुए अश्वत्थामाका धनुष अर्धचन्द्र बाणसे काट कर गर्जने लगे। तब महा बलवान् अश्वत्थामाने एक शक्ति उनके सारथीको मार डाला, और उतने ही समयमें दूसरा धनुष लेलिया, और सात्यकिकी ओर सहस्रों बाण चलाये। सारथीके मरनेसे सात्यकिके घोडे इधर उधरको भागते हुए दौड पडने लगे। (२१–२६)

उस समय युधिष्ठिरकी ओरके अनेक वीर अश्वत्थामाके ऊपर अनेक बाण वर्षाने लगे। उन क्रोधी वीरोंको अपनी ओर आते देख शत्रुनाशन अश्वत्थामा हंसकर युद्ध करने लगे। महारथ द्रोणपुत्र बाण रूपी अग्निसे सेनाको इस प्रकार जलाने लगे जैसे अग्नि सूखे काटको जलाती है। वह युधिष्ठिरकी सेना अश्वत्थामाके बलको देख इस प्रकार घबडा उठी, जैसे बडी मछलीके आजानेसे नदीका मुख। तब सबने जान लिया, कि

भिन्नानां चोत्तमाङ्गानां बाहूनां चोरुभिः सह ।
कुण्डलानां प्रवृद्धानां भूषणानां च भारत ॥ ११ ॥
निष्काणामथ शूराणां शरीराणां च धन्विनाम् ।
चर्मणां सपताकानां सङ्घास्तत्रापतन्भुवि ॥ १२ ॥
गजा गजान्समासाद्य विषाणैरार्दयन्नृप ।
विषाणाभिहतास्तत्र भ्राजन्ते द्विरदास्तथा ॥ १३ ॥
रुधिरेणावसिक्ताङ्गा गैरिकप्रस्रवा इव ।
यथा भ्राजन्ति स्यन्दन्तः पर्वता धातुमण्डिताः॥ १४ ॥
तोमरान्सादिभिर्मुक्तान्प्रतीपानास्थितान्बहून् ।
हरंतश्चिच्छिदुर्नागा बभंजुश्चापरे तथा ॥ १५ ॥
नाराचैश्छिन्नवर्माणो भ्राजन्ति स्म गजोत्तमाः ।
हिमागमे यथा राजन्क्षयभ्रा इव महीधराः ॥ १६ ॥
शरैः कनकपुङ्खैश्च चित्रा रेजुर्गजोत्तमाः ।
उल्काभिः सम्प्रदीप्ताग्राः पर्वता इव भारत ॥ १७ ॥
केचिद्व्यासक्ता नागैर्नागा नगनिभोपमाः ।
विनेशुः समरे तस्मिन्पक्षवन्त इवाद्रयः ॥ १८ ॥

भरी होनेके कारण सुवर्णपत्र के समान उस विस्तीर्ण युद्ध में भूमि की शोभा बढ़ी ॥ (७-१०)

हे भारत ! अनेक सुन्दर शिर और अनेक कुण्डल तथा भूषण कटकर पृथ्वीमें गिर पड़े । सोनेके भूषण, वीरोंके धनुष, बाण, ढाल सहित हाथ और लगा । हाथी घोड़ोंपर चढ़े वीरोंके चलाये हुए तोमरोंको खुदमें पकड़ कर उन्हीं वीरों को मारने और शस्त्रोंको तोड़ने लगे ॥ हे राजन् ! अनेक हाथीयोंके कवच नाराच बाणोंसे कट गये, तब वे शीतकालमें मेघरहित पर्वतोंके समान दीखने लगे ॥ (११-१६)

ततो युधिष्ठिरो राजंस्त्यक्त्वा द्रौणिं महाहवे ॥
प्रययौ तावकं सैन्यं युक्तः क्रूराय कर्मणे ॥ ३९ ॥[२६५६]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि पार्थोपयाने पञ्चपञ्चाशत्तमोऽध्यायः ॥५५॥

सञ्जय उवाच—भीमसेनं च पाञ्चाल्यं चेदिकेकयसंवृतम् ।
वैकर्त्तनः स्वयं रुध्वा वारयामास सायकैः ॥ १ ॥
ततस्तु चेदिकारूषान्सृञ्जयांश्च महारथान् ।
कर्णो जघान समरे भीमसेनस्य पश्यतः ॥ २ ॥
भीमसेनस्ततः कर्णं विहाय रथसत्तमम् ।
प्रययौ कौरवं सैन्यं कक्षमाग्निरिव ज्वलन् ॥ ३ ॥
सूतपुत्रोऽपि समरे पञ्चालान्केकयांस्तथा ।
सृञ्जयांश्च महेष्वासान्निजघान सहस्रशः ॥ ४ ॥
संशप्तकेषु पार्थश्च कौरवेषु वृकोदरः ।
पञ्चालेषु तथा कर्णः क्षयं चक्रुर्महारथाः ॥ ५ ॥
ते क्षत्रिया दह्यमानास्त्रिभिस्तैः पावकोपमैः ।
जग्मुर्विनाशं समरे राजन्दुर्मन्त्रिते तव ॥ ६ ॥
ततो दुर्योधनः क्रुद्धो नकुलं नवभिः शरैः ।

भी वहांसे गये। महाराज युधिष्ठिर भी अश्वत्थामा को छोडकर वीरों का नाश करने के लिये तुम्हारी सेना में घुसे ॥ (३५—३९) [२६५६]

कर्णपर्वमें पचपन अध्याय समाप्त ।

कर्णपर्वमें छप्पन अध्याय।

सञ्जय बोले, हे राजन्! पाञ्चाल और कैकयदेशकी सेनाके सहित भीमसेनके निवारण करके कर्ण उसे अपने बाणोंसे विद्ध करने लगे ॥ भीमसेनके देखते देखते कर्णने अपने तेज बाणोंसे चेदि, कारूष और सृञ्जय देशके अनेक वीरोंको मार डाला ॥ तब कर्णको छोड कर सूखे तृणको जलानेवाली अग्निके समान भीमसेन कौरव सेनाकी ओर दौडे ॥ (१-३)

इसी प्रकार कर्णने पाण्डवोंकी सेनामें जाकर सृञ्जय, कैकय और पाञ्चालदेशीय सेनाके सहस्रों वीरोंको मार डाला ॥ पाञ्चालोंका कर्ण, कौरवोंका महारथ भीम और संशप्तकोंका अर्जुन नाश करने लगे ॥ हे राजन्! तुम्हारी दुर्बुद्धिसे यह क्षत्रियोंका नाश हुआ। वे तीनों वीर अग्निके समान सेनाका नाश करने लगे ॥ (४—६)

हे भरतकुल श्रेष्ठ! अनन्तर दुर्योधन

वर्तमाने तथा घोरे संकुले सर्वतोदिशम् ।
अविज्ञाताः स्म युध्यन्ते विनिघ्नन्तः परम्परम् ॥ २८ ॥
भौमेन रजसाकीर्णे शस्त्रसम्पातसंकुले ।
नैव स्वे न परे राजन्व्यज्ञायन्त तमोवृताः ॥ २९ ॥
तथा तद्भवद्युद्धं घोररूपं भयानकम् ।
लोहितोदा महानद्यः प्रस्रुस्तत्र चासकृत् ॥ ३० ॥
शीर्षपाषाणसञ्छन्नाः केशशैवलशाद्वलाः ।
अस्थिमीनसमाकीर्णा धनुःशरगदोडुपाः ॥ ३१ ॥
मांसशोणितपङ्किन्यो घोररूपाः सुदारुणाः ।
नदीः प्रवर्तयामासुः शोणितौघविवर्धिनीः ॥ ३२ ॥
भीरुवित्रासकारिण्यः शूराणां हर्षवर्धनाः ।
ता नद्यो घोररूपास्तु नयन्त्यो यमसादनम् ॥ ३३ ॥
अवगाढान्मज्जयन्त्यः क्षत्रस्याजनयन्भयम् ।
क्रव्यादानां नरव्याघ्र नर्दतां तत्र तत्र ह ॥ ३४ ॥
घोरमायोधनं जज्ञे प्रेतराजपुरोपमम् ।
उत्थितान्यशरीराणि कबन्धानि समन्ततः ॥ ३५ ॥
नृत्यन्ति स्म भृतगणाः सुतृप्ता मांसशोणितैः ।

जैसे सोनेके दण्डवाली ध्वजा ॥(२५-२७)

इस प्रकार यह घोर युद्ध हुआ । हे राजन् ! धूल उठनेसे ऐसा अन्धकार होगया, कि वहां कोई किसीको नहीं देख सकता था । वह लोग अपनी वीचड़के समान जम गया । इस प्रकार यह रुधिरकी घोर रूपी नदी उस युद्धमें वह निकली ॥ उन नदियोंको देखकर कायर डरने और वीर प्रसन्न होने लगे ॥ (२८—३३)

आच्छादयन्दिशः सर्वाः सूर्यस्येवांशवो यथा।
बाणभूते ततस्तस्मिन्सञ्छन्ने च नभस्तले ॥ १६ ॥
यमाभ्यां ददृशे रूपं कालान्तकयमोपमम्।
पराक्रमं तु तं दृष्ट्वा तव सूनोर्महारथाः ॥ १७ ॥
मृत्योरुपान्तिकं प्राप्तौ माद्रीपुत्रौ स्म मेनिरे।
ततः सेनापती राजन्पाण्डवस्य महारथः ॥ १८ ॥
पार्षतः प्रययौ तत्र यत्र राजा सुयोधनः।
माद्रीपुत्रौ ततः शूरौ व्यतिक्रम्य महारथौ ॥ १९ ॥
धृष्टद्युम्नस्तव सुतं वारयामास सायकैः।
तमविध्यदमेयात्मा तव पुत्रो ह्यमर्षणः ॥ २० ॥
पाञ्चाल्यं पञ्चविंशत्या प्रहसन्पुरुषर्षभः।
ततः पुनरमेयात्मा तव पुत्रो ह्यमर्षणः ॥ २१ ॥
विद्ध्वा ननाद पाञ्चाल्यं षष्ट्या पञ्चभिरेव च।
तथास्य सशरं चापं हस्तावापं च मारिष ॥ २२ ॥
क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे।
तदपास्य धनुश्छिन्नं पाञ्चाल्यः शत्रुकर्शनः ॥ २३ ॥
अन्यदादत्त वेगेन धनुर्भार[illegible] नवम्।
प्रज्वलि[illegible] संरम्भा[illegible] : ॥ २४ ॥

थे ॥ जिस प्रकार सूर्यकी कि[illegible]
छा जाती हैं ऐसे ही [illegible]
सब आकाशमें छागये और च[illegible]
बाण ही बा[illegible] लगे। उस [illegible]
नकुल और [illegible] [illegible]
और मृत्युके स[illegible] रि[illegible]
यह पराक्रम देख [illegible]
नकुल और सहदेव [illegible] १८
तब पाण्डवोंके [illegible]
शुभ्र उधरको दौडे जि[illegible]
और सहदेव दुर्योधनसे यु[illegible]

हे [illegible] धृष्टद्युम्नने दुर्यो[illegible] ओर
अने [illegible]ये। क्रोधी [illegible]ने
भी [illegible] अनेक
फिर [illegible] न
[illegible] मारे।
[illegible] लगे।
[illegible] से

कोसलानां तथा राजन्नारायणवलस्य च ॥ २ ॥
संशप्तकास्तु समरे शरवृष्टीः समन्ततः ।
अपातयन्पार्थमूर्ध्नि जयगृद्धाः प्रमन्यवः ॥ ३ ॥
ता वृष्टीः सहसा राजंस्तरसा धारयन्प्रभुः ।
व्यगाहत रणे पार्थो विनिघ्नन्रथिनां वरान् ॥ ४ ॥
विगाह्य तद्बलानीकं कङ्कपत्रैः शिलाशितैः ।
आससाद ततः पार्थः सुशर्माणं वरायुधम् ॥ ५ ॥
स तस्य शरवर्षाणि ववर्ष रथिनां वरः ।
तथा संशप्तकाश्चैव पार्थ बाणैः समार्पयन् ॥ ६ ॥
सुशर्मा तु ततः पार्थं विध्वा दशभिराशुगैः ।
जनार्दनं त्रिभिर्बाणैरहनद्दक्षिणे भुजे ॥ ७ ॥
ततोऽपरेण भल्लेन केतुं विव्याध मारिष ।
स वानरवरो राजन्विश्वकर्मकृतो महान् ॥ ८ ॥
ननाद सुमहानादं भीषयाणो जगर्ज च ।
कपेरतु निनदं श्रुत्वा सन्त्रस्ता तव वाहिनी ॥ ९ ॥
भयं विपुलमाधाय निश्चेष्टा समपद्यत ।
ततः सा शुशुभे सेना निश्चेष्टावस्थिता नृप ॥ १० ॥

देशीय क्षत्री, नारायणी सेना और संशप्तक गणका नाश कर रहे थे ॥ वहां अनेक संशप्तक वीर जयकी इच्छासे क्रुद्ध होकर अर्जुनके ऊपर चारों ओरसे बाणोंकी वर्षा करने लगे ॥(१-३)

अर्जुन उन सबके बाणोंको काटते हुए और शत्रुओंको मारते हुए साहस और शीघ्रताके साथ कौरवोंकी सेनामें घुसने लगे ॥ उस सेनामें प्रवेश करके महाबाहु अर्जुनने युद्ध करनेका यत्न किया ॥ उन्होंने उनकी उस विशाल सेनाके बड़े बड़े रथियोंको मारते हुए तीक्ष्ण बाणोंसे विदीर्ण कर डाला ॥ (४-५)

सुशर्माने उनके ऊपर अनेक बाण चलाये; इसी प्रकार संशप्तक सेना भी अर्जुन पर बाण चलाने लगी ॥ (६-७)

अनन्तर राजा सुशर्माने क्रोध करके अर्जुनके सीनेमें दस और कृष्णके दहने हाथमें तीन बाण मारे और अर्जुनकी ध्वजामें एक बाण मारा इस बातके लगनेसे विश्वकर्माका बनाया हुआ बड़ा भारी, कपिराज हनुमानके चिह्नसे युक्त ध्वजा सिंहनाद करने लगी ॥ उस ध्वजाके सिंहनादको सुनकर तुम्हारी सेना भयसे व्याकुल हो गई ॥ उस समय तुम्हारी सेना निश्चेष्ट होकर खड़ी रह गई ॥ (८-१०)

आच्छादयन्दिशः सर्वाः सूर्यस्येवांशवो यथा।
बाणभूते ततस्तस्मिन्सञ्छन्ने च नभस्तले ॥ १६ ॥
यमाभ्यां ददृशे रूपं कालान्तकयमोपमम्।
पराक्रमं तु तं दृष्ट्वा तव सूनोर्महारथाः ॥ १७ ॥
मृत्योरुपान्तिकं प्राप्तौ माद्रीपुत्रौ स्म मेनिरे।
ततः सेनापती राजन्पाण्डवस्य महारथः ॥ १८ ॥
पार्षतः प्रययौ तत्र यत्र राजा सुयोधनः।
माद्रीपुत्रौ ततः शूरौ व्यतिक्रम्य महारथौ ॥ १९ ॥
धृष्टद्युम्नस्तव सुतं वारयामास सायकैः।
तमविध्यदमेयात्मा तव पुत्रो ह्यमर्षणः ॥ २० ॥
पाञ्चाल्यं पञ्चविंशत्या प्रहसन्पुरुषर्षभः।
ततः पुनरमेयात्मा तव पुत्रो ह्यमर्षणः ॥ २१ ॥
विद्ध्वा ननाद पाञ्चाल्यं षष्ट्या पञ्चभिरेव च।
तथास्य सशरं चापं हस्तावापं च मारिष ॥ २२ ॥
क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे।
तदपास्य धनुश्छिन्नं पाञ्चाल्यः शत्रुकर्शनः ॥ २३ ॥
अन्यदादत्त वेगेन धनुर्भारसहं नवम्।
प्रज्वलन्निव वेगेन संरम्भाद्रुधिरेक्षणः ॥ २४ ॥

थे ॥ जिस प्रकार सूर्यकी किरण जगत्में छा जाती हैं ऐसे ही दुर्योधनके बाण सब आकाशमें छागये और चारों ओर बाण ही बाण दीखने लगे। उस समय नकुल और सहदेवने दुर्योधनको यम और मृत्युके समान देखा, तुम्हारे पुत्रका यह पराक्रम देख सब महारथोंने जाना कि नकुल और सहदेव मर गये। १४-१८

तब पाण्डवोंके सेनापति महारथ धृष्टद्युम्न उधरको दौडे जिधर महारथ नकुल और सहदेव दुर्योधनसे युद्ध कर रहे थे। हे महाराज! धृष्टद्युम्नने दुर्योधनकी ओर अनेक बाण चलाये। क्रोधी दुर्योधनने भी धृष्टद्युम्नके शरीरमें अनेक बाण मारे॥ फिर पुरुषसिंह दुर्योधनने धृष्टद्युम्नके शरीरमें पच्चीस बाण मारे। फिर पैंसठ बाण मार कर गर्जने लगे। (१८-२२)

अनन्तर एक बाणसे बाण सहित धनुष और चमडोंका पञ्जा अर्थात् हत्थी काट दी, शत्रुनाशन धृष्टद्युम्नने उस धनुषको फेंक कर एक नवीन धनुष शीघ्रतामे धारण किया। उस समय

आमन्त्र्य च तथा योधाञ्शरैरासन्नयोधिभिः ।
छादयामास समरे केशवं चेदमब्रवीत् ॥ १९ ॥
पश्य कृष्ण महाबाहो संशप्तकगणान्बहून् ।
कुर्वाणान्दारुणं कर्म वध्यमानान्सहस्रशः ॥ २० ॥
रथबन्धमिमं घोरं पृथिव्यां नास्ति कश्चन ।
यः सहेत पुमाँल्लोके मदन्यो यदुपुङ्गव ॥ २१ ॥
इत्येवमुक्त्वा बीभत्सुर्देवदत्तमथाधमत् ।
पाञ्चजन्यं च कृष्णोऽपि पूरयन्निव रोदसी ॥ २२ ॥
तं तु शङ्खरवं श्रुत्वा संशप्तकवरूथिनी ।
सञ्चचाल महाराज विस्मरन्ती चाद्रवङ्गमम् ॥ २३ ॥
पादबन्धं ततश्चक्रे पाण्डवः परवीरहा ।
नागमस्त्रं महाराज सम्प्रकीर्य मुहुर्मुहुः ॥ २४ ॥
ते बद्धाः पादबन्धेन पाण्डवेन महात्मना ।
निश्चेष्टाश्चाभवन्राजन्नद्रयसारमया इव ॥ २५ ॥
निश्चेष्टांस्तु ततो योधानवधीत्पाण्डुनन्दनः ।
यथेन्द्रः समरे दैत्यांस्तारकस्य वधे पुरा ॥ २६ ॥
ते वध्यमानाः समरे मुमुचुस्तं रथोत्तमम् ।

अपने रथपर चढ़े हुए अनेक वीरोंको भूमिपर गिराया और अपने समीपवर्ती बाणोंसे अनेक पास आये हुए वीरोंको छा लिया और कृष्णसे यों बोले । १६-१९

से सब आकाश और पृथ्वी पूरित होगई ॥ इस शङ्खके शब्दको सुन संशप्तकोंकी सेना काँपने और भयसे भागने लगी । अनन्तर अर्जुनने नाग बाण चलाकर

रथं सोपस्करं छत्रं शक्तिं खड्गं गदां ध्वजम् ॥ ३३ ॥
भल्लैश्चिच्छेद दशभिः पुत्रस्य तव पार्षतः।
तपनीयाङ्गदं चित्रं नागं मणिमयं शुभम् ॥ ३४ ॥
ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः।
दुर्योधनं तु विरथं छिन्नवर्मायुधं रणे ॥ ३५ ॥
भ्रातरः पर्यरक्षन्त सोदरा भरतर्षभ।
तमारोप्य रथे राजन्दण्डधारो जनाधिपः ॥ ३६ ॥
अपाहरदसम्भ्रान्तो धृष्टद्युम्नस्य पश्यतः।
कर्णस्तु सात्यकिं जित्वा राजगृद्धी महाबलः ॥ ३७ ॥
द्रोणहन्तारमुग्रेषुं सस्काराभिमुखो रणे।
तं पृष्ठतोऽभ्ययात्तूर्णं शैनेयो वितुदञ्शरैः ॥ ३८ ॥
वारणं जघनोपान्ते विषाणाभ्यामिव द्विपः।
स भारत महानासीद्योधानां सुमहात्मनाम् ॥ ३९ ॥
कर्णपार्षतयोर्मध्ये त्वदीयानां महारणः।
न पाण्डवानां नास्माकं योधः कश्चित्पराङ्मुखः ॥४०॥
प्रत्यदृश्यत्ततः कर्णः पाञ्चालांस्त्वरितो ययौ।

सारथीको मार डाला॥ एकसे सुवर्ण भूषित धनुष, एकसे छत्र, रथ, खड्ग और गदा आदि सब शस्त्र काट दिये। अनन्तर धृष्टद्युम्नने दश बाणोंसे तुम्हारे पुत्रके मणिजटित नागको काट दिया। सब वीरोंने देखा कि दुर्योधनकी ध्वजा, रथ, शस्त्र कवच कट गये। हे राजन्! तब उनके भाई उनकी रक्षा करनेको दौडे। (३१—३६)

उसी समय राजा दण्डधारने दुर्योधनको अपने रथपर चढा लिया और सावधान होकर धृष्टद्युम्नके आगेसे हटा दिया, सात्यकिको जीतकर कर्ण भी दुर्योधनकी रक्षाको चले, वहां जाकर द्रोणाचार्यके मारनेवाले धृष्टद्युम्नके ऊपर अनेक बाण वर्षाने लगे। इनके पीछे अनेक बाण वर्षाते हुए सात्यकी दौडे, जैसे मतवाला हाथी किसी हाथी को दांतसे मारता हुआ दौडता है, ऐसेही सात्यकी कर्णके पीछे दौडे। (३६-३९)

हे राजन्! यह वीरोंका घोर युद्ध हुआ जिस समय पाण्डव और दुर्योधनकी विजयके लिये दोनों सेनापति युद्ध करने लगे। तब दोनों ओरसे कोई वीर युद्धसे न भागा॥ हे नरश्रेष्ठ! कर्णको धृष्टद्युम्नकी ओर आते देख अनेक

अर्जुनं हृदये विध्वा विव्याधान्यैस्त्रिभिः शरैः ।
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ॥ ३६ ॥
तत उच्चुक्रुशुः सर्वे हतः पार्थ इति स्म ह ।
ततः शङ्खनिनादाश्च भेरीशब्दाश्च पुष्कलाः ॥ ३७ ॥
नानावादित्रनिनदाः सिंहनादाश्च जज्ञिरे ॥
प्रतिलभ्य ततः संज्ञां श्वेताश्वः कृष्णसारथिः ॥ ३८ ॥
ऐन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे त्वरान्वितः ।
ततो बाणसहस्राणि समुत्पन्नानि मारिष ॥ ३९ ॥
सर्वदिक्षु व्यदृश्यन्त निघ्नन्ति तव वाहिनीम् ।
हयान्रथांश्च समरे जघ्नुः शतसहस्रशः ॥ ४० ॥
वध्यमाने ततः सैन्ये भयं सुमहदाविशत् ।
संशप्तकगणानां च गोपालानां च भारत ॥ ४१ ॥
नहि तत्र पुमान्कश्चिद्योऽर्जुन प्रत्यविध्यत ।
पश्यतां तत्र वीराणामहन्यत बलं तव । ॥ ४२ ॥
हन्यमानमपश्यंश्च निश्चेष्टं स्म पराक्रमे ।
अयुत तत्र योधानां हत्वा पाण्डुसुतो रणे ॥ ४३ ॥
व्यराजत महाराज विधूमोऽग्निरिव ज्वलन् ।

निजघान सुसंक्रुद्धश्चेदीनां च महारथान्।
तेषामाददतः प्राणानासीदाधिरथेर्वपुः ॥ ५० ॥
शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवोर्जितं महत्।
तत्र भारत कर्णेन मातङ्गास्ताडिताः शरैः ॥ ५१ ॥
सर्वतोऽभ्यद्रवन्भीताः कुर्वन्तो महदाकुलम्।
निपेतुरुर्व्यां समरे कर्णसायकताडिताः ॥ ५२ ॥
कुर्वन्तो विविधान्नादान्वज्रनुन्ना इवाचलाः।
गजवाजिमनुष्यैश्च निपतद्भिः समन्ततः ॥ ५३ ॥
रथैश्चाधिरथे मार्गे समास्तीर्यत मेदिनी।
नैवं भीष्मो न च द्रोणो नान्ये युधि च तावकाः॥ ५४ ॥
चक्रुः स्म तादृशं कर्म यादृशं वै कृतं रणे।
सूतपुत्रेण नागेषु हयेषु च रथेषु च ॥ ५५ ॥
नरेषु च महाराज कृतं स्म कदनं महत्।
मृगमध्ये यथा सिंहो दृश्यते निर्भयश्चरन् ॥ ५६ ॥
पाञ्चालानां तथा मध्ये कर्णोऽचरदभीतवत्।
यथा मृगगणांस्त्रस्तान्सिंहो द्रावयते दिशः ॥ ५७ ॥
पाञ्चालानां रथव्रातान्कर्णो व्यद्रावयत्तथा।
सिंहाभ्यं च यथा प्राप्य न जीवन्ति मृगाः क्वचित् ॥ ५८ ॥

बाणोंसे कर्णने व्याकुल कर दिया और उनके शरीरसे प्राण निकाल दिये।४६-५०

हे भारत! उस समय कर्णका शरीर रुधिर भीगे शिवके समान दीखता था, इसी प्रकार उन्होंने अनेक बाणोंसे हाथियोंको मार डाला॥ हाथी कर्णके बाणोंसे व्याकुल होकर पृथ्वीमें गिर गये और अनेक इधर उधरको भाग गये जैसे वज्रके लगनेसे पर्वत गिरते हैं वैसे ही वे हाथी कर्णके बाणोंसे चिल्लाते हुए गिर गये। अनेक मनुष्य और घोडे भी मरकर पृथ्वीमें गिर गये। (५०-५४)

जैसे कर्णने वीरोंको मारा ऐसा भीष्म, द्रोणाचार्य आदि तुम्हारे ओरके किसी योद्धाने नहीं मारा था। हाथी, घोडे और रथोंके बीचमें जैसा कर्णने घोर युद्ध किया ऐसा किसीने नहीं किया था, जैसे हरिणोंके बीचमें सिंह बेडर होकर घूमता है॥ ऐसा ही कर्ण उस सेनाका नाश करते हुए घूमने लगे। सिंहको देख हरिण के समान कर्णको देख पाञ्चाली योद्धा भागने लगे॥ ५४-५८

कृपस्तु शरवर्षं तद्विनिहत्य महास्त्रवित् ।
शिग्वण्डिनं रणे क्रुद्धो विव्याध दशभिः शरैः ॥ ६ ॥
ततः शिग्वण्डी कुपितः शरैः सप्तभिराहवे ।
कृपं विव्याध कुपितं कङ्कपत्रैरजिह्मगैः ॥ ७ ॥
ततः कृपः शरैस्तीक्ष्णैः सोऽतिविद्धो महारथः ।
त्र्यश्वसूतरथं चक्रे शिग्वण्डिनमथो द्विजः ॥ ८ ॥
हताश्वात्तु ततो यानादवप्लुत्य महारथः ।
खड्गं चर्म तथा गृह्य सत्वरं ब्राह्मणं ययौ ॥ ९ ॥
तमापतन्तं सहसा शरैः सन्नतपर्वभिः ।
छादयामास समरे तदद्भुतमिवाभवत् ॥ १० ॥
तत्राद्भुतमपश्याम शिलानां प्लवनं यथा ।
निश्चेष्टस्तद्रणे राजञ्छिग्वण्डी समतिष्ठत ॥ ११ ॥
कृपेण च्छादितं दृष्ट्वा नृपोत्तम शिग्वण्डिनम ।
प्रत्युद्ययौ कृपं तूर्ण धृष्टद्युम्नो महारथः ॥ १२ ॥
धृष्टद्युम्नं ततो यान्तं शारद्वतरथं प्रति ।
प्रतिजग्राह वेगेन कृतवर्मा महारथः ॥ १३ ॥
युधिष्ठिरमथायान्तं शारद्वतरथं प्रति ।

छा लिया ॥ तब शिखण्डी क्रोध करके बाण बरसाते हुए कृपाचार्यकी ओर दौड़े ॥ शस्त्र जाननेवाले कृपाचार्यने शिखण्डीके सब बाण काट दिये । और उनके शरीरमें दश बाण मारे ॥ (४–६)

कृपाचार्यकी ओर दौड़े ॥ (७–९)

शिखण्डीको आते देख कृपाचार्यने अनेक बाणोंसे छा दिया । हे राजन ! जैसे नदीमें तैरते हुए पत्थरोंको देखकर सब मनुष्य आश्चर्य करते हैं, ऐसे ही

एको बहूनभ्यपतद्गरुत्मान्पन्नगानिव ॥ ६७ ॥
तैः कर्णस्याभवद्युद्धं घोररूपं विशाम्पते ।
तादृग्याहक्पुरा वृत्तं देवानां दानवैः सह ॥ ६८ ॥
तान्समेतान्महेष्वासाञ्शरवर्षौघवर्षिणः ।
एको व्यधमदव्यग्रस्तमांसिव दिवाकरः ॥ ६९ ॥
भीमसेनस्तु संसक्ते राधेये पाण्डवैः सह ।
सर्वतोऽभ्यहनत्क्रुद्धो यमदण्डनिभैः शरैः ॥ ७० ॥
वाहीकान्केकयान्मत्स्यान्वासात्यान्मद्रसैन्धवान् ।
एकः सङ्ख्ये महेष्वासो योधयन्बहुशोभत ।
तत्र मर्मसु भीमेन नाराचैस्ताडिता गजाः ॥ ७१ ॥
प्रपतन्तो हतारोहाः कम्पयन्ति स्म मेदिनीम् ।
वाजिनश्च हतारोहाः पत्तयश्च गतासवः ॥ ७२ ॥
शेरते युधि निर्भिन्ना वमन्तो रुधिरं बहु ।
सहस्रशश्च रथिनः पातिताः पतितायुधाः ॥ ७३ ॥
ते क्षताः समदृश्यन्त भीमभीता गतासवः ।
रथिभिः सादिभिः सूतैः पादातैर्वाजिभिर्गजैः ॥७४॥

पाञ्चाल और पाण्डवोंसे युद्ध करने लगे ॥ हे राजन् ! पहले जैसे देवता और दानवोंका युद्ध हुआ था, ऐसे ही पाण्डव और कर्णका युद्ध हुआ ॥ जैसे अन्धकारको सूर्य नाश करता है ऐसे ही एकले कर्णने सावधान होकर उन वीरोंको अपने बाणोंसे व्याकुल कर दिया ॥ (६७–६९)

जिस समय कर्ण पाण्डवोंसे युद्ध करने लगे, तब यमराजके दण्डके समान बाण छोडते हुए भीमसेन क्रोध करके तुम्हारी सेनाका नाश करने लगे। भीमसेनने अपने बाणोंसे वाह्लिक, केकय, मत्स्य, वासत्य, मद्र और सिन्धुदेशके वीरोंको व्याकुल कर दिया। एकले भीमसेन अनेक वीरोंसे युद्ध करने लगे तब उसकी शोभा बहुत बढी ॥ उन्होंने अनेक हाथियोंको मर्मस्थानमें बाण मारकर गिरा दिया अनेक हाथी, घोडे, वीरोंके सहित पृथ्वीमें गिर गये, इसी प्रकार अनेक पदाति प्राणरहित होकर पृथ्वीमें सोगये इन सबके गिरनेसे पृथ्वी कांपने लगी। अनेक रथी रुधिरमें भींगकर और शस्त्रहीन होकर पृथ्वी में गिर गये। अनेक हाथी, घोडे और रथोंपर चढे वीर तथा पदाति भीमसेनके डरसे पृथ्वीमें गिर गये ॥ (७०–७४)

अभ्यापतद्मेयात्मा गौतमस्य रथं प्रति ॥ २२ ॥
दृष्ट्वा च युक्तं तं युद्धे ब्राह्मणं चरितव्रतम् ।
अपयातस्ततस्तूर्णं शिग्वण्डी राजसत्तम ॥ २३ ॥
सुकेतुस्तु ततो राजन्गौतमं नवभिः शरैः ।
विध्वा विव्याध सप्तत्या पुनश्चैनं त्रिभिः शरैः ॥२४ ॥
अथास्य सशरं चापं पुनश्चिच्छेद मारिष ।
सारथिं च शरेणास्य भृशं मर्मस्वताडयत् ॥ २५ ॥
गौतमस्तु ततः क्रुद्धो धनुर्गृह्य नवं दृढम् ।
सुकेतुं त्रिंशता बाणैः सर्वमर्मस्वताडयत् ॥ २६ ॥
स विह्वलितसर्वाङ्गः प्रचचाल रथोत्तमे ।
भूमिकम्पे यथा वृक्षश्चचाल कम्पितो भृशम् ॥ २७ ॥
स्खलतस्तस्य कायात्तु शिरो ज्वलितकुण्डलम् ।
सोष्णीषं सशिरस्त्राणं क्षुरप्रेण त्वपातयत् ॥ २८ ॥
तच्छिरः प्रापतद्भूमौ दृप्तेनाहृतमिवामिषम् ।
ततोऽस्य कायो वसुधां पश्चात्प्रापतदच्युत ॥ २९ ॥
तस्मिन्हते महाराज भ्रातास्तस्य पुरोगमाः ।
गौतमं समरे त्यक्त्वा दुद्रुवुस्ते दिशो दश ॥ ३० ॥

पराक्रमी सुकेतु कृपाचार्य के रथ के ऊपर अनेक बाण बर्षाते हुए वेगसे आये ॥ (२०–२२)

तब कृपाचार्यने क्रोध करके दूसरा नवीन दृढ धनुष धारण किया और सुकेतुके मर्मस्थानमें तीस बाण मारे,

अपारयन्तो मद्बाणान्सिंहशब्दं मृगा इव ।
दीर्यते च महत्सैन्यं सृञ्जयानां महारणे ॥ ८४ ॥
हस्तिकक्षो ह्यसौ कृष्णः केतुः कर्णस्य धीमतः ।
दृश्यते राजसैन्यस्य मध्ये विचरतो मुदा ॥ ८५ ॥
न च कर्णं रणे शक्ता जेतुमन्ये महारथाः ।
जानीते हि भवान्कर्णं वीर्यवन्तं पराक्रमे ॥ ८६ ॥
तत्र याहि यतः कर्णो द्रावयत्येष नो बलम् ।
वर्जयित्वा रणे याहि सूतपुत्रं महारथम् ॥ ८७ ॥
एतन्मे रोचते कृष्ण यथा वा तव रोचते ।
एतच्छ्रुत्वा वचस्तस्य गोविन्दः प्रहसन्निव ॥ ८८ ॥
अब्रवीदर्जुनं तूर्णं कौरवाञ्जहि पाण्डव ।
ततस्तव महासैन्यं गोविन्दप्रेरिता हयाः ॥ ८९ ॥
हंसवर्णाः प्रविविशुर्वहन्तः कृष्णपाण्डवौ ।
केशवप्रेरितैरश्वैः श्वेतैः काञ्चनभूषणैः ॥ ९० ॥
प्रविशद्भिस्तव बलं चतुर्दिशमभिद्यत ।
मेघस्तनितनिर्ह्रादः स रथो वानरध्वजः ॥ ९१ ॥

करनेवाले अनेक संशप्तकोंको मारा, अब ये युद्ध छोड कर भागे जाते हैं ॥ जैसे सिंहके शब्दको सुन कर हिरण भागते हैं, ऐसे ही मेरे बाणोंको न सह कर ये सेना भागी जाती है, ये देखो वह राजाओंकी सेनाके बीचमें घूमते हुए हस्तिकक्षामे युक्त कृष्ण वर्णवाली कर्णकी ध्वजा दीखती है ॥ (८२-८५)

मेरे सिवाय कर्णको युद्धमें और कोई भी महारथी नहीं जीत सक्ता, आप कर्णके बलको जानते ही हैं॥ जहां महारथ कर्ण युद्ध कर रहे हैं वहीं हमारे रथको ले चलो, जहां कर्ण हमारी सेना को मार रहे हैं आप हमारे रथको शीघ्र वहां ले चलिये ॥ हे कृष्ण ! हमारी तो यही इच्छा है आगे आपकी जो इच्छा हो । (८६-८८)

तो अर्जुनके ऐसे वचन सुन कृष्ण हंसकर बोले, हे अर्जुन ! तुम कौरवोंको युद्धमें जीतो। अनन्तर श्रीकृष्णसे चलाये हुए हंसके समान श्वेतवर्णवाले सुवर्णके भूषणोंसे भूषित अर्जुनके रथके घोडे जब कृष्ण और अर्जुनके रथको लेकर तेरी सेनामें वेगसे प्रवेश करने लगे तब तेरी सेना चारों ओरसे भग्न होने लगी॥ मेघके समान शब्दवाला वानर ध्वजा

सारथिं चास्य तरसा प्राहिणोद्यमसादनम् ।
भल्लेन गिरधारेण स हतः प्रापतद्रथात् ॥ ४० ॥
धृष्टद्युम्नस्तु बलवाञ्जित्वा शत्रुं महाबलम् ।
कौरवान्समरे तूर्णं वारयामास सायकैः ॥ ४१ ॥
ततस्ते तावका योधा धृष्टद्युम्नमुपाद्रवन् ।
सिंहनादरवं कृत्वा ततो युद्धमवर्त्तत ॥ ४२ ॥ [२६१७]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वयासिकया कर्णपर्वणि सकुरयुद्धे चतुष्पञ्चाशत्तमोऽध्यायः॥५४॥

सञ्जय उवाच— द्रौणिर्युधिष्ठिरं दृष्ट्वा जनेनेनाभिरक्षितम् ।
द्रौपदेयैरथा शूरैरभ्यवर्त्तत धृष्टवत् ॥ १ ॥
क्षिप्रास्त्रिपुगणान्घोरान्स्वर्णपुङ्खाञ्जिलाशितान् ।
दर्शयन्विविधान्मार्गाञ्जिघांक्षाश्च लघुहस्तवत् ॥ २ ॥
ततः खं पूरयामास शरैर्दिव्यास्त्रमन्त्रितैः ।
युधिष्ठिरं च समरे परिवार्य महास्त्रवित् ॥ ३ ॥
द्रौणायनिशरच्छन्नं न प्राज्ञायत किञ्चन ।
बाणभूतमभूत्सर्वमायोधनशिरो महत् ॥ ४ ॥
बाणजालं दिवि च्छन्नं रत्नजालविभूषितम् ।
शुशुभे भरतश्रेष्ठ वितानमिव पिष्टितम् ॥ ५ ॥

बाण चलाये, फिर एक तेज बाणसे कृतवर्माके सारथीको मारकर गिरा दिया। बलवान् धृष्टद्युम्नने अपने बलवान् शत्रु कृतवर्माको जीतकर अन्य कौरवोंको युद्धसे निवारण किया। तब तुम्हारे अनेक योद्धा सिंहके समान गर्जते हुए धृष्टद्युम्नकी ओर दौडे ॥ (३७-४२)

रहे थे; तब धैर्यसे युक्त होकर उनसे युद्ध करनेको चले गये। अश्वत्थामा अस्त्रोंको शीघ्र छोडने, बाणविद्या और रथकी अनेक गति दिखलाते हुए तथा सुवर्णके पङ्खवाले शिलापर पिये हुए बाण चलाते हुए युधिष्ठिरकी ओर चले॥ महास्त्रोंके जाननेवाले अश्वत्थामाने युधिष्ठिरकी

स च्छाद्यमानः समरे शरैः परबलार्दनः ॥ १०० ॥
दर्शयन्रौद्रमात्मानं पाशहस्त इवान्तकः।
निघ्नन्संशप्तकान्पार्थः प्रेक्षणीयतरोऽभवत् ॥ १०१ ॥
ततो विद्युत्प्रभैर्बाणैः कार्तस्वरविभूषितैः।
निरन्तरमिवाकाशमासीच्छन्नं किरीटिना ॥ १०२ ॥
किरीटिभुजनिर्मुक्तैः सम्पतद्भिर्महाशरैः।
समाच्छन्नं बभौ सर्वं काद्रवेयैरिव प्रभो ॥ १०३ ॥
रुक्मपुङ्खान्प्रसन्नाग्राञ्छरान्सन्नतपर्वणः।
अवासृजदमेयात्मा दिक्षु सर्वासु पाण्डवः ॥ १०४ ॥
मही वियद्दिशः सर्वाः समुद्रा गिरयोऽपि वा।
स्फुटन्तीति जना जज्ञुः पार्थस्य तलनिःस्वनात् ॥ १०५ ॥
हत्वा दशसहस्राणि पार्थिवानां महारथः।
संशप्तकानां कौन्तेयः प्रत्यक्षं त्वरितोऽभ्ययात् ॥ १०६ ॥
प्रत्यक्षं च समासाद्य पार्थः काम्बोजरक्षितम्।
प्रममाथ बलाद्राजन्दानवानिव वासवः ॥ १०७ ॥
प्रचिच्छेदाशु भल्लेन द्विषतामाततायिनाम्।

क्रमी महारथ संशप्तक अर्जुनके ऊपर बाण वर्षाने लगे ॥ (९६–१००)

हे राजन्! शत्रुनाशन! अर्जुन चारों ओरसे उनके बाणोंमें छिप गये। अनन्तर अर्जुन क्रोध करके इस प्रकार संशप्तकोंका नाश करने लगे, जैसे यमराज फांसि लेकर प्रजाका नाश करते है। संशप्तकोंका नाश करते हुए अर्जुनका रूप अत्यन्त सुन्दर दीखता था ॥ तब सोनेके पङ्खवाले, बिजलीके समान प्रकाशमान अर्जुनके बाणोंसे समस्त आकाश भर गया ॥ उस समय जैसे मच्छ और सर्पोंके उडनेसे आकाश दीखना सम्भव है ऐसे ही अर्जुनके बाणोंसे व्याप्त आकाश दीखने लगा ॥ (१००–१०३)

अर्जुनने तेज धार और सोनेके पङ्खवाले बाणोंसे दशों दिशाओंको पूरित कर दिया ॥ अर्जुनके ताल शब्दसे ऐसा जान पडता था, मानों आकाश, पृथ्वी, पर्वत और समुद्र फटे जाते है ॥ दश सहस्र संशप्तक वीरोंको मार कर अर्जुन उस सेनासे बाहर हुए, उस सेनासे बाहर होकर अर्जुनने काम्बोज देशकी सेनामें प्रवेश किया और उनको इस प्रकार मारने लगे, जैसे इन्द्र दानवोंको मारते हैं ॥ (१०४–१०७)

सुतसोमस्तु नवभिः शतानीकश्च सप्तभिः ।
अन्ये च बहवः शूरा विव्यधुस्तं समन्ततः ॥ १४ ॥
स तु क्रुद्धस्ततो राजन्नाशीविष इव श्वसन् ।
सात्यकिं पञ्चविंशत्या प्राविध्यत शिलीमुखैः ॥ १५ ॥
श्रुतकीर्तिं च नवभिः सुतसोमं च पञ्चभिः ।
अष्टाभिः श्रुतकर्माणं प्रतिविन्ध्यं त्रिभिः शरैः ॥१६ ॥
शतानीकं च नवभिर्धर्मपुत्रं च पञ्चभिः ।
तथेतरांस्ततः शूरान्द्वाभ्यां द्वाभ्यामताडयत् ॥ १७ ॥
श्रुतकीर्तेस्तथा चापं चिच्छेद निशितैः शरैः ।
अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः ॥ १८ ॥
द्रौणायनिं त्रिभिर्विद्ध्वा विव्याधान्यैः शितैः शरैः ।
ततो द्रौणिर्महाराज शरवर्षेण मारिष ॥ १९ ॥
छादयामास तत्सैन्यं समन्ताद्भरतर्षभ ।
ततः पुनरमेयात्मा धर्मराजस्य कार्मुकम् ॥ २० ॥
द्रौणिश्चिच्छेद विहसन्विव्याध च शरैस्त्रिभिः ।
ततो धर्मसुतो राजन्प्रगृह्यान्यन्महद्धनुः ॥ २१ ॥
द्रौणिं विव्याध सप्तत्या बाह्वोरुरसि चार्पयत् ।

कर्मीने तीन, श्रुतकीर्तिने सात, सुतसोमने नौ, और शतानीकने सात बाण चलाये और वीरोंने भी अश्वत्थामाकी ओर चारो ओरसे सहस्रों बाण चलाये ॥ (१०-१४)

महारथ श्रुतकीर्तिका धनुष तेजबाणोंसे काट दिया। अनन्तर श्रुतकीर्तिने दूसरा धनुष धारण किया ॥ (१५-१८)

हे महाराज ! अनन्तर श्रुतकीर्तिने अश्वत्थामाके शरीरमें तीन बाण मार

रथैर्हताश्वसूतैश्च हतारोहैश्च वाजिभिः ॥ ११६ ॥
द्विरदैश्च हतारोहैर्महामात्रैर्हताद्विपैः ।
अन्योन्येन महाराज कृतो घोरो जनक्षयः ॥ ११७ ॥
तस्मिन्प्रपक्षे पक्षे च निहते सव्यसाचिना ।
अर्जुनं जयतां श्रेष्ठं त्वरितो द्रौणिरभ्ययात् ॥ ११८ ॥
विधुन्वानो महच्चापं कार्तस्वरविभूषितम् ।
आददानः शरान्घोरान्स्वरश्मीनिव भास्करः ॥११९॥
क्रोधामर्षविवृत्तास्यो लोहिताक्षो बभौ बली ।
अन्तकाले यथा क्रुद्धो मृत्युः किङ्करदण्डभृत् ॥ १२०॥
ततः प्रासृजदुग्राणि शरवर्षाणि सङ्गशः ।
तैर्विसृष्टैर्महाराज व्यद्रवत्पाण्डवी चमूः ॥ १२१ ॥
स दृष्ट्वैव तु दाशार्हं स्यन्दनस्थं विशाम्पते ।
पुनः प्रासृजदुग्राणि शरवर्षाणि मारिष ॥ १२२ ॥
तैः पतद्भिर्महाराज द्रौणिमुक्तैः समन्ततः ।
सञ्छादितौ रथस्थौ तावुभौ कृष्णधनञ्जयौ ॥ १२३ ॥
ततः शरशतैस्तीक्ष्णैरश्वत्थामा प्रतापवान् ।

अनेक घोडों पर चढे वीर मर कर पृथ्वीमें गिर गये । अनेक हाथी, योद्धा और महावतोंके मरनेसे इधर उधर घूमकर मनुष्योंको मारने लगे । (११५-११७)

जिस समय अर्जुनने व्यूहके उस पक्ष और प्रपक्षको नाश कर दिया । तब उनसे युद्ध करनेके लिये अश्वत्थामा दौडे ॥ जैसे सूर्य अपनी किरणोंको जगत्में फैलाते हैं तैसे ही सुवर्ण भूषित धनुषको खींच कर अश्वत्थामा घोर बाण चलाने लगे ॥ क्रोध और पराक्रमसे भरे बलवान् अश्वत्थामाके नेत्र लाल हो रहे थे, और मुह फैल रहा था, उस समय इनका रूप ऐसा दीखता था, जैसे प्रलयकालमें दण्डधारी यमराजका ॥ (११८-१२०)

तब अश्वत्थामाने पाण्डवोंकी सेनाके ऊपर झुंडके झुंड बाणोंकी वर्षा की उससे त्रस्त होकर पांडवोंकी सेना चारों ओर भागने लगी ॥ अश्वत्थामाने रथमें बैठे हुए कृष्णको देखकर इनकी ओर सहस्रों तेज बाण छोडे॥ हे महाराज! अश्वत्थामाके बाणोंसे रथ पर बैठे हुए कृष्ण और अर्जुन छिप गये ॥ अनन्तर प्रतापवान् अश्वत्थामाने अपने सैकडों बाणोंसे कृष्ण और अर्जुनको उद्योग रहित

युधिष्ठिरस्तु त्वरितो द्रोणशिष्यो महारथः ॥ ३१ ॥
अब्रवीद् द्रोणपुत्राय रोषामर्षसमन्वितः ।
नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता ॥ ३२ ॥
यतस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ।
ब्राह्मणेन तपः कार्यं दानमध्ययनं तथा ॥ ३३ ॥
क्षत्रियेण धनुर्नाम्यं स भवान्ब्राह्मणध्रुवः ।
मिषतस्ते महाबाहो युधि जेष्यामि कौरवान् ॥ ३४ ॥
कुरुष्व समरे कर्म ब्रह्मबन्धुरसि ध्रुवम् ।
एवमुक्तो महाराज द्रोणपुत्रः स्मयन्निव ॥ ३५ ॥
युक्तं तत्त्वं च सञ्चिन्त्य नोत्तरं किञ्चिदब्रवीत् ।
अनुवर्त्य च ततः किञ्चिच्छरवर्षेण पाण्डवम् ॥ ३६ ॥
छादयामास समरे मृत्युरन्तक इव प्रजाः ।
स च्छाद्यमानस्तु तदा द्रोणपुत्रेण भारिष ॥ ३७ ॥
पार्थोऽपयातः शीघ्रं वै विहाय महतीं चमूम् ।
अपयाते ततस्तस्मिन्धर्मपुत्रे युधिष्ठिरे ॥ ३८ ॥
द्रोणपुत्ररतो राजन्प्रत्यगात्स महामनाः ।

हीयमाने च कौन्तेये कृष्णे रोषः समाविशत्।
स रोषाग्निःश्वसन्राजन्निर्दहन्निव चक्षुषा ॥ १३३ ॥
द्रौणिं ह्यपश्यत्संग्रामे फाल्गुनं च मुहुर्मुहुः।
ततः क्रुद्धोऽब्रवीत्कृष्णः पार्थं सप्रणयं तदा ॥ १३४ ॥
अत्यद्भुतमिदं पार्थ तव पश्यामि संयुगे।
अतिशेते हि यत्र त्वां द्रोणपुत्रोऽद्य भारत ॥ १३५ ॥
कच्चिद्वीर्यं यथापूर्वं भुजयोर्वा बलं तव।
कच्चित्ते गाण्डिवं हस्ते रथे तिष्ठसि चार्जुन ॥ १३६ ॥
कच्चित्कुशलिनौ बाहू मुष्टिर्वा न व्यशीर्यत।
उदीर्यमाणं हि रणे पश्यामि द्रौणिमाहवे ॥ १३७ ॥
गुरुपुत्र इति ह्येनं मानयन्भरतर्षभ।
उपेक्षां कुरु मा पार्थ नायं काल उपेक्षितुम् ॥ १३८ ॥
एवमुक्तस्तु कृष्णेन गृह्य भल्लांश्चतुर्दश।
त्वरमाणस्त्वराकाले द्रौणेर्धनुरथाच्छिनत् ॥ १३९ ॥
ध्वजं छत्रं पताकाश्च रथं शक्तिं गदां तथा।
जत्रुदेशे च सुभृशं वत्सदन्तैरताडयत् ॥ १४० ॥

अश्वत्थामाकी वृद्धि हुई और अर्जुनका पराक्रम नष्ट हुआ तब कृष्ण एकाएक महा क्रोधमें भर गये, उनके होठ फरकने लगे और नेत्र लाल होगये। १२९-१३३

उन्होंने अश्वत्थामाकी ओर इस प्रकार देखा, मानो भस्म कर देंगे, फिर अर्जुनकी ओर देख कर बोले, हे भारत! हमको तुम्हारी दशा देख बहुत आश्चर्य होता है कि अश्वत्थामा तुम्हारी ओर अनेक बाण चला रहे हैं और तुम कुछ नहीं करते। हे अर्जुन! कहो तुम्हारी भुजाओं में बल पहलेसा है या नहीं? कहो तुम्हारे हाथमें गाण्डीव धनुष तो है? तुम रथमें तो बैठे हो? कहो तुम्हारे हाथ तो अच्छे हैं? तुम्हारी मुट्ठीमें बल तो है? यह देखो युद्धमें अश्वत्थामाके बलकी कैसी वृद्धि हो रही है॥ हे कुन्तीपुत्र! तुम इसे अपना गुरुपुत्र जानकर छोडो मत, क्यों कि यह समय किसीको छोडने का नहीं है॥ (१३४—१३८)

कृष्णके वचन सुनते ही अर्जुनने अपने धनुष पर चौदह भल्ल बाण चढाये और उनको छोडकर शीघ्रता मदित अश्वत्थामाका धनुष काट दिया॥ अनन्तर ध्वजा, छत्र, पताका, रथ, शक्ति और गदाको काट दिया तथा

विव्याध भरतश्रेष्ठ चतुरश्चास्य वाजिनः ॥ ७ ॥
ततः पुनरमेयात्मा तव पुत्रो जनाधिप ।
क्षुरेण सहदेवस्य ध्वजं चिच्छेद काञ्चनम् ॥ ८ ॥
नकुलस्तु ततः क्रुद्धस्तव पुत्रं च सप्तभिः ।
जघान समरे राजन्सहदेवश्च पञ्चभिः ॥ ९ ॥
तावुभौ भरतश्रेष्ठौ ज्येष्ठौ सर्वधनुष्मताम् ।
विव्याधोरसि संक्रुद्धः पञ्चाभिः पञ्चभिः शरैः ॥ १० ॥
ततोऽपराभ्यां भल्लाभ्यां धनुषी समकृन्तत ।
यमयोः सहसा राजन्विव्याध च त्रिसप्तभिः ॥ ११ ॥
तावन्ये धनुषी श्रेष्ठे शक्रचापनिभे शुभे ।
प्रगृह्य रेजतुः शूरौ देवपुत्रसमौ युधि ॥ १२ ॥
ततर्तां रभसौ युद्धे भ्रातरौ भ्रातरं युधि ।
शरैर्वर्षतुर्घोरैर्महामेघौ यथाचलम् ॥ १३ ॥
ततः क्रुद्धो महाराज तव पुत्रो महारथः ।
पाण्डुपुत्रौ महेष्वासौ वारयामास पत्रिभिः ॥ १४ ॥
धनुर्मण्डलमेवास्य दृश्यते युधि भारत ।
सायकाश्चैव दृश्यन्ते निश्चरन्तः समन्ततः ॥ १५ ॥

ने क्रोध करके नकुलके शरीरमें नौ बाण और उन चार घोड़ोंके ऊपर एक एक बाण मारा ॥ अनन्तर तुम्हारे महा पराक्रमी पुत्रने अपने एक क्षुर बाणसे सहदेवके रथकी सोनेकी ध्वजाको काट कर गिरा दिया ॥ (७-८)

बाण मारे ॥ (९-११)

तब वे दोनों वीर इन्द्रधनुषके समान दूसरे धनुष लेकर देवपुत्रोंके समान युद्धमें शोभित हुए और वे दोनों भाई अपने चचेरे भाई दुर्योधन पर इस प्रकार बाण चलाने लगे, जैसे दो बड़े मेघ पर्वत पर

यदृच्छयैतत्सम्प्राप्तं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः कर्ण लभन्ते युद्धमीदृशम् ॥ २ ॥
सदृशैः क्षात्रियैः शूरैः शूराणां युध्यतां युधि ।
इष्टं भवति राधेय तदिदं समुपस्थितम् ॥ ३ ॥
हत्वा च पाण्डवान्युद्धे स्फीतामुर्वीमवाप्स्यथ ।
निहता वा परैर्युद्धे वीरलोकमवाप्स्यथ ॥ ४ ॥
दुर्योधनस्य तच्छ्रुत्वा वचनं क्षत्रियर्षभाः ।
हृष्टा नादानुदक्रोशन्वादित्राणि च सर्वशः ॥ ५ ॥
ततः प्रमुदिते तस्मिन्दुर्योधनबले तदा ।
हर्षयंस्तावकान्योधान्द्रौणिर्वचनमब्रवीत् ॥ ६ ॥
प्रत्यक्षं सर्वसैन्यानां भवतां चापि पश्यताम् ।
न्यस्तशस्त्रो मम पिता धृष्टद्युम्नेन पातितः ॥ ७ ॥
स तेनाहममर्षेण मित्रार्थे चापि पार्थिवाः ।
सत्यं वः प्रतिजानामि तद्वाक्यं मे निबोधत ॥ ८ ॥
धृष्टद्युम्नमहत्वाहं न विमोक्ष्यामि दंशनम् ।
अनृतायां प्रतिज्ञायां नाहं स्वर्गमवाप्नुयाम् ॥ ९ ॥
अर्जुनो भीमसेनश्च योधो यो रक्षिता रणे ।

शल्य आदि सब वीरोंसे बोले, हे कर्ण! आज प्रारब्धहीसे तुम लोगोंके लिये स्वर्गका द्वार खुला है, बडे प्रारब्धी क्षत्री ऐसे युद्धको पाते है ॥ (१-२)

हे राधापुत्र! अपने समान पराक्रमी से युद्ध करना क्षत्रियोंको बडी प्रारब्धसे प्राप्त होता है। आज वही दिन आगया है तुम लोग पाण्डवोंको मारकर सब जगत्का राज्य करो, अथवा उनके हाथसे मरकर स्वर्गको जाओ ॥ (३-४)

दुर्योधनके वचन सुन सब क्षत्री प्रसन्न होकर गर्जने लगे और अनेक प्रकारके बाजे बजने लगे ॥ जब तुम्हारी सेना इस प्रकार प्रसन्न हुई तब उनका उत्साह बढानेको अश्वत्थामा इस प्रकार बोले ॥ (५-६)

सब सेना और तुम लोगोंके देखते शस्त्रत्यागी मेरे पिताको धृष्टद्युम्नने मार डाला ॥ उस क्रोधसे और अपने मित्र दुर्योधनकी विजयके लिये हम जो सत्य प्रतिज्ञा करते हैं, उसे आपलोग सुनो ॥ धृष्टद्युम्नको विना मारे मैं कवच नहीं उतारूंगा। यदि हम प्रतिज्ञाको मैं सत्य न कर सकूं तो मुझे स्वर्ग प्राप्त न हो।

अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः ।
स पञ्चदश नाराचाञ्श्वसतः पन्नगानिव ॥ २५ ॥
जिघांसुर्भरतश्रेष्ठं धृष्टद्युम्नो व्यपासृजत ।
ते वर्म हेमविकृतं भित्त्वा रक्तः शिलाशिताः॥ २६ ॥
विविशुर्वसुधां वेगात्कङ्कबर्हिणवाससः ।
सोऽतिविद्धो महाराज पुत्रस्तेऽतिव्यराजत ॥ २७ ॥
वसन्तकाले सुमहान्प्रफुल्ल इव किंशुकः ।
स च्छिन्नवर्मा नाराचप्रहारैर्जर्जरीकृतः ॥ २८ ॥
धृष्टद्युम्नस्य भल्लेन क्षुरश्चिच्छेद कार्मुकम् ।
अथैनं छिन्नधन्वानं त्वरमाणो महीपतिः ॥ २९ ॥
सायकैर्दशभी राजन्भ्रुवोर्मध्ये समार्पयत ।
तस्य तेऽङ्गोभयन्त्रत्रं वर्मारपरिमार्जिताः ॥ ३० ॥
प्रफुल्ल पङ्कजं यद्वद् भ्रमरा मधुलिप्सवः ।
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः ॥ ३१ ॥
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ।
ततो दुर्योधनस्याश्वान्हत्वा सूतं च पञ्चभिः ॥ ३२ ॥
धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम ।

क्रोधके मारे धृष्टद्युम्नके नेत्र लाल होगये॥ अनन्तर महापराक्रमी धृष्टद्युम्नने सांप लेते हुए सांपके समान पन्द्रह बाण अपने धनुष पर चढाये,अनन्तर धृष्टद्युम्नने दुर्योधनके मारनेके लिए वे बाण, और मारके पंखवाले बाण छोड दे राजा दुर्योधनका सोनेका कवच काट कर और शरीरको छेद कर पृथ्वीमें घुस गये । (२५-२७)

तब क्रुद्ध होके राजाओंके राजा दुर्योधनने शरीरमें घुसे हुए, दुर्योधनने शरीरमें घुसे हुए बाण, उस समय इनकी शोभा ऐसी पडी,जैसे वसन्त ऋतुमें फूले हुए कचनारकी ॥ अनन्तर उन्होंने क्रोध करके धृष्टद्युम्नका धनुष काट दिया । अनन्तर शीघ्रताके सहित दश बाण उनके माथेमें मारे, उन तेज बाणोंसे धृष्टद्युम्नका सुवर्ण सोभी शरीरोंके सहित कमलके समान शोभता था (२८-३१)

अनन्तर धृष्टद्युम्नने क्रुद्ध होकर दूसरा धनुष लेके सोलह बाण छोडे, और चार बाणोंसे शल्यके चारों घोडे, और एक बाणसे सारथीको मारडाला, और एक बाणसे दुर्योधनके रथकी ध्वजाको काट डाला, और सुवर्णसे मढे हुए धनुषको काट डाला,

सञ्जय उवाच— एवमेष महानासीत्संग्रामः पृथिवीक्षिताम्।
क्रुद्धेऽर्जुने तथा कर्णे भीमसेने च पाण्डवे ॥ १ ॥
द्रोणपुत्रं पराजित्य जित्वा चान्यान्महारथान्।
अब्रवीदर्जुनो राजन्वासुदेवमिदं वचः ॥ २ ॥
पश्य कृष्ण महाबाहो द्रवन्तीं पाण्डवीं चमूम्।
कर्णं पश्य च संग्रामे कालयन्तं महारथान् ॥ ३ ॥
न च पश्यामि दाशार्ह धर्मराजं युधिष्ठिरम्।
नापि केतुर्युधां श्रेष्ठ धर्मराजस्य दृश्यते ॥ ४ ॥
त्रिभागश्चावशिष्टोऽयं दिवसस्य जनार्दन।
न च मां धार्त्तराष्ट्रेषु कश्चिद्युध्यति संयुगे ॥ ५ ॥
तस्मात्त्वं मत्प्रियं कुर्वन्याहि यत्र युधिष्ठिरः।
दृष्ट्वा कुशलिनं युद्धे धर्मपुत्रं सहानुजम् ॥ ६ ॥
पुनर्योद्धास्मि वार्ष्णेय शत्रुभिः सह संयुगे।
ततः प्रायाद्रथेनाशु वीभत्सोर्वचनाद्धरिः ॥ ७ ॥
यतो युधिष्ठिरो राजा सृञ्जयाश्च महारथाः।
अयुध्यस्तावकैः सार्धं मृत्युं कृत्वा निवर्तनम् ॥ ८ ॥
ततः संग्रामभूमिं तां वर्तमाने जनक्षये।

युद्ध करने लगे॥ (१५-१७)[२८२०]

कर्णपर्वमें सतावन अध्याय समाप्त।

कर्णपर्वमें अठावन अध्याय।

सञ्जय बोले, हे राजन्! इसप्रकार अर्जुन, कर्ण और भीमसेनका युद्ध हुआ। अश्वत्थामा आदि महारथोंको जीतकर अर्जुनने श्रीकृष्णसे कहा॥ हे महाबाहो कृष्ण! यह देखो हमारी सेना भागी जाती है, यह देखो कर्ण हमारे महारथोंको मार रहे है॥ हे महाबाहो! हम महाराज युधिष्ठिरको नहीं देखते है और न उनकी ध्वजा ही दिखायी देती है॥ (१-३)

हे कृष्ण! अब दिनके तीन भाग बीत गये, परन्तु कोई वीर मुझसे युद्ध करनेको न आया, इसलिये हमारी प्रसन्नताके लिये आप महाराजके पास हमारा रथ ले चलिये। हम उन्हें भाइयों समेत कुशलता से युक्त देख कर फिर युद्ध करनेको आवेंगे। (४-७)

अर्जुनके वचन सुन कृष्णने शीघ्र घोडोंको हांका उस समय राजा युधिष्ठिर और सृञ्जयवंशी क्षत्री मृत्युको अवश्य होनेवाली जानकर तुम्हारी सेनामें युद्ध

अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः ।
स पञ्चदश नाराचान्श्वसतः पन्नगानिव ॥ २५ ॥
जिघांसुर्भरतश्रेष्ठं धृष्टद्युम्नो व्यपासृजत ।
ते वर्म हेमविकृतं भित्त्वा राज्ञः शिलाशिताः॥ २६ ॥
विविशुर्वसुधां वेगात्कङ्कबर्हिणवाससः ।
सोऽतिविद्धो महाराज पुत्रस्तेऽतिव्यराजत ॥ २७ ॥
वसन्तकाले सुमहान्प्रफुल्ल इव किंशुकः ।
स च्छिन्नवर्मा नाराचप्रहारैर्जर्जरीकृतः ॥ २८ ॥
धृष्टद्युम्नस्य भल्लेन धनुश्चिच्छेद कार्मुकम् ।
अथैनं छिन्नधन्वानं त्वरमाणो महीपतिः ॥ २९ ॥
सायकैर्दशभी राजन्भ्रुवोर्मध्ये समार्पयत ।
तस्य तेऽशोभयन्वक्त्रं कर्मारपरिमार्जिताः ॥ ३० ॥
प्रफुल्लं पङ्कजं यद्वद् भ्रमरा मधुलिप्सवः ।
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः ॥ ३१ ॥
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ।
ततो दुर्योधनस्याश्वान्हत्वा सूतं च पञ्चभिः ॥ ३२ ॥
धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम् ।

क्रोधके मारे धृष्टद्युम्नके नेत्र लाल होगये॥ अनन्तर महापराक्रमी धृष्टद्युम्नने साप लेते हुए सांपके समान पन्द्रह बाण अपने धनुष पर चढाये,अनन्तर धृष्टद्युम्नने दुर्योधनके मारनेके लिए वे कंक और मोरके पखवाले बाण छोडे,तब राजा दुर्योधनका सोनेका पल्हथा काट कर और सारथीको वध कर पृथ्वीमें घुस गये । (२२-२६)

उन पखवाले बाणोंके लगनेसे राजा दुर्योधनके शरीरसे बहुत पीडा हुई, दुर्योधनके शरीरसे रुधिर बहने लगा, उस समय इनकी शोभा ऐसी थी,जैसे वसन्त ऋतुमें फूले हुए कचनारकी ॥ अनन्तर उन्होंने क्रोध करके धृष्टद्युम्नका धनुष काट दिया । अनन्तर शीघ्रताके सहित दस बाण उनके माथेमें मारे, उन तेज बाणोंसे धृष्टद्युम्नका सुन्दर मुख भौंरोंके सहित कमलके समान होगया ॥ (२७-३१)

अनन्तर धृष्टद्युम्नने प्रसन्न होकर उस दूसरे धनुषमें सोलह बाण लगाये, धृष्टद्युम्नने उन बाणोंसे पहले दुर्योधनके

नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः ॥ १७ ॥
जीवन्त इव दृश्यन्ते गतसत्वास्तरस्विनः।
गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान् ॥ १८ ॥
गजवाजिरथक्षुण्णान्पश्य योधान्सहस्रशः।
मनुष्यहयनागानां शरशक्त्यृष्टिपट्टिशैः ॥ १९ ॥
परिघैरायसैर्घोरैरयस्कुन्तैः परश्वधैः।
शरीरैर्बहुभिश्छिन्नैः शोणितौघपरिप्लुतैः ॥ २० ॥
गतासुभिरमित्रघ्न संवृता रणभूमयः।
बाहुभिश्चन्दनादिग्धैः साङ्गदैर्हेमभूषितैः ॥ २१ ॥
सतलत्रैः सकेयूरैर्भाति भारत मेदिनी।
सांगुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलंकृतैः ॥ २२ ॥
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम्।
बद्धचूडामणिवरैः शिरोभिश्च सकुण्डलैः ॥ २३ ॥
पतितैर्ऋषभाक्षाणां विराजति वसुन्धरा।
कबन्धैः शोणितादिग्धैश्छिन्नगात्रशिरोधरैः ॥ २४ ॥
भूर्भाति भरतश्रेष्ठ शान्तार्चिर्भिरिवाग्निभिः।
रथांश्च बहुधा भग्नान्हेमकिङ्किणिनः शुभान् ॥ २५ ॥
वाजिनश्च हतान्पश्य निष्कीर्णान्त्राञ्शराहतान्।

देखो अनेक शस्त्रधारी [illegible] योद्धा
अभी [illegible] गिसे जान [illegible] उन
वीरों [illegible]। और भू
गया है [illegible] सहस्रों
हाथी औ[illegible] मर
ये वीर श [illegible] गदा
शोभे मर [illegible] में
रिघ [illegible]
-२
।

और अङ्गुलित्राण सहित पञ्जे, हाथीके
सूडके समान वीरोंकी जांघ कुण्डल और
मुकुट शिर और बडे नेत्रवाले
मरे म [illegible] गई है ॥ (२१-२४)
ये [illegible]हित कबन्ध रुधिरमें
भीगे [illegible] हैं। यह भूमि इस
मग्न [illegible]ती है, जैसे शान्त
अ[illegible] ये घण्टा सहित रथ
पडे [illegible] २५)
आदि साजों से
पडे हैं। अनेक

तस्मिन्क्षणे नरश्रेष्ठ गजवाजिजनक्षयः ॥ ४१ ॥
प्रादुरासीदुभयतो राजन्मध्यगतेऽहनि ।
पाञ्चालास्तु महाराज त्वरिता विजिगीषवः ॥ ४२ ॥
ते सर्वेऽभ्यद्रवन्कर्णं पतत्त्रिण इव द्रुमम् ।
तांस्तथाधिरथिः क्रुद्धो गतसानान्मनस्विनः ॥ ४३ ॥
विचिन्वन्निव बाणौघैः समासाद्यदग्रगान् ।
व्याघ्रकेतुं सुवर्माणं चित्रं चोग्रायुधं जयम् ॥ ४४ ॥
शुक्लं च रोचमानं च सिंहसेनं च दुर्जयम् ।
ते वीरा रथमार्गेण परिवव्रुर्नरोत्तमम् ॥ ४५ ॥
सृजन्तं सायकान्क्रुद्धं कर्णमाहवशोभिनम् ।
युध्यमानांस्तु तान्वीरान्मनुजेन्द्र प्रतापवान् ॥ ४६ ॥
अष्टाभिरष्टौ राधेयोऽभ्यर्दयन्निशितैः शरैः ।
अथापरान्महाराज सूतपुत्रः प्रतापवान् ॥ ४७ ॥
जघान बहुसाहस्रान्योधान्युद्धविशारदान् ।
जिष्णुं च जिष्णुवर्माणं देवापिं भद्रमेव च ॥ ४८ ॥
कृतं च राजन्दुःसह चित्रं चित्रायुधं रिपुम् ।
चित्रकेतुं रोचमानं शत्रुं च महारथम् ॥ ४९ ॥

ज्ञातिभिः सहितांस्तत्र रोदमानैर्मुहुर्मुहुः ॥ ३५ ॥
व्युत्क्रान्तानपरान्योधांश्छादयित्वा तरस्विनः ।
पुनर्युद्धाय गच्छन्ति जयगृद्धाः प्रमन्यवः ॥ ३६ ॥
अपरे तत्र तत्रैव परिधावन्ति मानवाः ।
ज्ञातिभिः पतितैः शूरैर्याच्यमानास्तथोदकम् ॥ ३७ ॥
जलार्थं च गताः केचिन्निष्प्राणा बहवोऽर्जुन ।
सन्निवृत्ताश्च ते शूरास्तान्वै दृष्ट्वा विचेतसः ॥ ३८ ॥
जलं त्यक्त्वा प्रधावन्ति क्रोशमानाः परस्परम् ।
जलं पीत्वा मृतान्पश्य पिबतोऽन्यांश्च मारिष ॥ ३९ ॥
परित्यज्य प्रियानन्ये बान्धवान्बान्धवप्रियाः ।
व्युत्क्रान्ताः समदृश्यन्त तत्र तत्र महारणे ॥ ४० ॥
तथापरान्नरश्रेष्ठ सन्दष्टौष्ठपुटान्पुनः ।
भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षमाणान्समन्ततः ॥ ४१ ॥
एवं ब्रुवंस्तदा कृष्णो ययौ यत्र युधिष्ठिरः ।
अर्जुनश्चापि नृपतेर्दर्शनार्थं महारणे ॥ ४२ ॥
याहि याहीति गोविन्दं मुहुर्मुहुरचोदयत् ।
तां युद्धभूमिं पार्थस्य दर्शयित्वा च माधवः ॥ ४३ ॥

ये देखो इन मरे हुओंके पास इनके भाई बन्धु शस्त्र डाल कर खडे हुए रोरहे है ॥ ये देखो अनेक वीर,घोडे और घायल योद्धाओंको अच्छी भूमिमें ले जा रहे है । और उन्हें वहां रखकर आप क्रोध करके फिर युद्ध करने जाते है ॥ ये देखो अनेक योद्धा अपने पडे हुए बन्धुओंको पानी देनेको दौडे जाते है । ये देखो अनेक वीर अपने बन्धुओंको जल देकर लौटे चले आते है. अहह ! उनके आते हो आते वे मर गये । ये देखो उन्हें मरा देख उन्हे भी मूर्च्छा होगयी ॥ ३५-३८

हे शत्रुनाशन ! ये देखो अनेक वीर पानीके लिये दौड रहे हैं। अब ये पानी पीके लौटते हैं। इन्हें पानी नहीं मिला, ये अपने मरे हुए बन्धुओंको छोडकर भागे जाते हैं । हे पुरुष श्रेष्ठ ! ये देखो अनेक वीर भौंह टेढी किये ओठ चबाते हुए दूसरेको देख रहे हैं । (३९-४१)

ऐसा कहते हुए श्रीकृष्ण और अर्जुन महाराज युधिष्ठिरका दर्शन करने चले गये । अर्जुन बार बार कहते थे, कि शीघ्र घोटोंको चलाओ। इस प्रकार युद्ध भूमि दिखाते हुए श्रीकृष्ण अर्जुनसे

तथा कर्णमनुप्राप्य न जिजीवुर्महारथाः ।
वैश्वानरं यथा प्राप्य प्रतिदह्यन्ति वै जनाः ॥ ५९ ॥
कर्णाग्निना वने तद्वद्दग्धा भारत सृञ्जयाः ।
कर्णेन चेदिकैकेयपाञ्चालेषु च भारत ॥ ६० ॥
विश्रान्त्य नाम निहता बहवः शूरसम्मताः ।
यस्य चासीन्मती राजन्दृष्ट्वा कर्णस्य विक्रमम् ॥ ६१ ॥
नैकोऽप्याधिरथेर्जीवन्पाञ्चाल्यो मोक्ष्यते युधि ।
पाञ्चालान्व्यधमत्सङ्ख्ये सूतपुत्रः पुनः पुनः ॥ ६२ ॥
पाञ्चालानथ निघ्नन्तं कर्ण दृष्ट्वा महारणे ।
अभ्यधावत्सुसंक्रुद्धो धर्मराजो युधिष्ठिरः ॥ ६३ ॥
धृष्टद्युम्नश्च राधेयं द्रौपदेयाश्च मारिष ।
परिवव्रुरमित्रघ्नं शतशश्चापरे जनाः ॥ ६४ ॥
शिखण्डी सहदेवश्च नकुलो नाकुलिस्तथा ।
जनमेजयः शिनेर्नप्ता बहवश्च प्रभद्रकाः ॥ ६५ ॥
एते पुरोगमा भूत्वा धृष्टद्युम्नश्च संयुगे ।
कर्णमभ्यन्तमिष्वस्त्रैर्विचेरुरमितौजसः ॥ ६६ ॥
तांस्तत्राधिरथिः सङ्ख्ये चेदिपाञ्चालपाण्डवान् ।

तावकानां परेषां च राजन्दुर्मन्त्रिते तव ॥ ५२ ॥ [२८७२]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि वासुदेववाक्येऽष्टपञ्चाशत्तमोऽध्याय ॥५८॥

सञ्जय उवाच— ततः पुनः समाजग्मुरभीताः कुरुसृञ्जयाः ।
युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वयम् ॥ १ ॥
ततः प्रववृते भीमः संग्रामो लोमहर्षणः ।
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ॥ २ ॥
तस्मिन्प्रवृत्ते संग्रामे तुमुले शोणितोदके ।
संशप्तकेषु शूरेषु किञ्चिच्छिष्टेषु भारत ॥ ३ ॥
धृष्टद्युम्नो महाराज सहितः सर्वराजभिः ।
कर्णमेवाभिदुद्राव पाण्डवाश्च महारथाः ॥ ४ ॥
आगच्छमानांस्तान्संख्ये प्रहृष्टान्विजयैषिणः ।
दधारैको रणे कर्णो जलौघानिव पर्वतः ॥ ५ ॥
समासाद्य तु ते कर्णं व्यशीर्यन्त महारथाः ।
यथाचलं समासाद्य वार्यौघाः सर्वतोदिशम् ॥ ६ ॥
तयोरासीन्महाराज संग्रामो लोमहर्षणः ।
धृष्टद्युम्नस्तु राधेयं शरेणानतपर्वणा ॥ ७ ॥
ताडयामास समरे तिष्ठतिष्ठेति चाब्रवीत् ।

हीका फल है ॥ (५२)[२८७२]

कर्णपर्वमें अठावन अध्याय समाप्त ।

कर्णपर्वमें उनसठ अध्याय ।

सञ्जय बोले, हे राजन् ! अनन्तर युधिष्ठिरको आगे करके सृञ्जय और कर्णको आगे करके हम लोग युद्ध करने लगे ॥ तब कर्ण और पाण्डवोंका घोर संग्राम हुआ, उसमें सहस्रों मनुष्य मरे, उसे देखकर वीरोंके रोए खडे होने लगे । जब यह रुधिर बहानेवाला घोर युद्ध होने लगा, तब बचे हुए संशप्तक भी युद्ध करने लगे ॥ (१-३)

धृष्टद्युम्न पाण्डव आदि सब राजोंके सहित कर्णसे युद्ध करनेको चले ॥ जैसे अनेक नदियोंके वेगको पर्वत रोकता है तैसेही इन प्रसन्न विजयी वीरोंको आते देख एकले कर्णने रोका, जैसे पर्वतके पास आकर जल इधर उधरको फैल जाता है ॥ वैसे ही कर्णके पास आकर ये सब महारथ इधर उधर होगये॥ (४-६)

हे महाराज ! धृष्टद्युम्न और कर्णका घोर युद्ध हुआ तब धृष्टद्युम्नने एक बाण कर्णकी ओर चलाया और कहा कि, खडे रहो ! खडे रहो ! तब महारथ

भीमसेनशरैश्छिन्नैराच्छन्ना वसुधाभवत् ।
तत्स्तम्भितमिवानिष्टद्भीमसेनभयार्दितम् ॥ ७५ ॥
दुर्योधनबलं सर्वं निरुत्साहं कृतव्रणम् ।
निश्चेष्टं तुमुलं दीनं बभौ तस्मिन्महारणे ॥ ७६ ॥
प्रसन्नसलिले काले यथा स्यात्सागरो नृप ।
तद्वत्तव बलं तद्वै निश्चलं समवस्थितम् ॥ ७७ ॥
मन्युवीर्यबलोपेतं दर्पात्प्रत्यवरोपितम् ।
अभवत्तव पुत्रस्य तत्सैन्यं निष्प्रभं तदा ॥ ७८ ॥
तद्बलं भरतश्रेष्ठ वध्यमानं परस्परम् ।
रुधिरौघपरिक्लिन्नं रुधिरार्द्रं बभूव ह ॥ ७९ ॥
जगाम भरतश्रेष्ठ वध्यमानं परन्परम् ।
सूतपुत्रो रणे क्रुद्धः पाण्डवानामनीकिनीम् ॥ ८० ॥
भीमसेनः क्षुरैरुग्रैरपि द्रावयन्तौ चिरंजतुः ।
वर्तमाने तथा रौद्रे संग्रामेऽद्भुतदर्शने ॥ ८१ ॥
निरस्य पृतनामध्ये संज्ञप्तवरणान्बहून ।
अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत् ॥ ८२ ॥
प्रभग्नं बलमेतद्धि घोरत्रसानं जनार्दन ।
एते द्रवन्ति रणाः संज्ञप्तवरसत्तमाः ॥ ८३ ॥

भीमसेनके बाणोंसे सब युद्ध भूमि भर गई, उनके भयसे सेना कुछ न कर सकी, उस युद्धमें दुर्योधनकी सेना पाण्डवोंसे व्याकुल होकर उत्साह रहित होगई, तथा जैसे समुद्रतटमें महान् अचल विराजता है, ऐसे ही स्तम्भित होगयी, जो तेरी सेना क्रोध, दर्प और बलसे एक वीर दूसरेको मारने लगे ॥ (७५-७९)

इसी प्रकार सूतपुत्र कर्ण भी क्रोध करके पाण्डवोंकी सेनाका नाश करने लगे । इसी प्रकार भीमसेन भी कौरवोंकी सेनाको भगाने लगे । उस समय उन दोनों वीरोंने रणभूमिमें शोभने लगे । (८०—८१)

तं प्रत्यविध्यच्छैनेयः शरैर्हेमपरिष्कृतैः ॥ १७ ॥
ततो युद्धं महाराज चक्षुः श्रोत्रभयानकम् ।
आसीद्घोरं च चित्रं च प्रेक्षणीयं समन्ततः ॥ १८ ॥
सर्वेषां तत्र भूतानां लोमहर्षोऽभ्यजायत ।
तद् दृष्ट्वा समरे कर्म कर्णशैनेययोर्नृप ॥ १९ ॥
एतस्मिन्नन्तरे द्रौणिरभ्ययात्सुमहाबलम् ।
पार्षतं शत्रुदमनं शत्रुवीर्यासुनाशनम् ॥ २० ॥
अभ्यभाषत संक्रुद्धो द्रौणिः परपुरञ्जयः ।
तिष्ठतिष्ठाद्य ब्रह्मघ्न न मे जीवन्विमोक्ष्यसे ॥ २१ ॥
इत्युक्त्वा सुभृशं वीरं शीघ्रकृन्निशितैः शरैः ।
पार्षतं छादयामास घोररूपैः सुतेजनैः ॥ २२ ॥
यतमानं परं शक्त्या यतमानो महारथः ।
यथा हि समरे द्रोणः पार्षतं वीक्ष्य मारिष ॥ २३ ॥
तथा द्रौणिं रणे दृष्ट्वा पार्षतः परवीरहा ।
नातिहृष्टमना भूत्वा मन्यते मृत्युमात्मनः ॥ २४ ॥
स ज्ञात्वा समरेऽऽत्मानं शस्त्रेणावध्यमेव तु ।

सात्यकिकी ओर अनेक बाण चलाये ॥ अनन्तर कर्णने फिर सात्यकिके शरीरमें सात बाण मारे । सात्यकिने भी सोनेके पङ्खवाले, अनेक बाण कर्णकी ओर चलाये ॥ तब चारों ओर यह घोर और विचित्र युद्ध होने लगा, इसे सुन कर और देखकर वीरोंको भय होता है ॥ (१६—१८)

कर्ण और सात्यकिका घोर युद्ध देखकर सब वीरोंके रोएं खडे होगए, इसी बीचमें महापराक्रमी शत्रुनाशन अश्वत्थामा धृष्टद्युम्नसे युद्ध करनेको चले ॥ धृष्टद्युम्नको देख शत्रुनाशन अश्वत्थामा बोले, रे ब्रह्महत्यारे ! खडा रह खडा रह ! आज तू हमसे जीता नहीं बचेगा ॥ ऐसा कहकर वीर अश्वत्थामाने धृष्टद्युम्नकी ओर सहस्रों तेज बाण चलाये ॥ (१९–२२)

धृष्टद्युम्नभी इनके बाणोंको काटने का उपाय करने लगे । और अश्वत्थामा उनके मारनेका यत्न करने लगे । धृष्टद्युम्नने अश्वत्थामाको अपना काल रूप देख, बहुत दुःखी होकर युद्ध करने लगे । जैसे प्रलयमें यमराज कालसे युद्ध करनेको जाते हैं, इसी प्रकार धृष्टद्युम्न अपनेको शस्त्रसे मरने योग्य न

चलत्पताकरतां सेनां विमान घामिवाविशत् ।
तौ विदार्य महासेनां प्रविष्टौ केशवार्जुनौ ॥ ९२ ॥
क्रुद्धौ संरम्भरक्ताक्षौ विभ्राजेतां महाद्युती ।
युद्धशौण्डौ समाहूतावागतौ तौ रणाध्वरम् ॥ ९३ ॥
यज्ञभिर्विधिनाहूतौ मन्त्रे देवाविवाश्विनौ ।
क्रुद्धौ तौ तु नरव्याघ्रौ योगवन्तौ बभूवतुः ॥ ९४ ॥
तलशब्देन महिता यथा नागौ महाबने ।
विगाह्य तु रथानीकमश्वसङ्घांश्च फाल्गुनः ॥ ९५ ॥
व्यचरत्पूतनासंघे पाशहस्त इवान्तकः ।
तं दृष्ट्वा युधि विक्रान्तं सेनायां तव भारत ॥ ९६ ॥
संत्रासबहुलाभ्यः पुद्रवन्ते समन्ततः ।
ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः ॥ ९७ ॥
चतुर्दशसहस्रैस्तु तुरगाणां समन्ततः ।
द्वाभ्यां शतसहस्राभ्यां पदातीनां च धन्विनाम् ॥९८॥
शूराणां लब्धलक्षाणां विक्रान्तानां समन्ततः ।
अभ्यवर्तन्त बीभत्सुं क्रोशन्तो महारथाः ॥ ९९ ॥
शरवर्षैर्महाराज सर्वतः पाण्डुनन्दनम् ।

और चंचल पताकाओंसे युक्त वह रथ आकाशमें विमानकी भांति तेरी सेनामें प्रविष्ट हुआ ॥ (८८-९२)

वाला माघी वनमें वृक्षोंको फेंकता है, तैसे ही अर्जुन अपने बाणोंसे तुम्हारी सेनाके अग्रोंका नाश करने लगे । हे भारत ! जैसे

निशितेनाथ बाणेन द्रौणिं विव्याध पार्षतः।
ततो द्रौणिः सुसंक्रुद्धः शरैः संनतपर्वभिः ॥ ३४ ॥
आच्छादयद्दिशो राजन्धृष्टद्युम्नस्य संयुगे।
नैवान्तरिक्षं न दिशो नापि योधाः समन्ततः॥ ३५ ॥
दृश्यन्ते वै महाराज शरैश्छन्नाः सहस्रशः।
तथैव पार्षतो राजन्द्रौणिमाहवशोभिनम् ॥ ३६ ॥
शरैः संछादयामास सूतपुत्रस्य पश्यतः।
राधेयोऽपि महाराज पञ्चालान्सह पाण्डवैः ॥ ३७ ॥
द्रौपदेयान्युधामन्युं सात्यकिं च महारथम्।
एकः संवारयामास प्रेक्षणीयः समन्ततः ॥ ३८ ॥
धृष्टद्युम्नस्तु समरे द्रौणेश्चिच्छेद कार्मुकम्।
तदपास्य धनुद्रौणिरन्यदादाय कार्मुकम् ॥ ३९ ॥
वेगवान्समरे घोरे शरांश्चाशीविषोपमान्।
स पार्षतस्य राजेन्द्र धनुः शक्तिं गदां ध्वजम्॥ ४० ॥
हयान्सूतं रथं चैव निमेषाद्व्यधमच्छरैः।
स च्छिन्नधन्वा विरथो हताश्वो हतसारथिः ॥ ४१ ॥
खड्गमादत्त विपुलं शतचन्द्रं च भानुमत्।

ऐसा कहकर महापराक्रमी सेनापति धृष्टद्युम्नने एक तेज बाण अश्वत्थामाके शरीरमें मारा (३१–३४)

अश्वत्थामाने भी क्रोध करके अनेक तेज नतपर्व बाण चलाये, उन बाणोंसे धृष्टद्युम्न, रथ, योद्धा और आकाश कुछ न दीखने लगा। जैसे अश्वत्थामाके बाण सब ओर छा रहे थे, ऐसे ही धृष्टद्युम्नके बाण भी अश्वत्थामाकी ओर फैल रहे थे। राधापुत्र कर्णके देखते ही देखते धृष्टद्युम्नने अश्वत्थामाको छिपा दिया। कर्ण भी पाञ्चाल और पाण्डवोंके साथ घोर युद्ध करने लगे। एकले कर्णने द्रौपदीके पांचों पुत्र, सात्यकि और युधामन्युको रोक दिया। (३४–३८)

धृष्टद्युम्नने अश्वत्थामाका धनुष काट दिया, तब अश्वत्थामाने दूसरा धनुष धारण करके सांपके समान अनेक बाणोंसे धृष्टद्युम्नकी गदा, शक्ति, ध्वजा और धनुष काट दिया। अनन्तर क्षण मात्रमें उनके घोडे सारथी और रथको काट दिया॥ अनन्तर धृष्टद्युम्न उस घोडे और सारथीके सहित रथसे प्रकाशमान खड्ग और ढाल लेकर उतरे, परन्तु

शस्त्रं पाणिं तथा बाहुं तथापि च शिरांस्युत ॥ १०८ ॥
अङ्गाङ्गावयवैश्छिन्नैर्व्यायुधास्तेऽपतन्भुवि ।
विप्लवत्रातभिसम्भग्ना बहुशाखा इव द्रुमाः ॥१०९॥
हतस्यश्वरथपत्तीनां व्रातान्निघ्नन्तमर्जुनम् ।
सुदक्षिणादवरजः शरवृष्ट्याभ्यवीवृषत् ॥ ११० ॥
तस्यास्यतोऽर्द्धचन्द्राभ्यां बाहू परिघसन्निभौ ।
पूर्णचन्द्राभवक्त्रं च क्षुरेणाभ्यहरच्छिरः ॥ १११ ॥
स पपात ततो बाहात्सुलोहितपरिस्रवः ।
मनःशिलागिरेः शृङ्ग वज्रेणेवावदारितम् ॥ ११२ ॥
सुदक्षिणादवरजं काम्बोज द्रुद्रुर्हनम् ।
प्रांशु काम्बलपत्राक्षमत्यर्थं प्रियदर्शनम् ॥ ११३ ॥
वाञ्छनरतरभयदृशं भिन्नं हेमगिरिं यथा ।
ततोऽभवत्पुनर्युद्ध घोरमत्यर्थमद्भुतम् ॥ ११४ ॥
नानारथाश्च योधानां सभग्नास्तत्र युद्धयताम् ।
एकोपुनिहतैरश्वैः काम्बोजैर्यवनैः शकैः ॥ ११५ ॥
शोणितौघरतदा रक्तं सर्वसार्वाद्रिशाम्पने ।

आपिबन्त इव व्योम जग्मुद्रौणिरथं प्रति ॥ ५१ ॥
दृष्ट्वायातौ महावीर्यावुभौ कृष्णधनञ्जयौ ।
धृत्रद्युम्नवधे यत्नं चक्रे राजन्महाबलः ॥ ५२ ॥
विकृष्यमाणं दृष्ट्वैव धृष्टद्युम्नं नरेश्वर ।
शरांश्चिक्षेप वै पार्थो द्रौणिं प्रति महाबलः ॥ ५३ ॥
ते शरा हेमविकृता गाण्डीवप्रेषिता भृशम् ।
द्रौणिमासाद्य विविशुर्वल्मीकमिव पन्नगाः ॥ ५४ ॥
स विद्धस्तैः शरैर्घोरैर्द्रौणपुत्रः प्रतापवान् ।
उत्सृज्य समरे राजन्पाञ्चाल्यममितौजसम् ॥ ५५ ॥
रथमारुरुहे वीरो धनञ्जयशरार्दितः ।
प्रगृह्य च धनुः श्रेष्ठं पार्थं विव्याध सायकैः ॥ ५६ ॥
एतस्मिन्नन्तरे वीरः सहदेवो जनाधिप ।
अपोवाह रथेनाजौ पार्षतं शत्रुतापनम् ॥ ५७ ॥
अर्जुनोऽपि महाराज द्रौणिं विव्याध पत्त्रिभिः ।
तं द्रोणपुत्रः संक्रुद्धो बाह्वोरुरसि चार्पयत् ॥ ५८ ॥
क्रोधितस्तु रणे पार्थो नाराचं कालसंमितम् ।
द्रोणपुत्राय चिक्षेप कालदण्डमिवापरम् ॥ ५९ ॥

समान अश्वत्थामाकी ओर दौडे ॥ महापराक्रमी अर्जुन और कृष्णको आते देख अश्वत्थामा शीघ्रता सहित धृष्टद्युम्नके मारनेका यत्न करने लगे ॥ धृष्टद्युम्नको अश्वत्थामासे खिचता हुआ देख अर्जुनने अनेक बाण चलाये ॥ जैसे सांप बिलमें घुसता है ऐसे ही सोनेके पङ्खवाले अर्जुनके छोडे बाण अश्वत्थामाके शरीरमें घुसने लगे ॥ (५१-५४)

महापराक्रमी अश्वत्थामाने उन बाणोंसे पीडित होकर महातेजस्वी धृष्टद्युम्नको छोड दिया, फिर अपने अपने रथपर चढकर और धनुष धारण करके अर्जुनकी ओर अनेक बाण चलाने लगे॥ उसी समय महापराक्रमी सहदेव शत्रुनाशन धृष्टद्युम्नकी रक्षा करनेको आये, तब धृष्टद्युम्न उनके रथपर चढ कर रणभूमिसे भाग गये ॥ (५६-५७)

अर्जुनने भी क्रोध करके अश्वत्थामाके शरीरमें अनेक बाण मारे, इसी प्रकार अश्वत्थामाने भी क्रोधसे अर्जुनके बाहु और छातीमें बाण चलाये ॥ तब अर्जुनने क्रोध करके एक यमराजके दण्डके समान घोर नाराच बाण अश्वत्थामाकी

निश्चेष्टौ तावुभौ युद्धे कृत्वा माधवपाण्डवौ ॥ १२४ ॥
हाहाकृतमभूत्सर्वं स्थावरं जङ्गमं तथा ।
चराचरस्य गोप्तारौ दृष्ट्वा सञ्छादितौ शरैः ॥ १२५ ॥
सिद्धचारणसङ्घाश्च समेतुस्ते समन्ततः ।
चिन्तयन्तो भवेदद्य लोकानां स्वस्त्ययीति च ॥ १२६ ॥
न मया तादृशो राजन्दृष्टपूर्वः पराक्रमः ।
संग्रामे गादृशो द्रौणेः कृष्णौ सञ्छादयिष्यतः ॥ १२७ ॥
द्रौणेस्तु धनुषः शब्दमाहितत्रासनं रणे ।
अश्रौषं बहुशो राजन्निहत्य निनदो यथा ॥ १२८ ॥
व्यपास्य चरतो युद्धे सव्यदक्षिणमस्यतः ।
विस्पन्दमुद्धमध्यरथा भ्राजमानेव साभवत् ॥ १२९ ॥
स तथा क्षिप्रकारी च दृढहस्तश्च पाण्डवः ।
प्रमोदं परमं गत्वा प्रेक्ष्य तं द्रोणजं ततः ॥ १३० ॥
विक्रमं चित्रमं मेने आत्मनः स महारथाः ।
तस्यारम्य समरे राजन्बभूवातिदुर्दृशम् ॥ १३१ ॥
द्रौणिपाण्डवयोरेवं वर्तमाने महारणे ।
पर्धमाने च राजेन्द्र द्रोणपुत्रे महाबले ॥ १३२ ॥

सञ्जय उवाच— एतस्मिन्नन्तरे कृष्णः पार्थं वचनमब्रवीत् ।
दर्शयन्निव कौन्तेयं धर्मराजं युधिष्ठिरम् ॥ १ ॥
एष पाण्डव ते भ्राता धार्तराष्ट्रैर्महाबलैः ।
जिघांसुभिर्महेष्वासैर्द्रुतं पार्थोऽनुसार्यते ॥ २ ॥
तं चानुयान्ति संरब्धाः पाञ्चाला युद्धदुर्मदाः ।
युधिष्ठिरं महात्मानं परीप्सन्तो महाबलाः ॥ ३ ॥
एष दुर्योधनः पार्थ रथानीकेन दंशितः ।
राजा सर्वस्य लोकस्य राजानमनुधावति ॥ ४ ॥
जिघांसुः पुरुषव्याघ्र भ्रातृभिः सहितो बली ।
आशीविषसमस्पर्शैः सर्वयुद्धविशारदैः ॥ ५ ॥
एते जिघृक्षवो यान्ति द्विपाश्वरथपत्तयः ।
युधिष्ठिरं धार्तराष्ट्रा नरोत्तममिवार्थिनः ॥ ६ ॥
पश्य सात्वत भीमाभ्यां निरुद्धा धिष्ठिताः पुनः ।
जिहीर्षवोऽमृतं दैत्या शक्राग्निभ्यामिवासकृत् ॥ ७ ॥
एते बहुत्वात्त्वरिताः पुनर्गच्छन्ति पाण्डवम् ।
समुद्रमिव वार्योघाः प्रावृट्काले महारथाः ॥ ८ ॥

कर्णपर्वमें साठ अध्याय ।

सञ्जय बोले, हे राजन् ! उसी समय धर्मराज युधिष्ठिरको दिखलाते हुए श्रीकृष्ण अर्जुनसे बोले, हे अर्जुन ! देखो यही तुम्हारे भाई धर्मराज युधिष्ठिर महा-पराक्रमी मारनेकी इच्छावाले धृतराष्ट्रके पुत्रोंसे युद्ध कर रहे है । ये देखो ये कौरवोंकी सेनाके पीछे दौडे जाते है । और उनके पीछे उनकी रक्षा करते हुए महापराक्रमी महा योद्धा पांचालदेशी क्षत्री जा रहे है ॥ (१—३)

ये देखो सब जगत्का राजा दुर्योधन रथ सेनाके सहित महाराजसे युद्ध करने को चला आता है ॥ ये देखो इनके सङ्ग सब युद्धविद्याके जाननेवाले सर्पके समान क्रोधी इनके भाई भी महाराज को मारनेको जा रहे है ॥ ये देखो जैसे अनेक भिक्षुक दानीके पास जाते हैं वैसे ही धृतराष्ट्रके पुत्र हाथी घोडे और रथोंके सहित महाराजके पास जाते है ॥ (४—६)

ये देखो भीमसेन और सात्यकिने इस सेनाको इस प्रकार रोक रखा है जैसे इन्द्र और अग्नि अमृतके लिये लटते हुए दानवोंको रोकते है ॥ हे महारथ ! जैसे वर्षाकालमें अनेक जलौघ समुद्रमें जाते

स मूर्छां परमां गत्वा ध्वजयष्टिं समाश्रितः ।
तं विसंज्ञं महाराज शत्रुणा भृशपीडितम् ॥ १४१ ॥
अपोवाह रणात्सूतो रक्षमाणो धनञ्जयात् ।
एतस्मिन्नेव काले च विजयः शत्रुतापनः ॥ १४२ ॥
व्यहनत्तावकं सैन्यं शतशोऽथ सहस्रशः ।
पश्यतस्तस्य वीरस्य तव पुत्रस्य भारत ॥ १४३ ॥
एवमेष क्षयो वृत्तस्तावकानां परैः सह ।
क्रूरो विनसनो घोरो राजन्दुर्मन्त्रिते तव ॥ १४४ ॥
संशप्तकांश्च कौन्तेयः कुरूंश्चापि वृकोदरः ।
वसुषेणश्च पञ्चालान्क्षणेन व्यधमद्रणे ॥ १४५ ॥
वर्त्तमाने तथा रौद्रे राजन्वीरवरक्षये ।
उत्थितान्यगणेयानि कबन्धानि समन्ततः ॥ १४६ ॥
युधिष्ठिरोऽपि संग्रामे प्रहारैर्गाढवेदनः ।
शोणमात्रमपक्रम्य तस्थौ भरतसत्तम ॥ १४७ ॥ [२८०३]

इति श्रीमहाभारत शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सङ्कुलयुद्धे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

सञ्जय उवाच— दुर्योधनस्ततः कर्णमुपेत्य भरतर्षभ ।
अब्रवीन्मद्रराजं च तथैवान्यांश्च पार्थिवान् ॥ १ ॥

उपवासकृशो राजा भृशं भरतसत्तमः ।
ब्राह्मे बले स्थितो ह्येष न क्षात्रे हि बले विभुः॥ १७ ॥
कर्णेन चाभियुक्तोऽयं भूपतिः शत्रुतापनः ।
संशयं समनुप्राप्तः पाण्डवो वै युधिष्ठिरः ॥ १८ ॥
न जीवति महाराजो मन्ये पार्थ युधिष्ठिरः ।
यद्भीमसेनः सहते सिंहनादममर्षणः ॥ १९ ॥
नर्दतां धार्तराष्ट्राणां पुनः पुनरिन्दमः ।
धमतां च महाशङ्खान्संग्रामे जितकाशिनाम् ॥ २० ॥
युधिष्ठिरं पाण्डवेयं हतेति भरतर्षभ ।
सञ्चोदयत्यसौ कर्णो धार्तराष्ट्रान्महाबलान् ॥ २१ ॥
स्थूणाकर्णेन्द्रजालेन पार्थ पाशुपतेन च ।
प्रच्छादयन्ति राजानं शस्त्रजालैर्महारथाः ॥ २२ ॥
आतुरो हि कृतो राजा संनिषेव्यश्च भारत ।
यथैनमनुवर्तन्ते पाञ्चालाः सह पाण्डवैः ॥ २३ ॥
त्वरमाणास्त्वराकाले सर्वशस्त्रभृतां वराः ।
मज्जन्तमिव पाताले बलिनोऽप्युज्जिहीर्षवः ॥ २४ ॥
न केतुर्दृश्यते राज्ञः कर्णेन निहतः शरैः ।

करते करते दुर्बल होगये हैं। ये सदा ब्राह्मणोंके समान शील वृत्तिसे रहते है कर्मी क्षत्रियोंके समान क्रोध नहीं करते, आज महाराज युद्धिष्ठिर कर्णसे युद्ध कर रहे हैं। सो हमें सन्देह होता है॥ (१६-१८)

गर्जते हुए वार वार बडे बडे शंख बजानेवाले विजयी कौरवोंके सिंह समान शब्दको भीमसेन खडे हुए सुन रहे है। इससे हमें जान पडता है कि, महाराज नहीं जीते॥ देखो वह कर्ण महाबली धृतराष्ट्रके पुत्रोंसे कह रहा है, कि महाराज युधिष्ठिर मारे गये॥ (१९-२१)

हे अर्जुन! स्थूणाकर्ण, पाशुपत और इन्द्रजाल आदि अनेक शस्त्र राजाके रथ पर घूम रहे हैं॥ ये देखो अनेक पाञ्चाल और पाण्डव महाराजकी ओर दौडे जाते हैं। इससे जान पडता है, कि वे किसी घोर आपत्तिमें पडे हैं। इसलिये तुम भी उन्हींके पास चलो। ये देखो अनेक शस्त्र जाननेवाले, प्रधान योद्धा पातालमें डूबनेवाले बलिके समान सेना सागरमें डूबते हुए महाराजको उद्धार करनेको दौडे हुए जाते हैं॥ (२२-२४)

धृष्टद्युम्नस्य तं सङ्ख्ये निहनिष्यामि सायकैः ॥ १० ॥
एवमुक्ते ततः सर्वा सहिता भारती चमूः ।
अभ्यद्रवत कौन्तेयांस्तथा ते चापि पाण्डवाः ॥ ११ ॥
स संनिपातो रथयूथपानां बभूव राजन्नतिभीमरूपः ।
जनक्षयः कालयुगान्तकल्पः प्रावर्त्ततोग्रे कुरुसृञ्जयानाम् ॥ १२ ॥
ततः प्रवृत्ते युधि सम्प्रहारे भग्नानि सर्वाणि सदंवतानि ।
आसन्नमेतानि सहाप्सरोभिर्दिदृक्षमाणानि नरप्रवीरान् ॥ १३ ॥
दिव्यैश्च माल्यैर्विविधैश्च गन्धैर्दिव्यैश्च रत्नैर्विविधैर्नरेन्द्रान् ।
रणे स्म कर्मोद्धतताः प्रवीरानयाचिरञ्चप्सरसः प्रहृष्टाः ॥ १४ ॥
वर्मोरणस्तांश्च निषेदुषस्ता न्निषेदुषश्च सर्वानपि योधमुख्यान् ।
निषेद्यमाणारन्दनिलेन योधाः परस्परघ्ना धरणीं निषेतुः ॥ १५ ॥
सा दिव्यमाल्यैरवकीर्यमाणा सुवर्णपुङ्खैश्च शरैर्विचित्रैः ।
नक्षत्रसङ्घैरिव चित्रिता द्यौः विनिर्ययौ योधवरैर्विचित्रा ॥ १६ ॥
ततोऽन्तरिक्षादपि साधुवादैर्वादित्रघोषैः सहुतीर्यमाणः ।
ज्याघोषनेमिस्वनसादयित्र्यः समाकुलः खाऽभवत्सम्प्रहारः ॥ १७ ॥ २८२०

इति श्रीमहाभारते सविस्तरायां द्रोणाभिख्यायां कर्णपर्वणि अश्वत्थामसन्धिने नवत्यधिकशततमोऽध्यायः ॥ ९३ ॥

दिशो विप्रेक्षते सर्वास्त्वदर्थमिति मे मतिः ॥ ३४ ॥
पश्य पार्थ धनुः श्रेष्ठं विकर्षन्साधु शोभते।
शत्रुं जित्वा यथा शक्रो देवसङ्घैः समावृतः ॥ ३५ ॥
एते नर्दन्ति कौरव्या दृष्ट्वा कर्णस्य विक्रमम्।
त्रासयन्तो रणे पाण्डून्सृञ्जयांश्च समन्ततः ॥ ३६ ॥
एष सर्वात्मना पाण्डूंस्त्रासयित्वा महारणे।
अभिभाषति राधेयः सर्वसैन्यानि मानद ॥ ३७ ॥
अभिद्रवत भद्रं वो द्रुतं द्रवत कौरवाः।
यथा जीवन्न वः काश्चिन्मुच्येत युधि सृञ्जयः ॥ ३८ ॥
तथा कुरुत संयत्ता वयं यास्याम पृष्ठतः।
एवमुक्त्वा गतो ह्येष पृष्ठतो विकिरञ्छराम् ॥ ३९ ॥
पश्य कर्ण रणे पार्थ श्वेतच्छत्रविराजितम्।
उदयं पर्वतं यद्वच्छशाङ्केनाभिशोभितम् ॥ ४० ॥
पूर्णचन्द्रनिकाशेन मूर्ध्नि च्छत्रेण भारत।
ध्रियमाणेन समरे श्रीमच्छतशलाकिना ॥ ४१ ॥
एष त्वां प्रेक्षते कर्णः सकटाक्षं विशाम्पते।
उत्तमं जवमास्थाय ध्रुवमेष्यति संयुगे ॥ ४२ ॥
पश्य ह्येनं महाबाहो विन्धुन्वानं महद्धनुः।

तेरे लिये मानो सब ओर देख हैं। देखो कौरवों के बीचमें खडेहुए कर्ण इस प्रकार धनुष खींच रहे है, जैसे दानवोंको जीत कर देवतोंके बीचमें इन्द्र ॥ ३२-३५

कर्णका पराक्रम देखकर कौरव गर्ज रहे है ॥ और तुम्हारी सेनाको डरा रहे है। देखो राधापुत्र तुम्हारी ओर सृंजयोंकी सेनाको जीतकर अपनी सेनाके पीछे खडे है। इस रीतिसे सब प्रकारसे पाण्डवोंकी सेनाको त्रस्त करके ये अपनी सेनाको आज्ञा दे रहे है, कि तुम लोग जल्दी दौडो मारो, कोई सृञ्जय जीता न जाने पावे ॥ (३६—३८)

ये इस आज्ञाको देकर सेनाके पीछे चले गये। और वहींसे बाण चला रहे है ॥ देखो कर्ण युद्धमें सफेद छत्र धारण किये इस प्रकार विराज रहे हैं, जैसे चन्द्रमाके सहित उदयाचल। ये देखो सफेद छत्रधारी कर्ण अब केवल तुम्हारी ही ओर देख रहे हैं। अब ये रथको शीघ्र चलाकर तुमसे घोर युद्ध करनेको आया चाहते हैं। ये देखो कर्ण अपने

अवेक्षमाणो गोविन्दः सव्यसाचिनमब्रवीत् ॥ ९ ॥
पश्य पार्थ महारौद्रो वर्तते भरतक्षयः ।
पृथिव्यां क्षत्रियाणां वै दुर्योधकृते महान् ॥ १० ॥
पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम् ।
सूतानामपविद्धानि कलापांश्च महाधनान् ॥ ११ ॥
जातरूपमयैः पुङ्खैः शरांश्चानतपर्वणः ।
तैलधौतांश्च नाराचान्निर्मुक्तान्पन्नगानिव ॥ १२ ॥
हस्तिदन्तमयान्खड्गाञ्जातरूपपरिष्कृतान् ।
चर्माणि चापविद्धानि रुक्मगर्भाणि भारत ॥ १३ ॥
सुवर्णविकृतान्पाराज्यशक्तीः कनकभूषणाः ।
जाम्बूनदमयैः पट्टैर्बद्धाश्च विपुला गदाः ॥ १४ ॥
जातरूपमयीश्चष्टीः पट्टिशान्हेमभूषणान् ।
दृष्ट्वा कनकचित्रांश्च विप्रविद्धान्परश्वधान् ॥ १५ ॥
अयःशुल्वांश्च पतितान्मुसलानि शुभानि च ।
शक्तयो पश्य विप्राग्र्य विपुलान्परिघांस्तथा ॥ १६ ॥
पट्टाणि चापविद्धानि तोमरांश्च महारणे ।

थार रहे थे, उस युद्ध में घोर युद्ध भूमि-को देख कर श्रीकृष्ण अर्जुन से बोले ॥ (७—९)

सोनेके तारोंसे गुंथे हुए उत्तम पट्टस और सोनेके तारोंके कवच कटे हुए पड़े हैं। ये दण्डों सोनेके तारोंसे विचित्र प्राप्त,

आर्यां युद्धे मतिं कृत्वा प्रत्येहि रथयूथपम् ।
पञ्च ह्येतानि मुख्यानि रथानां रथसत्तम ॥ ५१ ॥
शतान्यायान्ति समरे बलिनां तिग्मतेजसाम् ।
पञ्च नागसहस्राणि द्विगुणा वाजिनस्तथा ॥ ५२ ॥
अभिसंहत्य कौन्तेय पदातिप्रयुतानि च ।
अन्योन्यरक्षितं वीर बलं त्वामभिवर्तते ॥ ५३ ॥
द्रोणपुत्रं पुरस्कृत्य तच्छीघ्रं संनिषूदय ।
निकृत्यैतद्रथानीकं बलिनं लोकविश्रुतम् ॥ ५४ ॥
सूतपुत्रं महेष्वासं दर्शयात्मानमात्मना ।
उत्तमं जवमास्थाय प्रत्येहि भरतर्षभ ॥ ५५ ॥
असौ कर्णः सुसंरब्धः पञ्चालानभिधावति ।
केतुमस्य हि पश्यामि धृष्टद्युम्नरथं प्रति ॥ ५६ ॥
समुपैष्यति पञ्चालानिति मन्ये परन्तप ।
आचचक्षे प्रियं पार्थ तवेदं भरतर्षभ ॥ ५७ ॥
राजासौ कुशली श्रीमान्धर्मपुत्रो युधिष्ठिरः ।
असौ भीमो महाबाहुः सञ्जिवृत्तश्चमूमुखे ॥ ५८ ॥

का अवलम्बन कर सेनापति कर्णके साथ युद्ध करो ॥ (४७-५१)

हे महारथ ! ये पांचसौ महातेजस्वी प्रधान रथ हैं, सो युद्ध करनेको चले आते है, ये महा पराक्रमी तेजस्वी वीरोंके पांच सहस्र हाथी और दश हजार घोडे चले आते है। लाखों पदाति चले आते है। ये सब सेना एक दूसरेकी रक्षा करती हुई तुम्हारी ही ओर चली आती है ॥ ये सेनाके आगे जगत्विख्यात महापराक्रमी वीर अश्वत्थामा चले आते है तुम यत्न करके इनको नाश करो। (५२-५४)

हे भारतकुलसिंह ! इस रथ झुण्डको मारकर महाधनुपधारी सूतपुत्रसे युद्ध करना। हे भारतकुलसिंह ! अब शीघ्र इसी सेनाकी ओर चलो। यह देखो कर्ण क्रोधमें पांचालोंकी ओर बढ रहा है, क्योंकि धृष्टद्युम्नके रथके समीप उसके रथकी ध्वजा मुझे दीख पडती है, इससे मुझे प्रतीत होता है, कि यह थोडे ही समयमें पांचालोंके समीप पहुंचेगा। (५४-५७)

हे भरतश्रेष्ठ अर्जुन ! अब मैं तुझे एक प्रिय वृत्त निवेदन करता हूं, कि ये श्रीमान् महाराजा युधिष्ठिर कुशलसे रहे

अनुकर्षानुपासङ्गान्पताका विविधध्वजान् ॥ २६ ॥
रथिनां च महागङ्धान्पाण्डुरांश्च प्रकीर्णकान् ।
निरस्तजिह्वान्मातङ्गशयानान्पर्वतोपमान् ॥ २७ ॥
ध्वजयन्तीर्विचित्राश्च हतांश्च गजवाजिनः ।
धारणानां परिस्तोमांस्तथैवाजिनकम्बलान् ॥ २८ ॥
विपाटितविचित्रांश्च रूप्यचित्रान्कुथांकुशान् ।
भिन्नाश्च बहुधा घण्टा महाङ्गिः पतितैर्गजैः ॥ २९ ॥
वैदूर्यदण्डांश्च शुभान्पतितानंकुशान्भुवि ।
यष्टीः स्वादिभुजाग्रेषु सवर्णविकृताः कशाः ॥ ३० ॥
विचित्रमणिचित्रांश्च जातरूपपरिष्कृतान् ।
अश्वास्तरपरिस्तोमान्राङ्कवान्पतितान्भुवि ॥ ३१ ॥
चूडामणिधरेन्द्राणां विचित्राः काञ्चनस्रजः ।
छत्राणि चापविद्धानि चामरव्यजनानि च ॥ ३२ ॥
चन्द्रनक्षत्रभासं च वदनं चारुकुण्डलैः ।
पद्मप्रख्यमुखिरत्यर्थं वीराणां समलंकृतैः ॥ ३३ ॥
पदनैः पश्य रुग्णाग्रां मर्दी शोणितकर्दमाम् ।
गजीयांश्चापरान्पश्य पूज्यमानान्बलवत्तनः ॥ ३४ ॥
उपारमन्तानन्यतो न्यस्तशस्त्रैर्विशाम्पते ।

समाद्रवन्ति पाञ्चाला धार्तराष्ट्रांस्तरास्विनः ।
विमृद्नन्ति नरव्याघ्रा भीमसेनबलाश्रयात् ॥ ६७ ॥
बलं परेषां दुर्द्धर्षास्त्यक्त्वा प्राणानरिन्दम ।
एते नर्दन्ति पञ्चाला ध्मापयन्ति च वारिजान्॥ ६८ ॥
अभिद्रवन्ति च रणे मृद्नन्तः सायकैः परान् ।
पश्यस्वैषां च माहात्म्यं पञ्चाला हि पराक्रमात्॥ ६९ ॥
धार्तराष्ट्रान्विनिघ्नन्ति क्रुद्धाः सिंहा इव द्विपान् ।
शस्त्रमाच्छिद्य शत्रूणां सायुधानां निरायुधाः॥ ७० ॥
तेनैवैतानमोघास्त्रान्निघ्नन्ति च नदन्ति च ।
शिरांस्येतानि पात्यन्ते शत्रूणां बाहवोऽपि च॥ ७१ ॥
रथनागहया वीरा यशस्याः सर्व एव च ।
सर्वतश्चाभिपन्नैषा धार्तराष्ट्री महाचमूः ॥ ७२ ॥
पञ्चालैर्मानसादेव हंसैर्गङ्गेव वेगितैः ।
सुभृशं च पराक्रान्ताः पाञ्चालानां निवारणे ॥ ७३ ॥
कृपकर्णादयो वीरा ऋषभाणामिवर्षभाः ।
भीमास्त्रेण सुनिर्भग्नान्धार्तराष्ट्रान्महारथान् ॥ ७४ ॥

छोडनेवाले पाञ्चालोंके अनेक प्रकारके बाणोंसे मरे हुए, वीर रहित हाथी घोडे और रथ फिरते है ॥ ये महापराक्रमी पाञ्चाल दुर्योधनकी सेनाकी ओर दौडे जाते है । ये पाञ्चाल भीमसेनके बलके आश्रयसे अपने प्राणोंका मोह छोडकर शत्रुओंकी सेनाको मार रहे हैं, गरज रहे है और शङ्ख बजा रहे है ॥ (६६-६८)

यह तुम अपने वीर पाञ्चालोंका पराक्रम देखो, ये लोग अपने बाणोंसे क्षत्रियोंका किस प्रकार नाश कर रहे हैं ॥ जैसे क्रोधी सिंह हाथियोंका नाश करते हैं तैसे ही ये पाञ्चाल शत्रुओंको मार रहे है । पाञ्चाल वीर स्वतः शस्त्र रहित होकर भी अमोघ शस्त्रवाले शत्रुओंके हाथसे शस्त्र छीनकर उसहीसे शत्रुओंको मार रहे है और गर्ज रहे हैं । उनके शस्त्रोंसे शत्रुओंके शिर और हाथ कट कटकर पृथ्वीमें गिरते हैं । यह धृष्टद्युम्नकी महासेना चारों ओरसे हाथी, घोडे और रथोंके सहित आपत्तिमें पड गयी हैं ॥ (६९-७२)

जैसे हंसोंका झुण्ड आनेसे गङ्गाका पानी गडबड होजाता है । ऐसे ही पाञ्चालोंके घूमनेसे यह सेना घबडा उठी । इनके रोकनेको सेनामें किसीकी

त्वरमाणस्ततः कृष्णः पार्थमाह गतेरिदम् ।
पश्य पाण्डव राजानमुपयातांश्च पार्थिवान् ॥ ४४ ॥
कर्ण पश्य महाराज्ञे ज्वलन्तमिव पावकम् ।
असौ भीमो महेष्वासः सन्निवृत्तो रणं प्रति ॥ ४५ ॥
तमेते विनिवर्तन्ते धृष्टद्युम्नपुरोगमाः ।
पाञ्चालसृञ्जयानां च पाण्डवानां च ये सुखम् ॥ ४६ ॥
निवृत्तश्च पुनः पार्थ भग्न शत्रुबल महत् ।
कौरवान्द्रवतो ह्येष कर्णो रोधयतेऽर्जुन ॥ ४७ ॥
अन्तकप्रतिमो वेगे शक्रतुल्यपराक्रमः ।
असौ गच्छति कौरव्य द्रौणिः शस्त्रभृतां वरः ॥ ४८ ॥
तमेव प्रद्रुतं संख्ये धृष्टद्युम्नो महारथः ।
अनुप्रयाति संग्रामे हतान्पश्य च सृञ्जयान् ॥ ४९ ॥
सर्वमाह सुदुर्धर्षो वासुदेवः किरीटिने ।
ततो राजन्महाघोरः प्रादुरासीन्महारणः ॥ ५० ॥
सिंहनादरवाश्चैव प्रादुरासन्समागमे ।
उभयोः सेनयो राजन्मृत्युं कृत्वा निवर्तनम् ॥ ५१ ॥
एवमेष क्षयो वृत्तः पृथिव्यां पृथिवीपते ।

बोले, हे पृथ्वीपुत्र ! यह देखो अनेक राजोंके साथ महाराज खड़े हैं। ये देखो सेना युद्धमें जलती हुई अग्निके समान प्रकाश कर रही है । (४३ – ४५)

सेनाका नाश कर रहे हैं ॥ ये देखो उसी अश्वत्थामाके युद्ध करनेको महारथ धृष्टद्युम्न दौड़े जाते हैं । ये देखो अनेक सृञ्जय वीर मारे हुए पड़े हैं ॥ ४६-४९

तीक्ष्णैराग्निरविप्रख्यैर्नाराचैर्दशाभिर्हतः ।
हत्वैनं पुनरायाति नागानन्यान्प्रहारिणः ॥ ८२ ॥
पश्य नीलाम्बुदनिभान्सहामात्रैरधिष्ठितान् ।
शक्तितोमरसङ्घातैर्विनिघ्नन्तं वृकोदरम् ॥ ८३ ॥
सप्त सप्त च नागांस्तान्वैजयन्तीश्च सध्वजाः ।
निहत्य निशितैर्बाणैरिछन्नाः पार्थाग्रजेन ते ॥ ८४ ॥
दशभिर्दशभिश्चैको नाराचैर्निहतो गजः ।
न चासौ धार्तराष्ट्राणां श्रूयते निनदस्तथा ॥ ८५ ॥
पुरन्दरसमे क्रुद्धे निवृत्ते भरतर्षभ ।
अक्षौहिण्यस्तथा तिस्रो धार्तराष्ट्रस्य संहताः ।
क्रुद्धेन भीमसेनेन नरसिंहेन वारिताः ॥ ८६ ॥
न शक्नुवन्ति वै पार्थ पार्थिवाः समुदीक्षितुम् ।
मध्यन्दिनगतं सूर्यं यथा दुर्बलचक्षुषः ॥ ८७ ॥
एते भीमस्य सन्त्रस्ताः सिंहस्येवेतरे मृगाः ।
शरैः सन्त्रासिताः सङ्ख्ये न लभन्ते सुखं क्वचित्॥८८॥

वाले इनके तोमर सहित दोनों हाथ काट दिये ॥ भीमसेनने अग्निके समान दश बाणोंसे निषादपुत्रको मारडाला । अब यह दूसरे वीरोंसे लडनेको चले, ये देखो काले मेघोंके समान काले, मदावतोंसे युक्त हाथियोंपर बैठे हुए अनेक वीर शक्ति तोमर और बाणोंसे भीमसेन को मार रहे हैं ॥ (७९-८३)

हे पार्थ ! देखो तुम्हारे बडे भाई भीमसेनने अपने तेज बाणोंसे सात सात हाथियोंको मारडाला और इनकी वैजयन्ती माला तथा ध्वजा कटकर पृथ्वीमें गिर गई, इधर देखो भीमसेनने अपने दश दश बाणोंसे एक एक हाथीको मार डाला । इस समय कोई धृतराष्ट्रका पुत्र कहीं नहीं गर्जता । ये देखो जहां इन्द्रके समान पराक्रमी भीमसेन क्रोध करके युद्ध कर रहे है । तहां दुर्योधनकी तीन अक्षोहिणी सेना इकट्ठी है । परन्तु एकले पुरुषसिंह भीमसेन इन सबको रोक रहे हैं । (८४-८६)

जैसे दुर्बल नेत्रवाले मनुष्य दो पहरके सूर्यकी ओर नहीं देख सकते, तैसे ही इस समय कोई राजा भीमसेनके मुखको नहीं देख सकता ॥ जैसे सिंहसे डरकर हरिण भागते हैं । ऐसे ही ये सब राजा भीमसेनके बाणोंसे व्याकुल होकर कहीं सुख नहीं पाते । (८७-८८)

विजयं च धनुः श्रेष्ठं विधुन्वानो महारथः ॥ ८ ॥
पार्षतस्य धनुश्छित्त्वा शरांश्चाशीविषोपमान् ।
ताडयामास संक्रुद्धः पार्षतं नवभिः शरैः ॥ ९ ॥
ते वर्म हेमविकृतं भित्त्वा तस्य महात्मनः ।
शोणिताक्ता व्यराजन्त शक्रगोपा इवानघ ॥ १० ॥
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महारथः ।
अथान्यद्धनुरादाय शरांश्चाशीविषोपमान् ॥ ११ ॥
कर्णं विव्याध समरे शरैः सन्नतपर्वभिः ।
तथैव राजन्कर्णोऽपि पार्षतं शत्रुतापनम् ॥ १२ ॥
छादयामास समरे शरैराशीविषोपमैः ।
द्रोणशत्रुर्महेष्वासो विव्याध निशितैः शरैः ॥ १३ ॥
तस्य कर्णो महाराज शरं कनकभूषणम् ।
सुन्दरतामें चन्द्रमा, वेगमें वायु, स्थिरतामें मेरु,क्षमामें पृथ्वी, तेजमें सूर्य, धनमें कुबेर, धीरजमें इन्द्र और बलमें विष्णुके तुल्य होगा ॥ हे कुन्ती ! यह तुम्हारा पुत्र ऐसा होगा जैसे अदितीके वामन, ये अपनी विजयसे सब शत्रुओंका नाश करेंगे और इन्हींसे तुम्हारा वंश चलेगा ॥ ये वाणी कुन्तीने शतशृंग

न माहशोऽन्यो नरदेव विद्यते धनुर्धरो देवमृते पिनाकिनम् ॥ ३० ॥
अहं हि तेनानुमतो महात्मना क्षणेन हन्यां सचराचरं जगत् ।
मया हि राजन्सादिगीश्वरा दिशो विजित्य सर्वा भवतः कृता वशे॥३१
स राजसूयश्च समाप्तदक्षिणः सभा च दिव्या भवतो ममौजसा ।
पाणौ पृषत्का निशिता ममैव धनुश्च सज्यं विततं सबाणम् ॥ ३२ ॥
पादौ च मे सरथौ सध्वजौ च न माहशं युद्धगतं जयन्ति ।
हता उदीच्या निहताः प्रतीच्याः प्राच्या निरस्ता दाक्षिणात्या विशस्ताः।
संशप्तकानां किञ्चिदेवास्ति शिष्टं सर्वस्य सैन्यस्य हतं मयार्धम् ।
शेते मया निहता भारतीयं चमू राजन्देवचमूप्रकाशा ॥ ३४ ॥
ये चास्त्रज्ञास्तानहं हन्मि चास्त्रैस्तस्माल्लोकानेष करोमि भस्म ।
जैत्रं रथं भीममास्थाय कृष्ण यावः शीघ्रं सूतपुत्रं निहन्तुम् ॥ ३५ ॥
राजा भवत्वद्य सुनिर्वृतोऽयं कर्णं रणे नाशयितास्मि बाणैः ।
इत्येवमुक्त्वा पुनराह पार्थो युधिष्ठिरं धर्मभृतां वरिष्ठम् ॥ ३६ ॥

कह और धनुष उठाकर अर्जुन महाराज युधिष्ठिरसे बोले, हे महाराज! हे पृथ्वीनाथ! हम आपसे सत्य कहते हैं, कि भगवान् शिवको छोडकर और जगत्में हमारे समान धनुपधारी कोई नहीं है॥ हे पृथ्वीनाथ! मै उस महात्माकी आज्ञासे क्षण भरमें चर और अचरको नाश कर सक्ता हूं। हमने सब राजोंके सहित समस्त पृथ्वी जीत कर आपके वशमें कर दी है॥ मेरे ही प्रतापसे आपने दाक्षिणाके साहित राजसूय यज्ञ समाप्त किया मैने आपके लिये उत्तम सभा बनवाई आप हमारे हाथ, धनुप और दिव्य बाणोंको देखिये॥ (२९-३२)

मेरे पैरमें रथ और ध्वजाका चिन्ह है, इसलिये मेरे समान मनुष्यको युद्धमें कोई नहीं जीत सक्ता। मैने पूर्व, पश्चिम, उत्तर दक्षिणके सब क्षत्रियोंको जीता है! हे राजन्! मैंने देवतोंकी सेनाके तुल्य कौरवोंकी आधी सेना मार डाली, संशप्तक भी थोडे ही शेष हैं। मेरे मारे हुए अनेक वीर पृथ्वीमें सो रहे हैं॥ मैं अस्त्र जाननेवालोंसे अस्त्रोंहीसे युद्ध करता हूं। इसलिये जगत्को भस्म कर सक्ता हूं। अब हम और कृष्ण रथपर बैठकर कर्णको मारने जाते है॥ हे कृष्ण! अब चलिये हम आज अपने बाणोंसे कर्णको अवश्य मारेंगे अब महाराज निर्विघ्न सब लोकका राज्य करें॥(३३–३६)

ऐसा कह कर अर्जुन फिर धर्मधारियोंमें श्रेष्ठ युधिष्ठिरसे बोले, हे महाराज!

अथापि जीवेत्समरे घटोत्कचस्तथापि नाहं समरे पराङ्मुखः ।
मम ह्यभाग्यानि पुराकृतानि पापानि नूनं बलवन्ति युद्धे ॥ २२ ॥
तृणं च कृत्वा समरे भवन्तं ततोऽहमेवं निकृतो दुरात्मना ।
वैकर्तनेनैव तथा कृतोऽहं यथा ह्यशक्तः क्रियते ह्यबान्धवः ॥ २३ ॥
आपद्गतं कश्चन यो विमोक्षेत्स बान्धवः स्नेहयुक्तं सुहृच्च ।
एवं पुराणा मुनयो वदन्ति धर्मः सदा सद्भिरनुष्ठितश्च ॥ २४ ॥
त्वष्ट्रा कृतं वाहमकूजनाक्षं शुभं समास्थाय कपिध्वजं तम् ।
खड्गं गृहीत्वा हेमपट्टानुबद्धं धनुश्चेदं गाण्डिवं तालमात्रम्॥ २५ ॥
स केशवेनोह्यमानः कथं त्वं कर्णाद्भीतो व्यपयातोऽसि पार्थ ।
धनुश्च तत्केशवाय प्रयच्छ यन्ता भविष्यस्त्वं रणे केशवस्य ॥ २६ ॥
तदा हनिष्यत्केशवः कर्णमुग्रं मरुत्पतिर्वृत्रमिवात्तवज्रः ।
राधेयमेतं यदि नाद्यशक्तश्चरन्तमुग्रं प्रतिबाधनाय ॥ २७ ॥
प्रयच्छान्यस्मै गाण्डिवमेतदद्य त्वत्तो योऽस्त्रैरभ्यधिको वा नरेन्द्रः ।
अस्मान्नैवं पुत्रदारैर्विहीनान्सुखाद्भ्रष्टान्राज्यनाशाच्च भूयः ॥ २८ ॥

तो मेरा यह निरादर न होता ॥ (१९-२१)

यदि आज महाबलवान घटोत्कच जीता होता तो मै युद्ध छोडकर काहे-को भागता ? मेरे पूर्व जन्मके पापोंसे ये दोनों पुत्र मारे गये, तुमको तिनकेके समान समझकर दुरात्मा कर्णने मेरी ऐसी दुर्दशा की जैसे कोई शत्रु अशक्त और बान्धवहीन की करता है ॥ पुराने मुनि कहते है कि जो किसीको प्रेम करके आपत्तिसे निकाल दे वही उसका बन्धु है, महात्मा लोग सदासे इसी धर्मको करते है ॥ (२२-२५)

तुम इस उत्तम शब्दवाले विश्वकर्मा के बनाये सुन्दर ध्वजायुक्त रथपर बैठ-कर सोनेकी मूठवाले खड्ग और ताडके बराबर गाण्डीव धनुष लेकर तथा कृष्ण को सारथी बना कर भी कर्णसे डरकर युद्ध छोड भाग आये, अब यह धनुष कृष्णको दो और तुम घोडे हांको तब ये जिस प्रकार इन्द्रने वज्र हाथमें लेकर वृत्रासुरको मारा था, तैसे ही हमारी सेनामें घूमते हुए महा पराक्रमी राधापु-त्र कर्णको मारेंगे ॥ (२५–२७)

हमें निश्चय होगया, कि तुम कर्णके मारनेमें समर्थ नहीं हो ॥ अथवा जो तुमसे अधिक शस्त्रविद्या जानता हो उस ही राजाको यह अपना गाण्डीव धनुष दे दो, अर्थात् तुम कुन्तीके गर्भसे पांच-वें महीनेमें नष्ट हो जाते अथवा उनके गर्भसे जन्म न लेते तो आज हमको

पापस्य पापव्यसनान्वितस्य विमूढबुद्धेरलसस्य भीरोः ॥ ४४ ॥
वृद्धावमन्तुः परुषस्य चैव किं ते चिरं मे ह्यनुसृत्य रूक्षम्।
गच्छाम्यहं वनमेवाद्य पापः सुखं भवान्वर्त्ततां मद्विहीनः॥ ४५ ॥
योग्यो राजा भीमसेनो महात्मा क्लीबस्य वा मम किं राज्यकृत्यम्।
न चापि शक्तः परुषाणि सोढुं पुनस्तवेमानि रुषान्वितस्य॥ ४६ ॥
भीमोऽस्तु राजा मम जीवितेन न कार्यमद्यावमतस्य वीर।
इत्येवमुक्त्वा सहसोत्पपात राजा ततस्तच्छयनं विहाय ॥ ४७ ॥
इयेष निर्गन्तुमथो वनाय तं वासुदेवः प्रणतोऽभ्युवाच।
राजन्विदितमेतद्वै यथा गाण्डीवधन्वनः ॥ ४८ ॥
प्रतिज्ञा सत्यसन्धस्य गाण्डीवं प्रति विश्रुता।
ब्रूयाच्च एवं गाण्डीवमन्यस्मै देयमित्युत ॥ ४९ ॥
वध्योऽस्य स पुमाँल्लोके त्वया चोक्तोऽयमीदृशम्।
ततः सत्यां प्रतिज्ञां तां पार्थेन प्रतिरक्षता ॥ ५० ॥
मच्छन्दादवमानोऽयं कृतस्तव महीपते।
गुरूणामवमानो हि वध इत्यभिधीयते ॥ ५१ ॥

को ये सब दुःख भोगने पडे। इसलिये हम बडे पापी, मूर्ख, आलसी, कादर, कुलको नाश करनेवाले, और पापी है। सो तुम हमारा शिर काट दो मैंनेबूढोंकी सेवा नहीं की इसीसे दुष्ट हूं। अब तुम हमारा सिर काटडालो। पहले कठोर वचन कह कर अब प्रणाम करनेसे क्या होगा। और यदि तुम हमको न मारोगे तो हम वनको चले जावेंगे, तुम हमारे विना सुखसे रहना॥ (४२-४५)

भीससेन राजा होनेके योग्य हैं, मैं नपुंसक राज्य क्या करूंगा। हम तुम्हारे और कठोर वचन नहीं सह सक्ते भीमसेन राजा होय अब हम और जीना नहीं चाहते ऐसा कह कर राजा पलंगसे उतरे और वनको जानेके लिये उपस्थित हुए, तब श्रीकृष्णने दण्डवत् करके कहा; हे राजन्! आप जानते है, कि अर्जुनने यह प्रतिज्ञा की थी कि जो कोई हमसे कहै कि तुम अपना गाण्डीव धनुष दूसरेको दे दो, तो उसको हम मार डालेंगे। आपने वैसा ही कहा इसलिये सत्यवादी अर्जुनने भी अपनी प्रतिज्ञा पूरी करली॥ (४६—५०)

हे पृथ्वीनाथ! मेरे ही हठसे अर्जुनने आपका इतना अपमान किया। गुरुओंका अपमान करना ही उनको मार डालना है। इसलिये आप हमारा

न तं पश्यामि कौन्तेय यस्ते वध्यो भविष्यति।
प्रहर्तुमिच्छसे कस्मात्किं वा ते चित्तविभ्रमः ॥ ६ ॥
कस्माद्भवान्महाखड्गं परिगृह्णाति सत्वरः।
तत्त्वां पृच्छामि कौन्तेय किमिदं ते चिकीर्षितम्॥ ७॥
परामृशसि यत्क्रुद्धः खड्गमद्भुतविक्रम।
एवमुक्तस्तु कृष्णेन प्रेक्षमाणो युधिष्ठिरम ॥ ८ ॥
अर्जुनः प्राह गोविन्दं क्रुद्धः सर्प इव श्वसन्।
अन्यस्मै देहि गाण्डीवमिति मे योऽभिचोदयेत्॥ ९ ॥
भिन्द्यामहं तस्य शिर इत्युपांशुव्रतं मम।
तदुक्तं मम चानेन राज्ञामितपराक्रम ॥ १० ॥
समक्षं तव गोविन्द न तत्क्षन्तुमिहोत्सहे।
तस्मादेनं वधिष्यामि राजानं धर्मभीरुकम् ॥ ११ ॥
प्रतिज्ञां पालयिष्यामि हत्वैनं नरसत्तमम्।
एतदर्थं मया खड्गो गृहीतो यदुनन्दन ॥ १२ ॥
सोऽहं युधिष्ठिरं हत्वा सत्यस्यानृण्यतां गतः।
विशोको विज्वरश्चापि भविष्यामि जनार्दन ॥ १३ ॥

राजोंमें शार्दूल युधिष्ठिरके दर्शन किये सो इस प्रसन्नताके समयमें यह क्या भूल करते हो ? ॥ तुम्हारे चित्तमें क्या भ्रम आगया है ? यहां कोई तुमसे लडनेवाला नहीं, तब किसके ऊपर खड्ग चलाना चाहते हो ? हे अद्भुत पराक्रमवाले कुन्तीपुत्र ! हम तुमसे पूछते हैं, कि तुम्हारे मनमें क्या है ? तुमने इतनी शीघ्रता सहित खड्ग क्यों खींच लिया॥ और किसलिये क्रोधसे खड्गको छूने लगे हो ? (४–८)

कृष्णके ऐसे वचन सुन युधिष्ठिरकी ओर देखते हुए महा पराक्रमी, अर्जुनने क्रोध करके श्रीकृष्णसे कहा, कि मेरी यह प्रतिज्ञा है, कि जो मुझसे कहेगा कि अपना धनुष दूसरेको दे दो, मैं उसका शिर काट लूंगा, सो आज महा पराक्रमी महाराजने हमसे ऐसा ही कहा। हे कृष्ण ! यह बात आपने भी सुनी है। हम इसे क्षमा नहीं कर सक्ते इसलिये हम आज धर्मात्मा महाराजका शिर काटेंगे ॥ (८–११)

हे यदुनन्दन ! आज सब मनुष्योंमें श्रेष्ठ युधिष्ठिरको मारकर हम अपनी प्रतिज्ञाको सत्य करेंगे, इसी लिये, हमने खड्ग उठाया है ॥ हे जनार्दन ! हम

समुत्तीर्णाः सहामात्याः सनाथाः स्म त्वयाऽच्युत ॥६०॥ [३५१८]

इति श्रीमहा० शतसाहस्र्यां सहितायां वैयासिक्यां कर्णपर्वणि युधिष्ठिरसमाश्वासने सप्ततितमोऽध्यायः॥७०॥

सञ्जय उवाच— धर्मराजस्य तच्छ्रुत्वा प्रीतियुक्तं वचस्ततः।
पार्थं प्रोवाच धर्मात्मा गोविन्दो यदुनन्दनः ॥ १ ॥
इति स्म कृष्णवचनात्प्रत्युच्चार्य युधिष्ठिरम्।
बभूव विमनाः पार्थः किंचित्कृत्वेव पातकम् ॥ २ ॥
ततोऽब्रवीद्वासुदेवः प्रहसन्निव पाण्डवम्।
कथं नाम भवेदेतद्यदि त्वं पार्थ धर्मजम् ॥ ३ ॥
असिना तीक्ष्णधारेण हन्या धर्मे व्यवस्थितम्।
त्वमित्युक्त्वाथ राजानमेवं कश्मलमाविशः ॥ ४ ॥
हत्वा तु नृपतिं पार्थ आकरिष्यः किमुत्तरम्।
एवं हि दुर्विदो धर्मो मन्दप्रज्ञैर्विशेषतः ॥ ५ ॥
स भवान्धर्मभीरुत्वाद् ध्रुवमैष्यन्महत्तमः।
नरकं घोररूपं च भ्रातुर्ज्येष्ठस्य वै वधात् ॥ ६ ॥
स त्वं धर्मभृतां श्रेष्ठं राजानं धर्मसंहितम्।
प्रसादय कुरुश्रेष्ठमेतदत्र मतं मम ॥ ७ ॥
प्रसाद्य भक्त्या राजानं प्रीते चैव युधिष्ठिरे।

हुए ॥ (५८—६०) [३५१८]

कर्णपर्वमें सत्तर अध्याय समाप्त।

कर्णपर्वमें इकत्तर अध्याय।

सञ्जय बोले, हे राजन्! धर्मराज युधिष्ठिरके ऐसे वचन सुन धर्मात्मा यदुकुल श्रेष्ठ श्रीकृष्ण अर्जुनको मलीन देख धर्मराजके वचनोंका उत्तर देकर अर्जुनसे बोले, हे कुन्तीपुत्र! यदि तुम कुन्तीपुत्र युधिष्ठिरको तेज धारवाले खड्गसे मार डालते तो इस समय तुम्हारी क्या दशा होती? उन धर्मात्माको केवल 'तुम' कहनेसे मलीन हो रहे हो, जिन बडे भाईको 'तुम' कहकर तुम्हारी यह दशा हो रही है, तो उनके मारनेसे तुम्हारी क्या दशा होती? धर्मकी गति जानना इस प्रकार बहुत कठिन है॥ (१—५)

इस समय यदि तुम धर्म भीरुताके कारण अपने बडे भाईका वध करते तो इसी पापसे तुम्हें तमोमय घोर नरकमें जाना पडता। हमारी सम्मतिमें तो तुम सब धर्मधारियोंमें श्रेष्ठ कुरुकुल तिलक महाराजको प्रसन्न करो, धर्मराज युधिष्ठिरको अपनी भक्तिसे प्रसन्न करके हम

अविज्ञानाद्ध्रुवान्यच्च धर्म रक्षति धर्मवित् ।
प्राणिनां त्वं वधं पार्थ धार्मिको नावबुध्यसे ॥ २२ ॥
प्राणिनामवधस्तात सर्वज्यायान्मतो मम ।
अनृतां वा वदेद्वाचं न तु हिंस्यात्कथञ्चन ॥ २३ ॥
स कथं भ्रातरं ज्येष्ठं राजानं धर्मकोविदम् ।
हन्याद्ध्रुवान्नरश्रेष्ठ प्राकृतोऽन्यः पुमानिव ॥ २४ ॥
अयुध्यमानस्य वधस्तथाशस्त्रोश्च सानद ।
पराङ्मुखस्य द्रवतः शरणं चापि गच्छतः ॥ २५ ॥
कृताञ्जलेः प्रपन्नस्य प्रमत्तस्य तथैव च ।
न वधः पूज्यते सद्भिस्तच्च सर्व गुरौ तव ॥ २६ ॥
त्वया चैवं व्रतं पार्थ बालेनेव कृतं पुरा ।
तस्मादधर्मसंयुक्तं मौर्ख्यात्कर्म व्यवस्यसि ॥ २७ ॥
स गुरुं पार्थ कस्मात्त्वं हन्तुकामोऽभिधावसि ।
असम्प्रधार्य धर्माणां गतिं सूक्ष्मां दुरत्ययाम् ॥ २८ ॥
इदं धर्मरहस्यं च तव वक्ष्यामि पाण्डव ।
यद् ब्रूयात्तव भीष्मो हि पाण्डवो वा युधिष्ठिरः ॥२९॥

है सो विद्या तुमको किञ्चित् भी नहीं। तुम धर्म जानकर भी कहते हो कि हम मनुष्यको मारकर अपनी प्रतिज्ञाको सत्य करें। वाह वाह! यह तुम्हारी बुद्धि बहुत अच्छी है। तुम्हें यह नहीं जान पडता कि मनुष्यको मारना सबसे बडा पाप है ॥ हमारी सम्मतिमें सबसे बडा पाप हिंसा ही है, चाहे मनुष्य झूठ बोल दे, परन्तु किसीको मारे नहीं ॥ (२१-२३)

सो तुम सब धर्मोंको जानकर भी साधारण मनुष्योंके समान सब धर्मके जाननेवाले बडे भाई राजा युधिष्ठिरको कैसे मारते हो? विनायुद्ध करते, अवध्य, युद्धसे भागते और शरण आये हुए को नहीं मारना चाहिये ॥ जो हाथ जोडकर अपनी शरण आवे और जो मद्य पीये हो उनको मारना उचित नहीं, युधिष्ठिरमें ये सब गुण हैं ॥ परन्तु विशेष कर ये तुम्हारे गुरु हैं ॥ (२४-२६)

हे अर्जुन! तुमने यह प्रतिज्ञा बाल-कपनमें की थी, अब उसका पालना मूर्खता ही है। हे कुन्तीपुत्र! सो तुम धर्मकी सूक्ष्म और दुरत्यय गति को न जानकर अपने गुरुको मारनेको क्यों दौडे? हे पाण्डव! अब हम तुमसे

अब्रवीत्तं महेष्वासं धर्मराजो धनञ्जयम् ॥ १६ ॥
कर्णेन मे महाबाहो सर्वसैन्यस्य पश्यतः।
कवचं च ध्वजं चैव धनुः शक्तिर्हयाः शराः ॥ १७ ॥
शरैः कृत्ता महेष्वास यतमानस्य संयुगे।
सोऽहं ज्ञात्वा रणे तस्य कर्म दृष्ट्वा च फाल्गुन ॥१८॥
व्यवसीदामि दुःखेन न च मे जीवितं प्रियम्।
न चेदद्य हि तं वीरं निहनिष्यसि संयुगे ॥ १९ ॥
प्राणानेव परित्यक्ष्ये जीवितार्थो हि को मम।
एवमुक्तः प्रत्युवाच विजयो भरतर्षभ ॥ २० ॥
सत्येन ते शपे राजन्प्रसादेन तथैव च।
भीमेन च नरश्रेष्ठ यमाभ्यां च महीपते ॥ २१ ॥
यथाद्य समरे कर्णं हनिष्यामि हतोऽपि वा।
महीतले पातिष्यामि सत्येनायुधमालभे ॥ २२ ॥
एवमाभाष्य राजानमब्रवीन्माधवं वचः।
अद्य कर्णं रणे कृष्ण सूदयिष्ये न संशयः ॥ २३ ॥
तव बुद्ध्या हि भद्रं ते वधस्तस्य दुरात्मनः।
एवमुक्तोऽब्रवीत्पार्थं केशवो राजसत्तम ॥ २४ ॥
शक्तोऽसि भरतश्रेष्ठ हन्तुं कर्णं महाबलम्।

अनन्तर महाधनुपधारी अर्जुनसे बोले, हे महाबाहो। सब सेनाके देखते देखते कर्णने मेरा कवच, ध्वजा, धनुप, शक्ति, घोडे और बाणोंको अपने बाणोंसे काट दिया। मैंने युद्धमें अनेक यत्न भी किये परन्तु कुछ कर नहीं सका, मै उसके घोर कर्मको देखकर बहुत दुःखी हुआ हूं। यदि अब तुम युद्धमें उसको नहीं मारोगे, तो मै अपने प्राणको त्याग दूंगा। कर्णके जीनेसे मै जीकर क्या करूंगा? (१६—२०)

अर्जुन बोले, हे पृथ्वीनाथ! हम आप, भीमसेन,नकुल, हमारे शस्त्र और सहदेवकी शपथ कर कहते हैं कि आज आपकी कृपासे कर्णको मारकर पृथ्वीमें गिरावेंगे, अथवा मै मर जाऊंगा, सत्य भावसे मैं शस्त्रको छूता हूं॥ (२०-२२)

राजासे ऐसे वचन कह श्रीकृष्णसे बोले, हे कृष्ण! आज हम निःसन्देह कर्णको युद्धमें मारेंगे, तुम्हारा कल्याण हो। तुम्हारी कृपासे आज यह पापी मारा जायगा। (२२–२४)

किमाश्चर्यं पुनर्मूढो धर्मकामो ह्यपण्डितः ।
सुसहत्प्राप्नुयात्पापमापगास्विव कौशिकः ॥ ३७ ॥

अर्जुन उवाच— आचक्ष्व भगवन्नेतद्यथा विन्दाम्यहं तथा ।
बलाकस्यानुसम्बन्धं नदीनां कौशिकस्य च ॥ ३८ ॥

वासुदेव उवाच- पुरा व्याधोऽभवत्कश्चिद्बलाको नाम भारत ।
यात्रार्थं पुत्रदारस्य मृगान्हन्ति न कामतः ॥ ३९ ॥
वृद्धौ च मातापितरौ बिभर्त्यन्यांश्च संश्रितान् ।
स्वधर्मनिरतो नित्यं सत्यवागनसूयकः ॥ ४० ॥
स कदाचिन्मृगं लिप्सुर्नाभ्यविन्दन्मृगं क्वचित् ।
अपः पिबन्तं ददृशे श्वापदं घ्राणचक्षुषम् ॥ ४१ ॥
अदृष्टपूर्वमपि तत्सत्वं तेन हतं तदा ।
अन्धे हते ततो व्योम्नः पुष्पवर्षं पपात च ॥ ४२ ॥
अप्सरोगीतवादित्रैर्नादितं च मनोरमम् ।
विमानमगमत्स्वर्गान्मृगव्याधनिनीषया ॥ ४३ ॥
तद्भूतं सर्वभूतानामभावाय किलार्जुन ।
तपस्तप्त्वा वरं प्राप्तं कृतमन्धं स्वयम्भुवा ॥ ४४ ॥

बलाकको अन्धेके मारनेसे ही उत्तम गति मिल गयी । कहीं मूर्ख धर्मके लिये यत्न करने पर भी पापी होजाता है, जैसे नदीके तटपर कौशिक ॥ (३४–३७)

अर्जुन बोले, हे भगवन् ! आप हमको ज्ञान होनेके लिये बलाक, अन्धे, कौशिक और नदीयोंकी कथा कहिये ॥ (३८)

श्रीकृष्ण बोले हे,भारत ! पहले समयमें एक बलाक नाम व्याध था । वह अपने कटुम्बके पालनेको हरिनोंको मारा करता था, परन्तु किसीकी हत्या अपने लिये नहीं करता था ॥ अपने बूढे माता पिता और सब कुटुम्बको पालता था । सदा सत्य बोलता था, किसीकी बढतीसे दुखी नहीं होता था और न कभी अपने धर्मको छोडता था ॥ (३९–४०)

एक दिन वह वनमें बहुत घूमा परन्तु कहीं हरिण न मिला । थोडे समयमें एक जल पीते अन्धे पशुको देखा,बलाकने उसे पहले कभी नहीं देखा था एक बाणसे उसे मार दिया । अन्धे पशुके मरते ही व्याधके ऊपर फूल बरसने लगे । थोडे समयमें गाती बजाती अप्सराओंके सहित स्वर्गसे एक विमान बलाकके लेनेको आया ॥ (४१–४३)

वह जन्तु सब जगत्का नाश करने

मूर्ध्न्युपाघ्राय चैवैनमिदं पुनरुवाच ह ॥ ३३ ॥
धनञ्जय महाबाहो मानितोऽस्मि दृढं त्वया।
महात्म्यं विजयं चैव भूयः प्राप्नुहि शाश्वतम्॥ ३४ ॥
अर्जुन उवाच— अद्य तं पापकर्माणं सानुबन्धं रणे शरैः।
नघाम्यन्तं समासाद्य राधेयं बलगर्वितम् ॥ ३५ ॥
येन त्वं पीडितो बाणैर्दृढमायम्य कार्मुकम्।
तस्याद्य कर्मणः कर्णः फलमाप्स्यति दारुणम्॥ ३६ ॥
अद्य त्वामनुपश्यामि कर्णं हत्वा महीपते।
सभाजयितुमाक्रन्दादिति सत्यं ब्रवीमि ते ॥ ३७ ॥
नाहत्वा विनिवर्तिष्ये कर्णमद्य रणाजिरात्।
इति सत्येन ते पादौ स्पृशामि जगतीपते ॥ ३८ ॥
सञ्जय उवाच- इति ब्रुवाणं सुमनाः किरीटिनं युधिष्ठिरः प्राह वचो बृहत्तरम्।
यशोऽक्षयं जीवितमीप्सितं ते जयं सदा वीर्यमरिक्षयं तथा ॥ ३९ ॥
प्रयाहि वृद्धिं च दिशन्तु देवता यथाहमिच्छामि तवास्तु तत्तथा।
प्रयाहि शीघ्रं जहि कर्णमाहवे पुरन्दरो वृत्रमिवात्मवृद्धये ॥४०॥[३५५८]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि
अर्जुनप्रतिज्ञायामेकसप्ततितमोऽध्याय ॥ ७१ ॥

अर्जुनको उठाकर छातीसे लगाकर माथा सूंघा और ऐसे वचन कहे। हे महाबाहो! हे धनञ्जय! तुमने हमारा बहुत सत्कार किया, अब युद्धमें जाकर अपना महात्म्य बढाओ और बहुत विजय करो॥(३२-३४

अर्जुन बोले, हे महाराज! आज मै उस पापी अभिमानी दुष्ट राधापुत्रको अपने बाणोंसे सहायकोंके सहित मारूंगा, उसने धनुपसे छूटे अनेक बाणोंसे आपको पीडा दी है सो आज अपने कर्मका फल पावेगा॥ हे महाराज! अब आप कुछ सोच मत कीजिये मै उसको मारकर ही अब आपके दर्शन करूंगा, मैंने यह प्रतिज्ञा आपके रोनेहीसे कर ली है। हे पृथ्वीनाथ! हम सत्य शपथ करते हैं, कि विना कर्णके मारे आपके दर्शन न करूंगा॥ (३५–३८)

सञ्जय बोले, हे राजन्! अर्जुनके ऐसे वचन सुन महाराज युधिष्ठिर अक्षय यश देनेवाले जीवन और इच्छाको बढानेवाले अर्जुनके उत्साह वर्द्धक और अक्षय वचन बोले, हम जो कुछ चाहते है सब देवता तुम्हारे लिये वैसा ही करें अब तुम जाओ और जैसे इन्द्रने

गतः स कष्टं नरकं सूक्ष्मधर्मेष्वकोविदः ।
यथा चाल्पश्रुतो मूढो धर्माणामविभागवित् ॥ ५३ ॥
वृद्धानपृष्ट्वा सन्देहं महच्छ्वभ्रमिवार्हति ।
तत्र ते लक्षणोद्देशः काश्चिदेवं भविष्यति ॥ ५४ ॥
दुष्करं परमं ज्ञानं तर्केणानुव्यवस्यति ।
श्रुतेर्धर्म इति चैके वदन्ति बहवो जनाः ॥ ५५ ॥
तत्ते न प्रत्यसूयामि न च सर्वं विधीयते ।
प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ॥ ५६ ॥
यत्स्यादहिंसासंयुक्तं स धर्म इति निश्चयः ।
अहिंसार्थाय हिंस्राणां धर्मप्रवचनं कृतम् ॥ ५७ ॥
धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः ।
यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः ॥ ५८ ॥
ये न्यायेन जिहीर्षन्तो धर्ममिच्छन्ति कर्हिचित् ।
अकूजनेन मोक्षं वा नानुकूजेत्कथञ्चन ॥ ५९ ॥
अवश्यं क्रूजितव्ये वा शङ्केरन्नप्यकूजतः ।

और मूर्खताके कारण घोर नरकमें गया, इसीसे हम कहते है, कि धर्मको जानना बहुत सूक्ष्म है ॥ (४९–५३)

तुम धर्म और अधर्मका विना निश्चय किये और वृद्धोंसे विना पूछे जो कर्म करते हो इससे नरकमें जाओगे । कोई महात्मा कहते हैं, कि वेद धर्मका मूल है, कोई कोई कहते है, कि जो तर्कोंमें सिद्ध हो वही धर्म है, परन्तु हम जानते हैं, कि धर्मको जानना बहुत कठिन है । हम ऊपर कहे किसी लक्षणका खण्डन नहीं करते है परन्तु यह अवश्य कहते है, कि मनुष्योंकी उन्नतिके लिये ही मुनियोंने समयके अनुसार धर्मके लक्षण बना लिये हैं । हमारी बुद्धिमें किसीकी हिंसा न करना केवल यही धर्म है, मुनियोंने हिंसकोंकी हिंसाके रोकनेके लिये ही धर्मके अनेक वचन लिख दिये हैं ॥ ५४-५७

जो धारण करता है वही धर्म कहाता है धर्म प्रजाओंका धारण करता है इस लिये उसे धर्म कहते हैं॥ यों मूर्खही कहते हैं कि पराई स्त्रीके पास जाना और जन्तुओंको मारना ही धर्म है, उन वेद विरोधीयोंको मोक्ष नहीं होती, उनसे धर्मात्माओंको बात भी नहीं करनी चाहिये ॥ जहां सत्य कहनेमें कुछ शङ्का हो अर्थात् सत्य कहनेमें किसीका नाश होता हो चुप होजाय और जो चुप न

तस्य राजा महाप्राजो धर्मराजो युधिष्ठिरः ।
आशिषोऽयुंक्त सततः प्रायात्कर्णरथं प्रति ॥ ९ ॥
तमायान्तं महेष्वासं दृष्ट्वा भूतानि भारत ।
निहतं मेनिरे कर्णं पाण्डवेन महात्मना ॥ १० ॥
बभूवुर्विमलाः सर्वा दिशो राजन्समन्ततः ।
चापाश्च शतपत्राश्च क्रौञ्चाश्चैव जनेश्वर. ॥ ११ ॥
प्रदक्षिणमकुर्वन्त तदा वै पाण्डुनन्दनम् ।
बहवः पक्षिणो राजन्पुण्यामानः शुभाः शिवाः ॥ १२ ॥
त्वरयन्तोऽर्जुनं युद्धे हृष्टरूपा ववाशिरे ।
कङ्का गृध्रा बकाः श्येना वायसाश्च विशाम्पते ॥१३॥
अग्रतस्तस्य गच्छन्ति मांसहेतोर्भयानकाः ।
निमित्तानि च धन्यानि पाण्डवस्य शशंसिरे ॥ १४ ॥
विनाशमरिसैन्यानां कर्णस्य च वधं प्रति ।
प्रयातस्याथ पार्थस्य महान्स्वेदो व्यजायत ॥ १५ ॥
चिन्ता च विपुला जज्ञे कथं चेदं भविष्यति ।
ततो गाण्डीवधन्वानमब्रवीन्मधुसूदनः ।
दृष्ट्वा पार्थं तथा यान्तं चिन्तापरिगतं तदा ॥ १६ ॥
वासुदेव उवाच-- गाण्डीवधन्वन्संग्रामे ये त्वया धनुषा जिताः ।

बैठे ॥ अनन्तर बुद्धिमान धर्मराजने अनेक आशीर्वाद दिये और आप भी रथमें चढकर कर्णसे युद्ध करनेको चले महा-धनुपधारी अर्जुनको आते देख सबने कर्णको मारा जान लिया ॥ (७–१०)

उन्हें चलता देख सब दिशा विमल होगयी । चाप, शतपत्र और क्रोञ्च पक्षी बोलने लगे, और भी अनेक पुण्यनाम-वाले उत्तम पक्षी अर्जुनकी दहिनी ओर मङ्गल शब्द बोलने लगे ॥ हे पृथ्वीनाथ उस समय अर्जुनके रथके आगे मांस खानेके लिये कंक, गिद्ध, बाज, कौवे इस प्रकार उडने लगे, मानो उन्हें युद्धके लिये शीघ्र बुलाते है और भी अनेक शकुन हुए ॥ (११–१६)

उस समय अर्जुनको पसीना आगया और चित्तमें बहुत चिन्ता हुई कि आज किस प्रकार इस घोर प्रतिज्ञासे पार हूंगा ? श्रीकृष्णने अपने मनमें जान लिया कि इस समय अर्जुन बहुत शोचमें हैं । (१६)

श्रीकृष्ण बोले, हे गाण्डीव धनुप-

गतिश्च परमा कृष्ण त्वमेव च परायणम् ।
न हि ते त्रिषु लोकेषु विद्यतेऽविदितं क्वचित् ॥ ६९ ॥
तस्माद्ब्रवान्परं धर्म वेद सर्वं यथातथम् ।
अवध्यं पाण्डवं मन्ये धर्मराजं युधिष्ठिरम् ॥ ७० ॥
अस्मिंस्तु मम सङ्कल्पे ब्रूहि किञ्चिदनुग्रहम् ।
इदं वा परमत्रैव शृणु हृत्स्थं विवक्षितम् ॥ ७१ ॥
जानासि दाशार्ह मम व्रतं त्वं यो मां ब्रूयात्कश्चन मानुषेषु ।
अन्यस्मै त्वं गाण्डिवं देहि पार्थ त्वत्तोऽस्त्रैर्वा वीर्यतो वा विशिष्टः ॥७२॥
हन्यामहं केशव तं प्रसह्य भीमो हन्यात्तूवरकेति चोक्तः ।
तन्मे राजा प्रोक्तवांस्ते समक्षं धनुर्देहीत्यसकृद्वृष्णिवीर ॥ ७३ ॥
तं हन्यां चेत्केशव जीवलोके स्थाता नाहं कालमप्यल्पमात्रम् ।
ध्वात्वा नूनं ह्येनसा चापि मुक्तो वधं राज्ञो भ्रष्टवीर्यो विचेताः ॥ ७४ ॥
यथा प्रतिज्ञा मम लोकवृद्धौ भवेत्सत्या धर्मभृतां वरिष्ठ ।
यथा जीवेत्पाडवोऽहं च कृष्ण तथा बुद्धिं दातुमप्यर्हसि त्वम् ॥ ७५ ॥

वासुदेव उवाच राजा श्रान्तो विक्षतो दुःखितश्च कर्णेन सङ्ख्ये निशितैर्बाणसङ्घैः।

हमारे माता और पिताके समान है। इसी लिये हमारे कल्याणके वचन कहते हैं। हे कृष्ण! तुम ही हमारी गति हो तीनोंलोकोंमें ऐसी कोई बात नहीं जो आप नहीं जानते, जगत्के सब धर्मोंको आप जानते हैं। इसलिये अब हमने जान लिया कि धर्मराज युधिष्ठिर मारने योग्य नहीं है परन्तु हमने जो प्रतिज्ञा की थी वह झूठ हुई जाती है। (६७-७१)

इसलिये उसके उद्धारका कुछ यत्न बताइये क्यों कि आप हमारे सङ्कल्पको जानते हैं, कि जो मनुष्य हमसे कहेगा कि अपना धनुष दूसरेको देदो वह कैसा ही योद्धा और उत्तम मनुष्य क्यों न हो मैं उसे मार डालूंगा ऐसे ही भीम सेनकी यह प्रतिज्ञा है, कि जो उन्हें अधिक खाने वाला, बतावेगा उसे मार डालेंगे, सो आपके आगे महाराजने कहा कि तुम दूसरेको धनुष देदो अब यदि मैं महाराजको मारता हूं तो क्षण भर भी नहीं जी सकूंगा, मेरा बल वीर्य तेज नष्ट हो जायगा तथा इस पापसे भी कभी नहीं छूटूंगा। हे धर्मधारियोंमें श्रेष्ठ! जिसमें हमारी प्रतिज्ञा भी सत्य हो और हम दोनों भाई जीते भी रहें ऐसी कोई बुद्धि हमें बताइये ॥ (७१–७५)

श्रीकृष्णचन्द्र बोले, हे वीर! महाराज सदा कर्णके दुःखसे व्याकुल रहते

अवश्यं तु मया वाच्यं यत्पथ्यं नव पाण्डव ॥ २५ ॥
मावमंस्था महाबाहो कर्णमाहवशोभिनम् ।
कर्णो हि बलवान्दक्षः कृतास्त्रश्च महारथः ॥ २६ ॥
कृती च चित्रयोधी च देशकालस्य कोविदः ।
बहुनात्र किमुक्तेन संक्षेपाच्छृणु पाण्डव ॥ २७ ॥
त्वत्समं त्वद्विशिष्टं वा कर्णं मन्ये महारथम् ।
परमं यत्नमास्थाय त्वया वध्यो महाहवे ॥ २८ ॥
तेजसा वह्निसदृशो वायुवेगसमो जवे ।
अन्तकप्रतिमः क्रोधे सिंहसंहननो बली ॥ २९ ॥
अष्टरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः ।
अभिमानी च शूरश्च प्रवीरः प्रियदर्शनः ॥ ३० ॥
सर्वयोधगुणैर्युक्तो मित्राणामभयङ्करः ।
सततं पाण्डवद्वेषी धार्तराष्ट्रहिते रतः ॥ ३१ ॥
सवैरवध्यो राधेयो देवैरपि सवासवैः ।
ऋते त्वामिति मे बुद्धिस्तदद्य जहि सूतजम् ॥ ३२ ॥
देवैरपि हि संयत्तैर्बिभ्रद्भिर्मांसशोणितम् ।

परन्तु तुम कर्णका अवमान भी मत करो, क्यों कि वह शस्त्र विद्या जाननेवाले, महा बलवान्, महा योद्धा और महारथ हैं। (२४—२६)

हे पाण्डव! कर्ण विचित्र योद्धा, बुद्धिमान और देश कालके जाननेवाले हैं॥ अधिक उनके गुण कहां तक कहें हम संक्षेपरूपसे कहते हैं सो सुनो। हम महारथ कर्णको तुम्हारे समान अथवा तुमसे भी अधिक योद्धा जानते हैं। इसलिये बहुत यत्न करके उसे मारना॥ (२७—२८)

सिंहके समान पराक्रमी कर्ण तेजमें अग्नि, बलमें वायु और क्रोधमें यमराजके समान हैं। महाबाहु कर्ण बडे अभिमानी, शूरवीर, सुन्दर और ऊंची छातीवाले हैं, इनमें वीरोंके सब गुण भरे हैं। वही कर्ण सदासे पाण्डवोंके वैरी और मित्रोंको सुख देनेवाले हैं। और धृतराष्ट्रके पुत्रोंके शुभ चिन्तक हैं। हमारी बुद्धिमें राधापुत्रको तुम्हारे सिवाय देवतोंके सहित इन्द्रकी भी मारनेकी शक्ति नहीं है। इसलिये तुम आज उसे मार डालो॥ (२९—३२)

यदि सब देवता और सब योद्धा मांस रुधिरमें भीगकरभी युद्ध करें तोभी

त्वामित्यत्र भवन्तं हि ब्रूहि पार्थ युधिष्ठिरम् ।
त्वमित्युक्तो हि निहतो गुरुर्भवति भारत ॥ ८३ ॥
एवमाचर कौन्तेय धर्मराजे युधिष्ठिरे ।
अधर्मयुक्तं संयोगं कुरुष्वैनं कुरूद्वह ॥ ८४ ॥
अथर्वाङ्गिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः ।
अविचार्यैव कार्यैषा श्रेयस्कामैर्नरैः सदा ॥ ८५ ॥
अवधेन वधः प्रोक्तो यद्गुरुस्त्वमिति प्रभुः ।
तद् ब्रूहि त्वं यन्मयोक्तं धर्मराजस्य धर्मवित्॥ ८६ ॥
वधं ह्ययं पाण्डव धर्मराजस्त्वत्तोऽयुक्तं वेत्स्यते चैवमेषः ।
ततोऽस्य पादावभिवाद्य पश्चात्समं ब्रूयाः सान्त्वयित्वा च पार्थम् ॥८७॥
भ्राता प्राज्ञस्तव कोपं न जातु कुर्याद्राजा धर्ममवेक्ष्य चापि ।
मुक्तोऽनृताद्भ्रातृवधाच्च पार्थ हृष्टः कर्णं त्वं जहि सूतपुत्रम्॥ ८८ ॥३४५८

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कृष्णार्जुनसंवादे ऊनसप्ततितमोऽध्याय ६९

सञ्जय उवाच- इत्येवमुक्तस्तु जनार्दनेन पार्थः प्रशस्याथ सुहृद्वचस्तत् ।
ततोऽब्रवीदर्जुनो धर्मराजमनुक्तपूर्वं परुषं प्रसह्य ॥ १ ॥

जायंगे । हे भारत ! तुम महाराजको 'आप'के स्थानपर ' तुम ' कह दो बस इतनेही से वे मरगये समझो ॥(८१-८३)

हे कुरुकुल श्रेष्ठ कुन्तीपुत्र ! तुम यही व्योहार महाराजके सङ्ग करो, तुम्हारे लिये यही अधर्म बहुत है और अङ्गिरा मुनिने ये वचन कहे है । धर्म चाहनेवालोंको ये अवश्यही करने चाहिये। गुरुको, 'तुम' कहना ही उन्हें मार डालना है, इसलिये तुम धर्मराजसे ऐसा ही कह दो, ये कुन्तीपुत्र युधिष्ठिर तुम्हारे हाथसे होनेवाले वधको जानेगा । पीछे इस प्रकारकी विषमताका परिहार करनेके लिये तुम्हें धर्मराजकी पादाभिवन्दन पूर्वक सांत्वना करनी चाहिये क्यों कि ये तुम्हारे बडे भाई और धर्मके जाननेवाले और सब लोकके राजा हैं । वह तुम्हारे ऊपर कुछ भी क्रोध नहीं करेगा । इस प्रकार तुमभी इस असत्य और घोर पापसे छूट जाओंगे, पीछे कर्णको मारो॥ (८४-८८) [३४५८]

कर्णपर्वमें उनत्तर अध्याय समाप्त ।

कर्णपर्वमें सत्तर अध्याय ।

सञ्जय बोले, हे राजन् ! अर्जुन श्रीकृष्णके ऐसे वचन सुन और उनके वचनकी प्रशंसा करके धर्मराज युधिष्ठिरसे जो पहिले कभी नहीं कहा ऐसा कठोर वचन कहने लगे। अर्जुन बोले हे राजन्!

कृतसङ्कल्पमायान्तं वधे कर्णस्य भारत ॥ १ ॥
अद्य सप्तदशाहानि वर्तमानस्य भारत ।
विनाशस्यातिघोरस्य नरवारणवाजिनाम् ॥ २ ॥
भूत्वा हि विपुला सेना तावकानां परैः सह ।
अन्योन्यं समरं प्राप्य किञ्चिच्छेषा विशाम्पते ॥ ३ ॥
भूत्वा वै कौरवाः पार्थ प्रभूतगजवाजिनः ।
त्वां वै शत्रुं समासाद्य विनष्टा रणमूर्धनि ॥ ४ ॥
एते ते पृथिवीपालाः सृञ्जयाश्च समागताः ।
त्वां समासाद्य दुर्धर्षं पाण्डवाश्च व्यवस्थिताः ॥ ५ ॥
पाञ्चालैः पाण्डवैर्मत्स्यैः कारूषैश्चेदिभिः सह ।
त्वया गुप्तैरमित्रघ्नैः कृतः शत्रुगणक्षयः ॥ ६ ॥
को हि शक्तो रणे जेतुं कौरवांस्तात संयुगे ।
अन्यत्र पाण्डवान्युद्धे त्वया गुप्तान्महारथान् ॥ ७ ॥
शक्तस्त्वं हि रणे जेतुं ससुरासुरमानुषान् ।
त्रींल्लोकान्समरे युक्तान्किं पुनः कौरवं बलम् ॥ ८ ॥
भगदत्तं च राजानं कोऽन्यः शक्तस्त्वया विना ।
जेतुं पुरुषशार्दूल योऽपि स्याद्वासवोपमः ॥ ९ ॥

मनमें कर्णके मारनेका दृढ सङ्कल्प जान कर श्रीकृष्ण फिर बोले,हे अर्जुन ! हाथी, घोडे और मनुष्योंको मरते आज सतरह दिन होगये । अब तुम्हारी सेना शत्रुओंसे युद्ध करते बहुत थोडी बची है । पहले कौरवोंके सङ्ग बहुत हाथी, घोडे और रथ थे, परन्तु अब तुमने उनको नष्ट कर दिया ॥ (१–४)

ये सब सृञ्जय आदि अनेक राजा तुम्हारी ओरसे युद्ध करनेको आये है । और तुम्हारे ही आश्रयसे सब पाण्डव युद्ध कर रहे है ॥ तुमने पाञ्चाल, पाण्डव, मत्स्य, कारुष और चेदीके शत्रुनाशन क्षत्रियोंकी सहायतासे अपने शत्रुओंका नाश किया और अपनी सेनाकी रक्षा भी की ॥ हे अर्जुन ! तुमसे रक्षित महारथ पाण्डवोंके सिवाय कौरवोंको कौन जीत सक्ता ? (५–७)

तुम अपने बलसे देवता और राक्षसों के सहित तीनों लोकोंको जीत सक्ते हो तब कौरवोंकी सेनाकी तो कथा ही क्या है ? हे कुरुकुलशार्दूल ! राजा भगदत्तके जीतनेमें तुम्हारे सिवाय और किस इन्द्रके समान मनुष्यकी शक्ति

निहन्ति यः शत्रुगणाननेकान्स सामुपालव्धुमारिन्दमोऽर्हति ॥९॥
स युक्तमास्थाय रथं हि काले धनुर्विधुन्वञ्शरपूर्णमुष्टिः ।
सृजत्यसौ शरवर्षाणि वीरो महाहवे मेघ इवाम्बुधाराः ॥ १० ॥
शतान्यष्टौ वारणानामवध्यं विशातितैः कुम्भकराग्रहस्तैः ।
भीमेनाजौ निहतान्यद्य बाणैः स मां क्रूरं वक्तुमर्हत्यरिघ्नः ॥ ११ ॥
बलं तु वाचि द्विजसत्तमानां क्षात्रं बुधा बाहुबलं वदन्ति ।
त्वं वाग्बलो भारत निष्ठुरश्च त्वमेव मां वेत्थ यथाबलोऽहम् ॥ १२ ॥
यते ह नित्यं तव कर्तुमिष्टं दारैः सुतैर्जीवितेनात्मना च ।
एवं यन्मां वाग्विशिखेन हंसि त्वत्तः सुखं न वयं विद्म किञ्चित् ॥१३॥
मां माववमंस्था द्रौपदीतल्पसंस्थो महारथान्प्रतिहन्मि त्वदर्थे ।
तेनाभिशङ्की भारत निष्ठुरोऽसि त्वत्तः सुखं नाभिजानामि किञ्चित्॥१४॥
प्रोक्तः स्वयं सत्यसन्धेन मृत्युस्तव प्रियार्थं नरदेव युद्धे ।
वीरः शिखण्डी द्रौपदोऽसौ महात्मा मयाभिगुप्तेन हतश्च तेन ॥ १५ ॥
न चाभिनन्दामि तवाधिराज्यं यतस्त्वमक्षेष्वहिताय सक्तः ।

हैं ॥ जो भीमसेन, कलिङ्ग, वङ्ग, काले मेघके समान मतवाले अङ्ग और निषादेशी योद्धाओंको मार रहे हैं वही हमारी निन्दा कर सकते है ॥ जो भीमसेन उत्तम रथपर बैठकर धनुष घुमाकर मेघके समान बाण वर्षा रहे है और जिन्होंने अपने बाणोंसे उत्तम सूंड और कुम्भवाले आठ सौ मतवाले हाथियोंको मारडाला वही शत्रुनाशन भीमसेन हमारी निन्दा कर सकते हैं ॥ (८-११)

हे भारत ! ब्राह्मणोंको वचन और क्षत्रियोंको हाथका बल होता है । तुम्हें केवल वचनहीका बल है। तुम बडे निष्ठुर हो और हमारा जैसा पराक्रम है, वैसा तुम जानते हो । हम स्त्री, पुत्र, धन और अपने शरीरसे भी सदा तुम्हारा कल्याण करनेको उपस्थित रहते हैं, तौ भी तुम ऐसे तीक्ष्ण वचनरूपी बाणोंसे हमें मारते हो, अर्थात् तुम्हारे से हमको कुच्छ भी सुख नहीं होता है । हे भारत! अब हम तुम्हारे लिये अनेक महारथोंको मारते हैं । तथापि तुम बडे निष्ठुर हो तुमसे कुच्छ भी सुख मिलनेकी आशा हमें नहीं है ॥ (१२-१४)

तुम्हारे लिये ही सत्यवादी भीष्मने अपनी मृत्यु बतादी, उनको पराक्रमी द्रुपदपुत्र शिखण्डीने मेरी सहायतासे मारडाला । हम तुम्हारे राज्यकी प्रशंसा भी नहीं करते, उस समय भी तुमने पापका मूल जुआ खेला । अब अपने

उग्राश्च भीमकर्माणस्तुषारा यवनाः खशाः।
दार्वाभिसारा दरदाः शका माठरतङ्गणाः ॥ १९ ॥
आन्ध्रकाश्च पुलिन्दाश्च किराताश्चोग्रविक्रमाः।
म्लेच्छाश्च पर्वतीयाश्च सागरानूपवासिनः ॥ २० ॥
संरम्भिणो युद्धशौण्डा बलिनो दण्डपाणयः।
एते सुयोधनस्यार्थे संरब्धाः कुरुभिः सह ॥ २१ ॥
न शक्या युधि निर्जेतुं त्वदन्येन परन्तप।
धार्तराष्ट्रमुदग्रं हि व्यूढं दृष्ट्वा महद्बलम् ॥ २२ ॥
यदि त्वं न भवेत्त्राता प्रतीयात्को नु मानवः।
तत्सागरमिवोद्धूतं रजसा संवृतं बलम् ॥ २३ ॥
विदार्य पाण्डवैः क्रुद्धैस्त्वया गुप्तैर्हतं विभो।
मागधानामधिपतिर्जयत्सेनो महाबलः ॥ २४ ॥
अद्य सप्तैव चाहानि हतः सङ्ख्येऽभिमन्युना।
ततो दशसहस्राणि गजानां भीमकर्मणाम् ॥ २५ ॥
जघान गदया भीमस्तस्य राज्ञः परिच्छदम्।
ततोऽन्येऽभिहता नागा रथाश्च शतशो बलात् ॥२६॥
तदेवं समरे पार्थ वर्तमाने महाभये।
भीमसेनं समासाद्य त्वां च पाण्डव कौरवाः ॥ २७ ॥

तुषार, यवन, खश, दार्वाभिसार, शक, माठर, तङ्गण, आंध्र, पुलिन्द, किरात, पराक्रमी म्लेच्छ, पर्वतीय और समुद्र तटके सब योद्धा केवल दुर्योधनके अपराधसे मारे गये। ये सब क्रोधी घोर कर्म करनेवाले, महापराक्रमी युद्धसे न हटनेवाले बलवान् और दण्डधारी थे। हे शत्रुनाशन! तुम्हारे सिवाय इन सबको और कोई नहीं जीत सक्ता था। १९-२२

उस समुद्रके समान भारी धूली उडाती हुई दुर्योधनकी महासेनाको तुम न होते तो कौन मारता? और कौन पाण्डवोंकी रक्षा करता? तुम्हारी ही सहायतासे कौरवोंकी सेनाको व्याकुल करके मगध देशके महाबलवान् राजा जयत्सेनको आज सात दिन हुए कि अभिमन्युने मारा था। अनन्तर भीमसेनने उसी दिन अपनी गदासे दश हजार हाथी मारे और उस राजाकी सेनाका नाश कर दिया॥ (२२–२६)

हे पाण्डव! उस घोर युद्धमें तुमने और भीमसेनने कौरवोंकी सेनाका हाथी,

तमाह कृष्णः किमिदं पुनर्भवान्विकोशमाकाशनिभं करोत्यसिम् ॥२३॥
ब्रवीहि मां त्वं पुनरुत्तरं वचस्तथा प्रवक्ष्यामह्यर्थसिद्धये ।
इत्येवमुक्तः पुरुषोत्तमेनः सुदुःखितः केशवमर्जुनोऽब्रवीत् ॥२४॥
अहं हनिष्ये स्वशरीरमेव प्रसह्य येनाहितमाचरं वै ।
निशम्य तत्पार्थवचोऽब्रवीदिदं धनञ्जयं धर्मभृतां वरिष्ठः ॥ २५ ॥
राजानमेनं त्वमितीदमुक्त्वा किं कश्मलं प्राविशः पार्थ घोरम् ।
त्वं चात्मानं हन्तुमिच्छस्यरिघ्न नेदं साद्धिः सेवितं वै किरीटिन् ॥ २६ ॥
धर्मात्मानं भ्रातरं ज्येष्ठमद्य खड्गेन चैनं यदि हन्या नृवीर ।
धर्माद्धीतिस्तत्कथं नाम ते स्यात्किञ्चोत्तरं वाकरिष्यस्त्वमेव ॥ २७ ॥
सूक्ष्मो धर्मो दुर्विदश्चापि पार्थ विशेषतोऽक्षैः प्रोच्यमानं निबोध ।
हत्वात्मानमात्मना प्राप्नुयास्त्वं वधाद्भ्रातुर्नरकं चातिघोरम् ॥ २८ ॥
ब्रवीहि वाचाद्य गुणानिहात्मनस्तथा हतात्मा भवितासि पार्थ ।
तथास्तु कृष्णेत्यभिनन्द्य तद्वचो धनञ्जयः प्राह धनुर्विनाम्य ॥ २९ ॥
युधिष्ठिरं धर्मभृतां वरिष्ठं शृणुष्व राजन्निति शक्रसूनुः ।

खड्ग खींचा, तब श्रीकृष्णने कहा कि, हे अर्जुन ! अब तुमने फिर आकाशके समान वर्णवाला अपना खड्ग क्यों निकाला ? तुम अपने मनका प्रयोजन कहो तो हम फिर तुमको उसका उत्तर देंगे ॥ (२२-२४)

श्रीकृष्णके ऐसे वचन सुन अर्जुन दुःखित होकर बोले, अब मै अपने शरीरहीको नाश करूंगा । यही सब दुःखों का मूल है । इसीने धर्मराज युधिष्ठिरको अनेक दुर्वाक्य कहे हैं । (२४-२५)

श्रीकृष्ण बोले, हे अर्जुन ! हे किरीटी ! तुमने राजाको जो कहा इसीसे अब दुःख करते हो और इसीसे अपने शरीरको नाश करना चाहते हो यह बात ठीक नहीं, महात्मा लोग इस व्यवहारकी निन्दा करते हैं। (२५-२६)

हे वीर ! यदि तुम अपने खड्गसे धर्मात्मा युधिष्ठिरको मारते और फिर उस कर्मसे ऐसे ही पस्ताते तो कैसा होता ? और जगत्में तुम क्या उत्तर देते ? हे कुन्तीपुत्र ! धर्म बहुत सूक्ष्म वस्तु है। उसको पण्डित लोग भी कठिनतासे जान सकते है । हम जो तुमसे कहते हैं सो तुम सुनो । अपनी अथवा भाईकी हत्या करके नरकमें जानेका प्रबन्ध मत करो । तुम अपने गुणोंका स्मरण करो और आत्महत्या मत करो ॥ (२६-२९)

श्रीकृष्णके वचन सुन बहुत अच्छा

मज्जन्तमप्लवे मन्दमुज्जिहीर्षुः सुयोधनम् ॥ ३६ ॥
तथा चरन्तं समरे तपन्तमिव भास्करम्।
पदातिकोटिसाहस्राः प्रवरायुधपाणयः ॥ ३७ ॥
न शेकुः सृञ्जया द्रष्टुं तथैवान्ये महीक्षितः।
विचरन्तं तथा तं तु संग्रामे जितकाशिनम् ॥ ३८ ॥
सर्वोद्यमेन महता पाण्डवान्समभिद्रवत्।
स तु विद्राव्य समरे पाण्डवान्सृञ्जयानपि ॥ ३९ ॥
एक एव रणे भीष्म एकवीरत्वमागतः।
तं शिखण्डी समासाद्य त्वया गुप्तो महाव्रतम् ॥ ४० ॥
जघान पुरुषव्याघ्रं शरैः सन्नतपर्वभिः।
स एष पतितः शेते शरतल्पे पितामहः ॥ ४१ ॥
त्वां प्राप्य पुरुषव्याघ्रं वृत्रः प्राप्येव वासवम्।
द्रोणः पञ्च दिनान्युग्रो विधम्य रिपुवाहिनीम् ॥ ४२ ॥
कृत्वा व्यूहमभेद्यं च पातयित्वा महारथान्।
जयद्रथस्य समरे कृत्वा रक्षां महारथः ॥ ४३ ॥
अन्तकप्रतिमश्चोग्रो रात्रियुद्धेऽदहत्प्रजाः।
दग्ध्वा योधाञ्छरैर्वीरो भारद्वाजः प्रतापवान् ॥ ४४ ॥
धृष्टद्युम्नं समासाद्य स गतः परमां गतिम्।
यदि वाद्य भवान्युद्धे सूतपुत्रमुखान्रथान् ॥ ४५ ॥

लिये भीष्मने अपने बाणोंसे पाण्डवोंकी सेनाका नाश कर दिया। उनको सूर्यके समान सेनामें घूमते देख सहस्रों शस्त्र धारी, पदाति और सृञ्जय आदि राजा उनको देख नहीं सके। (३५-३८)

विजयी भीष्मने अनेक यत्न करके पाण्डव और सृञ्जयोंको नाशकर दिया उस समय सेनामें केवल भीष्म ही भीष्म दीखते थे, तब शिखण्डीने तुम्हारी सहायतासे अपने तेज बाणोंसे उन पुरुषसिंहको मारडाला, वे ही भीष्म अभी शरशय्यापर सोते हैं॥ (३८-४२)

इसी प्रकार द्रोणाचार्यने भी पांच दिनतक तुम्हारी सेनाका नाश किया। अभेद्य व्यूह बनाकर महारथोंको मार कर और जयद्रथकी रक्षा करके रात्रिके घोर युद्धमें अपने बाणरूपी अग्निसे तुम्हारी सेनाको भस्म किया, पश्चात् महाप्रतापी द्रोणाचार्यको धृष्टद्युम्नने मारा, यदि आज तुम कर्ण आदि महा-

अद्यापुत्रा सूतमाता भवित्री कुन्ती वाधो वा मया तेन वापि ।
सत्यं वदाम्यद्य न कर्णमाजौ शरैरहत्वा कवचं विमोक्ष्ये ॥ ३७ ॥
सञ्जय उवाच–इत्येवमुक्त्वा पुनरेव पार्थो युधिष्ठिरं धर्मभृतां वरिष्ठम् ।
विमुच्य शस्त्राणि धनुर्विसृज्य कोशं च खड्गं विनिधाय तूर्णम् ॥ ३८ ॥
स व्रीडया नम्रशिराः किरीटी युधिष्ठिरं प्राञ्जलिरभ्युवाच ।
प्रसीद राजन्क्षम यन्मयोक्तं काले भवान्वेत्स्यति तन्नमस्ते ॥ ३९ ॥
प्रसाद्य राजानममित्रसाहं स्थितोऽब्रवीच्चैव पुनः प्रवीरः ।
नेदं चिरात्क्षिप्रमिदं भविष्यत्यावर्तते साध्वभियामि चैनम् ॥ ४० ॥
याम्येष भीमं समरात्प्रमोक्तुं सर्वात्मना सूतपुत्रं च हन्तुम् ।
तव प्रियार्थं मम जीवितं हि ब्रवीमि सत्यं तदवेहि राजन् ॥ ४१ ॥
इति प्रयास्यन्नुपगृह्य पादौ समुत्थितो दीप्ततेजाः किरीटी ।
एतच्छ्रुत्वा पाण्डवो धर्मराजो भ्रातुर्वाक्यं परुषं फाल्गुनस्य ॥४२॥
उत्थाय तस्माच्छयनादुवाच पार्थं ततो दुःखपरीतचेताः ।
कृतं मया पार्थ यथा न साधु येन प्राप्तं व्यसनं वः सुघोरम् ॥ ४३ ॥
तस्माच्छिराञ्छिन्धि ममेदमद्य कुलान्तकस्याधमपूरुषस्य ।

अब हम आपसे सत्य प्रतिज्ञा करते हैं कि, या तो आज कर्णकी माता कर्णसे हीन अथवा कुन्ती मुझसे रहित होजायगी, अब हम कर्णके मारे विना अपना कवच नहीं खोलेंगे ॥ (३६–३७)

सञ्जय बोले, हे राजन् ! ऐसा कह कर अर्जुनने अपने खड्गको म्यानमें रक्खा और धनुष बाण पृथ्वीमें रखकर हाथ जोड कर पैरोंमें शिर रखके अत्यन्त नम्र बातोंसे युधिष्ठिरसे बोले, हे महाराजाधिराज ! हम आपके चरणोंमें प्रणाम करते है। आप हमसे प्रसन्न हूजिये, आप मेरी इन सब बातोंको क्षमा कीजिये, तब राजाने इनका सब अपराध क्षमा किया । अनन्तर अर्जुन फिर हाथ जोडकर बोले, अब मैं युद्ध करनेको जाता हूं। जो आपको इस समय सोच है, सो बहुत समय तक नहीं रहेगा। हे राजन् ! अब मैं भीमसेनको युद्धसे छुडा दूंगा, और आज कर्णको अवश्य मारूंगा। मैं सत्य कहता हूं, कि आपकी प्रन्नताके लिए अपना जीवन भी दे सक्ता हूं। ऐसा कह कर तेजस्वी अर्जुन महाराजके पैरोंमें गिर पडे । (३८—४२)

अर्जुनके ऐसे वचन सुन धर्मात्मा युधिष्ठिर अपने पलङ्गसे उठे और खडे होकर कहने लगे । हे कुन्तीपुत्र ! हमने अच्छा-काम नहीं किया, कि जिससे तुम लोगों

तेषां हतावशिष्टास्तु सन्ति पञ्च महारथाः ॥ ५४ ॥
अश्वत्थामा कृतवर्मा कर्णो मद्राधिपः कृपः।
तांस्त्वमद्य नरव्याघ्र हत्वा पञ्च महारथान् ॥ ५५ ॥
हतामित्रः प्रयच्छोर्वीं राज्ञे सद्वीपपत्तनाम्।
साकाशजलपातालां सपर्वतमहावनाम् ॥ ५६ ॥
प्राप्नोत्वमितवीर्यश्रीरद्य पार्थो वसुन्धराम्।
एतां पुरा विष्णुरिव हत्वा दैतेयदानवान् ॥ ५७ ॥
प्रयच्छ मेदिनीं राज्ञे शक्रायैव हरिर्यथा।
अद्य मोदन्तु पञ्चाला निहतेष्वरिषु त्वया ॥
विष्णुना निहतेष्वेव दानवेयेषु देवताः ॥ ५८ ॥
यदि वा द्विपदां श्रेष्ठं द्रोणं मानयतो गुरुम्।
अश्वत्थाम्नि कृपा तेऽस्ति कृपे वाचार्यगौरवात् ॥५९॥
अत्यन्तापचितान्बन्धून्मानयन्मातृबान्धवान्।
कृतवर्माणमासाद्य न नेष्यासि यमक्षयम् ॥ ६० ॥
भ्रातरं मातुरासाद्य शल्यं मद्रजनाधिपम्।
यदि त्वमरविन्दाक्ष दयावान्न जिघांससि ॥ ६१ ॥

और तारोंसे रहित आकाश। जैसे इन्द्रने दानवोंकी सेनाका नाश कर दिया था ऐसे ही तुमने उस सेनाका नाश किया। (५१–५४)

अब उधर केवल पांच महारथ शेष रहे हैं॥ अश्वत्थामा, कृतवर्मा, कर्ण, मद्रराज शल्य, और कृपाचार्य बचे है। आज इन पांचोंको मारकर राजा युधिष्ठिरको वन, नगर, आकाश, पाताल, जल और द्वीपोंके सहित पृथ्वी दो और शत्रुओंका नाश करो॥ जैसे पहले समयमें विष्णुने दानवोंको मारकर इन्द्रको स्वर्गका राज दिया था, ऐसे ही आज तुम इन सबको मारकर युधिष्ठिरको पृथ्वीका राज्य दो। जैसे दानवोंके मरनेसे देवता प्रसन्न हुए थे, तैसे ही आज कौरवोंके मरनेसे पाञ्चाल प्रसन्न होवें॥ अब महाराज युधिष्ठिर सब जगत्के राजा होवें॥ (५४–५८)

यदि तुम अश्वत्थामाको गुरुपुत्र और कृपाचार्यको गुरु जानकर इन दोनों पर कृपा करो तो और सब बान्धवोंपर दया करो, तो अपनी माताका अत्यन्त सम्बन्ध समझकर कृतवर्माको भी मत मारना। हे कमलनेत्र! यदि तुम राजा शल्यको अपना मामा समझकर न मारो

तस्मात्त्वं वै महाबाहो मम पार्थस्य चोभयोः ।
व्यतिक्रमामिमं राजन्सत्यसंरक्षणं प्रति ॥ ५२ ॥
शरणं त्वां महाराज प्रपन्नौ स्व उभावपि ।
क्षन्तुमर्हसि मे राजन्प्रणतस्याभियाचतः ॥ ५३ ॥
राधेयस्याद्य पापस्य भूमिः पास्यति शोणितम् ।
सत्यं ते प्रतिजानामि हतं विद्ध्यद्य सूतजम् ॥ ५४ ॥
यस्येच्छसि वधं तस्य गतमप्यस्य जीवितम् ।
इति कृष्णवचः श्रुत्वा धर्मराजो युधिष्ठिरः ॥ ५५ ॥
ससम्भ्रमं हृषीकेशमुत्थाप्य प्रणतं तदा ।
कृताञ्जलिस्ततो वाक्यमुवाचानन्तरं वचः ॥ ५६ ॥
एवमेव यथात्थ त्वमस्त्येषोऽतिक्रमो मम ।
अनुनीतोऽस्मि गोविन्द तारितश्चास्मि माधव॥ ५७ ॥
मोचिता व्यसनाद्घोराद्वयमद्य त्वयाच्युत ।
भवन्तं नाथमासाद्य ह्यावां व्यसनसागरात् ॥ ५८ ॥
घोरादद्य समुत्तीर्णावुभावज्ञानमोहितौ ।
त्वद्बुद्धिप्लवमासाद्य दुःखशोकार्णवाद्वयम् ॥ ५९ ॥

और अर्जुनका अपराध क्षमा कीजिये ये अपराध हम लोगोंने सत्य की रक्षाके लिये किया था ॥ हे महाराज ! अब हम दोनों आपकी शरण हैं । और मैं अब प्रणाम करके आपसे यही भिक्षा मागता हूं, कि आप क्षमा करें। आज पापी राधापुत्रका भूमि खून पियेगी। अब आप जानिये कि कर्ण मारा गया। अब आप सत्य जानिये कि आप मनसे जिसे मारना विचारते है, वह मर गया ॥ (५१-५५)

श्रीकृष्णके ऐसे वचन सुन और उन्हें अपने चरणोंमें पडा देख महाराजने उठाया और आदर सहित ऐसा बोले, हे गोविन्द ! हे माधव ! तुम जैसा समझते हो, सो सब ठीक है, तुम्हारी सहायतासे हम सब दुःखोंसे पार हुए हैं ॥ (५६—५७)

तुमने हम लोगोंको घोर दुःखसे छुडाया है । यदि तुम्हारी सहायता न होती तो हम इस दुःखसे न छूटते हम दोनों मूर्खता और अज्ञानताके वशमें होकर इस घोर दुःख और शोकके समुद्रमें डूबे जाते थे, परन्तु तुम्हारी बुद्धिरूपी नावकी सहायतासे पार होगये अब हम अपने मन्त्रियोंके सहित आपसे सनाथ

सामितौ गर्जते कर्णस्तमद्य जहि भारत।
यच्च युष्मासु पापं वै धार्तराष्ट्रः प्रयुक्तवान् ॥ ७० ॥
तत्र सर्वत्र दुष्टात्मा कर्णः पापमतिर्मुखम्।
यच्च तद्धार्तराष्ट्रस्य क्रूरैः षड्भिर्महारथैः ॥ ७१ ॥
अपश्यं निहतं वीरं सौभद्रमृषभेक्षणम्।
द्रोणद्रौणिकृपान्वीरान्कर्षयन्तं नरर्षभान् ॥ ७२ ॥
निर्मनुष्यांश्च मातङ्गान्विरथांश्च महारथान्।
व्यश्वारोहांश्च तुरगान्पत्तीन्व्यायुधजीविनः ॥ ७३ ॥
कुर्वन्तमृषभस्कन्धं कुरुवृष्णियशस्करम्।
विधमन्तमनीकानि व्यथयन्तं महारथान् ॥ ७४ ॥
मनुष्यवाजिमातङ्गान्प्राहिणवन्तं यमक्षयम्।
शरैः सौभद्रमायान्तं दहन्तमिव वाहिनीम् ॥ ७५ ॥
तन्मे दहति गात्राणि सखे सत्येन ते शपे।
यत्तत्रापि च दुष्टात्मा कर्णोऽभ्यद्रुह्यत प्रभो ॥ ७६ ॥
अशक्नुवंश्चाभिमन्योः कर्णः स्थातुं रणेऽग्रतः।
सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः ॥ ७७ ॥
निःश्वसन्क्रोधसन्दीप्तो विमुखः सायकार्दितः।
अपयानकृतोत्साहो निराशश्चापि जीविते ॥ ७८ ॥

गर्जता था उसे आज तुम जीतो। दुर्योधनने जो तुम्हारे सङ्ग पाप किये हैं, उन सबका मूल महापापी कर्ण ही है। (६८-७१)

विशाल नेत्र सुभद्रापुत्र, द्रोण, अश्वत्थामा और कृपाचार्य आदि महारथोंसे युद्ध करते हुए, हाथी घोडे और महारथोंको काटते, रथोंको वीरोंसे शून्य करते, कौरवोंकी सेनाको भगाते बैलके कन्धेके समान ऊंचे कन्धेवाले कौरव और यदुकुलके यश बढानेवाले अभिमन्युको जो छः महारथोंने मिलकर मारा, हम शपथ खाकर सत्य कहते हैं कि उससे हमारा हृदय जला जाता है। (७१-७६)

वह अभिमन्यु अपने बलसे दुर्योधनकी सेनाको भस्म कर रहा था उस समय भी इसी दुर्योधनकी सहायतासे दुष्ट कर्ण हीने हमारा द्वेष किया था। जब सुभद्रा पुत्र अभिमन्युके बाणोंसे इस दुष्टके शरीरसे रुधिर बहने लगा और सन्धि कटने लगीं, जब उसके आगे खडा होकर युद्ध न कर सका, तब अपने जीवनसे

प्रयावस्त्वरितौ योद्धुं सूतपुत्ररथं प्रति ॥ ८ ॥
हत्वा तु समरे कर्णं त्वमद्य निशितैः शरैः ।
विपुलां प्रीतिमाधत्स्व धर्मपुत्रस्य मानद ॥ ९ ॥
एतदत्र महाबाहो प्राप्तकालं मतं मम ।
एवं कृते कृतं चैव तव कार्यं भविष्यति ॥ १० ॥
सञ्जय उवाच— ततोऽर्जुनो महाराज लज्जया वै समन्वितः ।
धर्मराजस्य चरणौ प्रपद्य शिरसा नतः ॥ ११ ॥
उवाच भरतश्रेष्ठं प्रसीदेति पुनः पुनः ।
क्षमस्व राजन्यत्प्रोक्तं धर्मकामेन भीरुणा ॥ १२ ॥
दृष्ट्वा तु पतितं पद्भ्यां धर्मराजो युधिष्ठिरः ।
धनञ्जयमभिप्रेक्ष्य रुदन्तं भरतर्षभ ॥ १३ ॥
उत्थाप्य भ्रातरं राजा धर्मराजो धनञ्जयम् ।
समाश्लिष्य च सस्नेहं प्ररुरोद महीपतिः ॥ १४ ॥
रुदित्वा सुचिरं कालं भ्रातरौ सुमहाद्युती ।
कृतशौचौ महाराज प्रीतिमन्तौ बभूवतुः ॥ १५ ॥
तत आश्लिष्य तं प्रेम्णा मूर्ध्नि चाघ्राय पाण्डवः ।
प्रीत्या परमया युक्तो विस्मयंश्च पुनः पुनः ।

और तुम सूतपुत्र कर्णसे युद्ध करनेको चलेंगे । हे वीर ! तुम अपने तेज बाणोंसे इसी समय सूतपुत्रको मारकर धर्मराज युधिष्ठिरको बहुत प्रसन्न करना । हे महाबाहो ! अब समयके अनुसार हमारी यही सम्मति है । ऐसा ही करनेसे तुम्हारा कल्याण होगा ॥ (६-१०)

सञ्जय बोले, हे महाराज धृतराष्ट्र ! तब अर्जुनने बहुत लज्जासे अपना शिर नीचा करके महाराज युधिष्ठिरके चरणोंमें रख दिया ॥ अनन्तर हाथ जोडकर बहुत नम्रतासे कहा कि, हे महाराज ! मैंने जो धर्मसे डर आपसे कुवचन कहे सो आप क्षमा कीजिये और प्रसन्न हूजिये ॥ (११—१२)

जब युधिष्ठिरने रोते हुए अर्जुनको अपने पैरोंमें पडा देखा तब उन्होंने उठाकर अपने हृदयमें लगा लिया और स्नेहसे रोने लगे ॥ थोडे समय तक दोनों तेजस्वी भाई रोते रहे फिर सोचकर परस्पर प्रसन्न होगये, तब धर्मराज युधिष्ठिरने प्रेमसे हृदय लगाकर प्रेम सहित अर्जुनका माथा सूंघा और बार बार प्रशंसा करने लगे ॥ (१३-१६)

समितौ गर्जते कर्णस्तमद्य जहि भारत।
यच्च युष्मासु पापं वै धार्तराष्ट्रः प्रयुक्तवान् ॥ ७० ॥
तत्र सर्वत्र दुष्टात्मा कर्णः पापमतिर्मुखम्।
यच्च तद्धार्तराष्ट्रस्य क्रूरैः षड्भिर्महारथैः ॥ ७१ ॥
अपश्यं निहतं वीरं सौभद्रमृषभेक्षणम्।
द्रोणद्रौणिकृपान्वीरान्कर्षयन्तं नरर्षभान् ॥ ७२ ॥
निर्मनुष्यांश्च मातङ्गान्विरथांश्च महारथान्।
व्यश्वारोहांश्च तुरगान्पत्तीन्व्यायुधजीविनः ॥ ७३ ॥
कुर्वन्तमृषभस्कन्धं कुरुवृष्णियशस्करम्।
विधमन्तमनीकानि व्यथयन्तं महारथान् ॥ ७४ ॥
मनुष्यवाजिमातङ्गान्प्राहिणवन्तं यमक्षयम्।
शरैः सौभद्रमायान्तं दहन्तमिव वाहिनीम् ॥ ७५ ॥
तन्मे दहति गात्राणि सखे सत्येन ते शपे।
यत्तत्रापि च दुष्टात्मा कर्णोऽभ्यद्रुह्यत प्रभो ॥ ७६ ॥
अशक्नुवंश्चाभिमन्योः कर्णः स्थातुं रणेऽग्रतः।
सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः ॥ ७७ ॥
निःश्वसन्क्रोधसन्दीप्तो विमुखः सायकार्दितः।
अपयानकृतोत्साहो निराशश्चापि जीविते ॥ ७८ ॥

गर्जता था उसे आज तुम जीतो। दुर्योधनने जो तुम्हारे सङ्ग पाप किये हैं, उन सबका मूल महापापी कर्ण ही है। (६८-७१)

विशाल नेत्र सुभद्रापुत्र, द्रोण, अश्वत्थामा और कृपाचार्य आदि महारथोंसे युद्ध करते हुए, हाथी घोडे और महारथोंको काटते, रथोंको वीरोंसे शून्य करते, कौरवोंकी सेनाको भगाते बैलके कन्धेके समान ऊंचे कन्धेवाले कौरव और यदुकुलके यश बढानेवाले अभिमन्युको जो छः महारथोंने मिलकर मारा, हम शपथ खाकर सत्य कहते है कि उससे हमारा हृदय जला जाता है। (७१-७६)

वह अभिमन्यु अपने बलसे दुर्योधनकी सेनाको भस्म कर रहा था उस समय भी इसी दुर्योधनकी सहायतासे दुष्ट कर्ण हीने हमारा द्वेष किया था। जब सुभद्रा पुत्र अभिमन्युके बाणोंसे इस दुष्टके शरीरसे रुधिर बहने लगा और सन्धि कटने लगीं, जब उसके आगे खडा होकर युद्ध न कर सका, तब अपने जीवनसे

एष चापि हि मे कामो नित्यमेव महारथ ॥ २५ ॥
कथं भवान्रणे कर्ण निहन्यादिति सत्तम ।
भूयश्चोवाच मतिमान्माधवो धर्मनन्दनम् ॥ २६ ॥
युधिष्ठिरेमं बीभत्सुं त्वं सान्त्वयितुमर्हसि ।
अनुज्ञातुं च कर्णस्य वधायाद्य दुरात्मनः ॥ २७ ॥
श्रुत्वा ह्यहमयं चैव त्वां कर्णशरपीडितम् ।
प्रवृत्तिं ज्ञातुमायाताविहावां पाण्डुनन्दन ॥ २८ ॥
दिष्ट्यासि राजन्नहतो दिष्ट्या न ग्रहणं गतः ।
परिसान्त्वय बीभत्सुं जयमाशाधि चानघ ॥ २९॥
युधिष्ठिर उवाच- एह्येहि पार्थ बीभत्सो मां परिष्वज पाण्डव ।
वक्तव्यमुक्तोऽस्मि हितं त्वया क्षान्तं च तन्मया ॥३०॥
अहं त्वामनुजानामि जहि कर्ण धनञ्जय ।
मन्युं च मा कृथाः पार्थ यन्मयोक्तोऽसि दारुणम् ॥३१॥
सञ्जय उवाच— ततो धनञ्जयो राजञ्शिरसा प्रणतस्तदा ।
पादौ जग्राह पाणिभ्यां भ्रातुर्ज्येष्ठस्य मारिष ॥ ३२ ॥
तमुत्थाप्य ततो राजा परिष्वज्य च पीडितम् ।

अर्जुनके वचन सुन श्रीकृष्ण राजासे बोले, हे कुन्तीपुत्र ! आप कर्णको मारनेमें समर्थ हो और मेरी भी बहुत दिनसे यही इच्छा है, कि कर्ण मारा जावे, परन्तु आप उसे युद्धमें कैसे मारते ? आपको यही उचित है, कि उस दुष्टको मारनेके लिये अर्जुनहीको आज्ञा दे, इससे उनका उत्साह बढेगा ॥ (२४-२७)

हे पाण्डुपुत्र ! आप कर्णके बाणोंसे पीडित हैं, यह सुनकर ही और आपके दर्शन करनेको हम आये थे ॥ हे पापरहित ! आप हमारी प्रारब्धहीसे उसके हाथसे नहीं मारे गये और न पकडे गये। अब अर्जुनको युद्ध करनेकी आज्ञा दीजिये और अपनी विजयका निश्चय कर लीजिये ॥ (२८-२९)

महाराज युधिष्ठिर बोले, हे प्यारे अर्जुन ! तुम हमारे पास आवो तुमने जो कुछ कहा था हमने सब क्षमा किया। हे कुन्तीपुत्र ! हे धनञ्जय ! हम तुम्हारे बलको जानते हैं, अब तुम कर्णको जीतो और हमने जो कुछ कहा है, उसपर क्रोध भी मत करना । ॥ (३०-३१)

सञ्जय बोले, हे राजन् ! तब अर्जुनने हाथ जोडकर अपना शिर महाराजके चरणोंमें रख दिया, तब राजाने दुःखित

पश्येदानीं यथा भद्रे विनष्टाः पाण्डवाः समम् ॥ ८७ ॥
अन्योन्यं समुदीक्षन्ते धार्तराष्ट्रस्य तेजसा।
व्यक्तं षण्ढतिला श्वेते न पुरेव निमज्जिताः ॥ ८८ ॥
प्रेष्यवच्चापि राजानमुपस्थास्यन्ति कौरवम्।
इत्युक्तवानधर्मज्ञस्तदा परमदुर्मतिः ॥ ८९ ॥
पापः पापवचाः कर्णः शृण्वतस्तव भारत।
अद्य पापस्य तद्वाक्यं सुवर्णविकृताः शराः ॥ ९० ॥
शमयन्तु शिलाधौतास्त्वयास्ता जीवितच्छिदः।
यानि चान्यानि दुष्टात्मा पापानि कृतवांस्त्वयि ॥ ९१ ॥
तानद्य जीवितं चास्य शमयन्तु शरास्तव।
गाण्डीवप्रहितान्घोरानद्य गात्रैः स्पृशञ्छरान् ॥ ९२ ॥
कर्णः स्मरतु दुष्टात्मा वचनं द्रोणभीष्मयोः।
सुवर्णपुङ्खा नाराचाः शत्रुघ्ना वैद्युतप्रभाः ॥ ९३ ॥
त्वयास्तास्तस्य वर्माणि भित्त्वा पास्यन्ति शोणितम्।
उग्रास्त्वद्भुजनिर्मुक्ता मर्म भित्त्वा महाशराः ॥ ९४ ॥
अद्य कर्णं महावेगाः प्रेषयन्तु यमक्षयम्।
अद्य हाहाकृता दीना विषण्णास्त्वच्छरार्दिताः ॥ ९५ ॥
प्रपतन्तं रथात्कर्ण पश्यन्तु वसुधाधिपाः।
अद्य शोणितसम्मग्नं शयानं पतितं भुवि।

हैं। और पाण्डव नष्ट होगये, ये सब दुर्योधनके तेजसे परस्पर देख रहे हैं? ये सब पाण्डव नपुंसक होगये, और घोर आपत्तिमें पडगये। अब ये सब राजाके दास होगये इनकी आज्ञामें चलना पडेगा। (८६–८९)

जो यह बडा पापी है, इस दुष्टने कुछ वचन सुनाये थे, उन सबका उत्तर आज तुम्हारे सोनेके पङ्खवाले, शिला पर घिसे धनुषसे छूटे घोर बाण देंगे, वे उस पापीके शरीरको काटेंगे। तुम्हारे सोनेके पङ्खवाले बिजलीके समान प्रकाशित बाणोंको देखकर दुरात्मा कर्ण, भीष्म और द्रोणाचार्यके वचनोंको स्मरण करे, आज तुम्हारे धनुषसे छूटकर तुम्हारे घोर बाण कर्णका कवच तोडकर मर्मस्थान काट कर रुधिर पियेंगे॥ (८९—९४)

इस समय अब तुम्हारे घोर बाण कर्णको मारकर यमराजके घर पहुंचावेंगे, अब तुम्हारे बाणोंसे व्याकुल होकर

सञ्जय उवाच— प्रसाद्य धर्मराजानं प्रहृष्टेनान्तरात्मना ।
पार्थः प्रोवाच गोविन्दं सूतपुत्रवधोद्यतः ॥ १ ॥
कल्पतां मे रथो भूयो युज्यन्तां च हयोत्तमाः ।
आयुधानि च सर्वाणि सज्जन्तां मे महारथे ॥ २ ॥
उपावृत्ताश्च तुरगाः शिक्षिताश्चाश्वसादिभिः ।
रथोपकरणैः सज्जा उपायान्तु त्वरान्विताः ॥ ३ ॥
प्रयाहि शीघ्रं गोविन्द सूतपुत्रजिघांसया ।
एवमुक्तो महाराज फाल्गुनेन महात्मना ॥ ४ ॥
उवाच दारुकं कृष्णः कुरु सर्वं यथाब्रवीत् ।
अर्जुनो भरतश्रेष्ठ श्रेष्ठः सर्वधनुष्मताम् ॥ ५ ॥
आज्ञप्तस्त्वथ कृष्णेन दारुको राजसत्तम ।
योजयामास स रथं वैयाघ्रं शत्रुतापनम् ॥ ६ ॥
सज्जं निवेदयामास पाण्डवस्य महात्मनः ।
युक्तं तु तं रथं दृष्ट्वा दारुकेण महात्मना ॥ ७ ॥
आपृच्छ्य धर्मराजानं ब्राह्मणान्स्वस्ति वाच्य च ।
सुमङ्गलं स्वस्त्ययनमारुरोह रथोत्तमम् ॥ ८ ॥

वृत्रासुरको मारा था, वैसे ही तुम कर्णको मारो ॥ (३९–४०) [३५५८]

कर्णपर्वमें इकत्तर अध्याय समाप्त ।

कर्णपर्वमें बाहत्तर अध्याय ।

सञ्जय बोले, हे राजन्! युधिष्ठिरको इस प्रकार प्रसन्न कर और कर्णके मारने का निश्चय कर अर्जुन प्रसन्नता पूर्वक श्रीकृष्णसे बोले ॥ अब हमारे रथमें उत्तम घोडे जोडे जायं, और सब प्रकारके शस्त्र रक्खे जावें ॥ अनेक शिक्षित और उत्तम घोडोंपर चढकर वीर सब सामग्री सहित हमारे सङ्ग चलनेको शीघ्र आवें॥ हे गोविन्द! आप शीघ्र कर्णके मारनेको चलिये । (१–४)

महात्मा अर्जुनके ऐसे वचन सुन कृष्णने दारुकसे कहा,कुरुकुलश्रेष्ठ महाधनुषधारी अर्जुनने जो कुछ कहा सो सब तुम ठीक कर दो । हे राजन् धृतराष्ट्र! श्रीकृष्णकी आज्ञासे दारुकने अर्जुनके उत्तम रथमें घोडे जोडे और सब सामग्री ठीक की । फिर महात्मा अर्जुनसे आकर कहा कि आपका रथ उपस्थित है । (४–७)

अनन्तर धर्मराज युधिष्ठिरकी आज्ञा लेकर ब्राह्मणोंसे आशीर्वाद ले और स्वस्तिवाचन सुन अर्जुन उत्तम रथपर

अभ्याहतानां कर्णेन पञ्चालानामसौ रणे।
श्रूयते निनदो घोरस्त्वद्बन्धूनां परन्तप ॥ १०५ ॥
नत्वेव भीताः पञ्चालाः कथञ्चित्स्युः पराङ्मुखाः।
नहि मृत्युं महेष्वासा गणयन्ति महारणे ॥ १०६ ॥
य एकः पाण्डवीं सेनां शरौघैः समवेष्टयत्।
तं समासाद्य पञ्चाला भीष्मान्नासन्पराङ्मुखाः॥१०७॥
ते कथं कर्णमासाद्य विद्रवेयुर्महारथाः।
यस्त्वेकः सर्वपञ्चालानहन्यहनि नाशयन् ॥ १०८ ॥
कालवच्चरते वीरः पञ्चालानां रथव्रजे।
तमप्यासाद्य समरे मित्रार्थे मित्रवत्सलाः ॥ १०९ ॥
तथा ज्वलन्तमस्त्राग्निं गुरुं सर्वधनुष्मताम्।
निर्दहन्तं च समरे दुर्धर्षं द्रोणमोजसा ॥ ११० ॥
ते नित्यमुदिता जेतुं मृधे शत्रूनरिन्दम।
न जात्वाधिरथेर्भीताः पञ्चालाः स्युः पराङ्मुखाः॥१११॥
तेषामापततां शूरः पञ्चालानां तरस्विनाम्।
आदत्तासून्शरैः कर्णः पतङ्गानामिवानलः ॥ ११२ ॥
एते द्रवन्ति पञ्चाला द्राव्यन्ते योधिभिर्ध्रुवम्।

हे शत्रुनाशन! ये देखो कर्णके बाणोंसे व्याकुल होकर तुम्हारे संबन्धी पाञ्चाल चिल्ला रहे हैं॥ ये महाधनुषधारी पाञ्चाल बडे योद्धा हैं। मृत्युसे भी नहीं डरते देखो अभीतक इन्होंने युद्धको नहीं छोडा जिस अकेलेने अपने बाणोंसे पाण्डवोंकी सब सेनाको व्याकुल कर दिया था उस भीष्मसे भी पाञ्चाल नहीं भागे थे, जो पाञ्चाल नित्य अपना नाश देखकर भी उस समय युद्धसे नहीं भागे थे अब कर्णसे क्या भागेंगे? (१०५-१०८)

इसी प्रकार पाञ्चालोंकी सब सेनामें मृत्युके समान घूमते हुए प्रतिदिन पाञ्चालोंका नाश करनेवाले, इस सब जगत्के धनुषधारियोंके गुरु द्रोणाचार्यके शस्त्ररूपी अग्निसे जलकर भी मित्रोंके ऊपर प्रेम करनेवाले होनेसे मित्रोंके लिये लडते हुए युद्धसे विमुख नहीं हुए, ये सदा युद्धके लिये उत्साह करते रहते हैं सो आज कर्णके आगे क्यों भागेंगे? हे शूर! देखो वीर पाञ्चाल बाण छोडते हुए कर्णकी ओर इस प्रकार दौड रहे हैं। जैसे अग्निकी ओर पतङ्ग दौडे।१०९-११२

न तेषां मानुषो जेता त्वदन्य इह विद्यते ॥ १७ ॥
दृष्टा हि बहवः शूराः शक्रतुल्यपराक्रमाः ।
त्वां प्राप्य समरे शूरं ते गताः परमां गतिम् ॥ १८ ॥
को हि द्रोणं च भीष्मं च भगदत्तं च मारिष ।
विन्दानुविन्दावावन्त्यौ काम्बोजं च सुदक्षिणम्॥१९॥
श्रुतायुषं महावीर्यमच्युतायुषमेव च ।
प्रत्युद्गम्य भवेत्क्षेमी यो न स्यात्त्वमिव प्रभो॥ २० ॥
तव ह्यस्त्राणि दिव्यानि लाघवं बलमेव च ।
असंमोहश्च युद्धेषु विज्ञानस्य च संनतिः ॥ २१ ॥
वेधः पातश्च लक्ष्येषु योगश्चैव तथार्जुन ।
भवान्देवान्सगन्धर्वान्हन्यात्सहचराचरान् ॥ २२ ॥
पृथिव्यां तु रणे पार्थ न योद्धा त्वत्समः पुमान् ।
धनुर्ग्राहा हि ये केचित्क्षत्रिया युद्धदुर्मदाः ॥ २३ ॥
आदेवात्त्वत्समं तेषां न पश्यामि शृणोमि च ।
ब्रह्मणा च प्रजाः सृष्टा गाण्डीवं च महद्धनुः ॥ २४ ॥
येन त्वं युध्यसे पार्थ तस्मान्नास्ति त्वया समः ।

धारी अर्जुन ! तुमने जिन वीरोंको जीता है उनको जीतनेवाला तुम्हारे सिवाय इस जगत्में कोई नहीं है । हमने अनेक इन्द्रके समान पराक्रमी वीरोंको युद्धमें देखा परन्तु वे सब तुमसे युद्ध करते ही मर गये ॥ भला तुम्हारे सिवाय भीष्म, द्रोणाचार्य, भगदत्त, उज्जैनके विन्द और अनुविन्द, काम्बोज देशी सुदक्षिण, महाबली श्रुतायुष और अच्युतायुष इन वीरोंके आगे जाकर कौन जीता बच सक्ता है ? (१७-२०)

तुम्हारे शस्त्र बहुत तेज हैं। बलसे शीघ्र चलाना भूल न करना और बुद्धिमानीसे युद्ध करना ये सब गुण तुममें हैं। हे अर्जुन ! तुम लक्ष्यको बहुत शीघ्र देखते हो और तुम अपने बलसे देवता, गन्धर्व और मनुष्योंके सहित चराचरका नाश कर सक्ते हो, जगत्में जितने धनुषधारी क्षत्री हुए तुम उनमें सबसे अधिक हो। हमने देवता और मनुष्योंमें तुम्हारे समान वीर कोई न देखा और न सुना । (२०-२४)

ब्रह्माने सब सृष्टि बनानेके समय इस दिव्य गाण्डीव धनुषको बनाया था, उसी गाण्डीवसे तुम युद्ध करते हो इस-लिये तुम्हारे समान कोई योद्धा नहीं है,

हन्यादुपेक्षितः कर्णो रोगो देहमिवागतः ॥ १२१ ॥
नान्यं त्वत्तो हि पश्यामि योधं यौधिष्ठिरे बले ।
यः समासाद्य राधेयं स्वस्तिमानाव्रजेद्गृहम् ॥ १२२ ॥
तमद्य निशितैर्बाणैर्विनिहत्य नरर्षभ ।
यथाप्रतिज्ञं पार्थ त्वं कृत्वा कीर्तिमवाप्नुहि ॥ १२३ ॥
त्वं हि शक्तो रणे जेतुं सकर्णानपि कौरवान् ।
नान्यो युधि युधां श्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥ १२४ ॥
एतत्कृत्वा महत्कर्म हत्वा कर्णं महारथम् ।
कृतार्थः सफलः पार्थ सुखी भव नरोत्तम ॥१२५॥ [३७२३]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कृष्णवाक्ये त्रिसप्ततितमोऽध्यायः ॥ ७३॥

सञ्जय उवाच— स केशवस्य बीभत्सुः श्रुत्वा भारत भाषितम् ।
विशोकः सम्प्रहृष्टश्च क्षणेन समपद्यत ॥ १ ॥
ततो ज्यामभिमृज्याशु व्याक्षिपद्गाण्डिवं धनुः ।
ददधे कर्णविनाशाय केशवं चाभ्यभाषत ॥ २ ॥
त्वया नाथेन गोविन्द ध्रुव एव जयो मम ।
प्रसन्नो यस्य मेऽद्य त्वं लोके भूतभविष्यकृत् ॥ ३ ॥
त्वत्सहायो ह्यहं कृष्ण त्रींल्लोकान्वै समागतान् ।

शत्रुओंकी सेनाको नाश करते हुए धनुषधारियोंमें श्रेष्ठ महारथ कर्ण अत्यन्त शोभित हुए, जैसे आग काठको जलाती है ऐसे कर्णने पाण्डवोंकी सेनाको जला दिया, इनके बाणोंसे व्याकुल होकर

ततोऽभियाते तव सैन्ये स भीमः प्रादुश्चक्रे वेगमनन्तवेगः ॥ ७ ॥
यथान्तकाले क्षपयन्दिधक्षुर्भूतान्तकृत्काल इवात्तदण्डः ।
तस्यातिवेगस्य रणेऽतिवेगं नाशक्नुवन्वारयितुं त्वदीयाः ॥ ८ ॥
व्यात्ताननस्यापततो यथैव कालस्य काले हरतः प्रजा वै ।
ततो बलं भारत भारतानां प्रदह्यमानं समरे महात्मना ॥ ९ ॥
भीतं दिशोऽकीर्यत भीमनुन्नं महानिलेनाभ्रगणा यथैव ।
ततो धीमान्सारथिमब्रवीद्वली स भीमसेनः पुनरेव हृष्टः ॥ १० ॥
सूताभिजानीहि स्वकान्परान्वा रथान्ध्वजांश्चापततः समेतान् ।
युद्धयन्ह्यहं नाभिजानामि किञ्चिन्मा सैन्यं स्वं छादयिष्ये पृषत्कैः ॥११॥
अरीन्विशोकाभिनिरीक्ष्य सर्वतो रथो ध्वजाग्राणि धुनोति मे भृशम् ।
राजातुरो नागमद्यत्किरीटी बह्वनि दुःखान्यभियातोऽस्मि सूत ॥ १२ ॥
एतद् दुःखं सारथे धर्मराजो यन्मां हित्वा यातवाञ्शत्रुमध्ये ।

जैसे फूलयुक्त वृक्षपर अनेक पक्षी दौडते है । ऐसे ही तुम्हारी सेनाके वीर भीमसेनकी ओर दौंडे । तब भीमसेनने अपने घोर पराक्रमको प्रगट किया ॥ (४–७)

जैसे प्रलयकालमें दण्ड धारण करके यमराज प्रजाको नाश करनेके लिये दौडते हैं, ऐसे ही भीमसेन तुम्हारी सेनाका नाश करने लगे । उस समय महा पराक्रमी भीमसेनके वेगको कोई भी योद्धा न सह सका ॥ हे भारत ! जैसे प्रलयकालमें कोई नाश करते मुख वाये यमराजको नहीं देख सक्ता, ऐसे ही कोई योद्धा भीमसेनकी ओर न देख सका । इस प्रकारसे सेनाका नाश करते देख तुम्हारी सेना चारों ओरको इस प्रकार भागने लगी जैसे वायुके लगनेसे मेघ । (७–१०)

तब महा बुद्धिमान् भीमसेनसे प्रसन्न होकर अपने सारथीसे कहा, हे सूत ! हम इस समय युद्ध कर रहे हैं । इसलिये हमें अपनी और कौरवोंकी सेना नहीं दिखाई देती है । परन्तु तुम सबकी ध्वजाओंको पहचानते हो, इसलिये तुम ऐसी युक्ति करना जिससे हम अपनी सेनाको बाणोंसे न मार सके ॥ हे सूत! इस समय हमारे सब शत्रु प्रसन्न हो रहे हैं । और हमें यह जान पडता है कि महाराज बहुत पीडित हैं । क्यों कि अर्जुन उन्हें देखकर अभीतक नहीं लौटे इसीसे हमारा हृदय इस समय दुःखसे व्याकुल हो रहा है ॥(१०-१२)

हमें यह विचार कर बहुत दुःख होता है, कि धर्मराज हमें युद्धमें अकेला छोडकर चले गये, न जाने वे सब

विषमं च समं चैव हतैरश्वपदातिभिः ॥ ४४ ॥
रथैश्च कुञ्जरैश्चैव न प्राज्ञायत किञ्चन।
नापि स्वे न परे योधाः प्राज्ञायन्त परस्परम् ॥ ४५ ॥
घोरे शरान्धकारे तु कर्णास्त्रे च विजृंभिते।
राधेयचापनिर्मुक्तैः शरैः काञ्चनभूषणैः ॥ ४६ ॥
संछादिता महाराज पाण्डवानां महारथाः।
ते पाण्डवेयाः समरे राधेयेन पुनः पुनः ॥ ४७ ॥
अभज्यन्त महाराज यतमाना महारथाः।
मृगसंघान्यथा क्रुद्धः सिंहो द्रावयते वने ॥ ४८ ॥
पञ्चालानां रथश्रेष्ठान्द्रावयञ्शात्रवांस्तथा।
कर्णस्तु समरे योधांस्त्रासयन्सुमहायशाः ॥ ४९ ॥
कालयामास तत्सैन्यं यथा पशुगणान्वृकः।
दृष्ट्वा तु पाण्डवीं सेनां धार्तराष्ट्राः पराङ्मुखीम् ॥ ५० ॥
तत्राजग्मुर्महेष्वासा रुवन्तो भैरवान्रवान्।
दुर्योधनो हि राजेन्द्र मुदा परमया युतः ॥ ५१ ॥
वादयामास संहृष्टोः नानावाद्यानि सर्वशः।
पञ्चालाऽपि महेष्वासा भग्नास्तत्र नरोत्तमाः ॥ ५२ ॥

गये। उस समय अनेक हाथी, घोडे और पैदलोंके मरनेसे पृथ्वीमें मांस और रुधिरकी कीचड होगयी। किसीको वहां जानेकी शक्ति नहीं रही और पृथ्वी ऊंची नीचि होगयी। कटे हुए हाथी और रथोंसे इधर कुछ नहीं जाना जाता था, कोई योद्धा अपने और परायेको नहीं पहचानता था ॥ (४१–४५)

राधापुत्रके छूटे हुए बाणोंसे चारों ओर अन्धकार होरहा था, हे महाराज! राधापुत्रने बार बार अपने बाणोंसे समर भूमिमें पराक्रमी पाण्डवोंके महारथोंको व्याकुल कर दिया, तब वे सब युद्ध छोड कर ऐसे भागे, जैसे वनमें सिंहको देख मृग भागते हैं। महायशस्वी कर्णने पाञ्चाल आदि महारथोंको डराकर भगा दिया, जैसे भेडियेको देख बकरी भागती है, ऐसे ही पाण्डवोंकी सेना कर्णको देख भागी। (४६–५०)

पाण्डवोंकी सेनाको भागते देख तुम्हारे पुत्र दुर्योधन अपने धनुषधारी भाइयोंके सहित बहुत प्रसन्न होते हुए कर्णके पास गर्जते हुए आये और अनेक प्रकारके बाजे बजानेकी आज्ञा दी। तब

सर्वानेकस्तानहं पातयिष्ये ते वा सर्वे भीमसेनं तुदन्तु ॥ २१ ॥
आशास्तारः कर्म चाप्युत्तमं ये तन्मे देवाः केवलं साधयन्तु ।
आयात्विहाद्यार्जुनः शस्त्रघाती शक्रस्तूर्णं यज्ञ इवोपहूतः ॥ २२ ॥
इक्षस्वैतां भारतीं दीर्यमाणामेते कस्माद्विद्रवन्ते नरेन्द्राः ।
व्यक्तं धीमान्सव्यसाची नराग्र्यः सैन्यं ह्येतच्छादयत्याशु बाणैः ॥२३॥
पश्य ध्वजांश्च द्रवतो विशोक नागान्हयान्पातिसङ्घांश्च सङ्घ्ये ।
रथान्विकीर्णाञ्शरशक्तिताडितान्पश्यस्वैतान्रथिनश्चैव सूत ॥ २४ ॥
आपूर्यते कौरवी चाप्यभीक्ष्णं सेना ह्यसौ सुभृशं हन्यमाना ।
धनञ्जयस्याशनितुल्यवेगैर्ग्रस्ता शरैः काञ्चनबर्हिजालैः ॥ २५ ॥
एते द्रवन्ति स्म रथाश्वनागाः पदातिसङ्घानतिमर्दयन्तः ।
समुह्यमानाः कौरवाः सर्व एव द्रवन्ति नागा इव दाहभीताः ॥२६॥
हाहाकृताश्चैव रणे विशोक मुञ्चन्ति नादान्विपुलान्गजेन्द्राः ॥ २७ ॥
विशोक उवाच-किं भीम नैनं त्वमिहाशृणोषि विस्फारितं गाण्डिवस्यानिघोरम्।
क्रुद्धेन पार्थेन विकृष्यतोऽद्य कच्चिन्नेमौ तव कर्णौ विनष्टौ ॥ २८ ॥
सर्वे कामाः पाण्डव ते समृद्धाः कपिर्ह्यसौ दृश्यते हस्तिसैन्ये ।

गिरावे, आजसे यह कीर्त्ति सदाके लिये स्थिर हुई इस समय मेरी यही आशा है। सब देवता इसको पूर्ण करें । (१९-२२)

जैसे यज्ञमें इन्द्र जाते हैं, तैसे ही इस समय शत्रुनाशन अर्जुन यहां पहुंच जायं। इधर देखो ये कौरवोंकी सेनाके प्रधान राजा क्यों भागे जाते हैं। निश्चय अर्जुन आगये, और इसी सेनाको अपने बाणोंसे छा रहे हैं॥ हे विशोक! ये देखो राजाओंके ध्वज भागते हुए दीखते हैं। ये हाथी, घोडे भगे चले आते हैं। ये अनेक बाण शक्ति और तोमरोंसे व्याकुल अनेक वीर, इधर उधरको भाग रहे हैं ॥ (२२-२४)

अब तुम खडे होकर अर्जुनकी ध्वजा देखो, ये अर्जुनके सुवर्ण पङ्खवाले, वज्र तुल्य बाणोंसे पीडित कौरवोंकी सेना इधरको भागी जाती है, जैसे वनमें आग लगनेसे हाथी भागते हैं तैसे हाथी, घोडे, रथ और पदाति अपनी सेनाको मारते हुए भागे जाते हैं। हे विशोक! ये देखो अनेक हाथी हाहाकार करते हुए इधर उधरको भाग रहे हैं॥(२५-२७)

विशोक बोला, हे भीमसेन! क्या तुम्हारे कान फूट गये? तुम क्रोध भरे अर्जुनके हाथसे खिचते हुए गाण्डीवका घोर शब्द नहीं सुनते? हे पाण्डव! अब आपके सब काम सिद्ध होगये, ये

कर्णपुत्रौ तु राजेन्द्र भ्रातरौ सत्यविक्रमौ ।
निजघ्नाते बलं क्रुद्धौ पाण्डवानामितस्ततः ॥ ६२ ॥
तत्र युद्धं महच्चासीत्क्रूरं विशसनं महत् ।
तथैव पाण्डवाः शूरा धृष्टद्युम्नशिखण्डिनौ ॥ ६३ ॥
द्रौपदेयाश्च संक्रुद्धा अभ्यघ्नंस्तावकं बलम् ।
एवमेष क्षयो वृत्तः पाण्डवानां ततस्ततः ॥
तावकानामपि रणे भीमं प्राप्य महाबलम् ॥ ६४ ॥ [३९८१]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि
सकुलयुद्धे अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

सञ्जय उवाच— अर्जुनस्तु महाराज हत्वा सैन्यं चतुर्विधम् ।
सूतपुत्रं च संक्रुद्धं दृष्ट्वा चैव महारणे ॥ १ ॥
शोणितोदां महीं कृत्वा मांसमज्जास्थिपंकिलाम् ।
मनुष्यशीर्षपाषाणां हस्त्यश्वकृतरोधसम् ॥ २ ॥
शूरास्थिचयसंकीर्णां काकगृध्रानुनादिताम् ।
छत्रहंसप्लवोपेतां वीरवृक्षापहारिणीम् ॥ ३ ॥
हारपद्माकरवतीमुष्णीषवरफेनिलाम् ।

भी पाण्डवोंके सहस्रों वीरोंको मारने लगे ॥ (५९-६१)

कर्णके दोनों महारथ पुत्र भी पाण्डवोंकी सेनाका नाश करने लगे । इसी प्रकार पाण्डवोंकी ओरसे वीर धृष्टद्युम्न, शिखण्डी, द्रौपदीके पांचों पुत्र क्रोध करके तुम्हारी सेनाका नाश करने लगे। इस प्रकार यह घोर युद्ध प्रलय कालके समान हुआ । तुम्हारी सेना भी महा पराक्रमी भीमसेनसे घोर युद्ध करने लगी ॥ (६२-६४) [३९८१]

कर्णपर्वमें अट्ठत्तर अध्याय समाप्त।

कर्णपर्वमें उनासी अध्याय।

सञ्जय बोले, हे राजन् ! अर्जुनने भी चतुरङ्गिणी सेनाका नाश करके और कर्णको क्रोधमें भरा देखकर मांस, चर्बी हड्डी और रुधिरकी कीचड करके पत्थरोंके ढेरके समान मनुष्योंके शिर काट कर, रुधिरकी नदी बहा कर, मरे हुए हाथियोंके तट बनाकर रुधिरकी नदी बहा दी । (१-२)

इस नदीमें चारों ओर शूर वीरोंकी हड्डी और काकगिद्ध आदिकोंके शब्द सुननेमें आने लगे। कटे हुए छत्र हंसोंके समान दीखने लगे । मरे वीर टूटे वृक्षोंके समान बहने लगे । हार, पद्म, पगडी,

रथान्हयान्पत्तिगणांश्च सायकैर्विदारितान्पश्य पतन्त्यभी यथा ।
तवानुजेनासरराजतेजसा महावनानीव सुपर्णवायुना ॥ ३७ ॥
चतुःशतान्पश्य रथानिमान्हतान्सवाजिसूतान्समरे किरीटिना ।
महेषुभिः सप्तशतानि दन्तिनां पदातिसादींश्च रथाननेकशः ॥ ३८ ॥
अय समभ्येति तवान्तिकं बली निघ्नन्कुरूंश्चित्र इव ग्रहोऽर्जुनः ।
समृद्धकामोऽसि हतास्तवाहिता बलं तवायुश्च चिराय वर्धताम् ॥ ३९ ॥
भीमसेन उवाच- ददानि ते ग्रामवरांश्चतुर्दश प्रियाख्याने सारथे सुप्रसन्नः ।
दासीशतं चापि रथांश्च विंशतिं यदर्जुनं वेदयसे विशोक ॥ ४० ॥ ३८३८

इति श्रीमहाभारते० सहितायां वैयासिक्यां कर्णपर्वणि भीमसेनविशोकसंवादे षट्सप्ततितमोऽध्यायः ॥७६॥

सञ्जय उवाच— श्रुत्वा तु रथनिर्घोषं सिंहनादं च संयुगे ।
अर्जुनः प्राह गोविन्दं शीघ्रं नोदय वाजिनः ॥ १ ॥
अर्जुनस्य वचः श्रुत्वा गोविन्दोऽर्जुनमब्रवीत् ।
एष गच्छामि सुक्षिप्रं यत्र भीमो व्यवस्थितः ॥ २ ॥
तं यान्तमश्वैर्हिमशङ्खवर्णैः सुवर्णमुक्तामणिजालनद्धैः ।
जम्भं जिघांसुं प्रगृहीतवज्रं जयाय देवेन्द्रमिवोग्रमन्युम् ॥ ३ ॥

सफेद मेघके समान रङ्गवाले, घोडोंके रथ पर बैठे हुए इधर ही को चले आते है, जैसे गरुडके पङ्खका वायु लगनेसे वनके वृक्ष गिरते है,ऐसे ही इन्द्रके समान तेजस्वी अर्जुनके बाणोंसे ये हाथी, घोडे और पदाति गिर रहे है ॥ (३४–३७)

अर्जुनने अपने बाणोंसे इतने ही समयमें घोडे और सारथियों समेत चार सौ रथ, सातसौ हाथी और अनेक घोडे और पदाति मारडाले,अब ये बलवान् अर्जुन हमारे पास चले आते है। ईश्वर करै आपकी अवस्थाकी और बलकी वृद्धि हो। अब शत्रुओंका नाश होगा ॥(३८-३९)

भीमसेन बोले, हे विशोक ! तुमने जो हमें अर्जुनको दिखाया इससे हम प्रसन्न होकर तुम्हें चौदह बडे बडे गांव, सौ दासी और बीस रथ, देते हैं ॥ (४०) [३८३८]

कर्णपर्वमें छिहत्तर अध्याय समाप्त ।

कर्णपर्वमें सतत्तर अध्याय ।

सञ्जय बोले, हे राजन् ! भीमसेनका सिंहनाद और रथका शब्द सुनकर अर्जुन श्रीकृष्णसे बोले, कि रथ शीघ्रही हांको अर्जुनके वचन सुन श्रीकृष्ण बोले, अब हम भीमसेनके पास शीघ्र ही जाते हैं ॥ (१—२)

अनन्तर सोनेकी मणि और मोतियोंसे भूषित शङ्खके समान घोडोंको

राधेयो ह्यन्यथा पार्थान्सृंजयांश्च महारथान्।
निःशेषान्समरे कुर्यात्पश्यतां नो जनार्दन ॥ १३ ॥
ततः प्रायाद्रथेनाशु केशवस्तव वाहिनीम्।
कर्णं प्रति महेष्वासं द्वैरथे सव्यसाचिना ॥ १४ ॥
प्रयातश्च महाबाहुः पाण्डवानुज्ञया हरिः।
आश्वासयन्रथेनैव पाण्डुसैन्यानि सर्वशः ॥ १५ ॥
रथघोषः स संग्रामे पाण्डवेयस्य सम्बभौ।
वासवाशनितुल्यस्य मेघौघस्येव मारिष ॥ १६ ॥
महता रथघोषेण पाण्डवः सत्यविक्रमः।
अभ्ययाद्प्रमेयात्मा निर्जयंस्तव वाहिनीम् ॥ १७ ॥
तमायान्तं समीक्ष्यैव श्वेताश्वं कृष्णसारथिम्।
मद्रराजोऽब्रवीत्कर्णं केतुं दृष्ट्वा महात्मनः ॥ १८ ॥
अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः।
निघ्नन्नमित्रान्समरे यं कर्ण परिपृच्छसि ॥ १९ ॥
एष तिष्ठति कौन्तेयः संस्पृशन्गाण्डिवं धनुः।
तं हनिष्यसि चेदद्य तत्र श्रेयो भविष्यति ॥ २० ॥
धनुर्ज्याचन्द्रताराङ्का पताका किङ्किणीयुता।

मेरी सम्मतिमें रथ इसीकी ओर हांकिये। हे कृष्ण! आप ऐसा उपाय कीजिये जिसमें कर्ण हमारे देखते देखते सोमक और पाञ्चालोंका नाश न कर सके ॥ (११-१३)

अर्जुनके ऐसे वचन सुन श्रीकृष्णने कर्णसे युद्ध करनेको शीघ्रतासे रथ हांका। श्रीकृष्ण अर्जुनकी सम्मतिसे अपनी सेनाको प्रसन्न करते हुए कर्णसे युद्ध करनेको चले, उस समय अर्जुनके रथका शब्द ऐसा हुआ जैसा बिजली सहित बादलका। महापराक्रमी अर्जुन अपने रथका शब्द करते हुए, और तुम्हारी सेनाको जीतते हुए कर्णसे युद्ध करनेको चले ॥ (१४-१७)

उस समय श्रीकृष्ण सारथी और सफेद घोडोंसे युक्त अर्जुनकी ध्वजाको देख मद्रराज शल्य कर्णसे बोले, हे कर्ण! जिसको तुम पूछते थे, यह सफेद घोडे और कृष्ण सारथी सहित शत्रुओंका नाश करते हुए उसी अर्जुनका रथ चला आता है, वे देखो रथके भीतर गाण्डीव धनुष धारण किये अर्जुन बैठे है। तुम उनको आज युद्धमें मारो तो हमारा सबका कल्याणहोगा॥ १८-२०

गजाश्वसादिबहुलाः पाण्डवं समुपाद्रवन् ॥ ११ ॥
तेषामापततां पार्थमारावः सुमहानभूत् ।
सागरस्येव क्षुब्धस्य यथा स्यात्सलिलस्वनः ॥ १२ ॥
ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः ।
अभ्यद्रवन्त संग्रामे त्यक्त्वा प्राणकृतं भयम् ॥ १३ ॥
तेषामापततां तत्र शरवर्षाणि मुञ्चताम् ।
अर्जुनो व्यधमत्सैन्यं महावातो घनानिव ॥ १४ ॥
तेऽर्जुनं सहिता भूत्वा रथवंशैः प्रहारिणः ।
अभियाय महेष्वासा विव्यधुर्निशितैः शरैः ॥ १५ ॥
ततोऽर्जुनः सहस्राणि रथवारणवाजिनाम् ।
प्रेषयामास विशिखैर्यमस्य सदनं प्रति ॥ १६ ॥
ते वध्यमानाः समरे पार्थचापच्युतैः शरैः ।
तत्र तत्र स्म लीयन्ते भये जाते महारथाः ॥ १७ ॥
तेषां चतुःशतान्वीरान्यतमानान्महारथान् ।
अर्जुनो निशितैर्बाणैरनयद्यमसादनम् ॥ १८ ॥
ते वध्यमानाः समरे नानालिङ्गै शितैः शरैः ।
अर्जुनं समभित्यज्य दुद्रुवुर्वै दिशो दश ॥ १९ ॥
तेषां शब्दो महानासीद् द्रवतां वाहिनीमुखे ।

हे राजन् ! तुम्हारी ओरसे भी अनेक योद्धा हाथी, घोडे, रथ और पदातियोंके सहित अर्जुनसे युद्ध करनेको चले ॥ जैसे चढते हुए समुद्रका शब्द होता है, ऐसे ही इस तुम्हारी सेनाका घोर शब्द हुआ ॥ (१०—१२)

तुम्हारी सेनाके वीर मरनेका भय छोडकर अर्जुनकी ओर इस प्रकार दौडे, जैसे सिंह सिंहपर दौडे ॥ जैसे आंधी मेघोंको व्याकुल कर देती है, ऐसे ही उन शस्त्र चलाती सेनाको अर्जुनने अपने बाणोंसे व्याकुल कर दिया ॥ अनन्तर सब वीर इकट्ठे हो रथोंपर बैठकर अर्जुनसे युद्ध करनेको आये, तब अर्जुनने अपने बाणोंसे सहस्रों हाथी, घोडे और मनुष्योंको मार डाला ॥ (१३–१६)

अर्जुनके बाणोंसे व्याकुल होकर वे सब वीर अपने अपने स्थानोंपर मूर्च्छित होने लगे । अर्जुनने उस समय अत्यन्त यत्न करते हुए चार सौ वीरोंको मार डाला। अनन्तर अर्जुनके उन महा घोर बाणोंसे व्याकुल होकर वे सब वीर इधर उधरको

व्याकुलीकृतमत्यर्थं परसैन्यं किरीटिना।
नानामृगसहस्राणां यूथं केसरिणा यथा ॥ ३० ॥
त्वामभिप्रेप्सुरायाति कर्ण निघ्नन्वरान्रथान्।
असह्यमानो राधेय तं याहि प्रति भारत ॥ ३१ ॥
एषा विदीर्यते सेना धार्तराष्ट्री समन्ततः।
अर्जुनस्य भयात्तूर्णं निघ्नतः शात्रवान्बहून् ॥ ३२ ॥
वर्जयन्सर्वसैन्यानि त्वरते हि धनञ्जयः।
त्वदर्थमिति मन्येऽहं यथास्योदीर्यते वपुः ॥ ३३ ॥
न ह्यवस्थास्यते पार्थो युयुत्सुः केन चित्सह।
त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे ॥ ३४ ॥
विरथं धर्मराजं तु दृष्ट्वा सुदृढविक्षतम्।
शिखण्डिनं सात्यकिं च धृष्टद्युम्नं च पार्षतम् ॥ ३५ ॥
द्रौपदेयान्युधामन्युमुत्तमौजसमेव च।
नकुलं सहदेवं च भ्रातरौ द्वौ समीक्ष्य च ॥ ३६ ॥
सहसैकरथः पार्थस्त्वामभ्येति परन्तपः।
क्रोधरक्तेक्षणः क्रुद्धो जिघांसुः सर्वपार्थिवान् ॥ ३७ ॥

पुण्य नाश होनेपर देवता गिरते हैं, ऐसे ही इन रथोंसे वीर गिर रहे हैं ॥ जैसे सिंहको देख सहस्रों हरिण व्याकुल होजाते हैं। ऐसे ही इस समय अर्जुनके बाणोंसे तुम्हारी सेना व्याकुल होरही है ॥ (२८–३०)

हे राधापुत्र! ये प्रधान वीरोंको नाश करते अर्जुन तुम्हीसे युद्ध करनेको चले आते है। इनके वेगको और कोई नहीं सह सक्ता। इस लिये तुम ही इनसे युद्ध करनेको चले आते हो, ये देखो अर्जुनके बाणोंसे व्याकुल होकर धृतराष्ट्रकी सेना भागी जाती है ॥ ये महातेजस्वी अर्जुन सब सेनाको छोडकर केवल तुम्हारी ही ओर चले आते हैं ॥ (३१–३३)

इस समय भीमसेनको व्याकुल देख अर्जुनको बहुत क्रोध हुआ है, इससे हमें निश्चय होता है कि ये तुम्हारे सिवाय किसीसे नहीं लडेंगे ॥ आज महाराज धर्मराजको रथहीन और घावोंसे बहुत व्याकुल देखकर, शिखण्डी धृष्टद्युम्न, सात्यकि, द्रौपदीके पुत्र युधामन्यु, उत्तमौजा, नकुल सहदेव दोनों भाई इन सबको व्याकुल देखकर ये क्रोधसे नेत्र लाल किये, सब राजोंको मारनेकी

तथार्दितान्भीमबलान्भीमसेनेन भारत ।
दृष्ट्वा दुर्योधनो राजा इदं वचनमब्रवीत् ॥ २९ ॥
सैनिकांश्च महेष्वासान्योधांश्च भरतर्षभ ।
समादिशन्रणे सर्वान्हत भीममिति स ह ॥ ३० ॥
तस्मिन्हते हतं मन्ये पाण्डुसैन्यमशेषतः ।
प्रतिगृह्य च तामाज्ञां तव पुत्रस्य पार्थिवाः ॥ ३१ ॥
भीमं प्रच्छादयामासुः शरवर्षैः समन्ततः ।
गजाश्च बहुला राजन्नराश्च जयगृद्धिनः ॥ ३२ ॥
रथे स्थिताश्च राजेन्द्र परिवव्रुर्वृकोदरम् ।
स तैः परिवृतः शूरैः शूरो राजन्समन्ततः ॥ ३३ ॥
शुशुभे भरतश्रेष्ठो नक्षत्रैरिव चन्द्रमाः ।
परिवेषी यथा सोमः परिपूर्णो विराजते ॥ ३४ ॥
स रराज तथा संख्ये दर्शनीयो नरोत्तमः ।
निर्विशेषो महाराज यथा हि विजयस्तथा ॥ ३५ ॥
तस्य ते पार्थिवाः सर्वे शरवृष्टिं समासृजन् ।
क्रोधरक्तेक्षणाः शूरा हन्तुकामा वृकोदरम् ॥ ३६ ॥
तां विदार्य महासेनां शरैः सन्नतपर्वभिः ।

प्रजा घबराती है, ऐसे ही इस समय भीमसेनका रूप देखकर तुम्हारी सेनाके वीर डरने लगे । अपने महाबलवान वीरोंको भीमसेनके बलसे व्याकुल देखकर राजा दुर्योधन ऐसे वचन बोले.तुम सब साधारण और प्रधान योद्धा भीमसेनको मारो, इसके मारे जानेसे पाण्डवोंकी सब सेना आपसे आप मर जायगी । (२७-३१)

तुम्हारे पुत्रकी ऐसी आज्ञा सुन सब राजोंने भीमसेनको बाणोंसे ढा दिया, अनेक पैदल और हाथियोंपर चढे वीर भी भीमसेनकी ओर दौडे । अनेक रथपर चढे योद्धा भी भीमसेन से युद्ध करने लगे । वीर भीमसेन इन सब वीरोंसे घिरकर इस प्रकार शोभित हुए, जैसे परिवेष युक्त पूर्ण चन्द्रमा नक्षत्रोंके सहित होवे । उस समय पुरुषश्रेष्ठ भीमसेन साक्षात् अर्जुनके समान दीखने लगे ॥ (३१-३५)

वे सब राजा भी क्रोधसे लालनेत्र करके भीमसेनको मारनेके लिये अनेक प्रकारके बाण बर्षाने लगे ॥ जैसे मछली जालसे निकल जलमें घूमने लगती है,

भयहा यो भवेद्वीरस्त्वामृते सूतनन्दन।
एते त्वां कुरवः सर्वे द्वीपमासाद्य संयुगे ॥ ४५ ॥
धिष्ठिताः पुरुषव्याघ्र त्वत्तः शरणकांक्षिणः।
वैदेहाम्बष्ठकाम्बोजास्तथा नग्नजितस्त्वया ॥ ४६ ॥
गान्धाराश्च यथा धृत्या जिताः संख्ये सुदुर्जयाः।
तां धृतिं कुरु राधेय ततः प्रत्येहि पाण्डवम् ॥ ४७ ॥
वासुदेवं च वार्ष्णेयं प्रीयमाणं किरीटिना।
प्रत्युद्याहि महाबाहो पौरुषे महति स्थितः ॥ ४८ ॥

कर्ण उवाच— प्रकृतिस्थोऽसि मे शल्य इदानीं संमतस्तथा।
प्रतिभासि महाबाहो मा भैषीस्त्वं धनञ्जयात्॥ ४९ ॥
पश्य बाह्वोर्बलं मेऽद्य शिक्षितस्य च पश्य मे।
एकोऽद्य निहनिष्यामि पाण्डवानां महाचमूम् ॥ ५० ॥
कृष्णौ च पुरुषव्याघ्र ततः सत्यं ब्रवीमि ते।
नाहत्वा युधि तौ वीरौ व्यपयास्ये कथञ्चन ॥ ५१ ॥
शिष्ये वा निहतस्ताभ्यामनित्यो हि रणे जयः।
कृतार्थोऽद्य भविष्यामि हत्वा वाप्यथवा हतः ॥५२ ॥

शल्य उवाच— अजय्यमेनं प्रवदन्ति युद्धे महारथाः कर्ण रथप्रवीरम्।
एकाकिनं किमुकृष्णाभिगुप्तं विजेतुमेनं क इहोत्सहेत ॥ ५३ ॥

समर्थ नहीं। हे पुरुषसिंह ! विदेह, अंबष्ठ, काम्बोज, मगध और गान्धार देशके सब क्षत्रियोंको जिस बलसे तुमने जीता था, आज उसी बलसे अर्जुनके सङ्गमें युद्ध करो। हे महाबाहु ! परम साहससे अर्जुनके मित्र कृष्णसे युद्ध करनेके चलो ॥ (४४—४८)

कर्ण बोले, हे महाबाहो शल्य ! मैं इस समय अत्यन्त सावधान हूं, इसलिये तुम अर्जुनसे कुछ मत डरो, अब तुम हमारे बाहु और शिक्षाका बल देखो आज मैं अकेला ही पाण्डवोंकी सब सेनाका नाश करूंगा ॥ हे पुरुषसिंह ! आज मैं प्रतिज्ञा करता हूं कि बिना कृष्ण और अर्जुनके मारे युद्धसे नहीं लौटूंगा, अथवा वे ही मुझे मार डालेंगे, क्योंकि युद्धमें जय और पराजयका कुछ निश्चय नहीं रहता। जो हो दोनों ही प्रकारसे मेरा कल्याण है ॥ (४९-५२)

शल्य बोले, हे कर्ण ! सब महारथ अकेले अर्जुनहीको अजेय अर्थात् अजीत कहते हैं और इस समय तो साक्षात्

यतो यतः पाण्डवेयः प्रविष्टो रथसत्तमः ।
ततस्ततोऽपातयत योधाञ्शतसहस्रशः ॥ ४६ ॥
एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे ।
दुर्योधनो महाराज शकुनिं वाक्यमब्रवीत् ॥ ४७ ॥
जहि मातुल संग्रामे भीमसेनं महाबलम् ।
अस्मिञ्जिते जितं मन्ये पाण्डवेयं महाबलम् ॥ ४८ ॥
ततः प्रायान्महाराज सौबलेयः प्रतापवान् ।
रणाय महते युक्तो भ्रातृभिः परिवारितः ॥ ४९ ॥
स समासाद्य संग्रामे भीमं भीमपराक्रमम् ।
वारयामास तं वीरो वेलेव मकरालयम् ॥ ५० ॥
स न्यवर्तत तं भीमो वार्यमाणः शितैः शरैः ।
शकुनिस्तस्य राजेन्द्र वामपार्श्वे स्तनान्तरे ॥ ५१ ॥
प्रेषयामास नाराचान्रुक्मपुङ्खाञ्शिलाशितान् ।
वर्म भित्त्वा तु ते घोराः पाण्डवस्य महात्मनः ॥ ५२ ॥
न्यमज्जन्त महाराज कङ्कबर्हिणवाससः ।
सोऽतिविद्धो रणे भीमः शरं रुक्मविभूषितम् ॥५३ ॥
प्रेषयामास स रुषा सौबलं प्रति भारत ।
तमायान्तं शरं घोरं शकुनिः शत्रुतापनः ॥ ५४ ॥

भीमसेन जाते थे, वहीं सैकडों और सहस्रों वीरोंका नाश करते थे ॥ ४३–४६

दुर्योधन इस भीमसेनके घोर कर्मको देख शकुनिसे बोले, हे मामा ! इस महाबलवान भीमसेनको युद्धमें जीतो इसके जीतनेमे पाण्डवोंकी सब सेना हार जायगी ॥ तब महापराक्रमी सुबल पुत्र शकुनि अपने भाइयोंके सहित भीमसेनमे घोर युद्ध करनेको चले ॥ जैसे पर्वतमें लगनेमे समुद्रका वेग कम होजाता है ऐसे ही शकुनिके आनेसे भीमसेनका वेग कम होगया ॥ तब भीमसेनने भी क्रोध करके शकुनिसे युद्ध करनेकी इच्छा की । (४७–५१)

उस समय शकुनिने भीमके बाएं हाथ की सन्धिमें सोनेके पङ्खवाले अनेक बाण मारे । वे बाण महात्मा भीमसेनके कवचको काटकर शरीरमें घुस गये। (५१–५३)

उन सोने और पक्षियोंके पङ्खोंसे युक्त बाणोंके लगनेसे भीमसेनने क्रोध करके एक सोनेके पङ्खवाला तेजबाण शकुनिकी ओर चलाया, उसे आता देख

महादेवं तोषयामास योऽस्त्रैः साक्षात्सुयुद्धेन महानुभावः।
लेभे ततः पाशुपतं सुघोरं त्रैलोक्यसंहारकरं महास्त्रम् ॥ ६१ ॥
पृथक्पृथग्लोकपालाः समेता ददुर्महास्त्राण्यप्रमेयाणि सङ्ख्ये।
यैस्ताञ्जघानाशु रणे नृसिंहः स कालकेयानसुरान्समेतान्॥ ६२ ॥
तथा विराटस्य पुरे समेतान्सर्वानसानेकरथेन जित्वा।
जहार तद्धोधनमाजिमध्ये वस्त्राणि चादत्त महारथेभ्यः ॥ ६३ ॥
तमीदृशं वीर्यगुणोपपन्नं कृष्णद्वितीयं परमं नृपाणाम्।
तमाह्वयन्साहसमुत्तमं वै जाने स्वयं सर्वलोकस्य शल्य ॥ ६४ ॥
अनन्तवीर्येण च केशवेन नारायणेनाप्रतिमेन गुप्तः।
वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वलोकैः ॥ ६५ ॥
महात्मनः शङ्खचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य।
भयं न मे जायते साध्वसं च दृष्ट्वा कृष्णावेकरथे समेतौ ॥ ६६ ॥
अतीव पार्थो युधि कार्मुकिभ्यो नारायणश्चाप्रति चक्रयुद्धे।
एवंविधौ पाण्डवावासुदेवौ चलेत्स्वदेशाद्धिमवान्न कृष्णौ ॥ ६७ ॥

अर्जुनके सङ्ग कौन युद्ध कर सक्ता है ? (५७-६०)

जिस महानुभावने अपने बाणोंसे महादेवको युद्धमें प्रसन्न किया था, जिनको शिवने प्रसन्न होकर तीन लोकको नाश करनेमें समर्थ महा घोर पाशुपत अस्त्र दिया ॥ जिनको सब लोकपालोंने अलग अलग महा घोर शस्त्र दिये हैं। जिन्होंने उन्हीं शस्त्रोंसे समस्त कालकेय दानवोंका नाश किया। जिस एकलेने हम सबको विराट नगरमें जीत कर गौ छीन ली थीं और सब महारथोंके वस्त्र उतार लिये थे ॥ (६१-६३)

हे शल्य ! आज हम उस ही वीर सब गुणोंसे भरे सब क्षत्रियोंमें श्रेष्ठ अर्जुनसे साहसके समेत पुकार कर युद्ध करेंगे ॥ सो अर्जुन आज पराक्रमी सब लोकोंके स्वामी साक्षात् नारायण श्रीकृष्णसे रक्षित हैं। अब उनके गुण तीनों लोक इकठे होकर दस सहस्र वर्ष तक कहैं, तो भी पार नहीं पासक्ते ॥ हे शल्य ! शङ्ख, चक्र और गदाधारी जगत्को जीतनेवाले महात्मा वसुदेव पुत्र श्रीकृष्ण और अर्जुनको एक रथ पर बैठा देख मै भयसे नहीं कांपता हूं ॥ (६४—६६)

हमें निश्चय है, कि अर्जुन महा धनुषधारी और कृष्ण चक्र युद्धमें अद्वितीय है, चाहे हिमाचल अपने स्थानसे चल जाय परन्तु ये दोनों युद्धमें नहीं

न तु तं ममृषे भीमः सिंहनादं तरस्विनाम् ।
अन्यद्धनुः समुद्यम्य त्वरमाणो महाबलः ॥ ६४ ॥
मुहूर्तादिव राजेन्द्र च्छादयामास सायकैः ।
सौबलस्य बलं संख्ये त्यक्त्वाऽऽत्मानं महाबलः ॥६५॥
तस्याश्वांश्चतुरो हत्वा सूतं चैव विशाम्पते ।
ध्वजं चिच्छेद भल्लेन त्वरमाणः पराक्रमी ॥ ६६ ॥
हताश्वं रथमुत्सृज्य त्वरमाणो नरोत्तमः ।
तस्थौ विस्फारयंश्चापं क्रोधरक्तेक्षणः श्वसन् ॥ ६७ ॥
शरैश्च बहुधा राजन्भीममार्छत्समन्ततः ।
प्रतिहत्य तु वेगेन भीमसेनः प्रतापवान् ॥ ६८ ॥
धनुश्चिच्छेद संक्रुद्धो विव्याध च शितैः शरैः ।
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः ॥ ६९ ॥
निपपात तदा भूमौ किंचित्प्राणो नराधिपः ।
ततस्तं विह्वलं ज्ञात्वा पुत्रस्तव विशाम्पते ॥ ७० ॥
अपोवाह रथेनाजौ भीमसेनस्य पश्यतः ।
रथस्थे तु नरव्याघ्रे धार्तराष्ट्राः पराङ्मुखाः ॥ ७१ ॥
प्रदुद्रुवुर्दिशो भीता भीमाज्जाते महाभये ।
सौबले निर्जिते राजन्भीमसेनेन धन्विना ॥ ७२ ॥

सेनने उस गर्जनेको क्षमा नहीं किया और शीघ्रतामें फिर धनुष लेकर मृत्युके भयको छोड कर शकुनिकी सब सेनाको क्षण मात्रमें बाणोंसे छा दिया ॥(६१-६५)

अनन्तर बहुत शीघ्रता सहित शकुनिके घोडे और सारथीको मारके ध्वजा काट दी, तब शकुनि क्रोधसे सांस लेते उस रथसे उतरे और लाल नेत्र करके धनुषको टङ्कारने लगे और वहींसे भीमसेनकी ओर अनेक बाण चलाने लगे । परन्तु प्रतापी भीमसेनने इनके सब शस्त्रोंको काट दिया, और एक बाणसे उसका धनुष काटकर उनके शरीरमें अनेक बाण मारे । (६६–६९)

शत्रुनाशन शकुनि बलवान् शत्रुके बाणोंसे पीडित होकर मूर्च्छित हो पृथ्वीमें गिर पडे । हे पृथ्वीनाथ ! इन्हें व्याकुल देख तुम्हारे पुत्रने अपने रथपर चढा कर भीमसेनके आगेसे भगा दिया, उस समय अकेले भीमसेनने सब सेनाको जीत लिया, जिस समय शकुनि भीमसेनके बाणोंसे व्याकुल हुए, उस

धनञ्जयास्त्रैस्तु शरैर्विदारिता हता निपेतुर्नरवाजिकुञ्जराः ॥ ७५ ॥
शरार्चिषं गाण्डिवचारुमण्डलं युगान्तसूर्यप्रतिमानतेजसम् ।
न कौरवाः शेकुरुदीक्षितुं जयं यथा रविं व्याधितचक्षुषो जनाः ॥ ७६ ॥
शरोत्तमान्संप्रहितान्महारथैश्चिच्छेद पार्थः प्रहसञ्छरौघैः ।
भूयश्च तानहनद्बाणसङ्घान्गाण्डीवधन्वायतपूर्णमण्डलम् ॥ ७७ ॥
यथोग्ररश्मिः शुचिशुक्रमध्यगः सुखं विवस्वान् हरते जलौघान् ।
तथाऽर्जुनो बाणगणान्निरस्य ददाह सेनां तव पार्थिवेन्द्र ॥ ७८ ॥
तमभ्यधावद्विसृजन्कृपः शरांस्तथैव भोजस्तव चात्मजः स्वयम् ।
महारथो द्रोणसुतस्य सायकैरवाकिरंस्तोयधरा यथाचलम् ॥ ७९ ॥
जिघांसुभिस्तान् कुशलः शरोत्तमान् महाहवे सम्प्रहितान्प्रयत्नतः ।
शरैः प्रचिच्छेद स पाण्डवस्त्वरन् पराभिनद्वक्षसि चेषुभिस्त्रिभिः ८०॥
स गाण्डिवज्यायतपूर्णमण्डलस्तपन् रिपूनर्जुनभास्करो बभौ ।
शरोग्ररश्मिः शुचिशुक्रमध्यगो यथैव सूर्यः परिवेषवांस्तथा ॥ ८१ ॥
अथाज्यबाणैर्दशभिर्धनञ्जयं पराभिनद् द्रोणसुतोऽच्युतं त्रिभिः ।
चतुर्भिरश्वांश्चतुरः कपिं ततः शरैश्च नाराचवरैरवाकिरत् ॥ ८२ ॥

है, किस समय चढाते हैं, किस समय छोडते है, सो कोई नहीं देख सक्ते थे, केवल मरते हुए मनुष्य हाथी और घोडे दीखते थे, जैसे रोग युक्त नेत्रवाले, मनुष्य सूर्यकी ओर नहीं देख सक्ते, वैसे ही बाण किरण और धनुष मण्डलवाले, अर्जुनको कोई शत्रु नहीं देख सक्ता था ॥ (७३—७६)

हे राजेन्द्र उस समय अर्जुनने हंसते हंसते शत्रुओंके अच्छे बाणोंको काट कर शत्रुओंके ऊपर सैकडों बाण चलाये ॥ जैसे जेठ वैशाखका सूर्य अपनी किरणोंसे जगत्के जलको खींचता है ऐसे ही अर्जुन अपने बाणोंसे तुम्हारी सेनाके प्राण लेने लगे ॥ जैसे पर्वतके ऊपर मेघ जल वर्षाते हैं, ऐसे ही कृपाचार्य, अश्वत्थामा, महारथ कृतवर्मा और स्वतः राजा दुर्योधन अर्जुनके ऊपर बाण वर्षाने लगे ॥ (७७-७९)

अर्जुनने उनके बाण काट कर सबके हृदयमें तीन तीन बाण मारे जैसे जेठ वैशाखका सूर्य जगत्को तपाता है, ऐसे ही बाण किरण और धनुष मण्डलवाले, अर्जुनरूपी सूर्य तुम्हारी सेनाको तपाने लगे ॥ (८०-८१)

तब अश्वत्थामाने दस बाण अर्जुनके, तीन श्रीकृष्णके और एक एक चारों घोडोंको मारकर अर्जुनकी ध्वजामें

दुर्योधनोऽब्रवीत्किं नु सौबलो वाऽपि सञ्जय ॥ १ ॥
कर्णो वा जयतां श्रेष्ठो योधा वा मामका युधि ।
कृपो वा कृतवर्मा वा द्रौणिर्दुःशासनोऽपि वा ॥ २ ॥
अत्यद्भुतमहं मन्ये पाण्डवेयस्य विक्रमम् ।
यदेकः समरे सर्वान्योधयामास मामकान् ॥ ३ ॥
यथाप्रतिज्ञं योधानां राधेयः कृतवानपि ।
कुरूणामथ सर्वेषां कर्णः शत्रुनिषूदनः ॥ ४ ॥
शर्म वर्म प्रतिष्ठा च जीविताशा च सञ्जय ।
तत्प्रभग्नं बलं दृष्ट्वा कौन्तेयेनामितौजसा ॥ ५ ॥
राधेयो वाप्याधिरथिः कर्णः किमकरोद्युधि ।
पुत्रा वा मम दुर्धर्षा राजानो वा महारथाः ॥
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि सञ्जय ॥ ६ ॥

सञ्जय उवाच— अपराह्णे महाराज सूतपुत्रः प्रतापवान् ।
जघान सोमकान्सर्वान्भीमसेनस्य पश्यतः ॥ ७ ॥
भीमोऽप्यतिबलं सैन्यं घार्तराष्ट्रं व्यपोथयत् ।
अथ कर्णोऽब्रवीच्छल्यं पश्चालान्प्रापयस्व माम् ॥ ८ ॥

सेनके डरसे हमारी सेना भागी तब दुर्योधन और शकुनिने क्या किया ? विजय करनेवालोंमें श्रेष्ठ कर्ण, कृपाचार्य, अश्वत्थामा, कृतवर्मा, और दुःशासन आदि हमारे वीरोंने क्या किया ? हमें भीमसेनका यह पराक्रम सुनकर बहुत ही आश्चर्य होता है, कि वह अकेला ही हमारी सब सेनासे युद्ध करता रहा ॥ (१-३)

अकेले राधापुत्र शत्रुनाशन कर्णने भी अपनी प्रतिज्ञाके अनुसार शत्रुओंका नाश किया ॥ उस समय हमारी सेनाकी रक्षा और कल्याणका भार कर्णही पर था । उन्होंने कुन्तीपुत्रका ऐसा घोर पराक्रम देख क्या किया ? अथवा हमारे महापराक्रमी पुत्र और महारथ राजोंने क्या किया ? सो तुम हमसे कहो, क्यों कि यह सब विषय तुम्हारा जाना है ॥ (३-६)

सञ्जय बोले, हे महाराज ! जिस समय भीमसेनके देखते कर्णने सोमकवंशका नाश किया । उस समय दिनके दो भाग बीत गये थे, भीमसेनने भी अपने बलसे तुम्हारी सेनाका नाश किया तब कर्णने शल्यसे कहा, कि हमारा रथ पाञ्चाल सेनामें ले चलो । भीमसेन

ततः प्रकीर्णं सुमहद्बलं तव प्रदारितं सेतुरिवाम्भसा यथा ॥९० ॥
ततोऽर्जुनस्याशु रथेन केशवश्चकार शत्रूनपसव्यमातुरान् ।
ततः प्रयातं त्वरितं धनञ्जयं शतक्रतुं वृत्रनिजघ्नुषं यथा ॥ ९१ ॥
समन्वधावन्पुनरुत्थितैर्ध्वजै रथैः सुयुक्तैरपरे युयुत्सवः ।
अथाभिसृत्य प्रतिवार्य तानरीन्धनञ्जयस्याभिमुखं महारथाः ॥ ९२ ॥
शिखण्डिशैनेययमाः शितैः शरैर्विदारयन्तो व्यनदन्सुभैरवम् ।
ततोऽभिजघ्नुः कुपिताः परस्परं शरैस्तदाञ्जोगतिभिः सुतेजनैः॥ ९३ ॥
कुरुप्रवीराः सह सृञ्जयैर्यथासुराः पुरा देवगणैस्तथाहवे ।
जयेप्सवः स्वर्गमनाय चोत्सुकाः पतन्ति नागाश्वरथाः परन्तप ॥९४॥
जगर्जुरुच्चैर्बलवच्च विव्यधुः शरैः सुमुक्तैरितरेतरं पृथक् ।
शरान्धकारे तु महात्मभिः कृते महामृधे योधवरैः परस्परम् ॥
चतुर्दिशो वै विदिशश्च पार्थिव प्रभा च सूर्यस्य तमोवृताभवत् ॥९५॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि
सकुलयुद्धे ऊनाशीतितमोऽध्यायः ॥ ७९ ॥ [४०७६]

बांध टूटनेसे पानी चारों ओर फैल जाता है, इसी प्रकार इन वीरोंके व्याकुल होनेसे तुम्हारी सेना इधर उधर भागने लगी ॥ (८९–९०)

तब कृष्णने बहुत शीघ्रतासे अर्जुन के रथको सब शत्रुओंकी दहिनी ओर पहुंचा दिया। जैसे इन्द्र वृत्रासुरके मारनेको चले थे, वैसे ही अर्जुन भी कर्णको मारने चले, तब अनेक महारथ ध्वजा उडाते हुए उत्तम घोडोंके रथोंपर चढकर अर्जुनसे युद्ध करनेको आये परन्तु अर्जुनने अपने बाणोंसे सबको रोक दिया ॥ (९१–९२)

उधर शिखण्डी, धृष्टद्युम्न, सात्यकि और नकुल सहदेव गर्ज गर्ज कर अपने तेज बाणोंसे तुम्हारी सेनाको नाश करने लगे ॥ हे शत्रुनाशन! जैसे देवता और दानवोंका युद्ध हुआ था, इसी प्रकार यह कौरव पाण्डवोंका युद्ध हुआ। सब वीर अपनी अपनी विजयकी इच्छासे युद्ध करने लगे। अनेक योद्धा, हाथी और रथोंसे गिरकर स्वर्गको चले गये॥ अनेक योद्धा परस्पर गर्ज कर तेज बाण चलाने लगे। उस समय युद्धभूमिमें बाणोंका अन्धकार होगया। हे पृथ्वीनाथ! चारों दिशा कोने और सूर्य भी बाणोंसे छिप कर अन्धकार होगया ॥ (९३–९५) [४०७६]

कर्णपर्वमें उनासी अध्याय समाप्त।

अताडयद्रणे शूरो जत्रुदेशे नरोत्तमः ।
शिखण्डी पञ्चविंशत्या धृष्टद्युम्नश्च सप्तभिः ॥ १८ ॥
द्रौपदेयाश्चतुःषष्ट्या सहदेवश्च सप्तभिः ।
नकुलश्च शतेनाजौ कर्ण विव्याध सायकैः ॥ १९ ॥
भीमसेनस्तु राधेयं नवत्या नतपर्वणाम् ।
विव्याध समरे क्रुद्धो जत्रुदेशे महाबलः ॥ २० ॥
अथ प्रहस्याधिरथिर्व्याक्षिपद्धनुरुत्तमम् ।
सुमोच निशितान्बाणान्पीडयन्सुमहाबलः ॥ २१ ॥
तान्प्रत्यविध्यद्राधेयः पञ्चभिः पञ्चभिः शरैः ।
सात्यकेस्तु धनुश्छित्त्वा ध्वजं च भरतर्षभ ॥ २२ ॥
तं तथा नवभिर्बाणैराजघान स्तनान्तरे ।
भीमसेनं ततः क्रुद्धो विव्याध त्रिंशता शरैः ॥ २३ ॥
सहदेवस्य भल्लेन ध्वजं चिच्छेद मारिष ।
सारथिं च त्रिभिर्बाणैराजघान परन्तपः ॥ २४ ॥
विरथान्द्रौपदेयांश्च चकार भरतर्षभ ।
अक्ष्णोर्निमेषमात्रेण तदद्भुतमिवाभवत् ॥ २५ ॥
विमुखीकृत्य तान्सर्वान्शरैः सन्नतपर्वभिः ।
पञ्चालानहनच्छूरांश्चेदीनां च महारथान् ॥ २६ ॥

सात्यकिने वीस तीक्ष्ण बाण कर्णके कण्ठमें मारे, वीर शिखण्डीने पच्चीस, धृष्टद्युम्नने सात, द्रौपदीके पुत्रोंने चौंसठ, सहदेवने सात और नकुलने सौ तेजबाण कर्णके शरीरमें मारे, उसी समय महा पराक्रमी भीमसेनने क्रोध करके कर्णके कण्ठमें नव्वे तेज बाण मारे ॥ १७-२०

तब महापराक्रमी कर्णने क्रोध करके अपना उत्तम धनुष घुमाया और अनेक तीक्ष्ण बाण छोडे ॥ हे भरत कुलसिंह ! कर्णने सब वीरोंके शरीरमें पांच पांच बाण मारे, सात्यकिका धनुष और ध्वजा काट दी, और नौ बाण सात्यकिके हृदयमें मारे, फिर क्रोध करके भीमसेनकी ओर वीस बाण चलाये, एक बाणसे सहदेवकी ध्वजा काट दी और तीन बाण उनके सारथीको मारे और द्रौपदीके पुत्रोंके रथ काट दिये । कर्णके क्षण भरमें ये कर्म देखकर सब वीर आश्चर्य करने लगे ॥ (२१—२५)

इन सबको इस प्रकार विमुख करके चेदी और पाञ्चाल देशीय महारथोंको

सुवर्णवर्णसन्नाहैर्योधैः कनकभूषणैः ।
आस्थिताः कल्पचर्माणो भद्रा नित्यमदा द्विपाः॥१०॥
क्रुद्धाः क्रूरैर्महामात्रैः पार्ष्ण्यङ्कुशप्रचोदिताः ।
चतुःशताः शरवरैर्हताः पेतुः किरीटिना ॥ ११ ॥
पर्यस्तानीव शृङ्गाणि समृद्धानि महागिरेः ।
धनञ्जयशराभ्यस्तैः स्तीर्णा भूर्वरवारणैः ॥ १२ ॥
समन्ताज्जलदप्रख्यान्वारणान्मदवर्षिणः ।
अभिपेदेऽर्जुनरथो घनान्भिन्दन्निवांशुमान् ॥ १३ ॥
हतैर्गजमनुष्याश्वैर्भिन्नैश्च बहुधा रथैः ।
विशस्त्रयन्त्रकवचैर्युद्धशौण्डैर्गतासुभिः ॥ १४ ॥
अपविद्धायुधैर्मार्गः स्तीर्णोऽभूत्फाल्गुनेन वै ।
व्यस्फारयद्वै गाण्डीवं सुमहद्भैरवारवम् ॥ १५ ॥
घोरवज्राविनिष्पेषं स्तनयित्नुरिवाम्बरे ।
ततः प्रादीर्यत चमूर्धनञ्जयशराहता ॥ १६ ॥
महावातसमाविद्धा महानौरिव सागरे ।
नानारूपाः प्राणहराः शरा गाण्डीवचोदिताः ॥१७॥
अलातोल्काशनिप्रख्यास्तव सैन्यं विनिर्दहन् ।

विना सारथी पृथ्वीमें गिर गये। कहीं मतवाले हाथी सोनेके कवचवाले वीरोंके सहित मरकर गिर गये॥ इस प्रकार अंकुश और क्रोधी महावतों सहित चार सौ हाथी कटकर पृथ्वीमें गिर गये। वह पृथ्वी गिरे हाथियोंसे इस प्रकार शोभित हुई जैसे पर्वतोंके शिखर गिरनेसे॥ (८-१२)

जैसे सूर्य मेघोंको काटकर निकलता है, ऐसे ही अर्जुन मतवाले हाथियोंको काट कर सेनासे बाहर निकले। उस भूमिमें अनेक हाथी, घोडे, रथ और महा योद्धा मनुष्य शस्त्र रहित होकर और मरकर गिर गये। गाण्डीव धनुष पर घोर टङ्कार देते हुए अर्जुनने गिरे हुए शस्त्रोंसे मार्गको पूरित कर दिया। जैसे बिजली और वज्रका शब्द आकाशमें होता है ऐसे ही अर्जुनके धनुषका शब्द होने लगा। तब वह सेना बाणोंसे व्याकुल होकर इधर उधरको भागने लगी॥ (१३-१६)

जैसे समुद्रमें कोई नाव वायुसे व्याकुल होजाती है, ऐसेही गाण्डीवसे छूटे अनेक प्रकारके प्राणहारक बाणोंसे वह

वध्यतां सायकैस्तीक्ष्णैः कर्णचापवरच्युतैः ।
तेन शब्देन वित्रस्ता पाण्डवानां महाचमूः ॥ ३६ ॥
कर्णमेकं रणे योधं मेनिरे तत्र शात्रवाः ।
तत्राद्भुतं पुनश्चक्रे राधेयः शत्रुकर्शनः ॥ ३७ ॥
यदेनं पाण्डवाः सर्वे न शेकुरभिवीक्षितुम् ।
यथौघः पर्वतश्रेष्ठमासाद्याभिप्रदीर्यते ॥ ३८ ॥
तथा तत्पाण्डवं सैन्यं कर्णमासाद्य दीर्यते ।
कर्णोऽपि समरे राजन्विधूमोऽग्निरिव ज्वलन् ॥ ३९ ॥
ददंस्तथौ महाबाहुः पाण्डवानां महाचमूम् ।
शिरांसि च महाराज कर्णाश्चैव सकुण्डलान् ॥ ४० ॥
बाहूंश्च वीरो वीराणां चिच्छेद लघु चेषुभिः ।
हस्तिदन्तत्सरून्खड्गान्ध्वजाञ्शक्तीर्हयान्गजान् ॥४१॥
रथांश्च विविधान्राजन्पताका व्यजनानि च ।
अक्षं च युगयोक्त्राणि चक्राणि विविधानि च ॥ ४२ ॥
चिच्छेद बहुधा कर्णो योधव्रतमनुष्ठितः ।
तत्र भारत कर्णेन निहतैर्गजवाजिभिः ॥ ४३ ॥
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ।

पाण्डवोंकी सेना रणसे इधर उधर भागने लगी, उस समय भागती पाञ्चाल सेना-का घोर शब्द होने लगा, कर्णके धनुषका शब्द सुनकर पाण्डवोंकी सेना डरसे व्याकुल होगयी, सबने जान लिया कि कर्णके समान कोई योद्धा नहीं है । (३६-३७)

तब शत्रुनाशन कर्णने फिर विचित्र कर्म करना आरम्भ किया, जैसे पानी पर्वतमें लगनेसे इधर उधरको फैल जाता है, ऐसे ही पाण्डवोंकी सेना कर्णको देखकर इधर उधर भागी । कोई पाण्डवोंका वीर उस समय कर्णकी ओर देख न सका । हे राजन् ! उस समय कर्णका रूप ऐसा हुआ जैसे धुंआ रहित जलती अग्नि । (३७-३९)

महाबाहु कर्णने अपने बाणोंसे वीरों-के शिर, कुण्डल सहित कान और अनेक वीरोंके हाथ काट दिये । हाथी दांतके मूंठवाले खड्ग, ध्वजा, शक्ति, घोडे, हाथी और रथोंको भी काट दिया । पहिये और पहियोंकी नाभि, धुरी, घो-डोंकी लगाम कर्णने काट दिये । उनके बाणोंसे अनेक घोडे और हाथी मर

अपसव्यांस्तु तांश्चक्रे रथेन मधुसूदनः ॥ २७ ॥
नियुक्तान्हि स तान्मेने यमायाशु किरीटिना।
ततस्ते प्राद्रवञ्शूराः पराङ्मुखरथेऽर्जुने ॥ २८ ॥
तेषामापततां केतूनश्वांश्चापानि सायकान्।
नाराचैरर्धचन्द्रैश्च क्षिप्रं पार्थो न्यपातयत् ॥ २९ ॥
अथान्यैर्दशभिर्भल्लैः शिरांस्येषामपायत्।
रोषसंरक्तनेत्राणि संदष्टौष्ठानि भूतले ॥ ३० ॥
तानि वक्त्राणि विबभुः कमलानीव भूरिशः।
तांस्तु भल्लैर्महावेगैर्दशभिर्दश कौरवान् ॥ ३१ ॥
रुक्माङ्गदान्रुक्मपुङ्खैर्हत्वा प्रायादमित्रहा ॥ ३२ ॥ [४१०८]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सकुलयुद्धेऽशीतितमोऽध्यायः ॥ ८० ॥

सञ्जय उवाच— तं प्रयान्तं महावेगैरश्वैः कपिवरध्वजम्।
युद्धायाभ्यद्रवन्वीराः कुरूणां नवती रथाः ॥ १ ॥
कृत्वा संशप्तका घोरं शपथं पारलौकिकम्।
परिवव्रुर्नरव्याघ्रा नरव्याघ्रं रणेऽर्जुनम् ॥ २ ॥
कृष्णः श्वेतान्महावेगानश्वान्काञ्चनभूषणान्।

को चले,वे सब धनुष धारण करके उन से युद्ध करनेको आये। तब श्रीकृष्णने उन सबोंके रथोंको अपने रथके बाये कर दिया। तब उन सब वीरोंने जाना कि अब हम नहीं बचेंगे ऐसा विचार कर वे सब युद्धसे भाग गये॥ २५–२८

अर्जुनने अपने तेज नाराच और अर्ध चन्द्र बाणोंसे उनके घोडे, ध्वजा और धनुष काट दिये, फिर दश बाणों से ओठ चबाते लाल नेत्रवाले दशों वीरोंके शिर काट डाले। वे दशों शिर पृथ्वीमें गिरकर कमलके समान शोभित होने लगे, इस प्रकार दस बाणोंसे सुवर्ण भूषणधारण किये दश कौरवोंको मारकर शत्रुनाशन अर्जुन अगाडी चले॥ (२९—३२) [४१०८]

कर्णपर्वमें अस्सी अध्याय समाप्त।

कर्णपर्वमें एकासी अध्याय।

सञ्जय बोले, हे राजन्! वानरयुक्त ध्वजावाले अर्जुनको शीघ्र चलनेवाले घोडोंके रथपर चढे जाते देख तुम्हारी सेनाके नव्वे महारथ युद्ध करनेको चले। ये सब संशप्तक प्रतिज्ञा करके और मृत्यु का निश्चय करके अर्जुनकी ओर इस प्रकार चले, जैसे अनेक सिंह सिंहकी ओर जाते है॥ परन्तु कृष्णने मोतियों-

न्यवर्तन्त यथा शूरं मृत्युं कृत्वा निवर्तनम् ।
तान्निवृत्तान्रणे शूरान्राधेयः शत्रुतापनः ॥ ५३ ॥
अनेकशो महाराज बभञ्ज पुरुषर्षभः ।
तत्र भारत कर्णेन पञ्चाला विंशती रथाः ॥ ५४ ॥
निहताः सायकैः क्रोधाच्चेदयश्च परं शताः ।
कृत्वा शून्यान्रथोपस्थान्वाजिपृष्ठांश्च भारत ॥ ५५ ॥
निर्मनुष्यान्गजस्कन्धान्पादातांश्चैव विद्रुतान् ।
आदित्य इव मध्याह्ने दुर्निरीक्ष्यः परन्तपः ॥ ५६ ॥
कालान्तकवपुः शूरः सूतपुत्रोऽभ्यराजत ।
एवमेतन्महाराज नरवाजिरथद्विपान् ॥ ५७ ॥
हत्वा तस्थौ महेष्वासः कर्णोऽरिगणसूदनः ।
यथा भूतगणान्हत्वा कालस्तिष्ठेन्महाबलः ॥ ५८ ॥
तथा स सोमकान्हत्वा तस्थावेको महारथः ।
तत्राद्भुतमपश्याम पञ्चालानां पराक्रमम् ॥ ५९ ॥
वध्यमानाऽपि यत्कर्ण नाजह्रु रणमूर्धनि ।
राजा दुःशासनश्चैव कृपः शारद्वतस्तथा ॥ ६० ॥
अश्वत्थामा कृतवर्मा शकुनिश्च महाबलः ।
न्यहनत्पाण्डवीं सेनां शतशोऽथ सहस्रशः ॥ ६१ ॥

महाधनुपधारी पाञ्चाल युद्ध छोडकर भाग गये, और फिर वे मृत्युका निश्चय करके लौटे । उन वीरोंको लौटता देख शत्रुनाशन कर्णने अनेक वीरोंको मार डाला । (५०–५४)

कर्णने वीस पाञ्चाल महारथोंको मारा, सौ घोडे और रथों पर चढे क्षत्री मारे गये । अनेक हाथी वीरोंसे रहित होगये, पदाति युद्धको छोड कर भाग गये, उस समय कर्णका तेज दोपहरके सूर्यके समान दीखता था । उस समय मनुष्य, घोडे और हाथियोंको मारते हुए वीर कर्ण यमराजके समान दीखने लगे, जैसे महा बलवान् यमराज प्रजाका नाश करके खडे होते हैं, ऐसे ही क्षत्रियोंको मार कर कर्ण खडे हुए । (५४–५९)

मैंने उस समय कर्णसे युद्ध करते पाञ्चालोंका विचित्र बल देखा, उस समय उन्होंने बाणोंसे पीडित होकर भी युद्धको नहीं छोडा । राजा दुर्योधन, दुःशासन, शरद्वतीपुत्र कृपाचार्य, अश्वत्थामा, कृतवर्मा और महाबलवान् शकुनि

कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः ।
मुसलैर्भिन्दिपालैश्च रथस्थं पार्थमार्दयन् ॥ १२ ॥
तां शस्त्रवृष्टिमतुलां द्विपहस्तैः प्रवेरिताम् ।
चिच्छेद निशितैर्भल्लैरर्धचन्द्रैश्च फाल्गुनः ॥ १३ ॥
अथ तान्द्विरदान्सर्वान्नानालिङ्गैः शरोत्तमैः ।
सपताकध्वजारोहान्गिरीन्वज्रैरिवाहनत् ॥ १४ ॥
ते हेमपुङ्खैरिषुभिरर्दिता हेममालिनः ।
हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः ॥ १५ ॥
ततो गाण्डीवनिर्घोषो महानासीद्दिशाम्पते ।
स्तनतां कूजतां चैव मनुष्यगजवाजिनाम् ॥ १६ ॥
कुञ्जराश्च हता राजन्दुद्रुवुस्ते समन्ततः ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश ॥ १७ ॥
रथा हीना महाराज रथिभिर्वाजिभिस्तथा ।
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः ॥ १८ ॥
अश्वारोहा महाराज धावमाना इतस्ततः ।
तत्र तत्रैव दृश्यन्ते निहताः पार्थसायकैः ॥ १९ ॥

सौ हाथियोंपर चढे म्लेच्छ तुम्हारे पुत्रकी आज्ञासे अर्जुनसे युद्ध करनेको आये॥ वे सब रथपर बैठे हुए अर्जुनकी ओर बाण, तोमर, प्रास, शक्ति, मूसल और भिन्दिपाल चलाने लगे॥ (१०-१२)

अर्जुनने उन हाथियोंपर चढे वीरोंके छोडे हुए बाणोंको अर्धचन्द्र और नाराच नामक बाणोंसे काट दिया॥ जैसे इन्द्रने वज्रसे अनेक पर्वतोंको काट दिया था, ऐसे ही अर्जुनने भी उन सब हाथियोंको पताका ध्वजा और वीरोंके सहित काट डाला॥ जैसे अग्निकी ज्वाला सहित अनेक पर्वत कटकर पृथ्वीमें गिरते हैं, ऐसे ही वे सब हाथी सोनेके पङ्खवाले बाणोंसे व्याकुल होकर पृथ्वीमें गिर गये॥ (१३-१५)

हे पृथ्वीनाथ! इस समय मरते हुए हाथी, मनुष्य और घोडे तथा गाण्डीव धनुषका घोर शब्द होने लगा॥ हे पृथ्वीनाथ! अनेक हाथी बाण लगनेसे इधर उधरको भागने लगे, वीरोंके मरनेसे घोडे भी भागने लगे॥ हे महाराज! सहस्रों रथ, सारथी और वीरोंसे रहित होकर गन्धर्व नगरोंके समान इधर उधर फिरने लगे॥ (१६-१८)

इसी प्रकार अर्जुनके बाणोंसे व्याकुल

धनुःशरध्वजोपेतां नरक्षुद्रकपालिनीम् ॥ ४ ॥
चर्मवर्मभ्रमोपेतां रथोडुपसमाकुलाम् ।
जयैषिणां च सुतरां भीरूणां च सुदुस्तराम् ॥ ५ ॥
नदीं प्रावर्तयित्वा च बीभत्सुः परवीरहा ।
वासुदेवमिदं वाक्यमब्रवीत्पुरुषर्षभः ॥ ६ ॥

अर्जुन उवाच— एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते ।
भीमसेनादयश्चैते योधयन्ति महारथम् ॥ ७ ॥
एते द्रवन्ति पञ्चालाः कर्णत्रस्ता जनार्दन ।
एष दुर्योधनो राजा श्वेतच्छत्रेण धार्यता ॥ ८ ॥
कर्णेन भग्नान्पञ्चालान्द्रावयन्बहु शोभते ।
कृपश्च कृतवर्मा च द्रौणिश्चैव महारथः ॥ ९ ॥
एते रक्षन्ति राजानं सूतपुत्रेण रक्षिताः ।
अवध्यमानास्तेऽस्माभिर्घातयिष्यन्ति सोमकान् ॥१० ॥
एष शल्यो रथोपस्थे रश्मिसंचारकोविदः ।
सूतपुत्ररथं कृष्ण वाहयन्बहु शोभते ॥ ११ ॥
तत्र मे बुद्धिरुत्पन्ना वाहयात्र महारथम् ।
नाहत्वा समरे कर्णं निवर्तिष्ये कथञ्चन ॥ १२ ॥

फेन, धनुष, बाण, ध्वजा और मनुष्योंके कपाल बहने लगे, ढाल और कवच भंवरके समान घूमने लगे। रथ डोंगीके समान दीखने लगे, उसको देख वीर लोग प्रसन्न और कायर डरने लगे ॥ (३-५)

इस प्रकार पुरुषसिंह अर्जुन इस घोर नदीको बहाकर श्रीकृष्णसे ऐसे बोले, हे कृष्ण ! यही ध्वजा महारथ सूतपुत्रकी दीख पडती है । उनसे भीमसेन आदि योद्धा युद्ध कर रहे हैं । हे जनार्दन ! ये देखो कर्णके डरसे पाञ्चाल भागे जाते हैं, ये सफेद छत्रधारी राजा दुर्योधन खडे हैं, ये महारथ कृपाचार्य, अश्वत्थामा और कृतवर्मा खडे हैं । यह हमारी सेना भागी जाती है । ये सब वीर कर्णकी सहायतासे दुर्योधनकी रक्षा करते हैं । (६-१०)

यदि अब हम उन्हें न मारेंगे तो सोमक सेनाका नाश होजायगा । ये घोडोंकी विद्या जाननेवाले शल्य सूतपुत्रका रथ हांकते शोभित होरहे हैं । आज मैंने यह प्रतिज्ञा की है कि कर्णको विना मारे नहीं लौटूंगा । इसलिये अब

कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः ।
मुसलैर्भिन्दिपालैश्च रथस्थं पार्थमार्दयन् ॥ १२ ॥
तां शस्त्रवृष्टिमतुलां द्विपहस्तैः प्रवेरिताम् ।
चिच्छेद निशितैर्भल्लैरर्धचन्द्रैश्च फाल्गुनः ॥ १३ ॥
अथ तान्द्विरदान्सर्वान्नानालिङ्गैः शरोत्तमैः ।
सपताकध्वजारोहान्गिरीन्वज्रैरिवाहनत् ॥ १४ ॥
ते हेमपुङ्खैरिषुभिरर्दिता हेममालिनः ।
हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः ॥ १५ ॥
ततो गाण्डीवनिर्घोषो महानासीद्दिशाम्पते ।
स्तनतां क्रूजतां चैव मनुष्यगजवाजिनाम् ॥ १६ ॥
कुञ्जराश्च हता राजन्दुद्रुवुस्ते समन्ततः ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश ॥ १७ ॥
रथा हीना महाराज रथिभिर्वाजिभिस्तथा ।
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः ॥ १८ ॥
अश्वारोहा महाराज धावमाना इतस्ततः ।
तत्र तत्रैव दृश्यन्ते निहताः पार्थसायकैः ॥ १९ ॥

सौ हाथियोंपर चढे म्लेच्छ तुम्हारे पुत्र-की आज्ञासे अर्जुनसे युद्ध करनेको आये॥ वे सब रथपर बैठे हुए अर्जुनकी ओर बाण, तोमर, प्रास, शक्ति, मूसल और भिन्दिपाल चलाने लगे॥ (१०-१२)

अर्जुनने उन हाथियोंपर चढे वीरोंके छोडे हुए बाणोंको अर्धचन्द्र और नाराच नामक बाणोंसे काट दिया॥ जैसे इन्द्रने वज्रसे अनेक पर्वतोंको काट दिया था, ऐसे ही अर्जुनने भी उन सब हाथियोंको पताका ध्वजा और वीरोंके सहित काट डाला॥ जैसे अग्निकी ज्वाला सहित अनेक पर्वत कटकर पृथ्वीमें गिरते है, ऐसे ही वे सब हाथी सोनेके पङ्खवाले बाणोंसे व्याकुल होकर पृथ्वीमें गिर गये॥ (१३-१५)

हे पृथ्वीनाथ ! इस समय मरते हुए हाथी, मनुष्य और घोडे तथा गाण्डीव धनुषका घोर शब्द होने लगा॥ हे पृथ्वीनाथ ! अनेक हाथी बाण लगनेसे इधर उधरको भागने लगे, वीरोंके मरनेसे घोडे भी भागने लगे॥ हे महाराज! सहस्रों रथ, सारथी और वीरोंसे रहित होकर गन्धर्व नगरोंके समान इधर उधर फिरने लगे॥ (१६-१८)

इसी प्रकार अर्जुनके बाणोंसे व्याकुल

पश्य कर्णार्जुनस्यैषा सौदामन्यस्वरे यथा ॥ २१ ॥
एष ध्वजाग्रे पार्थस्य प्रेक्षमाणः समन्ततः ।
दृश्यते वानरो भीमो वीराणां भयवर्धनः ॥ २२ ॥
एतच्चक्रं गदा शङ्खः शार्ङ्गं कृष्णस्य च प्रभो ।
दृश्यते पाण्डवरथे वाहयानस्य वाजिनः ॥ २३ ॥
एतत्क्रूजति गाण्डीवं विसृष्टं सव्यसाचिना ।
एते हस्तवता मुक्ता घ्नन्त्यमित्रान्शिताः शराः ॥२४ ॥
विशालायतताम्राक्षैः पूर्णचन्द्रनिभाननैः ।
एषा भूः कीर्यते राज्ञां शिरोभिरपलायिनाम् ॥ २५ ॥
एते परिघसङ्काशाः पुण्यगन्धानुलेपनाः ।
उद्धृता रणशूराणां पात्यन्ते सायुधा भुजाः ॥ २६ ॥
निरस्तजिह्वा नेत्रांता वाजिनः सह सादिभिः ।
पतिताः पात्यमानाश्च क्षितौ क्षीणा विशेरते ॥ २७ ॥
एते पर्वतशृङ्गाणां तुल्या हैमवता गजाः ।
संछिन्नकुम्भाः पार्थेन प्रपतन्त्यद्रयो यथा ॥ २८ ॥
गन्धर्वनगराकारा यथा याते नरेश्वराः ।
विमानादिव पुण्यान्ते स्वर्गिणो निपतन्त्यमी ॥ २९ ॥

हे कर्ण ! जैसे आकाशमें बिजली चमकती है ऐसे ही धनुषके रोदे चन्द्रमा और तारोंसे युक्त यह अर्जुनकी ध्वजा चमक रही है । ये वीरोंको भय देनेवाले चारों ओर देखते हुए भयङ्कर वन्दर अर्जुनकी ध्वजापर बैठे हुए दीख रहे हैं । ये घोडे हांकते हुए, श्रीकृष्णके शङ्ख, चक्र, गदा और शार्ङ्ग धनुष रथमें रक्खे हैं ॥ ये अर्जुनके धनुषका शब्द आ रहा है, इधर उनके तेज बाणोंसे अनेक वीर मर रहे हैं ॥ (२१-२४)

ये देखो युद्धसे न भागनेवाले लाल कमलके समान बडे नेत्रवाले राजोंके शिरोंसे यह भूमि भरी जाती है, देखो चन्दन आदि सुगन्ध लगे परिघके समान सुन्दर वीरोंके कटे हुए हाथ शस्त्रों सहित कटे जाते हैं ॥ ये अनेक घोडे आंख फैलाये जीभ निकाले पृथ्वीमें गिर पडे हैं और ये ऊपर बैठनेवाले योद्धा भी मर गये हैं । (२५-२७)

हिमाचलकी तराईके पर्वत शृंगके समान शरीरवाले हाथी अर्जुनके बाणोंसे कटकर टूटे हुए पर्वतोंके समान पृथ्वीमें गिर रहे हैं ॥ जैसे बडे बडे विमानोंसे

कर्णिनालीकनाराचैस्तोमरप्रासशक्तिभिः ।
मुसलैर्भिन्दिपालैश्च रथस्थं पार्थमार्दयन् ॥ १२ ॥
तां शस्त्रवृष्टिमतुलां द्विपहस्तैः प्रवेरिताम् ।
चिच्छेद निशितैर्भल्लैरर्धचन्द्रैश्च फाल्गुनः ॥ १३ ॥
अथ तान्द्विरदान्सर्वान्नानालिङ्गैः शरोत्तमैः ।
सपताकध्वजारोहान्गिरीन्वज्रैरिवाहनत् ॥ १४ ॥
ते हेमपुङ्खैरिषुभिरर्दिता हेममालिनः ।
हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः ॥ १५ ॥
ततो गाण्डीवनिर्घोषो महानासीद्विशाम्पते ।
स्तनतां कूजतां चैव मनुष्यगजवाजिनाम् ॥ १६ ॥
कुञ्जराश्च हता राजन्दुद्रुवुस्ते समन्ततः ।
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश ॥ १७ ॥
रथा हीना महाराज रथिभिर्वाजिभिस्तथा ।
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः ॥ १८ ॥
अश्वारोहा महाराज धावमाना इतस्ततः ।
तत्र तत्रैव दृश्यन्ते निहताः पार्थसायकैः ॥ १९ ॥

सौ हाथियोंपर चढे म्लेच्छ तुम्हारे पुत्रकी आज्ञासे अर्जुनसे युद्ध करनेको आये॥ वे सब रथपर बैठे हुए अर्जुनकी ओर बाण, तोमर, प्रास, शक्ति, मूसल और भिन्दिपाल चलाने लगे॥ (१०-१२)

अर्जुनने उन हाथियोंपर चढे वीरोंके छोडे हुए बाणोंको अर्धचन्द्र और नाराच नामक बाणोंसे काट दिया॥ जैसे इन्द्रने वज्रसे अनेक पर्वतोंको काट दिया था, ऐसे ही अर्जुनने भी उन सब हाथियोंको पताका ध्वजा और वीरोंके सहित काट डाला॥ जैसे अग्निकी ज्वाला सहित अनेक पर्वत कटकर पृथ्वीमें गिरते हैं, ऐसे ही वे सब हाथी सोनेके पङ्खवाले बाणोंसे व्याकुल होकर पृथ्वीमें गिर गये॥ (१३-१५)

हे पृथ्वीनाथ! इस समय मरते हुए हाथी, मनुष्य और घोडे तथा गाण्डिव धनुषका घोर शब्द होने लगा॥ हे पृथ्वीनाथ! अनेक हाथी बाण लगनेसे इधर उधरको भागने लगे, वीरोंके मरनेसे घोडे भी भागने लगे॥ हे महाराज! सहस्रों रथ, सारथी और वीरोंसे रहित होकर गन्धर्व नगरोंके समान इधर उधर फिरने लगे॥ (१६-१८)

इसी प्रकार अर्जुनके बाणोंसे व्याकुल

त्वरितोऽभिपतत्यस्मांस्त्यक्त्वा सैन्यान्यसंशयम् ।
त्वं कर्ण प्रतियाह्येनं नास्त्यन्यो हि धनुर्धरः ॥ ३८ ॥
न तं पश्यामि लोकेऽस्मिंस्त्वत्तो ह्यन्यं धनुर्धरम् ।
अर्जुनं समरे क्रुद्धं यो वेलामिव धारयेत् ॥ ३९ ॥
न चास्य रक्षां पश्यामि पार्श्वतो न च पृष्ठतः ।
एक एवाभियाति त्वां पश्य साफल्यमात्मनः ॥ ४० ॥
त्वं हि कृष्णौ रणे शक्तः संसाधयितुमाहवे ।
तवैव भारो राधेय प्रत्युद्याहि धनञ्जयम् ॥ ४१ ॥
समानो ह्यसि भीष्मेण द्रोणद्रौणिकृपेण च ।
सव्यसाचिनमायान्तं निवारय महारणे ॥ ४२ ॥
लेलिहानं यथा सर्पं गर्जन्तमृषभं यथा ।
वनस्थितं यथा व्याघ्रं जहि कर्ण धनञ्जयम् ॥ ४३ ॥
एते द्रवन्ति समरे धार्तराष्ट्रा महारथाः ।
अर्जुनस्य भयात्तूर्णं निरपेक्षा जनाधिपाः ॥ ४४ ॥
द्रवतामथ तेषां तु नान्योऽस्ति युधि मानवः ।

इच्छासे अर्जुन तुम्हारी ही ओर चले आते हैं ॥ (३४-३७)

हे कर्ण ! तुम इस सब सेनाको छोडकर शीघ्रता सहित केवल अर्जुनहीसे युद्ध करनेको चलो, क्यों कि तुम्हारे सिवाय और किसी धनुपधारीको उनसे युद्ध करनेकी शक्ति नहीं है । हम तुम्हारे सिवाय लोकमें दूसरे वीरको ऐसा नहीं देखते जो क्रोध भरे अर्जुनसे युद्ध कर सके, देखो अपने प्रारब्धके फलको, देखो अर्जुनके आगे पीछे कोई रक्षा करनेवाला नहीं है, ये एकले ही तुमसे लडनेको चले आते हैं ॥(३८-४०)

हे राधापुत्र ! तुमही कृष्ण और अर्जुनसे लड सकते हो । इनके मारनेका भार तुम्हारे ही शिर है, इसलिये तुमही इससें लडनेको जाओ, तुम भीष्म द्रोणाचार्य, और अश्वत्थामाके समान वली हो, इसलिये अर्जुनसे युद्ध करो ॥ हे कर्ण ! जैसे कोई मनुष्य लहराते सांप, मतवाले सांड और वलवान सिंहसे युद्ध करता है, ऐसे ही आज तुम अर्जुनसे युद्ध करो ॥ (४१-४३)

ये तुम्हारी सेनाके महारथ अर्जुनके बाणोंसे पीडित होकर और युद्धकी इच्छा छोडकर भागे जाते हैं । हे सूतपुत्र ! अब इन भागते हुए वीरोंका भय नाश करनेमें तुम्हारे सिवाय और कोई

भग्नसूर्धास्थिचरणाः क्रव्यादगणभोजनाः ॥ २८ ॥
असृङ्मांसवसाभिश्च तृप्तिमभ्यागता गदा ।
अस्थीन्यप्यश्नती तस्थौ कालरात्रीव दुर्दृशा ॥ २९ ॥
सहस्राणि दशाश्वानां हत्वा पत्तींश्च भूयसः ।
भीमोऽभ्यधावत्संक्रुद्धो गदापाणिरितस्ततः ॥ ३० ॥
गदापाणिं ततो भीमं दृष्ट्वा भारत तावकाः ।
मेनिरे समनुप्राप्तं कालदण्डोद्यतं यमम् ॥ ३१ ॥
स मत्त इव मातङ्गः संक्रुद्धः पाण्डुनन्दनः ।
प्रविवेश गजानीकं मकरः सागरं यथा ॥ ३२ ॥
विगाह्य च गजानीकं प्रगृह्य महतीं गदाम् ।
क्षणेन भीमः संक्रुद्धस्तन्निन्ये यमसादनम् ॥ ३३ ॥
गजान्सकङ्कटान्मत्तान्सारोहान्सपताकिनः ।
पततः सम्पश्याम सपक्षान्पर्वतानिव ॥ ३४ ॥
हत्वा तु तद्गजानीकं भीमसेनो महाबलः ।
पुनः स्वरथमास्थाय पृष्ठतोऽर्जुनमभ्ययात् ॥ ३५ ॥
हतं पराङ्मुखप्रायं निरुत्साहं परं बलम् ।

शिरसे रहित होकर दांत निकालकर पृथ्वीमें गिर पडे ॥ (२५-२८)

गिद्ध और स्यार उनका मांस खाने लगे । वह गदा मांस, चर्बी, रुधिर और हड्डियोंको खाती हुई कालरात्रिके समान भयानक दीखने लगी और मांस रुधिरसे तृप्त होगई । दश सहस्र घोडों को मारकर क्रोध भरे भीमसेन गदा लेकर इधर उधर घूमने लगे ॥(२९-३०)

हे महाराज ! गदाधारी भीमसेनको देखकर तुम्हारी सेनाने साक्षात् दण्डधारी यमराज समझ लिया ॥ महापराक्रमी मतवाले हाथीके समान भीमसेन उस सेनाका नाश करके तुम्हारी हाथी सेनामें इस प्रकार घुसे जैसे भारी मगर जलमें घुसता है ॥ भीमसेनने क्रोध करके क्षणमात्रमें अपनी गदासे उन सब हाथियोंको मारडाला ॥ (३१-३३)

हमने उस समय झूल अम्बारी और वीरोंके सहित अनेक हाथियोंको पक्षयुक्त पर्वतोंके समान गिरते देखा ॥ इस प्रकार उस गजसेनाका नाश करके भीमसेन फिर अपने रथपर बैठे और पीछेसे अर्जुन की रक्षा करने को चले ॥ (३४—३५)

हे महाराज ! उस समय जो तुम्हारी

कर्ण उवाच-नैतादृशो जातु बभूव लोके रथोत्तमो यावदुपश्रुतं नः ।
तमीदृशं प्रनियोत्स्यामि पार्थं महाहवे पश्य च पौरुषं मे ॥ ५४ ॥
रणे चरत्येष रथप्रवीरः सितैर्हयैः कौरवराजपुत्रः ।
स वाद्य मां नेष्यति कृच्छ्रमेतत्कर्णस्यान्तादेतदन्तास्तु सर्वे ॥ ५५ ॥
अस्वेदिनौ राजपुत्रस्य हस्तावव्यथमानौ जातकिणौ बृहन्तौ ।
दृढायुधः कृतिमान् क्षिप्रहस्तो न पाण्डवेयेन समोऽस्ति योधः ॥ ५६ ॥
गृह्णात्यनेकानपि कङ्कपत्रानेकं यथा तान्प्रति योज्य चाशु ।
ते क्रोशमात्रे निपतन्त्यमोघाः कस्तेन योधोऽस्ति समः पृथिव्याम् ॥५७॥
अतोषयत्खाण्डवे यो हुताशं कृष्णद्वितीयोऽतिरथस्तरस्वी ।
लेभे चक्रं यत्र कृष्णो महात्मा धनुर्गाण्डीवं पाण्डवः सव्यसाची ॥५८॥
श्वेताश्वयुक्तं च सुघोषमुग्रं रथं महाबाहुरदीनसत्वः ।
महेषुधी चाक्षये दिव्यरूपे शस्त्राणि दिव्यानि च हव्यवाहात् ॥५९॥
तथेन्द्रलोके निजघान दैत्यानसङ्ख्येयान् कालकेयांश्च सर्वान् ।
लेभे शङ्खं देवदत्तं स तत्र को नाम तेनाभ्यधिकः पृथिव्याम् ॥६०॥

श्रीकृष्ण उनकी रक्षा कर रहे है इस समय उसके जीतनेका कौन साहस कर सक्ता है ? (५३)

कर्ण बोले, हे शल्य! हमने जहांतक सुना है तहांतक अर्जुनके समान योद्धा नहीं सुना सो हम आज उसीसे युद्ध करेंगे, तुम हमारे पराक्रमको देखो ॥ ये कौरव राजपुत्र महारथ अर्जुन सफेद घोडोंके रथपर चढे हुए सेनामें घूम रहे है सो आज हमें मारेंगे वा इन्हें मार कर हम ही सब पाण्डवोंका नाश करेंगे। इन राजपुत्रके बडे बडे हाथोंमें धनुषकी ठेठ पड गई है तो भी कांपते नहीं और न पसीना ही आता है, इनके समान शीघ्र शस्त्र चलानेवाला और योद्धा जगत्में कोई नहीं है ॥ (५४-५६)

ये अनेक बाण हाथमें लेकर एक बाणके समान शीघ्रता सहित छोडते है, वे सब बाण एक कोसतक जा सकते है। ऐसे वीर अर्जुनसे कौन युद्ध कर सक्ता है ? इन्हीं अर्जुनने महारथ और महातेजस्वी कृष्णकी सहायतासे खाण्डव वनमें अग्निको तृप्त किया था। वहींसे श्रीकृष्णको चक्र और अर्जुनको गांडीव धनुष मिला था। वहींसे यह उत्तम शब्दवाला सफेद घोडोंके सहित रथ, दिव्य अक्षय तूणीर और अनेक दिव्य शस्त्र मिले थे, इन्होंने देवलोकमें जाकर असंख्य कालकेय नामक दानवोंको मारा था। तब देवदत्त शङ्ख पाया था, उन

देवैरपि न शक्यस्त्वं परिज्ञातुं कुतो मया।
त्वयि सर्वे स्म दृश्यन्ते भावा ये जगति स्थिताः ॥ ५२ ॥
त्वामुपासन्त वरदं देवा ब्रह्मादयोऽनघ।
सर्वस्त्वमसि देवानां कर्ता कारयिता च ह ॥ ५३ ॥
त्वत्प्रसादात्सुराः सर्वे मोदन्तीहाकुतोभयाः।
एवं स्तुत्वा महादेवं स ऋषिः प्रणतोऽभवत् ॥ ५४ ॥
यदिदं चापलं देव कृतमेतत्त्वयादिकम्।
ततः प्रसादयामि त्वां तपो मे न क्षरेदिति ॥ ५५ ॥
ततो देवः प्रीतमनास्तमृषिं पुनरब्रवीत्।
तपस्ते वर्धतां विप्र मत्प्रसादात्सहस्रधा ॥ ५६ ॥
आश्रमे चेह वत्स्यामि त्वया सार्धमहं सदा।
सप्तसारस्वते चास्मिन्यो मामर्चिष्यते नरः ॥ ५७ ॥
न तस्य दुर्लभं किञ्चिद्धवितेह परत्र वा।
सारस्वतं च ते लोकं गमिष्यन्ति न संशयः ॥ ५८ ॥
एतन्मङ्कणकस्यापि चरितं भूरितेजसः।
स हि पुत्रः सुकन्यायामुत्पन्नो मातरिश्वना ॥५९॥ [२३१५]

इति श्रीमहाभारते० शल्यपर्वांतर्गतगदापर्वणि बलदेव० सारस्वतोपाख्याने अष्टत्रिंशोऽध्याय ॥ ३८ ॥

मिल जाता है। आपको देवता भी नहीं जान सक्ते, मेरी तो कथा ही क्या है? जगत्के सब भाव तुममें दिखाई देते हैं हे पाप रहित! ब्रह्मादिक देवता भी आपकी उपासना करते हैं। हे देव! तुम जगत्के रूप और देवतोंके भी बनानेवाले हो, आपकी कृपासे सब देवता निर्भय होकर आनन्द करते हैं। हमने जो चपलता करी, वह भूल थी, अब हम आपसे यह वरदान मांगते हैं कि हमारी तपस्या क्षीण न होवे। (५०-५५)

मुनिके ऐसे वचन सुन महादेव प्रसन्न होकर बोले, हे ब्राह्मण! हमारे आशीर्वादसे तुम्हारा तप सहस्रों गुणा बढेगा, हम तुम्हारे सङ्ग इस आश्रममें सदा निवास करेंगे, जो मनुष्य इस सारस्वत तीर्थमें हमारी पूजा करेगा उसे जगत् में कोई वस्तु दुर्लभ नहीं होगी। मरकर वह मनुष्य सारस्वत लोकमें जायगा, हमने यह महातेजस्वी मंकणककी कथा तुमसे कही, ये मङ्कणक मातरिश्वा मुनि और सुकन्याके पुत्र थे। (५५—५९) [२३१५]

शल्यपर्वमें अडतीस अध्याय समाप्त।

उभौ हि शूरौ बलिनौ दृढायुधौ महारथौ संहननोपपन्नौ ।
एतादृशौ फाल्गुनवासुदेवौ कोऽन्यः प्रतीयान्महते तौ तु शल्य ॥ ६८ ॥
मनोरथो यस्तु ममाद्य तस्य मद्रेश युद्धं प्रति पाण्डवस्य ।
नैतच्चिरादाशु भविष्यतीदमत्यद्भुतं चित्रमतुल्यरूपम् ॥ ६९ ॥
एतौ च हत्वा युधि पातयिष्ये मां वापि कृष्णौ निहनिष्यतोऽद्य ।
इति ब्रुवञ्शल्यमभित्रहन्ता कर्णो रणे मेघ इवोन्ननाद ॥ ७० ॥
अभ्येत्य पुत्रेण तवाभिनन्दितः समेत्य चोवाच कुरुप्रवीरम् ।
कृपं च भोजं च महाभुजावुभौ तथैव गान्धारपतिं सहानुजम् ॥ ७१ ॥
गुरोः सुतं चावरजं तथात्मनः पदातिनोऽथ द्विपसादिनश्च तान् ।
निरुध्यताभिद्रवताच्युतार्जुनौ श्रमेण संयोजयताशु सर्वशः ॥ ७२ ॥
यथा भवद्भिर्भृशविक्षतावुभौ सुखेन हन्यामहमद्य भूमिपाः ।
तथेति चोक्त्वा त्वरिताः स तेऽर्जुनं जिघांसवो वीरतराः समाययुः ॥७३॥
शरैश्च जघ्नुर्युधि तं महारथा धनञ्जयं कर्णनिदेशकारिणः ।
नदीनदं भूरिजलो महार्णवो यथा तथा तान्समरेऽर्जुनोऽग्रसत् ॥ ७४ ॥
न सन्दधानो न तथा शरोत्तमान्प्रमुञ्चमानो रिपुभिः प्रदृश्यते ।

हारेंगे ॥ हे शल्य ! ये दोनों महारथ महा शस्त्रधारी और महायोद्धा है । इन दोनोंसे मेरे सिवाय और कौन युद्ध कर सक्ता है ॥ हे महाराज ! बहुत दिनसे महा पराक्रमी अर्जुनसे जो मेरी इच्छा है, सो आज तक पूरी न हुई इससे अधिक और क्या आश्चर्य होगा ? आज मैं या तो इन दोनोंको मारूंगा, या मुझे वे ही मार डालेंगे, ऐसे कह कर शत्रुनाशन कर्ण मेघके समान गर्जने लगा ॥ (६७-७०)

अनन्तर दुर्योधन, कृपाचार्य, कृतवर्मा, और भाइयोंके सहित शकुनिसे ऐसा बोले, तथा अश्वत्थामा अपने छोटे भाई तथा और भी सब पैदल, हाथी, घोडे और रथोंपर चढे वीरोंसे कहा कि तुम सब केवल अर्जुनसे युद्ध करना और इन दोनोंको थका दो । हे वीरो ! तुम लोग अर्जुन और कृष्णको घावोंसे व्याकुल कर दो, तब मैं सुखसे इन्हें मार डालूंगा । (७१-७३)

कर्णके वचन सुन सब लोग, अर्जुनसे युद्ध करनेको गये । और कृष्णके वचनानुसार अर्जुनके ऊपर अनेक प्रकारके शस्त्र बरसाने लगे, जैसे समुद्र सब नदियोंको शान्त कर देता है, तैसे ही अर्जुनने भी उन सब वीरोंको शान्त कर दिया ॥ अर्जुन किस समय बाण लेते

हत्वा चाश्वान्सात्यकेः सूनपुत्रः कैकेयपुत्रं न्यवधीद्विशोकम् । ३ ॥
तमभ्यधावन्निहते कुमारे कैकेयसेनापतिरुग्रकर्मा ।
शरैर्विधुन्वन्भृशमुग्रवेगैः कर्णात्मजं चाप्यहनत्प्रसेनम् ॥ ४ ॥
तस्यार्धचन्द्रैस्त्रिभिरुच्चकर्त प्रहस्य बाहू च शिरश्च कर्णः ।
स स्यन्दनाद्गामगमद्गतासुः परश्वधैः शाल इवावरुग्णः ॥ ५ ॥
हताश्वमज्ञोगतिभिः प्रसेनः शिनिप्रवीरं निशितैः पृषत्कैः ।
प्रच्छाद्य नृत्यन्निव कर्णपुत्रः शैनेयबाणाभिहतः पपात ॥ ६ ॥
पुत्रे हते क्रोधपरीतचेताः कर्णः शिनीनामृषभं जिघांसुः ।
हतोऽसि शैनेय इति ब्रुवन्स व्यवासृजद्बाणमरिप्रसाहम् ॥ ७ ॥
तमस्य चिच्छेद शरं शिखण्डी त्रिभिस्त्रिभिश्च प्रतुनोद कर्णम् ।
शिखण्डिनः कार्मुकं च ध्वजं च च्छित्त्वा क्षुराभ्यां न्यपतत्सुजातः ॥८॥
शिखण्डिनं षड्भिरविध्यदुग्रो धार्ष्टद्युम्नेः स शिरश्चोच्चकर्त ।
तथाभिनत्सुतसोमं शरेण सुसंशितेनाधिरथिर्महात्मा ॥ ९ ॥
अथाक्रन्दे तुमुले वर्तमाने धार्ष्टद्युम्ने निहते तत्र कृष्णः ।

मार डाले, फिर सात्यकिके घोडे मार कर राजपुत्र कैकेय देशीय विशोकसे युद्ध करनेको गये और उसे मार डाला ॥ (१ - ३)

राजपुत्र विशोकको मरा देख उसका सेनापति उग्रकर्मा तीक्ष्ण बाण वर्षाते हुए कर्णकी ओर दौडा और कर्णके पुत्र प्रसेनको मारने लगा ॥ कर्णने तीन अर्द्धचन्द्र बाणोंसे उग्रकर्माके दोनों हाथ और शिर काट लिया, वह शाल वृक्षके समान पृथ्वीमें कट कर गिर गये ॥ तब कर्णपुत्र प्रसेनने घोडे रहित रथपर बैठे हुए सात्यकि की ओर तीक्ष्ण बाण चलाये तब सात्यकिने अपने बाणोंसे उसे मार कर गिरा दिया ॥ (४—६)

पुत्रके मरनेसे कर्णको महा क्रोध हुआ और सात्यकिको मारनेके लिये मनमें इच्छा की ॥ फिर सात्यकी मारे गये, ऐसा कह कर एक शत्रुनाशन घोर बाण उनपर चलाया । तब शिखण्डीने उस बाणको तीन बाणोंसे काट दिया, और तीन बाण कर्णके शरीरमें मारे, कर्णने अपने दो बाणोंसे शिखण्डीकी ध्वजा और एक बाणसे धृष्टद्युम्नके पुत्रका शिर काट दिया । फिर महात्मा कर्णने सुतसोमकी ओर अनेक बाण चलाये । (७-९)

धृष्टद्युम्नके पुत्रके मरनेसे पाण्डवोंकी सब सेनामें हाहाकार होने लगा, तब श्रीकृष्णने अर्जुनसे कहा कि, हे कुन्ती-

तथापि तं प्रस्फुरदात्तकार्मुकं त्रिभिः शरैर्यन्तृशिरः क्षुरेण ।
हयांश्चतुर्भिश्च पुनस्त्रिभिर्ध्वजं धनञ्जयो द्रौणिरथादपातयत् ॥ ८३ ॥
स रोषपूर्णो मणिवज्रहाटकैरलंकृतं तक्षकभोगवर्चसम् ।
महाधनं कार्मुकमन्यदाददे यथा महाहिप्रवरं गिरेस्तटात् ॥ ८४ ॥
स्वमायुधं चोपनिकीर्य भूतले धनुश्च कृत्वा सगुणं गुणाधिकः ।
समार्दयत्तावजितौ नरोत्तमौ शरोत्तमैर्द्रौणिरविध्यदन्तिकात्॥ ८५ ॥
कृपश्च भोजश्च तवात्मजाश्च ते शरैरनेकैर्युधि पाण्डवर्षभम् ।
महारथाः संयुगमूर्धनि स्थितास्तमोनुदं वारिधरा इवापतन् ॥ ८६ ॥
कृपस्य पार्थः सशरं शरासनं हयान्ध्वजान्सारथिमेव पत्त्रिभिः ।
समार्पयद्बाहुसहस्रविक्रमस्तथा यथा वज्रधरः पुरा बलेः ॥ ८७ ॥
स पार्थबाणैर्विनिपातितायुधो ध्वजावमर्दे च कृते महाहवे ।
कृतः कृपो बाणसहस्रयन्त्रितो यथापगेयः प्रथमं किरीटिना ॥ ८८ ॥
शरैः प्रचिच्छेद तवात्मजस्य ध्वजं धनुश्च प्रचकर्त नर्दतः ।
जघान चाश्वान्कृतवर्मणः शुभान्ध्वजं च चिच्छेद ततः प्रतापवान्॥८९॥
स वाजिसूतेष्वसनान्सकेतनाञ्जघान नागाश्वरथांस्त्वरंश्च सः ।

अनेक बाण मारे तब अर्जुनने क्रोध करके एक बाणसे उनके सारथी, चारसे चारों घोडे और एकसे ध्वजा काट दी। अनन्तर अश्वत्थामा सुवर्ण और रत्नोंसे जटित महा सांपके समान भयङ्कर धनुष लेकर उस रथसे इस प्रकार कूदे जैसे घोर सर्प पर्वतसे गिरता है। फिर अपने सब शस्त्र रथसे खींचकर पृथ्वीमें गिरा दिये और अनेक तेज बाण कृष्ण तथा अर्जुनकी ओर चलाये (८१-८५)

जैसे सूर्यकी ओर अनेक मेघ दौडते हैं। ऐसे ही युद्धमें खडे पाण्डव श्रेष्ठ अर्जुनकी ओर मेघके समान बाण बर्षाते हुए, कृपाचार्य, कृतवर्मा और दुर्योधन दौडे ॥ जैसे वज्रधारी इन्द्रने बलिको अपने बाणोंसे व्याकुल कर दिया था, ऐसे ही सहस्र बाहुके समान अर्जुनने अपने बाणोंसे कृपाचार्यके घोडे, सारथी ध्वजा और बाणोंके सहित धनुष काट दिये, जैसे अर्जुनने अपने बाणोंसे भीष्मको व्याकुल कर दिया था, ऐसे ही घोडे, सारथी, ध्वजा कटनेसे कृपाचार्य व्याकुल होगये ॥ (८६-८८)

इसी प्रकार दुर्योधनके घोडे और सारथीको मारकर ध्वजा और धनुष काट दिया, फिर कृतवर्माके घोडोंको मार डाला। फिर हाथी, घोडे, और रथोंपर चढे अनेक वीरोंको मारने लगे। जैसे

तान्पञ्चभिस्त्वभ्यहनत्पृषत्कैः कर्णस्ततः सिंह इवोन्ननाद ॥ १८ ॥
तस्यास्यतस्तानभिनिघ्नतश्च ज्यावाणहस्तस्य धनुःस्वनेन।
साद्रिद्रुमा स्यात्पृथिवी विशीर्णेत्यतीव मत्वा जनता व्यषीदत् ॥ १९ ॥
स शक्रचापप्रतिमेन धन्वना भृशायतेनाधिरथिः शरान्सृजन्।
बभौ रणे दीप्तमरीचिमण्डलो यथांशुमाली परिवेषवांस्तथा ॥ २० ॥
शिखण्डिनं द्वादशभिः पराभिनच्छितैः शरैः षड्भिरथोत्तमौजसम्।
त्रिभिर्युधामन्युमविध्यदाशुगैस्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ ॥२१॥
पराजिताः पञ्च महारथास्तु ते महाहवे सूतसुतेन मारिष।
निरुद्यमास्तस्थुरमित्रनन्दना यथेन्द्रियार्थात्मवता पराजिताः ॥ २२ ॥
निमज्जतस्तानथ कर्णसागरे विपन्ननावो वणिजो यथार्णवे।
उदह्धिरे नौभिरिवार्णवाद्रथैः सुकल्पितैर्द्रौपदिजाः स्वमातुलान् ॥ २३ ॥
ततः शिनीनामृषभः शितैः शरैर्निकृत्य कर्णप्रहितानिषून्बहून्।
विदार्य कर्णं निशितैरयस्मयैस्तवात्मजं ज्येष्ठमविध्यदष्टभिः ॥ २४ ॥
कृपोऽथ भोजश्च तवात्मजस्तथा स्वयं च कर्णो निशितैरताडयत्।

सिंहके समान गर्जने लगे, उस समय शत्रुओंको मारते हुए कर्णके शब्दसे पृथ्वी फट जायगी ऐसा जानकर और वन तथा पर्वत फट जायंगे, ऐसे विचार कर सब जगत् डरने लगा। जैसे जेठ, वैशाखका सूर्य अपनी किरणोंसे तेज दिखाई देता है, ऐसेही इन्द्रधनुषके समान अपनी धनुषसे बाण छोडते हुए अधिरथपुत्र कर्ण भी महा तेजस्वी दीखने लगे ॥ (१८-२०)

शिखण्डीके शरीरमें बारह, उत्तमौजाके छः, युधामन्युके तीन, सोमक राजपुत्र और शिखण्डीके तीन तीन बाण मारे ॥ जब महारथ सूतने इन पांचों महारथोंको जीत लिया, तब सब लोग आत्मज्ञानीसे निरुद्ध विषयोंके समान निरुद्यम होकर खडे होगये ॥ जैसे कोई उत्तम मनुष्य समुद्रमें डूबते हुए बनियोंको अपनी नाव पर चढाकर बचाता है, ऐसे ही अपने मामाओंकी रक्षा करनेको द्रौपदीके पांचों पुत्र अपने रथोंपर बैठे हुए तेज बाण वर्षाते हुए कर्णसे युद्ध करनेको आये ॥ २१-२३

तब सात्यकिने क्रोध करके अपने तेज बाणोंसे कर्णके सब बाण काट डाले, और दुर्योधनके शरीरमें आठ बाण मारे ॥ तब कृपाचार्य, कृतवर्मा राजा दुर्योधन और कर्ण अपने तेज बाणोंसे अकेले सात्यकि से युद्ध करने लगे। (२४--२५)

सञ्जय उवाच- राजन्कुरूणां प्रवरैर्बलैर्भीमसभिद्रुतम् ।
सज्जन्तमिव कौन्तेयमुज्जिहीर्षुर्धनञ्जयः ॥ १ ॥
विमृद्य सूतपुत्रस्य सेनां भारत सायकैः ।
प्राहिणोन्मृत्युलोकाय परवीरान्धनञ्जयः ॥ २ ॥
ततोऽस्यास्वरमाश्रित्य शरजालानि भागशः ।
अदृश्यन्त तथान्ये च निजघ्नुस्तव वाहिनीम् ॥ ३ ॥
स पक्षिसङ्घाचरितमाकाशं पूरयञ्शरैः ।
धनञ्जयो महाबाहुः कुरूणामन्तकोऽभवत् ॥ ४ ॥
ततो भल्लैः क्षुरप्रैश्च नाराचैर्विमलैरपि ।
गात्राणि प्राच्छिनत्पार्थः शिरांसि च चकर्त ह ॥ ५ ॥
छिन्नगात्रैर्विकवचैर्विशिरस्कैः समन्ततः ।
पातितैश्च पतद्भिश्च योधैरासीत्समावृता ॥ ६ ॥
धनञ्जयशराभ्यस्तैः स्यन्दनाश्वरथद्विपैः ।
संछिन्नभिन्नविध्वस्तैर्व्यङ्गाङ्गावयवैः स्तृता ॥ ७ ॥
सुदुर्गमा सुविषमा घोरात्यर्थं सुदुर्दृशा ।
रणभूमिरभूद्राजन्महावैतरणी यथा ॥ ८ ॥
ईषाचक्राक्षभल्लैश्च व्यश्वैः साश्वैश्च युध्यताम् ।
ससूतैर्हतसूतैश्च रथैः स्तीर्णाभवन्मही ॥ ९ ॥

कर्णपर्वमें अस्सी अध्याय ।

सञ्जय बोले, हे राजन् ! जैसे कोई दौड़ते हुए मनुष्यको बचानेके लिये दौड़ता है, ऐसे ही तुम्हारे प्रधान वीरोंसे युद्ध करते हुए अर्जुन भीमसेनकी ओर चले, और कर्णकी सेनामें जाकर अनेक वीरोंको मार डाला, तब अर्जुनके बाण सब आकाशमें छा गये, और तुम्हारी सेनाका नाश करने लगे ॥ (१-३)

अर्जुनने अपने बाणोंसे पक्षियोंके समान आकाशको पूरित कर दिया.तब अनेक प्रकारके तेज भल्ल और नाराच बाणोंसे अर्जुनने वीरोंके शिर और शरीर काट डाले, उस समय मुण्ड रहित शरीर और शरीर रहित मुण्डोंसे वह रणभूमि पूरित होगयी, वह भूमि अर्जुनके बाणोंसे कटे हुए अङ्गरहित हाथी, घोडे और मनुष्य तथा रथोंसे पूरित होगयी ॥ (४-७)

हे राजन् ! वह रणभूमि भयानक कुरूप और दुर्गम होगयी, जैसे यमलोककी वैतरणी नदी ॥ कटे हुए रथ और घोडोंके सहित, कहीं सारथी युक्त, कहीं

सकृत्प्रभिन्नाविव वासितान्तरे महागजौ मन्मथसक्तचेतसौ ॥३२॥
तवात्मजस्याथ वृकोदरस्त्वरन्धनुः क्षुराभ्यां ध्वजमेव चाच्छिनत्।
ललाटमप्यस्य बिभेद पत्त्रिणा शिरश्च कायात्प्रजहार सारथेः॥ ३३ ॥
स राजपुत्रोऽन्यदवाप्य कार्मुकं वृकोदरं द्वादशभिः पराभिनत्।
स्वयं नियच्छंस्तुरगानजिह्मगैः शरैश्च भीमं पुनरप्यवीवृषत् ॥ ३४ ॥
ततः शरं सूर्यमरीचिसप्रभं सुवर्णवज्रोत्तमरत्नभूषितम्।
महेन्द्रवज्राशनिपातदुःसहं सुमोच भीमाङ्गविदारणक्षमम् ॥ ३५ ॥
स तेन निर्विद्धतनुर्वृकोदरो निपातितः स्रस्ततनुर्गतासुवत्।
प्रसार्य बाहू रथवर्यमाश्रितः पुनः स संज्ञामुपलभ्य चानदत् ॥ ३६ ॥

इति श्रीमहाभारते-शतसाहस्र्या० कर्णपर्वणि दु शासनभीमसेनयुद्धे द्व्यशीतितमोऽध्याय ॥८२॥[४२०१]

सञ्जय उवाच—तत्राकरोद्दुष्करं राजपुत्रो दुःशासनस्तुमुलं युद्ध्यमानः।
चिच्छेद भीमस्य धनुः शरेण षष्ट्या शरैः सारथिमप्यविध्यत्॥ १ ॥
स तत्कृत्वा राजपुत्रस्तरस्वी विव्याध भीमं नवभिः पृषत्कैः।
ततोऽभिनद्बहुभिः क्षिप्रमेव वरेषुभिर्भीमसेनं महात्मा ॥ २ ॥

दोनों शरीर नाश करनेवाले बाणोंसे घोर युद्ध करने लगे॥ और दोनोंके शरीरसे रुधिर बहने लगा, तब भीमसेनने क्रोध करके एक एक क्षुर बाणसे तुम्हारे पुत्रकी ध्वजा और धनुष काट दिये। और उनके माथेमें अनेक बाण मारे, फिर सारथीका शिर काट कर पृथ्वीमें गिरा दिया॥ (३१–३३)

तब राजपुत्र दुःशासन आप ही घोडे हांकने लगा, और अपने बारह तेज बाण भीमसेनके शरीरमें मारे, तब एक इन्द्रके वज्रके समान घोर, सूर्य किरणके समान प्रभावाले, सुवर्ण और नीलम आदि मणियोंसे जटित, भीमसेनको मारनेमें समर्थ घोर बाण दुःशासनने छोडा, उस बाणके लगनेसे भीमसेनका कवच कट गया, शरीरसे रुधिर बहने लगा और हाथ पैर फैलकर मरे हुएके समान रथमें गिर पडे। थोडे समयमें फिर उठकर गर्जने लगे॥ (३३–३६)

कर्णपर्वमें बियासी अध्याय समाप्त। [४२०१]

कर्णपर्वमें तिरासी अध्याय।

सञ्जय बोले, हे राजन्! उस समय युद्ध करते हुए राजपुत्र दुःशासनने घोर कर्म किया। एक बाणसे भीमसेनका धनुष काट दिया, और साठ बाण उनके सारथीके शरीरमें मारे। अनन्तर महात्मा राजपुत्रने भीमसेनके शरीरमें नौ तेज बाण मारकर फिर अनेक बाण मारे॥ (१–२)

महागिरौ वेणुवनं निशि प्रज्वलितं यथा ॥ १८ ॥
तथा तव महासैन्यं प्रास्फुरच्छरपीडितम् ।
सम्पिष्टद्रुमविध्वस्तं तव सैन्यं किरीटिना ॥ १९ ॥
कृतं प्रविहतं बाणैः सर्वतः प्रद्रुतं दिशः ।
महावने मृगगणा दावाग्नित्रासिता यथा ॥ २० ॥
कुरवः पर्यवर्तन्त निर्दग्धाः सव्यसाचिना ।
उत्सृज्य च महाबाहुं भीमसेनं तथा रणे ॥ २१ ॥
बलं कुरूणामुद्विग्नं सर्वमासीत्पराङ्मुखम् ।
ततः कुरुषु भग्नेषु बीभत्सुरपराजितः ॥ २२ ॥
भीमसेनं समासाद्य मुहूर्तं सोऽभ्यवर्तत ।
समागम्य च भीमेन मन्त्रयित्वा च फाल्गुनः ॥ २३ ॥
विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरम् ।
भीमसेनाभ्यनुज्ञातस्ततः प्रायाद्धनञ्जयः ॥ २४ ॥
नादयन्रथघोषेण पृथिवीं द्यां च भारत ।
ततः परिवृतो वीरैर्दशभिर्योधपुङ्गवैः ॥ २५ ॥
दुःशासनादवरजैस्तव पुत्रैर्धनञ्जयः ।
ते तमभ्यर्दयन्बाणैरुल्काभिरिव कुञ्जरम् ॥ २६ ॥
आततेष्वसनाः शूरा नृत्यन्त इव भारत ।

सेना व्याकुल होगई। जैसे वनमें आग लगनेसे बांस जलते है, तैसेही बिजली और वज्रके समान बाणोंसे तुम्हारी सेना भस्म होने लगी। अर्जुनने तुम्हारी सेनाका नाश कर दिया। जैसे वनमें आग लगनेसे हरिन भागते हैं, तैसेही तुम्हारी सेना अर्जुनके बाणोंसे इधर उधरको भागने लगी ॥ (१७—२०)

तब सब प्रधान योद्धा भीमसेनको छोडकर अर्जुनसे युद्ध करनेको आये. उस समय तुम्हारी सब सेना युद्धसे विमुख होकर इधर उधरको भागने लगी। तब अर्जुन भीमसेनके पास गये और थोडे समयतक खडे होकर कुछ सम्मति करते रहे। उन्होंने भीमसेनसे महाराज का कुशल कहा और फिर उनकी आज्ञा लेकर युद्ध करनेको चले गये॥ २१-२४

उस समय उनके रथके शब्दसे पृथ्वी और आकाश पूरित होगये। तब जैसे कोई मनुष्य आग जलाकर हाथीको डराता है ऐसे ही दुःशासनसे छोटे महा योद्धा तुम्हारे दसपुत्र अर्जुनसे युद्ध करने

हयाः ससूता निहता नरेन्द्र चूर्णीकृतश्चास्य रथः पतन्त्या ।
दुःशासनं पाण्डवाः प्रेक्ष्य सर्वे हृष्टाः पञ्चालाः सिंहनादानमुञ्चन् ॥११॥
तं पातयित्वाथ वृकोदरोऽथ जगर्ज हर्षेण विनादयन्दिशः ।
नादेन तेनाखिलपार्श्ववर्तिनो मूर्छाकुलाः पतितास्त्वाजमीढ ॥ १२ ॥
भीमोऽपि वेगाद्वर्तीर्य यानाद्दुःशासनं वेगवानभ्यधावत् ।
ततः स्मृत्वा भीमसेनस्तरस्वी सापत्नकं यत्प्रयुक्तं सुतैस्ते ॥ १३ ॥
तस्मिन्सुघोरे तुमुले वर्तमाने प्रधानभूयिष्ठतरैः समन्तात् ।
दुःशासनं तत्र समीक्ष्य राजन्भीमो महाबाहुरचिन्त्यकर्मा ॥ १४ ॥
स्मृत्वाऽथ केशग्रहणं च देव्या वस्त्रापहारं च रजस्वलायाः ।
अनागसो भर्तृपराङ्मुखाया दुःखानि दत्तान्यपि विप्रचिन्त्य ॥ १५ ॥
जज्वाल क्रोधादथ भीमसेन आज्यप्रसिक्तो हि यथा हुताशः ।
तत्राह कर्णं च सुयोधनं च कृपं द्रौणिं कृतवर्माणमेव ॥ १६ ॥
निहन्मि दुःशासनमद्य पापं संरक्ष्यतामद्य समस्तयोधाः ।
इत्येवमुक्त्वा सहसाभ्यधावन्निहन्तुकामोऽतिबलस्तरस्वी ॥ १७ ॥
तथा तु विक्रम्य रणे वृकोदरो महागजं केसरिको यथैव ।

और वस्त्रोंसे रहित होकर पृथ्वीमें गिर पडे ॥ (७-१०)

हे महाराज ! इसी गदासे दुःशासन के रथ, घोडे, सारथी आदिका चूरा होगया, दुःशासनकी यह दशा देख पाञ्चाल और पाण्डव प्रसन्न होकर सिंहके समान गर्जने लगे ॥ हे आजमीढ! दुःशासनको गिराकर भीमसेन प्रसन्न होकर गर्जने लगे, उस शब्दसे पास खडे सब वीरोंको मूर्च्छा आगई ॥ तब बलवान् भीमसेन तुम्हारे पुत्रोंके वैरको स्मरण करके शीघ्रता सहित अपने रथसे उतरे और दुःशासन की ओर दौडे ॥ (११—१३)

उस घोर युद्धमें दुःशासनकी यह घोर दशा देख सब प्रधान वीरोंके बीचमें घोर कर्म करनेवाले भीमसेनने द्रौपदीके वस्त्र और बाल खींचने, रजस्वला दशामें सभामें लाने, पतियोंके आगे कठोर वचन कहने आदि दुःखोंको स्मरण करके ऐसा क्रोध किया जैसे जलती अग्निपर घी पडनेसे अधिक ज्वाला होती है । (१४—१६)

तब कर्ण, कृपाचार्य, अश्वत्थामा और कृतवर्मासे कहा, अब हम दुःशासनको मारते हैं तुम सब इकट्ठे होकर उसकी रक्षा करो ॥ ऐसा कहकर वेगसे उसकी ओर दौडे जैसे सिंह मतवाले

मुक्ताजालप्रतिच्छन्नान्प्रेषीत्कर्णरथं प्रति ॥ ३ ॥
ततः कर्णरथं यान्तमारिघ्नं तं धनञ्जयम् ।
बाणवर्षैरभिघ्नन्तः संशप्तकरथा ययुः ॥ ४ ॥
त्वरमाणांस्तु तान्सर्वान्ससूतेष्वसनध्वजान् ।
जघान नवतिं वीरानर्जुनो निशितैः शरैः ॥ ५ ॥
तेऽपतन्त हता बाणैर्नानारूपैः किरीटिना ।
सविमाना यथा सिद्धाः स्वर्गात्पुण्यक्षये तथा ॥ ६ ॥
ततः सरथनागाश्वाः कुरवः कुरुसत्तमम् ।
निर्भया भरतश्रेष्ठमभ्यवर्तन्त फाल्गुनम् ॥ ७ ॥
तदायस्तमनुष्याश्वमुदीर्णवरवारणम् ।
पुत्राणां ते महासैन्यं समरौत्सीद्धनञ्जयम् ॥ ८ ॥
शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः ।
प्राच्छादयन्महेष्वासाः कुरवः कुरुनन्दनम् ॥ ९ ॥
तामन्तरिक्षे विततां शस्त्रवृष्टिं समन्ततः ।
व्यधमत्पाण्डवो बाणैस्तमः सूर्य इवांशुभिः ॥ १० ॥
ततो म्लेच्छाः स्थिता मत्तैस्त्रयोदशशतैर्गजैः ।
पार्श्वतो व्यहनन्पार्थं तव पुत्रस्य शासनात् ॥ ११ ॥

के जालयुक्त सफेद बहुत शीघ्र चलने-वाले घोडोंको कर्णहीकी ओर हांका॥१-३

शत्रुनाशन अर्जुनको कर्णके रथकी ओर जाते देख बाण वर्षाते हुए सशप्तक योद्धा दौडे॥ उनको अपनी ओर आते देख अर्जुनने तेज बाणोंसे इन सबको घोडे, सारथी और धनुषोंके सहित काट डाला॥ जैसे पुण्य नाश होनेसे विमानों के सहित देवता पृथ्वीमें गिरते हैं, ऐसे ही अर्जुनके अनेक रङ्गवाले बाणोंसे वे सब योद्धा मरकर गिर गये॥ (४-६)

हे कुरुकुलश्रेष्ठ! जब अनेक कौरव निर्भय होकर कुरुकुलश्रेष्ठ अर्जुनसे युद्ध करनेको चले तब हाथी, घोडे, रथ मनुष्योंसे भरी हुई तुम्हारे पुत्रोंकी महा सेनाने अर्जुनको चारों ओरसे घेर लिया॥ महाधनुषधारी कौरवोंने कुरुकुलश्रेष्ठ अर्जुनके ऊपर शक्ति, तोमर, गदा, प्रास और बाण चलाये और खड्गोंसे युद्ध करने लगे॥ (७—९)

जैसे सूर्य अपनी किरणोंसे अन्धकार-का नाश कर देते हैं, ऐसेही अर्जुनने अपने बाणोंसे उस आकाशमें छायी हुई बाण वर्षाको काट दिया॥ तब तेरह

तस्मिन्क्षणे पाण्डवस्य बाह्वोर्बलमहृयत ।
यत्साद्विनो वारणांश्च रथांश्चैकोऽजयद्युधि ॥ २० ॥
ततस्त्यङ्क्षेण महता घलेन भरतर्षभ ।
दृष्ट्वा परिवृतं राजन्भीमसेनः किरीटिनम् ॥ २१ ॥
हतावशेषानुत्सृज्य त्वदीयान्कतिचिद्रथान् ।
जवेनाभ्यद्रवद्राजन्धनञ्जयरथं प्रति ॥ २२ ॥
ततस्तत्प्राद्रवत्सैन्यं हतभूयिष्ठमातुरम् ।
दृष्ट्वार्जुनं तदा भीमो जगाम भ्रातरं प्रति ॥ २३ ॥
हतावशिष्टांस्तुरगानर्जुनेन महाबलान् ।
भीमो व्यधमदभ्रान्तो गदापाणिर्महाहवे ॥ २४ ॥
कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम् ।
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् ॥ २५ ॥
ततो गदां नृनागाश्वेष्वाशु भीमो व्यवासृजत् ।
सा जघान बहूनश्वानश्वारोहांश्च मारिष ॥ २६ ॥
काष्णायसतनुत्राणान्नरानश्वांश्च पाण्डवः ।
पोथयामास गदया सशब्दं तेऽपतन्हताः ॥ २७ ॥
दन्तैर्दशन्तो वसुधां शेरते क्षतजोक्षिताः ।

होकर अनेक घुडचढे इधर उधर घूमने लगे ॥ उस समय अर्जुनने ऐसा पराक्रम किया कि हाथी, घोडे और रथों पर चढे सब वीरोंको जीत लिया ॥ (१९–२०)

तब महाबाहु भीमसेन अर्जुनको तीन प्रकारकी महासेनासे घिरा हुआ देख तुम्हारी बची हुई सेनाको छोड अर्जुनके रथकी ओर वेगसे चले। भीमसेनको अर्जुनकी ओर जाते देख वह बची हुई सब सेना इधर उधरको भागने लगी। अर्जुनसे जो सेना बची थी उस सबको बलवान भीमसेनने गदासे मार डाला। (२१–२४)

तब भीमसेन कालरात्रिके समान भयानक मनुष्य, हाथी और घोडोंकी खानेवाली, छारदीवाली, (पुरकोट) कटारी और नगरके द्वारोंको तोडनेवाली महाभयङ्कर गदा, घोडे, हाथी और मनुष्योंपर चलाने लगे ॥ उससे तुम्हारी सेनाका नाश होने लगा। भीमसेनने लोहेके कवच पहने अनेक हाथी और मनुष्योंको अपनी गदासे मारकर पृथ्वीमें गिरा दिया, अनेक वीर हाथ, पैर और

दुःशासनं जीवितं प्रोत्मृज्जन्तमाक्षिप्य योधांस्तरसा महाबलः ॥ २६ ॥
एवं क्रुद्धो भीमसेनः करेण उत्पाटयामास भुजं महात्मा ।
दुःशासनं तेन स वीरमध्ये जघान वज्राशनिसन्निभेन ॥ २७ ॥
उत्कृत्य वक्षः पतितस्य भूमावथापिबच्छोणितमस्य कोष्णम् ।
ततो निपात्यास्य शिरोऽपकृत्य तेनासिना तव पुत्रस्य राजन् ॥ २८ ॥
सत्यां चिकीर्षुर्मतिमान्प्रतिज्ञां भीमोऽपिबच्छोणितमस्य कोष्णम् ।
आस्वाद्य चास्वाद्य च वीक्षमाणः क्रुद्धो हि चैनं निजगाद वाक्यम् ॥ २९ ॥
स्तन्यस्य मातुर्मधुसर्पिषोर्वा माध्वीकपानस्य च सत्कृतस्य ।
दिव्यस्य वा तोयरसस्य पानात्पयोदधिभ्यां मथिताच्च मुख्यात् ॥ ३० ॥
अन्यानि पानानि च यानि लोके सुधामृतस्वादुरसानि तेभ्यः ।
सर्वेभ्य एवाभ्यधिको रसोऽयं समाद्य चास्याहितलोहितस्य ॥ ३१ ॥
अथाह भीमः पुनरुग्रकर्मा दुःशासनं क्रोधपरीतचेताः ।
गतासुमालोक्य विहस्य सुस्वरं किं वा कुर्या मृत्युना रक्षितोऽसि ॥ ३२ ॥
एवं ब्रुवाणं पुनराद्रवन्तमास्वाद्यमानं तमतिप्रहृष्टम् ।
ये भीमसेनं ददृशुस्तदानीं भयेन तेऽपि व्यथिता निपेतुः ॥ ३३ ॥
ये चापि नासन्व्यथिता मनुष्यास्तेषां करेभ्यः पतितं हि शस्त्रम् ।

जिस क्षत्रीको अपने बलका अभिमान हो, वह मरते हुए दुःशासनको बचावे। मैं अभी इस दुष्टके हाथ तोड़ूंगा, ऐसा कहकर भीमसेनने वज्रके समान हाथसे दुःशासनका हाथ उखाड लिया और वज्र और बिजलीके समान उस हाथसे दुःशासनको मारने लगे॥ (२५—२७)

फिर छाती चीरकर उसका गर्म रुधिर पिया और फिर अपने खड्गसे उसका शिर काट लिया॥ अपनी प्रतिज्ञा सत्य करनेके लिये दुःशासनका रुधिर चाखते हुए बोले, मैंने ऐसा स्वाद माताके दूध, घी, शहद और उत्तम जलमें भी नहीं पाया था। और भी जगत्में जो अमृतके समान वस्तु है, उनमें भी ऐसा स्वाद कभी नहीं पाया जैसा आज इस दुष्ट दुःशासनके रुधिरमें पाया॥ (२८-३१)

दुःशासनको मरा देख क्रोधमें भरकर घोर कर्मवाले भीमसेन फिर बोले, आह! अब मैं तेरा क्या कर सक्ता हूं! अब मृत्यु तेरी रक्षा कर रही है॥ रुधिर पीते भीमसेनको देख सब क्षत्री डरके मारे इधर उधरको भागने लगे, और भीमसेन प्रसन्न होते हुए दुःशासनको छोड चल दिये। जो डरके मारे

तस्मिन्क्षणे पाण्डवस्य बाह्वोर्बलमदृश्यत ।
यत्सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि ॥ २० ॥
ततस्त्यङ्क्षेण महता बलेन भरतर्षभ ।
दृष्ट्वा परिवृतं राजन्भीमसेनः किरीटिनम् ॥ २१ ॥
हतावशेषानुत्सृज्य त्वदीयान्कातिचिद्रथान् ।
जवेनाभ्यद्रवद्राजन्धनञ्जयरथं प्रति ॥ २२ ॥
ततस्तत्प्राद्रवत्सैन्यं हतभूयिष्ठमातुरम् ।
दृष्ट्वार्जुनं तदा भीमो जगाम भ्रातरं प्रति ॥ २३ ॥
हतावशिष्टांस्तुरगानर्जुनेन महाबलान् ।
भीमो व्यधमदभ्रान्तो गदापाणिर्महाहवे ॥ २४ ॥
कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम् ।
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् ॥ २५ ॥
ततो गदां नृनागाश्वेष्वाशु भीमो व्यवासृजत् ।
सा जघान बहूनश्वानश्वारोहांश्च मारिष ॥ २६ ॥
काञ्चनीयसतनुत्राणान्नरानश्वांश्च पाण्डवः ।
पोथयामास गदया सशब्दं तेऽपतन्हताः ॥ २७ ॥
दन्तैर्दशन्तो वसुधां शेरते क्षतजोक्षिताः ।

होकर अनेक घुडचढे इधर उधर घूमने लगे ॥ उस समय अर्जुनने ऐसा पराक्रम किया कि हाथी, घोडे और रथों पर चढे सब वीरोंको जीत लिया ॥ (१९–२०)

तब महाबाहु भीमसेन अर्जुनको तीन प्रकारकी महासेनासे घिरा हुआ देख तुम्हारी बची हुई सेनाको छोड अर्जुनके रथकी ओर वेगसे चले। भीमसेनको अर्जुनकी ओर जाते देख वह बची हुई सब सेना इधर उधरको भागने लगी । अर्जुनसे जो सेना बची थी उस सबको बलवान भीमसेनने गदासे मार डाला । (२१–२४)

तब भीमसेन कालरात्रिके समान भयानक मनुष्य, हाथी और घोडोंकी खानेवाली, छारदीवाली, (पुरकोट) कटारी और नगरके द्वारोंको तोडनेवाली महाभयङ्कर गदा, घोडे, हाथी और मनुष्योंपर चलाने लगे ॥ उससे तुम्हारी सेनाका नाश होने लगा । भीमसेनने लोहेके कवच पहने अनेक हाथी और मनुष्योंको अपनी गदासे मारकर पृथ्वीमें गिरा दिया, अनेक वीर हाथ, पैर और

एष ते रुधिरं कण्ठात्पिबामि पुरुषाधम ॥ ४२ ॥
ब्रूहीदानीं तु संहृष्टः पुनर्गौरिति गौरिति ।
ये तदास्मान्प्रनृत्यन्ति पुनर्गौरिति गौरिति ॥ ४३ ॥
तान्वयं प्रतिनृत्यामः पुनर्गौरिति गौरिति ।
प्रमाणकोट्यां शयनं कालकूटस्य भोजनम् ॥ ४४ ॥
दंशनं चाहिभिः कृष्णैर्दाहं च जतुवेश्मनि ।
द्यूतेन राज्यहरणमरण्ये वसतिश्च या ॥ ४५ ॥
द्रौपद्याः केशपक्षस्य ग्रहणं च सुदारुणम् ।
इष्वस्त्राणि च संग्रामेष्वसुखानि च वेश्मनि ॥ ४६ ॥
विराटभवने यश्च क्लेशोऽस्माकं पृथग्विधः ।
शकुनेर्धार्तराष्ट्रस्य राधेयस्य च मन्त्रिते ॥ ४७ ॥
अनुभूतानि दुःखानि तेषां हेतुस्त्वमेव हि ।
दुःखान्येतानि जानीमो न सुखानि कदाचन ।
धृतराष्ट्रस्य दौरात्म्यात्सपुत्रस्य सदा वयम् ॥ ४८ ॥
इत्युक्त्वा वचनं राजञ्जयं प्राप्य वृकोदरः ।
पुनराह महाराज स्मयंस्तौ केशवार्जुनौ ॥ ४९ ॥
असृग्दिग्धो विस्रवल्लोहितास्यः क्रुद्धोऽत्यर्थं भीमसेनस्तरस्वी ।

गर्जते हुए कौरवोंको सुनाकर बोले, अब मैं इस नीचका रुधिर कण्ठतक पीऊंगा, यही मूर्ख सभामें पाण्डवोंको बैल कहकर नाचता था, अब वही बैल मरा पडा है। अब हमभी इस बैलको मारकर बैल बैल कहकर नाचते हैं। (४० ४४)

उन मूर्खोंने मुझे प्रमाणकोटिमें सुलाकर कालकूट विष खिलाया था और कृष्णसर्पोंसे कटवाया था तथा हमें लाखके घरमें जलाना चाहता था, जुआ खेलकर कपटसे हमारा राज्य छीना और तेरह वर्षके लिये वनको भेजा था॥ इसी दुष्टने द्रौपदीके बाल पकडकर खींचे थे, इसीसे युद्धमें और घरमें हमें शस्त्रोंसे मारना चाहता था, उन्हीं दुष्टोंने शकुनि और राधापुत्रकी सम्मतिसे हम पाचोंको विराट नगरमें रखकर अलग अलग दुःख दिये थे, हमें यह निश्चय है, कि जितने दुःख पडे हैं इन सबका मूल यही दुष्ट था। (४४—४८)

हमने पुत्रों सहित धृतराष्ट्रके राज्यमें सदा दुःखही पाया सुख कभी नहीं। ऐसा कहकर और विजय पाकर भीमसेन कृष्ण और अर्जुनसे बोले, हे वीर! मैं

तस्मिन्क्षणे पाण्डवस्य बाह्वोर्बलमहृयत ।
यत्सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि ॥ २० ॥
ततस्त्वङ्गेण महता बलेन भरतर्षभ ।
दृष्ट्वा परिवृतं राजन्भीमसेनः किरीटिनम् ॥ २१ ॥
हतावशेषानुत्सृज्य त्वदीयान्कतिचिद्रथान् ।
जवेनाभ्यद्रवद्राजन्धनञ्जयरथं प्रति ॥ २२ ॥
ततस्तत्प्राद्रवत्सैन्यं हतभूयिष्ठमातुरम् ।
दृष्ट्वार्जुनं तदा भीमो जगाम भ्रातरं प्रति ॥ २३ ॥
हतावशिष्टांस्तुरगानर्जुनेन महाबलान् ।
भीमो व्यधमदभ्रान्तो गदापाणिर्महाहवे ॥ २४ ॥
कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम् ।
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् ॥ २५ ॥
ततो गदां नृनागाश्वेष्वाशु भीमो व्यवासृजत् ।
सा जघान बहूनश्वानश्वारोहांश्च मारिष ॥ २६ ॥
कार्ष्णायसतनुत्राणान्नरानश्वांश्च पाण्डवः ।
पोथयामास गदया सशब्दं तेऽपतन्हताः ॥ २७ ॥
दन्तैर्दशन्तो वसुधां शेरते क्षतजोक्षिताः ।

होकर अनेक घुडचढे इधर उधर घूमने लगे ॥ उस समय अर्जुनने ऐसा पराक्रम किया कि हाथी, घोडे और रथो पर चढे सब वीरोंको जीत लिया ॥ (१९–२०)

तब महाबाहु भीमसेन अर्जुनको तीन प्रकारकी महासेनासे घिरा हुआ देख तुम्हारी बची हुई सेनाको छोड अर्जुनके रथकी ओर वेगसे चले। भीमसेनको अर्जुनकी ओर जाते देख वह बची हुई सब सेना इधर उधरको भागने लगी। अर्जुनसे जो सेना बची थी उस सबको बलवान भीमसेनने गदासे मार डाला। (२१–२४)

तब भीमसेन कालरात्रिके समान भयानक मनुष्य, हाथी और घोडोंकी खानेवाली, छारदीवाली, (पुरकोट) कटारी और नगरके द्वारोंको तोडनेवाली महाभयङ्कर गदा, घोडे, हाथी और मनुष्योंपर चलाने लगे ॥ उससे तुम्हारी सेनाका नाश होने लगा। भीमसेनने लोहेके कवच पहने अनेक हाथी और मनुष्योंको अपनी गदासे मारकर पृथ्वीमें गिरा दिया, अनेक वीर हाथ, पैर और

रुक्माङ्गदान्रुक्मपुङ्खैः पार्थो निन्ये यमक्षयम् ।
हतेषु तेषु वीरेषु प्रदुद्राव बलं तव ॥ ६ ॥
पश्यतः सूतपुत्रस्य पाण्डवस्य भयार्दितम् ।
ततः कर्णो महाराज प्रविवेश महद्भयम् ॥ ७ ॥
दृष्ट्वा भीमस्य विक्रान्तमन्तकस्य प्रजास्विव ।
तस्य त्वाकारभावज्ञः शल्यः समितिशोभनः ॥ ८ ॥
उवाच वचनं कर्णं प्राप्तकालमरिन्दमम् ।
मा व्यथां कुरु राधेय नैव त्वय्युपपद्यते ॥ ९ ॥
एते द्रवन्ति राजानो भीमसेनभयार्दिताः ।
दुर्योधनश्च संमूढो भ्रातृव्यसनकर्शितः ॥ १० ॥
दुःशासनस्य रुधिरे पीयमाने महात्मना ।
व्यापन्नचेतसश्चैव शोकोपहतचेतसः ॥ ११ ॥
दुर्योधनमुपासन्ते परिवार्य समन्ततः ।
कृपप्रभृतयश्चैते हतशेषाः सहोदराः ॥ १२ ॥
पाण्डवा लब्धलक्षाश्च धनञ्जयपुरोगमाः ।
त्वामेवाभिमुखाः शूरा युद्धाय समुपस्थिताः ॥ १३ ॥
स त्वं पुरुषशार्दूल पौरुषेण समास्थितः ।
क्षत्रधर्मं पुरस्कृत्य प्रत्युद्याहि धनञ्जयम् ॥ १४ ॥

शिर सुवर्ण कवच सहित काट डाला। उन दशोंके मरनेसे तुम्हारी सेना इधर उधरको भागने लगी। उस समय कर्ण भी देख रहे थे, और तुम्हारी सेना भाग चली। (३—७)

तब कर्ण भी भयसे कांपने लगे, यमराज के समान भीमसेन का पराक्रम देख कर्ण बहुत डर गया, उनकी चेष्टा देख पराक्रमी शल्य ममयानुसार यों बोले, हे राधापुत्र! तुम डरो मत, डरना तुमको अनुचित है, ये देखो तुम्हारी और के सब राजा भीमसेनके डरसे भागे जाते हैं। राजा दुःशासनके शोकसे मूर्खसे होगये हैं। इस समय धृतराष्ट्रके पुत्र दुर्योधन दुःशासनका रुधिर पिया जाने से मूर्खके समान खडा है। और कुछ नहीं कर सक्ता, ये सब कृपाचार्य आदि वीर और बचे हुए भाई राजा दुर्योधन को समझा रहे हैं॥ (७-१२)

ये सब अर्जुन आदि पाण्डव वीर विजय पाकर केवल तुम्हारी सेना ही से लडनेके लिये चले आते हैं॥ हे पुरुष

व्यालम्बत महाराज प्रायशः शस्त्रवेष्टितम् ॥ ३६ ॥
विलम्बमानं तत्सैन्यमप्रगल्भमवस्थितम् ।
दृष्ट्वा प्राच्छादयद्बाणैरर्जुनः प्राणतापनैः ॥ ३७ ॥
नराश्वरथमातङ्गा युधि गाण्डीवधन्वना ।
शरव्रातैश्चिता रेजुः कदम्बा इव केसरैः ॥ ३८ ॥
ततः कुरूणामभवदार्तनादो महान्नृप ।
नराश्वनागासुहरैर्वध्यतामर्जुनेषुभिः ॥ ३९ ॥
हाहाकृतं भृशं त्रस्तं लीयमानं पररपरम् ।
अलातचक्रवत्सैन्यं तदाभ्रमत तावकम् ॥ ४० ॥
ततस्तद्युद्धमभवत्कुरूणां सुमहद्भुवि ।
न ह्यत्रासीदनिर्भिन्नो रथः सादी हयो गजः ॥ ४१ ॥
आदीप्तमिव तत्सैन्यं शरैश्छिन्नतनुच्छदम् ।
आसीत्सुशोणितक्लिन्नं फुल्लाशोकवनं यथा ॥ ४२ ॥
तं दृष्ट्वा कुरवस्तत्र विक्रान्तं सव्यसाचिनम् ।
निराशाः समपद्यन्त सर्वे कर्णस्य जीविते ॥ ४३ ॥
अविषह्यं तु पार्थस्य शरसम्पातमाहवे ।

सेना मरनेसे बची सो उत्साह रहित और शस्त्रोंसे व्याकुल होकर इधर उधर भागने लगी ॥ उस सेनाकी ऐसी दशा देख अर्जुनने प्राण नाशक बाण चलाये॥ जैसे फूले हुए कदंब केसरोंसे शोभित होते हैं, ऐसेही अर्जुनके बाणोंसे विद्ध हुए मनुष्य, हाथी और घोडे दीखने लगे ॥ (३६-३८)

हे महाराज ! उस समय अर्जुनके बाणोंसे व्याकुल तुम्हारी सेनाके हाथी, घोडे और मनुष्योंका घोर शब्द होने लगा ॥ तुम्हारी सेनामें हाहाकार होने लगा, एक मनुष्य दूसरेकी आड लेनेकी इच्छा करने लगा ॥ थोडे समयमें वह सब सेना कुम्हारके चाकके समान घूमने लगी ॥ यह महाबलवान् पाण्डवोंके सङ्ग कौरवोंका घोर युद्ध हुआ, ऐसा हाथी या घोडा कोई न था, कि जिसके शरीर में शस्त्र न लगा हो ॥ (३९-४१)

जैसे फूले हुए अशोकोंका वन शोभित होता है, ऐसेही रुधिरमें भीगी, बाणोंसे व्याकुल, टूटे कवचवाली तुम्हारी सेना दीखने लगी ॥ सब कौरवोंने अर्जुनके इस पराक्रमको देखकर कर्णके जीनेकी आशा छोड दी ॥ अर्जुनके बाणोंको न सहकर और अर्जुनसे हारकर कौरवोंकी

जज्वाल कर्णस्य सुतोऽतिमात्रमिद्धो यथाज्याहुतिभिर्हुताशः॥ २२ ॥
कर्णस्य पुत्रो नकुलस्य राजन्सर्वानश्वानक्षिणोदुत्तमास्त्रैः ।
वनायुजान्वै नकुलस्य शुभ्रानुदग्रगान्हेमजालावनद्धान् ॥ २३ ॥
ततो हताश्वादवरुह्य यानादादाय चर्मामलरुक्मचन्द्रम् ।
आकाशसङ्काशमसिं प्रगृह्य दोधूयमानः खगवच्चचार ॥ २४ ॥
ततोऽन्तरिक्षे च रथाश्वनागं चिच्छेद तूर्णं नकुलश्चित्रयोधी ।
ते प्रापतन्नासिना गां विशस्ता यथाश्वमेधे पशवः शामित्रा ॥ २५ ॥
द्विसाहस्राः पातिता युद्धशौण्डा नानादेश्याः सुभृताः सत्यसन्धाः ।
एकेन सङ्ख्ये नकुलेन कृत्ता जयेप्सुनानुत्तमचन्दनाङ्गाः ॥ २६ ॥
तमापतन्तं नकुलं सोऽभिपत्य समन्ततः सायकैः प्रत्यविध्यत् ।
स तुद्यमानो नकुलः पृषत्कैर्विव्याध वीरं स चुकोप विद्धः ॥ २७ ॥
महाभये रक्ष्यमाणो महात्मा भ्रात्रा भीमेनाकरोत्तत्र भीमम् ।
तं कर्णपुत्रो व्यधमन्तमेकं नराश्वमातङ्गरथाननेकान् ॥ २८ ॥
क्रीडन्तमष्टादशभिः पृषत्कैर्विव्याध वीरं नकुलं सरोषः ।

अनेक दिव्य बाण चलाये ॥ जैसे आहुति देनेसे अग्नि बढती है ऐसे ही अपनी बुद्धि, बल और बाण लगने और क्रोधसे कर्णका पुत्र प्रकाशित होने लगा ॥ (२०-२२)

अनन्तर कर्णके पुत्रने सोनेके जालवाले शीघ्रगामी अति उत्तम बाणोंसे नकुलके सफेद घोडोंको मार डाला तब नकुल उस मरे हुए घोडोंवाले रथसे आकाशके समान निर्मल चन्द्रमाके समान चमकते हुए खड्ग और ढाल लेकर कूदे और खड्गको घुमाते हुए उस युद्धमें पक्षीके समान घूमने लगे, तब विचित्र योद्धा नकुलने कूद कूद कर अनेक हाथी, घोडे और मनुष्योंको मार डाला, वह सब इस प्रकार मर मरकर पृथ्वीमें गिरे, जैसे शमिताके हाथसे अश्वमेध यज्ञमें पशु ॥ (२३-२५)

एकले नकुलने अपनी विजयके लिये अनेक देशोंके उत्पन्न हुए महा योद्धा, सत्यवादी चन्दन आदिसे विभूषित दो सहस्र क्षत्रियोंको मारा ॥ इस प्रकार युद्ध करते नकुलके शरीरमें कर्णके पुत्रने अनेक बाण मारे, उन बाणोंके लगनेसे वीर नकुलको और भी क्रोध बढा। तब भीमसेनसे रक्षित नकुलने भयानक कर्म किया । लीलासे अनेक मनुष्य, घोडे, हाथी और रथोंको विद्ध करतेहुए एकले नकुलको देख कर्ण पुत्रने क्रोधसे नकुलके शरीरमें अठारह तेजबाण मारे। २६-२८

तान्प्रद्रुतान्कुरून्दृष्ट्वा कर्णः शस्त्रभृतां वरः ।
सञ्चिन्तयित्वा पार्थस्य वधे दध्रे मनः श्वसन् ॥ ५३ ॥
विस्फार्य सुमहच्चापं ततश्चाधिरथिर्वृषः ।
पञ्चालान्पुनराधावत्पश्यतः सव्यसाचिनः ॥ ५४ ॥
ततः क्षणेन क्षितिपाः क्षतजप्रतिसेक्षणाः ।
कर्ण ववर्षुर्बाणौघैर्यथा मेघा महीधरम् ॥ ५५ ॥
ततः शरसहस्राणि कर्णमुक्तानि सारिष ।
व्ययोजयन्त पञ्चालान्प्राणैः प्राणभृतां वर ॥ ५६ ॥
तत्र शब्दो महानासीत्पञ्चालानां महामते ।
वध्यतां सूतपुत्रेण मित्रार्थे मित्रगृद्धिना ॥ ५७ ॥ [४१६५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि सकुरुयुद्धे एकाशीतितमोऽध्यायः ॥८१॥

सञ्जय उवाच— ततः कर्णः कुरुषु प्रद्रुतेषु वरूथिना श्वेतहयेन राजन् ।
पाञ्चालपुत्रान्व्यधमत्सूतपुत्रो महेषुभिर्वात इवाभ्रसङ्घान् ॥ १ ॥
सूतं रथादञ्जलिकैर्निपात्य जघान चाश्वाञ्जनमेजयस्य ।
शतानीकं सुतसोमं च भल्लैरवाकिरद्धनुषी चाप्यकृन्तत् ॥ २ ॥
धृष्टद्युम्नं निर्विभेदाथ षड्भिर्जघानाश्वांस्तरसा तस्य संख्ये ।

उन सब कौरवोंको भागते देख शस्त्र धारीयोंमें श्रेष्ठ कर्णने सांप लेकर अर्जुन के मारनेका विचार किया ॥ तब अधिरथपुत्र कर्ण अपने धनुप पर टङ्कार देकर अर्जुनके आगेसे पाञ्चाल सेनाकी ओर दौडे ॥ जैसे अनेक मेघ पर्वत पर जल वर्षाते है, ऐसे ही पाण्डवोंकी ओरके अनेक राजा क्रोधसे लाल नेत्र करके कर्णके ऊपर बाण वर्षाने लगे ॥(५३-५५)

हे मनुष्य श्रेष्ठ! तब कर्णने भी अपने बाणोंसे सहस्रों पांचालोंको मार डाला। हे बुद्धिमानोंमें श्रेष्ठ! उस समय मित्रके लिये युद्ध करते हुए कर्णके बाणोंसे व्याकुल पांचाल सेनाका घोर शब्द होने लगा ॥ (५६-५७) [४१६५]

कर्णपर्वमें एकासी अध्याय समाप्त ।

कर्णपर्वमें बियासी अध्याय ।

सञ्जय बोले, हे राजन्! जैसे वायु मेघोंको व्याकुल कर देता है, तैसे ही सूतपुत्र कर्णने अपने बाणोंसे पांचाल देशीय राजपुत्रोंको व्याकुल कर दिया। कर्णने अपने बाणोंसे राजपुत्र शतानीक और सुतसोमके घोडे और सारथीको मारकर धनुप काट दिया, फिर उनके शरीरमें अनेक बाण मारे, तब धृष्टद्युम्नके शरीरमें छः बाण मार कर उनके घोडे

महारथावेकरथे समेतौ शरैः प्रभिन्दन्निव पाण्डवेयौ ॥ ३७ ॥
तस्मिन्रथे निहते पाण्डवस्य क्षिप्रं च खड्गे विशिखैर्निकृत्ते ।
अन्ये च संहत्य कुरुप्रवीरास्ततो न्यघ्नञ्शरवर्षैरुपेत्य ॥ ३८ ॥
तौ पाण्डवेयौ परितः समेतान्संहूयमानाविव हव्यवाहौ ।
भीमार्जुनौ वृषसेनाय क्रुद्धौ ववर्षतुः शरवर्षं सुघोरम् ॥ ३९ ॥
अथाब्रवीन्मारुतिः फाल्गुनं च पश्यस्वैनं नकुलं पीड्यमानम् ।
अयं च नो बाधते कर्णपुत्रस्तस्माद्भवान्प्रत्युपयातु कार्णिम् ॥ ४० ॥
स तन्निशम्यैव वचः किरीटी रथं समासाद्य वृकोदरस्य ।
अथाब्रवीन्नकुलो वीक्ष्य वीरमुपागतं शातय शीघ्रमेनम् ॥ ४१ ॥
इत्येवमुक्तः सहसा किरीटी भ्रात्रा समक्षं नकुलेन संख्ये ।
कपिध्वजं केशवसंगृहीतं प्रैषीदुदग्रो वृषसेनाय वाहम् ॥ ४२ ॥[४२९५]

इति श्रीमहाभारते० कर्णपर्वणि वृषसेनयुद्धे नकुलपराजये चतुरशीतितमोऽध्यायः ॥ ८४ ॥

सञ्जय उवाच- नकुलमथ विदित्वा छिन्नबाणासनासिं
विरथमरिशरार्तं कर्णपुत्रास्त्रभग्नम् ।
पवनधुतपताकाहादिनो वल्गिताश्वा वरपुरुषनियुक्तास्ते रथैः शीघ्रमीयुः १॥

कर चढे, जैसे सिंह पर्वतपर चढे ॥ तब वीर वृषसेनने महा क्रोध करके एक रथ पर बैठे दोनों महारथोंपर अनेक बाण वर्षाये ॥ (३५-३७)

जब वीर नकुलका खड्ग और रथ कट गया, तब अनेक कौरव इकट्ठे होकर बाण वर्षाते हुए उन पर दौडे ॥ तब भीमसेन और अर्जुन भी अग्निके समान क्रोधसे भरकर कौरवोंकी ओर अनेक बाण चलाने लगे ॥ तब भीमसेनने अर्जुनसे कहा, इस कर्णके पुत्रने हमारी सेना और नकुलको बहुत व्याकुल किया है, इस लिये आप इससे युद्ध करने को जाइये [illegible] कर अर्जुनने अपने रथको भीमसेनके रथके पास पहुंचा दिया, तब नकुलने अर्जुनसे कहा कि, इस वृषसेनको आप ही मारिये। भीमसेनके आगे नकुलके ऐसे वचन सुन अर्जुनने वानर ध्वजा और कृष्ण सारथी वाला रथ वृषसेनकी ओर शीघ्र चलाया ॥ (३८- ४२)[४२९५]

कर्णपर्वमें चौरासी अध्याय समाप्त ।

कर्णपर्वमें पचासी अध्याय ।

नकुलको खड्ग, धनुष और रथसे हीन सुनकर तथा वृषसेनके बाणोंसे व्याकुल जानकर द्रुपदके पांचों महारथ पुत्र, सात्यकी और द्रौपदीके पांचों पुत्र ध्वजा उडाते घोडोंको कुदाते रथोंपर

अपाञ्चाल्यं क्रियते याहि पार्थ कर्ण जहात्यब्रवीद्राजसिंह ॥ १० ॥
ततः प्रहस्याशु नरप्रवीरो रथं रथेनाधिरथेर्जगाम ।
भये तेषां त्राणमिच्छन्सुघाहुरभ्याहतानां रथयूथपेन ॥ ११ ॥
विस्फार्य गाण्डीवमथोग्रघोषं ज्यया समाहत्य तले भृशं च ।
घाणान्धकारं सहसैव कृत्वा जघान नागाश्वरथध्वजांश्च ॥ १२ ॥
प्रतिश्रुतः प्राहरदन्तरिक्षं गुहा गिरीणामपतन्वयांसि ।
यन्मण्डलज्येन विजृम्भमाणो रौद्रे मुहूर्तेऽभ्यपतात्किरीटी ॥१३॥
तं भीमसेनोऽनुययौ रथेन पृष्ठे रक्षन्पाण्डवमेकवीरः ।
तौ राजपुत्रौ त्वरितौ रथाभ्यां कर्णाय यातावरिभिर्विषक्तौ ॥१४॥
तत्रान्तरे सुमहान्सूतपुत्रश्चक्रे युद्धं सोमकान्सम्प्रगृह्य ।
रथाश्वमातङ्गगणाञ्जघान प्रच्छादयामास शरैर्दिशश्च ॥ १५ ॥
तमुत्तमौजा जनमेजयश्च क्रुद्धौ युधामन्युशिखण्डिनौ च ।
कर्णं विभेदुः सहिताः पृषत्कैः सन्नर्दमानाः सह पार्षतेन ॥ १६ ॥
ते पञ्च पञ्चालरथप्रवीरा वैकर्तनं कर्णमाभिद्रवन्तः ।
तस्माद्रधाच्च्यावयितुं न शेकुर्धैर्यात्कृतात्मानमिवेन्द्रियार्थाः॥ १७ ॥
तेषां धनूंषि ध्वजवाजिसूतांस्तूर्णं पताकाश्च निकृत्य बाणैः ।

पुत्र ! कर्ण पाञ्चालोंका नाश किये देता है, इसलिये तुम चल कर उसे जीतो । तब पुरुषसिंह अर्जुनने हंसकर अपनी सेनाकी रक्षाके लिये और कर्णको मारनेके लिये चले और गाण्डीव धनुषके रोदपर घोर टंकार देकर हाथी, घोडे, और मनुष्योंको मारकर बाणोंका अन्धकार कर दिया । जिस समय अर्जुन कर्णसे युद्ध करनेको चले उस समय रौद्रमुहूर्त था, उस धनुषके शब्दसे ऐसी प्रतिध्वनि हुई मानो पर्वतोंकी गुफा फटने लगी । इनके पीछे रक्षा करते हुए महावीर भीमसेन चले, ये दोनों शत्रुनाशन राजपुत्र कर्णको मारने चले ॥ (१०-१४)

इसी बीचमें महारथ सूतपुत्रने सोमक और पांचालोंसे घोर युद्ध किया। पाण्डवोंकी ओरसे भी क्रोध करके उत्तमौजा, जनमेजय युधामन्यु, शिखण्डी और धृष्टद्युम्न युद्ध करने लगे ॥ जैसे महात्मा आत्मज्ञानी मनुष्यको इन्द्रियोंके विषय नहीं जीत सक्ते, ऐसे ही पाञ्चाल देशी पांच वीर महारथ कर्णके धैर्य और रथको न तोड सके ।१५-१७

इन सबके घोडे, सारथी और ध्वजाओंको अपने तेज बाणोंसे काट कर कर्ण

अथाभवद्युद्धमतीव दारुणं पुनः कुरूणां सह पाण्डुसृञ्जयैः ।
शरासिशक्त्यृष्टिगदापरश्वधैर्नराश्वनागासुहरं भृशाकुलम् ॥ ९ ॥
रथाश्वमातङ्गपदातिभिस्ततः परस्परं विप्रहताः पतन्क्षितौ ।
यथा सविद्युत्स्तनिता बलाहकाः समाहता दिग्भ्य इवोग्रमारुतैः॥ १० ॥
ततः शतानीकमतान्महागजांस्तथा रथान्पत्तिगणांश्च तान्बहून् ।
जघान भोजस्तु हयानथापतन्क्षणाद्विशस्ताः कृतवर्मणः शरैः ॥ ११ ॥
अथापरे द्रौणिहता महाद्विपास्त्रयः ससर्वायुधयोधकेतनाः ।
निपेतुरुर्व्यां व्यसवो निपातितास्तथा यथा वज्रहता महाचलाः ॥ १२ ॥
कुलिन्दराजावरजादनन्तरः स्तनान्तरे पत्रिवरैरताडयत् ।
तवात्मजं तस्य नवात्मजः शरैः शितैः शरीरं व्यहनद् द्विपं च तम्॥१३॥
स नागराजः सह राजसूनुना पपात रक्तं बहु सर्वतः क्षरन् ।
महेन्द्रवज्रप्रहतोऽम्बुदागमे यथा जलं गैरिकपर्वतस्तथा ॥ १४ ॥
कुलिन्दपुत्रप्रहितोऽपरो द्विपः क्राथं ससूताश्वरथं व्यपोथयत् ।
ततोऽपतत्क्राथशराभिघातितः सहेश्वरो वज्रहतो यथा गिरिः ॥ १५ ॥

सेना बहुत प्रसन्न हुई, सब योद्धा शंख बजाने लगे । फिर बाण वर्षाते हुए कुलिन्द देशकी सेनापर दौडे ॥ तब पाञ्चाल, सृञ्जय और कौरवोंका घोर युद्ध होने लगा। अनेक शक्ति, खड्ग, गदा और बाण चलने लगे। तथा हाथी, घोडे, और मनुष्य मरने लगे ॥ जैसे बडी आंधी चलनेसे बिजलीके सहित मेघ सब दिशाओंमें गिरने लगते है, ऐसे ही शस्त्रधारी हाथी, घोडे, और रथों पर चढे तथा पैदल योद्धा मर मर कर गिरने लगे ॥ (८–१०)

तब शतानीककी सेनाके मतवाले हाथियोंको और रथी तथा अनेक पदातियोंको कृतवर्माने मारकर पृथ्वीमें गिरा दिया, तब अश्वत्थामाने भी वीर और महावतोंके सहित तीन मतवाले हाथियोंको मारकर इस प्रकार पृथ्वीमें गिरा दिया, जैसे इन्द्र अपने वज्रसे काटकर पर्वतोंको गिराते है ॥ कुलिन्द राजके तीसरे भाईने तुम्हारे पुत्रके शरीरमें अनेक बाण मारे, उन्होंने भी अपने तेज बाणोंसे उसे हाथीके समेत मारकर गिरा दिया ॥ दुर्योधनके बाण लगनेसे वह हाथी राजपुत्रके सहित भूमिपर गिरपडा और उस हाथी के शरीरसे इस प्रकार रुधिर बहने लगा, जैसे वर्षाकाल में गेरु के पर्वत से जल बहता है ॥ (११–१४)

तीसरे कुलिन्द राजपुत्रके हाथीने

स तैश्चतुर्भिर्युयुधे यदूत्तमो दिगीश्वरैर्दैत्यपतिर्यथा तथा ॥ २५ ॥
समाततेनेषुबलेन कूजता भृशायतेनासितबाणवर्षिणा ।
बभूव दुर्धर्षतरः स सात्यकिः शरन्नभोमध्यगतो यथा रविः ॥ २६ ॥
पुनः समास्थाय रथान्सुदंशितः शिनिप्रवीरं जुगुपुः परन्तपाः ।
समेत्य पञ्चालमहारथा रणे मरुद्गणाः शक्रमिवारिनिग्रहे ॥ २७ ॥
ततोऽभवद्युद्धमतीव दारुणं तवाहितानां तव सैनिकैः सह ।
रथाश्वमातङ्गविनाशनं तथा यथा पुराणामसुरैः पुराभवत ॥ २८ ॥
रथा द्विपा वाजिपदातयस्तथा भवन्ति नानाविधशस्त्रवेष्टिताः ।
परस्परेणाभिहताश्च चस्खलुर्विनेदुरार्ता व्यसवोऽपतंस्तथा ॥ २९ ॥
तथागतं भीमसभीस्तवात्मजः ससार राजावरजः किरञ्शरैः ।
तमभ्यधावत्त्वरितो वृकोदरो महारुरुं सिंह इवाभिपेदिवान् ॥ ३० ॥
ततस्तयोर्युद्धमतीव दारुणं प्रदीव्यतोः प्राणदुरोदरं द्वयोः ।
परस्परेणाभिनिविष्टरोषयोरुदग्रयोः शम्बरशक्रयोर्यथा ॥ ३१ ॥
शरैः शरीरार्तिकरैः सुतेजनैर्निजघ्नतुस्तावितरेतरं भृशम् ।

अकेले सात्यकि भी इन चारो वीरों-से इस प्रकार लडे, जैसे चार लोकपालोंसे दैत्यराज लडे, जैसे आकाशमें सूर्य शीघ्र चलते है, ऐसे ही उस समय घोर धनुषधारी सात्यकि धनुष टङ्कारते हुए उस युद्धभूमिमे घूमने लगे ॥ उस समय बाण वर्षाते हुए सात्यकिकी ओर कोई नहीं देख सक्ता था। जैसे दैत्योंसे लडते हुए इन्द्रकी रक्षा करनेको मरुत नामक देवता दौडते है, ऐसे ही उत्तम रथोंपर चढ कर महारथ पाञ्चाल देशी अनेक योद्धा सात्यकिकी रक्षा करनेको इकट्ठे होकर आये ॥ जैसे पहले समयमें देवता और राक्षसोंका घोर युद्ध हुआ था, वैसाही यह युद्ध भी हुवा ॥ २५-२८

उस समय रथ, घोडे हाथी और मनुष्य दुःखसे पीडित होकर घोर शब्द करने लगे, और मर मर कर पृथ्वीमें गिरने लगे ॥ उसी समय दुर्योधनके छोटे भाई तुम्हारे पुत्र दुःशासन बेडर होकर बाण वर्षाते हुए भीमसेनकी ओर दौडे । भीमसेन भी दुःशासनकी ओर इस प्रकार चले, जैसे महासिंह छोटे हरिण पर दौडे ॥ (२९-३०)

तब ये दोनों क्रोधमें भरकर प्राणोंकी आशा छोड कर महाघोर बाणोंसे इस प्रकार युद्ध करने लगे, जैसे पहले समयमें वीर शंबर और इन्द्र लडे थे ॥ जैसे एक हथिनीके लिये दो काममोहित हाथी युद्ध करते हैं, ऐसे ही ये

त्रिभिश्च भीमं नकुलं च सप्तभिर्जनार्दनं द्वादशभिश्च सायकैः ॥ २२ ॥
तदस्य कर्मातिमनुष्यकर्मणः समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन्।
पराक्रमज्ञास्तु धनञ्जयस्य ये हुतोऽयमग्नाविति ते तु मेनिरे ॥ २३ ॥
ततः किरीटी परवीरघाती हताश्वमालोक्य नरप्रवीरः।
माद्रीसुतं नकुलं लोकमध्ये समीक्ष्य कृष्णं भृशविक्षतं च॥ २४ ॥
समभ्यधावद्वृषसेनमाहवे स सूतजस्य प्रमुखे स्थितस्तदा।
तमापतन्तं नरवीरमुग्रं महाहवे बाणसहस्रधारिणम् ॥ २५ ॥
अभ्यापतत्कर्णसुतो महारथं यथा महेन्द्रं नमुचिः पुरा तथा।
ततो द्रुतं चैकशरेण पार्थं शितेन विध्वा युधि कर्णपुत्रः ॥ २६ ॥
ननाद नादं सुमहानुभावो विध्वेव शक्रं नमुचिः स वीरः।
पुनः स पार्थं वृषसेन उग्रैर्बाणैरविद्ध्यद्भुजमूले तु सव्ये ॥ २७ ॥
तथैव कृष्णं नवभिः समार्दयत्पुनश्च पार्थं दशभिर्जघान।
पूर्वं यथा वृषसेनप्रयुक्तैरभ्याहतः श्वेतहयः शरैस्तैः ॥ २८ ॥
संरम्भमीषद्गमितो वधाय कर्णात्मजस्याथ मनः प्रदध्रे।
ततः किरीटी रणमूर्ध्नि कोपात्कृत्वा त्रिशाखां भ्रुकुटिं ललाटे ॥ २९ ॥
मुमोच तूर्णं विशिखान्महात्मा वधे धृतः कर्णसुतस्य सङ्ख्ये।

शतानीक के शरीर में तीन, अर्जुनके तीन, कृष्णके बारह, भीमसेनके तीन और नकुलके सात बाण मारे ॥ (२०–२२)

वृषसेनका यह अमानुष कर्म देख सब कौरव बडे प्रसन्न हुए परन्तु अर्जुनके पराक्रम जाननेवाले वीरोंने जाना कि यह आगमें घी पड रहा है ॥ तब शत्रुनाशन अर्जुन अपने भाई नकुलको सब सेनाके बीचमें रथहीन और कृष्णको घावोंसे व्याकुल देख कर्णके आगे वृषसेनकी ओर दौडे। सहस्रों बाणधारी महापराक्रमी वीर अर्जुनको अपनी ओर आते देख वीर वृषसेन इस प्रकार दौडे जैसे पहले समयमें नमुची इन्द्रकी ओर दौडा था। (२३–२६)

तब वीर कर्णपुत्रने एक तेज बाण अर्जुनके हृदयमें मारा, फिर वेगसे इस प्रकार गर्जे जैसे इन्द्रके शरीरमें बाण मारकर नमुची गर्जे थे, फिर अर्जुनके शरीरमें अनेक तेज बाण मारे, फिर कृष्णके शरीरमें नौ बाण मारकर अर्जुनके शरीरमें पहलेके समान दस बाण मारे ॥ (२६—२८)

तब अर्जुनने कर्णपुत्रको मारनेके लिये युद्धमें क्रोधसे भौंह टेढी की, फिर शस्त्र छोडकर और यमराजके समान

ततः क्रुद्धो भीमसेनस्तरस्वी शक्तिं चोग्रां प्राहिणोत्ते सुताय ।
तामापतन्तीं सहसातिघोरां दृष्ट्वा सुतस्ते ज्वलितास्यवोल्काम् ॥ ३ ॥
आकर्णपूर्णैरिषुभिर्महात्मा चिच्छेद पुत्रो दशभिः पृषत्कैः ।
दृष्ट्वा तु तत्कर्म कृतं सुदुष्करं प्रापूजयन्सर्वयोधाः प्रहृष्टाः ॥ ४ ॥
अथाशु भीमं च शरेण भूयो गाढं स विव्याध सुतस्त्वदीयः ।
चुक्रोध भीमः पुनराशु तस्मै भृशं प्रजज्वाल रुषाभिवीक्ष्य ॥ ५ ॥
विद्धोऽसि वीराशु भृशं त्वयाद्य सहस्व भूयोऽपि गदाप्रहारम् ।
उक्त्वैवमुच्चैः कुपितोऽथ भीमो जग्राह तां भीमगदां वधाय ॥ ६ ॥
उवाच चाद्याहमहं दुरात्मन्पास्यामि ते शोणितमाजिमध्ये ।
अथैवमुक्तस्तनयस्तवोग्रां शक्तिं वेगात्प्राहिणोन्मृत्युरूपाम् ॥ ७ ॥
आविध्य भीमोऽपि गदां सुघोरां विचिक्षिपे रोषपरीतमूर्तिः ।
सा तस्य शक्तिं सहसा विरुज्य पुत्रं तवाजौ ताडयामास मूर्ध्नि॥ ८ ॥
स विक्षरन्नाग इव प्रभिन्नो गदामस्मै तुमुले प्राहिणोद्वै ।
तयाहरद्दश धन्वन्तराणि दुःशासनं भीमसेनः प्रसह्य ॥ ९ ॥
तया हतः पतितो वेपमानो दुःशासनो गदया वेगवत्या ।
विध्वस्तवर्माभरणास्त्वरस्रक् विचेष्टमानो भृशवेदनातुरः ॥ १० ॥

तब तेजस्वी भीमसेनने क्रोध करके एक जलती हुई बिजलीके समान शक्ति दुःशासनकी ओर चलाई। उसे आते देख तुम्हारे पुत्रने कानतक खींच कर दश बाण मारे और उनसे वह शक्ति कटकर पृथ्वीमें गिर गई ॥ (३-४)

दुःशासनका यह कर्म देखकर सब योद्धा प्रसन्न होकर दुःशासनकी प्रशंसा करने लगे तब फिर एक तेज बाण उन्होंने भीमसेनके हृदयमें मारा। उसके लगनेसे भीमसेन क्रोध करके बोले, हे वीर ! हम तुम्हारे बाणोंसे अत्यन्त व्याकुल होगये अब तुम भी हमारी गदाका एक प्रहार सहो, ऐसा कह भीमसेनने दुःशासनके मारनेको गदा उठाई और बोले कि, हे दुरात्मा ! अब हम तेरा इन सब वीरोंके देखते ही रुधिर पीयेंगे।(४-७)

भीमसेनके ऐसे वचन सुन दुःशासनने एक मृत्युके समान घोररूपी शक्ति चलाई तब भीमसेनने क्रोध करके गदाको घुमाया उससे दुःशासकी शक्ति टूट गई और गदा उनके शिरमें लगी उसके लगनेसे दुःशासनके शिरसे रुधिर बहने लगा और दश धनुष पीछे जाकर गिरा। उस वेगवती गदाके लगनेसे कांपते हुए दुःशासन कवच, माला

सम्प्रेक्ष्य बाणाभिहतं पतन्तं रथात्सुतं सूतजः क्षिप्रकारी॥ ३८ ॥
रथं रथेनाशु जगाम रोषात्किरीटिनः पुत्रवधाभितप्तः।
ततः समक्षं स्वसुतं विलोक्य कर्णो हतं श्वेतहयेन सङ्ख्ये।
संरम्भमागम्य परं महात्मा कृष्णार्जुनौ सहसैवाभ्यधावत्॥३९॥ ४३३४

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि वृषसेनवधे पञ्चाशीतितमोऽध्यायः ॥८५॥

सञ्जय उवाच— तमायान्तमभिप्रेक्ष्य वेलोद्वृत्तमिवार्णवम्।
गर्जन्तं सुमहाकायं दुर्निवारं सुरैरपि ॥ १ ॥
अर्जुनं प्राह दाशार्हः प्रहस्य पुरुषर्षभः।
अयं स रथ आयाति श्वेताश्वः शल्यसारथिः ॥ २ ॥
येन ते सह योद्धव्यं स्थिरो भव धनञ्जय।
पश्य चैनं समायुक्तं रथं कर्णस्य पाण्डव ॥ ३ ॥
श्वेतवाजिसमायुक्तं युक्तं राधासुतेन च।
नानापताकाकलिलं किङ्किणीजालमालिनम् ॥ ४ ॥
उह्यमानमिवाकाशे विमानं पाण्डुरैर्हयैः।
ध्वजं च पश्य कर्णस्य नागकक्षं महात्मनः ॥ ५ ॥
आखण्डलधनुःप्रख्यमुल्लिखन्तमिवाम्बरम्।
पश्य कर्णं समायान्तं धार्तराष्ट्रप्रियैषिणम् ॥ ६ ॥

ऐसेही अर्जुनका बाण लगनेसे कर्णका पुत्र पृथ्वीमें गिरा। उसको रथसे गिरता देख बलवान् कर्ण शोक और क्रोधमें भर कर अर्जुनको मारने दौडे। महात्मा कर्ण क्रोधमें भरकर कृष्ण और अर्जुनको मारने चले॥ (३५–३९) [४३३४]

कर्णपर्वमें पचासी अध्याय समाप्त।

कर्णपर्वमें छियासी अध्याय।

सञ्जय बोले, हे राजन्! उस समुद्रके समान बडे शरीरवाले सूतपुत्रको अपनी ओर आते देख और देवतोंसे भी न हारने योग्य जानकर श्रीकृष्णने अर्जुनसे कहा, यह सफेद घोडे और शल्य सारथीवाला कर्णका रथ चला आता है। हे पाण्डव अर्जुन! अब तुम सावधान हो। आज इसीसे तुम्हें युद्ध करना होगा। यह सफेद घोडेवाला राधापुत्र कर्ण अनेक पताका और अनेक घोडोंवाला रथ, तुम्हारे पास ही आगया, ये देखो यह कर्णका सफेद घोडोंवाला रथ आकाशमें उडते विमानके समान चला, आता है। (१–५)

ये सांप युक्त कर्णकी ध्वजा फहरा रही है। इस समय इस अत्यन्त ऊंची

ई.राजेंद्र नगर

(मा. मा. कार्यालय क्र. ८३) (मा. मु. अधि.)



तस्य पार्थ प्रसादेन देवदेवस्य शूलिनः ॥ १५ ॥
जहि कर्णं महाबाहो नमुचिं वृत्रहा यथा।
श्रेयस्तेऽस्तु सदा पार्थ युद्धे जयमवाप्नुहि ॥ १६ ॥
अर्जुन उवाच— ध्रुव एव जयः कृष्ण मम नास्त्यत्र संशयः।
सर्वलोकगुरुर्यस्त्वं तुष्टोऽसि मधुसूदन ॥ १७ ॥
चोदयाश्वान्हृषीकेश रथं मम महारथ।
नाहत्वा समरे कर्णं निवर्तिष्यति फाल्गुनः ॥ १८ ॥
अद्य कर्ण हतं पश्य मच्छरैः शकलीकृतम्।
मां वा द्रक्ष्यसि गोविन्द कर्णेन निहतं शरैः ॥ १९ ॥
उपस्थितमिदं घोरं युद्धं त्रैलोक्यमोहनम्।
यज्ञनाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति ॥ २० ॥
एवं ब्रुवंस्तदा पार्थः कृष्णमक्लिष्टकारिणम्।
प्रत्युद्ययौ रथेनाशु गजं प्रति गजो यथा ॥ २१ ॥
पुनरप्याह तेजस्वी पार्थः कृष्णमरिन्दम।
चोदयाश्वान्हृषीकेश कालोऽयमतिवर्तते।
एवमुक्तस्तदा तेन पाण्डवेन महात्मना ॥ २२ ॥

है। और सब देवताओंसे वरदान पाये हैं, तुम देवदेव महादेव की कृपासे कर्णको इस प्रकार जीतो जैसे इन्द्रने नमुचीको जीता था। हे अर्जुन! हे महाबाहो! तुम्हारी सदा कल्याण हो अब युद्धमें विजय करो॥ (१३-१६)

अर्जुन बोले, हे मधुनामक दानवके मारनेवाले कृष्ण! जब तीनलोकके कर्त्ता आप मुझपर प्रसन्न हुए तो युद्धमें निश्चय ही मेरी जीत होगी। मैं कदापि नहीं हारूंगा॥ हे महारथ कृष्ण! आप यह निश्चय जान लीजिये कि कर्णके मारे विना आज अर्जुन नहीं लौटेंगे, अब आप हमारे घोडोंको प्रेरित कीजिये॥ हे गोविन्द! अब आप हमारे बाणोंसे कर्णको अथवा कर्णके बाणोंसे हमें मरा देखेंगे, आज यह ऐसा घोर युद्ध होगा कि जबतक पृथ्वी रहेगी तबतक इसका वर्णन भी रहेगा॥ (१७-२०)

महारथ कृष्णसे ऐसा कहकर अर्जुन कर्णकी ओर इस प्रकार चले, जैसे मतवाला हाथी मतवाले हाथीपर दौंडे॥ फिर अर्जुनने श्रीकृष्णसे कहा। हे कृष्ण! बहुत समय नष्ट हुआ जाता है घोडोंको शीघ्र हांको। महात्मा पाण्डवके ऐसे वचन सुनकर श्रीकृष्णने पाण्डवोंकी

निगृह्य दुःशासनमेकवीरः सुयोधनस्याधिरथेः समक्षम् ॥ १८ ॥
रथादवप्लुत्य गतः स भूमौ यत्नेन तस्मिन्प्रणिधाय चक्षुः।
असिं समुद्यम्य सितं सुधारं कण्ठे पदाक्रम्य च वेपमानम् ॥ १९ ॥
उवाच तद्वौरिति यद् ब्रुवाणो हृष्टो वदे. कर्णसुयोधनाभ्याम्।
ये राजसूयावभृथे पवित्रा जाताः कचा याज्ञसेन्या दुरात्मन् ॥ २० ॥
ते पाणिना कतरेणावकृष्टास्तद् ब्रुहि त्वां पृच्छति भीमसेनः।
श्रुत्वा तु तद्भीमवचः सुघोरं दुःशासनो भीमसेनं निरीक्ष्य ॥ २१ ॥
जज्वाल भीमं स तदा रमर्षेन संशृण्वतां कौरवसोमकानाम्।
उक्तस्तदाजौ स तथा सरोषं जगाद भीमं परिवर्तनेत्रः ॥ २२ ॥
अयं करिकराकारः पीनस्तनविमर्दनः।
गोसहस्रप्रदाता च क्षात्रियान्तकरः करः ॥ २३ ॥
अनेन याज्ञसेन्या मे भीम केशा विकर्षिताः।
पश्यतां कुरुमुख्यानां युष्माकं च सभासदाम् ॥ २४ ॥
एव त्वसौ राजसुतं निशम्य ब्रुवन्तमाजौ विनिपीड्य वक्षः।
भीमो बलात्तं प्रतिगृह्य दोर्भ्यामुच्चैर्ननादाथ समस्तयोधान् ॥ २५ ॥
उवाच यस्यास्ति बलं स रक्षत्वसौ भवेदद्य निरस्तबाहुः।

हाथी को पकड लेता है, ऐसे ही बलवान् भीमसेनने दौडकर दुर्योधन और कर्णके आगे दुःशासनको पकड लिया ॥ (१६—१८)

अनन्तर कांपते हुए दुःशासनके गलेपर पैर रखकर खड्ग खींचा और क्रोध करके उसकी ओर देखने लगे, और क्रोध करके बोले, हे दुरात्मन्! बोल तूही है जो राजसूय यज्ञमें द्रौपदीके केश पवित्र हुए थे उनको तैंने कर्ण और दुर्योधनके आगे अपने हाथसे पकडा था। अब भीमसेन पूछते हैं, कि तैंने कौनसे हाथमें द्रौपदी के केशोंको पकडा था ? (१९–२१)

भीमसेनके ऐसे वचन सुन और उनकी ओर देख क्रोधसे कौरव और सृञ्जयोंके बीचमें राजपुत्र दुःशासनने ऐसे घोर वचन कहे, हे भीम ! ये देखो हाथीकी सूंडके समान, पीनस्तन मर्दक, सहस्रों गौओंको देनेवाला और क्षत्रियोंका नाश करनेवाला यही मेरा हाथ है, जिसने प्रधान कौरव और तुम्हारे सबके देखते ही द्रौपदाके केश खींचे थे ॥ (२१-२४)

ऐसे कहते हुए, राजपुत्रकी छातीको भीमसेनने अपने हाथोंके बलसे दबाकर फिर पुकारकर सब योद्धाओंसे कहा,

तौ रथौ सम्प्रसक्तौ तु दृष्ट्वा भारत पार्थिवाः।
सिंहनादरवांश्चक्रुः साधुवादांश्च पुष्कलान् ॥ ८ ॥
दृष्ट्वा च द्वैरथं ताभ्यां तत्र योधाः सहस्रशः।
चक्रुर्बाहुस्वनांश्चैव तथा चैवावधूननम् ॥ ९ ॥
आजघ्नुः कुरवस्तत्र वादित्राणि समन्ततः।
कर्ण प्रहर्षयिष्यन्तः शङ्खान्दध्मुश्च सर्वशः ॥ १० ॥
तथैव पाण्डवाः सर्वे हर्षयन्तो धनञ्जयम्।
तूर्यशङ्खनिनादेन दिशः सर्वा व्यनादयन् ॥ ११ ॥
क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलं सर्वतोऽभवत्।
बाहुशब्दैश्च शूराणां कर्णार्जुनसमागमे ॥ १२ ॥
तौ दृष्ट्वा पुरुषव्याघ्रौ रथस्थौ रथिनां वरौ।
प्रगृहीतमहाचापौ शरशक्तिध्वजायुतौ ॥ १३ ॥
वर्मिणौ बद्धनिस्त्रिंशौ श्वेताश्वौ शङ्खशोभितौ।
तूणीरवरसम्पन्नौ द्वावप्येतौ सुदर्शनौ ॥ १४ ॥
रक्तचन्दनादिग्धाङ्गौ समदौ गोवृषाविव।
चापविद्युद्ध्वजोपेतौ शस्त्रसम्पत्तियोधिनौ ॥ १५ ॥
चामरव्यजनोपेतौ श्वेतच्छत्रोपशोभितौ।

हे भारत! उन दोनों रथोंको एक स्थान पर खडा देख दोनों ओरके वीर सिंहोंके समान गर्जकर साधु साधु कहने लगे॥ उन दोनोंको युद्धके लिये उपस्थित देख सब योद्धा लोग प्रसन्न होकर ताल ठोंकने लगे। कर्णके प्रसन्न करनेके लिये चारों ओरसे शङ्ख आदि बाजे बजाते हुए तुम्हारी ओरके अनेक योद्धा उनके पास गये॥ इसी प्रकार पाण्डवोंके योद्धा भी अर्जुनको प्रसन्न करनेके लिये चारों ओरसे शङ्ख आदि अनेक बाजे बजाने लगे॥ (८-११)

उस कर्ण और अर्जुनके समागममें वीरोंके ताल और गर्जनेके शब्दसे सब दिशा पूरित होगई॥ उन दोनों पुरुषसिंहको धनुष, बाण, ध्वजा युक्त कवच और हत्थी पहने उत्तम शङ्ख धारण किये सफेद घोडोंके रथोंपर बैठे देख उनके सुन्दर रूपमे सब प्रसन्न होगये॥ उत्तम लाल चंदन लगे, ध्वजा और पताकायुक्त रथोंपर बैठे, उत्तम बाणोंसे युद्ध करनेवाले, दोनों वीर ऐसे शोभित हुए जैसे दो सूर्य। ये दोनों महारथ सफेद छत्र, चमर, पङ्ख तथा कृष्ण और

भयाच्च संचुक्रुशुरस्वरैस्ते निमीलिताक्षा ददृशुः समन्ततः ॥ ३४ ॥
तं तत्र भीमं ददृशुः समन्ताद्दौःशासनं तद्रुधिरं पिबन्तम् ।
सर्वेऽपलायन्त भयाभिपन्ना न वै मनुष्योऽयमिति ब्रुवाणाः ॥ ३५ ॥
तस्मिन्कृते भीमसेनेन रूपे दृष्ट्वा जनाः शोणितं पीयमानम् ।
सम्प्राद्रवंश्चित्रसेनेन सार्धं भीमं रक्षो भाषमाणा भयार्ताः ॥ ३६ ॥
युधामन्युं प्रद्रुतं चित्रसेनं सहानीकस्त्वभ्यगाद्राजपुत्रः ।
विव्याध चैनं निशितैः पृषत्कैर्व्यपेतभीः सप्तभिराशुमुक्तैः ॥ ३७ ॥
संक्रान्तभोग इव लेलिहानो महोरगः क्रोधविष सिसृक्षुः ।।
निवृत्त्य पार्श्वालजमभ्यविध्यत्त्रिभिः शरैः सारथिमस्य षड्भिः ॥ ३८ ॥
ततः सुपुङ्खेन सुयन्त्रितेन सुसंशिताग्रेण शरेण शूरः ।
आकर्णमुक्तेन समाहितेन युधामन्युस्तस्य शिरो जहार ॥ ३९ ॥
तस्मिन्हते भ्रातरि चित्रसेने क्रुद्धः कर्णः पौरुषं दर्शयानः ।
व्यद्रावयत्पाण्डवानामनीकं प्रत्युद्यातो नकुलेनामितौजाः ॥ ४० ॥
भीमोऽपि हत्वा तत्रैव दुःशासनममर्षणम् ।
पूरयित्वाञ्जलिं भूयो रुधिरस्योग्रनिःस्वनः ॥ ४१ ॥
शृण्वतां लोकवीराणामिदं वचनमब्रवीत् ।

नहीं भगे उनके हाथसे शस्त्र गिर गये और अनेक क्षत्री आंख बन्द कर पृथ्वीमें बैठ गये, भीमसेनको दुःशासनका रुधिर पीते देख सब क्षत्री भयसे व्याकुल हो कर यह मनुष्य नहीं है; ऐसा कहते हुए भागने लगे। सब क्षत्री कहने लगे भीमसेन राक्षस है। तब राजा चित्रसेन भी युद्धको छोड भागे ॥ (३२–३५)

उनको भागते देख अनेक बाण छोडते हुए निडर युधामन्यु उनके पीछे दौडे और सात बाण उनके शरीरमें मारे। जैसे चोट लगनेसे भागता हुआ विषभरा सांप किसी पर काटनेको दौड ता है, ऐसे ही चित्रसेन उन बाणोंके लगनेसे लौटे और तीन बाण राजपुत्र युधामन्यु और छः बाण उनके सारथीके मारे, तब युधामन्युने क्रोध करके एक अत्यन्त वेगसे उत्तम पङ्खवाला घोर बाण कानतक खींचकर चित्रसेनपर चलाया उससे उनका शिर कटकर पृथ्वीमें गिर गया ॥ (३७–३९)

अपने भाईको मरा देख कर्णको महा क्रोध हुआ, तब वे अपने बाणोंसे पाण्डवोंकी सेनाको व्याकुल करते नकुलसे युद्ध करनेको गये. भीमसेनभी दुःशासनको मारकर एक अञ्जली रुधिर लेकर

उभौ वरायुधधरावुभौ रणकृतश्रमौ ।
उभौ च बाहुशब्देन नादयन्तौ नभस्तलम् ॥ २४ ॥
उभौ विश्रुतकर्माणौ पौरुषेण बलेन च ।
उभौ च सदृशौ युद्धे शम्बरामरराजयोः ॥ २५ ॥
कार्तवीर्यसमौ चोभौ तथा दाशरथेः समौ ।
विष्णुवीर्यसमौ चोभौ तथा भवसमौ युधि ॥ २६ ॥
उभौ श्वेतहयौ राजन्रथप्रवरवाहिनौ ।
सारथीप्रवरौ चैव तयोरास्तां महारणे ॥ २७ ॥
ततो दृष्ट्वा महाराज राजमानौ महारथौ ।
सिद्धचारणसङ्घानां विस्मयः समपद्यत ॥ २८ ॥
तव पुत्रास्ततः कर्णं सबला भरतर्षभ ।
परिवव्रुर्महात्मानं क्षिप्रमाहवशोभिनम् ॥ २९ ॥
तथैव पाण्डवा हृष्टा धृष्टद्युम्नपुरोगमाः ।
परिवव्रुर्महात्मानं पार्थमप्रतिमं युधि ॥ ३० ॥
तावकानां रणे कर्णो ग्लहो ह्यासीद्विशाम्पते ।
तथैव पाण्डवेयानां ग्लहः पार्थोऽभवत्तदा ॥ ३१ ॥
त एव सभ्यास्तत्रासन्प्रेक्षकाश्चाभवन्स्म ते ।
तत्रैषां ग्लहमानानां ध्रुवौ जयपराजयौ ॥ ३२ ॥

विजयमें सन्देह होगया, वे दोनों उत्तम शस्त्र धारण किये दोनों युद्धसे थके वीर अपने तालके शब्दसे आकाशको पूरित करने लगे ॥ ये दोनों समान बलवान् योद्धा समान पराक्रमी जगत् प्रसिद्ध बलमें इन्द्र और शम्बरके तुल्य थे ॥ (२३–२५)

दोनों ही कृतवीर्य पुत्र अर्जुन, दशरथ पुत्र राम, विष्णु और शिवके समान योद्धा थे ॥ वे दोनों युद्धमें सफेद घोडे उत्तम सारथी और उत्तम रथोंके सहित खडे हुए । हे महाराज ! उन दोनोंको युद्धमें खडे देख सब सिद्ध चारण आदिके संघ आश्चर्य करने लगे ॥ (२६—२८)

हे महाराज ! तब तुम्हारे सब पुत्र शीघ्रता सहित बहुत सेना सङ्गमें लेकर वीर कर्णकी रक्षा करने लगे ॥ इसी प्रकार धृष्टद्युम्न आदि अनेक योद्धा अद्वितीय वीर अर्जुनकी रक्षा करने लगे॥ हे पृथ्वीनाथ ! उस समय दोनों ओरसे कर्ण और अर्जुन जुवारियोंके दांवके समान होगये और सब वीर सभासदोंके

दुःशासने यद्रणे संश्रुतं मे तद्वै सत्यं कृतमद्येह वीरौ ॥ ५० ॥
अत्रैव दास्याम्यपरं द्वितीयं दुर्योधनं यज्ञपशुं विशस्य ।
शिरो मृदित्वा च पदा दुरात्मनः शान्तिं लप्स्ये कौरवाणां समक्षम् ५१
एतावदुक्त्वा वचनं प्रहृष्टो ननाद चोच्चै रुधिरार्द्रगात्रः ।
ननर्द चैवातिबलो महात्मा वृत्रं निहत्येव सहस्रनेत्रः ॥ ५२ ॥ [४२५३]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि दुःशासनवधे त्र्यशीतितमोऽध्यायः ॥८३॥

संजय उवाच— दुःशासने तु निहते तव पुत्रा महारथाः ।
महाक्रोधविषा वीराः समरेष्वपलायिनः ॥ १ ॥
दश राजन्महावीर्या भीमं प्राच्छादयञ्शरैः ।
निषङ्गी कवची पाशी दण्डधारो धनुर्धरः ॥ २ ॥
अलोलुपः सहः षण्ढो वातवेगसुवर्चसौ ।
एते समेत्य सहिता भ्रातृव्यसनकर्शिताः ॥ ३ ॥
भीमसेनं महाबाहुं मार्गणैः समवारयन् ।
स वार्यमाणो विशिखैः समन्तात्तैर्महारथैः ॥ ४ ॥
भीमः क्रोधाग्निरक्ताक्षः क्रुद्धः काल इवाबभौ ।
तांस्तु भल्लैर्महावेगैर्दशभिर्दश भारतान् ॥ ५ ॥

क्रोधी भीमसेन हूं इस समय मैंने जो दुःशासनका रुधिर पिया है वही मेरे मुखसे बह रहा है। मैंने जो सभामें प्रतिज्ञा की थी सो सत्य कर ली अब मैं सब कौरवोंके बीचमें दूसरी प्रतिज्ञा करता हूं कि, इस यज्ञमें अपने पैरसे दुरात्मा दुर्योधनरूपी पशुका शिर पीसकर बलिदान करूंगा तभी शांत हूंगा ॥ जैसे वृत्रासुरको मारकर इन्द्र प्रसन्न हुए थे ऐसेही महाबलवान् महात्मा भीमसेन दुःशासनको मारकर प्रसन्न होकर गर्जने और नाचने लगे ॥ (४८—५२)

कर्णपर्वमें तिरासी अध्याय समाप्त । [४२५३]

कर्णपर्वमें चौरासी अध्याय ।

संजय बोले, हे राजन्! दुःशासनके मरनेपर युद्धसे न भागनेवाले महारथ तुम्हारे पुत्रोंको महा क्रोध हुआ; तब निषङ्गी, कवची, पाशी, दण्डधारी, धनुर्धारी, अलोलुप, सह, षंढ, वातवेग और सुवर्चा ये सब दुःशासनके शोकसे व्याकुल होकर भीमसेनके ऊपर घोर बाण वर्षाने लगे । (१—४)

भीमसेन उन महारथोंके बाणोंसे व्याकुल होकर क्रोधके मारे यमराजके समान होगये और अत्यन्त शीघ्र चलने वाले दश बाणोंसे उन दशों वीरोंका

मुनयश्चारणाः सिद्धा वैनतेया वयांसि च ॥ ४१ ॥
रत्नानि निधयः सर्वे वेदाश्चाख्यानपञ्चमाः।
सोपवेदोपनिषदः सरहस्याः ससंग्रहाः ॥ ४२ ॥
वासुकिश्चित्रसेनश्च तक्षको मणिकस्तथा।
सर्पाश्चैव तथा सर्वे काद्रवेयाश्च सान्वयाः ॥ ४३ ॥
विषवन्तो महाराज नागाश्चार्जुनतोऽभवन्।
ऐरावताः सौरभेया वैशालेयाश्च भोगिनः ॥ ४४ ॥
एतेऽभवन्नर्जुनतः क्षुद्रसर्पाश्च कर्णतः।
ईहामृगा व्यालमृगा माङ्गल्याश्च मृगद्विजाः ॥ ४५ ॥
पार्थस्य विजये राजन्सर्व एवाभिसंस्तुताः।
वसवो मरुतः साध्या रुद्रा विश्वेऽश्विनौ तथा ॥ ४६ ॥
अग्निरिन्द्रश्च सोमश्च पवनोऽथ दिशो दश।
धनञ्जयस्य ते पक्षे आदित्याः कर्णतोऽभवन् ॥ ४७ ॥
विशः शूद्राश्च सूताश्च ये च सङ्करजातयः।
सर्वशस्ते महाराज राधेयमभजंस्तदा ॥ ४८ ॥
देवास्तु पितृभिः सार्धं सगणाः सपदानुगाः।
यमो वैश्रवणश्चैव वरुणश्च यतोऽर्जुनः ॥ ४९ ॥
ब्रह्म क्षत्रं च यज्ञाश्च दक्षिणाश्चार्जुनं श्रिताः।

राक्षस और गुह्यकोंने प्रसन्न होकर कर्णका पक्ष लिया। मुनि, चारण, सिद्ध, गरुड, और पक्षी, रत्न, खान, वेद, इतिहास, उपवेद, उपनिषद्, रहस्य और संग्रह, वासुकी, चित्रसेन, तक्षक और मणिक आदि कद्रुके पुत्र सब विषीले सर्प अर्जुनकी ओर हुए। ऐरावत और मय तथा शालेय आदि सांप ये सब भी अर्जुन ही की ओर थे। और छोटे छोटे सांप कर्णकी ओर हुए। (४०-४५)

मेडिये, हरिण, खरहे, मांगल्य आदि सब जीव जन्तु, अर्जुनकी विजयकी इच्छा करने लगे। वसु, मरुत, साध्य, रुद्र, विश्वदेव, अश्विनीकुमार, अग्नि, इन्द्र, चन्द्रमा, वायु, दशों दिशा, ये सब अर्जुनकी ओर और आदित्य नामक देवता कर्णके पक्षमें हुए। हे राजन्! बनिये, शूद्र, सूत और सब वर्णसङ्कर कर्णकी विजय चाहने लगे। देवता पितर और उनके सब सेवक, वरुण, कुबेर और यमराज अर्जुनकी विजयकी इच्छा करने लगे॥ (४५-४९)

भारो हि धार्तराष्ट्रेण त्वयि सर्वः समाहितः ।
तमुद्वह महाबाहो यथाशक्ति यथाबलम् ॥ १५ ॥
जये स्याद्विपुला कीर्तिर्ध्रुवः स्वर्गः पराजये ।
वृषसेनश्च राधेय संक्रुद्धस्तनयस्तव ॥ १६ ॥
त्वयि मोहं समापन्ने पाण्डवानभिधावति ।
एतच्छ्रुत्वा तु वचनं शल्यस्यामिततेजसः ॥
हृदि चावश्यकं भावं चक्रे युद्धाय सुस्थिरम् ॥ १७ ॥
ततः क्रुद्धो वृषसेनोऽभ्यधावद्वस्थितं प्रमुखे पाण्डवं तम् ।
वृकोदरं कालमिवान्तदण्डं गदाहस्तं योधयन्तं त्वदीयान् ॥ १८ ॥
तमभ्यधावन्नकुलः प्रवीरो रोषादमित्रं प्रतुदन्पृषत्कैः ।
कर्णस्य पुत्रं समरे प्रहृष्टं पुरा जिघांसुर्मघवेव जम्भम् ॥ १९ ॥
ततो ध्वजं स्फाटिकचित्रकक्ष्यं चिच्छेद वीरो नकुलः क्षुरेण ।
कर्णात्मजस्येष्वसनं च चित्रं भल्लेन जाम्बूनदचित्रनद्धम् ॥ २० ॥
अथान्यदादाय धनुः स शीघ्रं कर्णात्मजः पाण्डवमभ्यविध्यत् ।
दिव्यैरस्त्रैरभ्यवर्षच्च सोऽपि कर्णस्य पुत्रो नकुलं कृतास्त्रः ॥ २१ ॥
शराभिघाताच्च रुषा च राजन्स्वया च भासास्त्रसमीरणाच्च ।

शार्दूल ! अब तुम क्षत्रियोंके धर्मानुसार अत्यन्त उत्साह करके अर्जुनसे लडनेको चलो ॥ हे महाबाहो ! दुर्योधनने युद्धका सब भार तुम्हारे ही भरोसे छोड दिया, सो अब तुम अपने बल और उत्साहके अनुसार उनका उपकार करो। हे राधापुत्र! विजय होनेसे अचल कीर्ति होगी और मरनेसे सदैवके लिये स्वर्ग मिलेगा । (१३-१६)

वे तुम्हारे पुत्र क्रोधी वृषसेन खडे हैं । ये तुमको डरा हुआ देखकर आप ही पाण्डवोंसे युद्ध करने जाना चाहते हैं । महा तेजस्वी शल्यके ऐसे वचन सुन कर्णने लडनेका दृढ सङ्कल्प किया ॥ तब दण्डधारी यमराजके समान गदाधारी भीमसेनको कौरवोंसे युद्ध करते देख वृषसेन उनसे लडनेको चले, उनको आते देख घोर बाण वर्षाते हुए नकुल इस प्रकार दौडे जैसे अपने शत्रु जम्भको मारनेके लिये इन्द्र दौडे थे ॥(१६-१९)

तब नकुलने एक बाणसे कर्णके पुत्रकी स्फटिक दण्डवाली ध्वजा काट दी और एक बाणसे सुवर्ण भूषित धनुष काट दिया । वृषसेनने उस धनुषको फेंककर शीघ्रतासे दूसरा धनुष लिया और नकुलकी ओर शस्त्रविद्याके अनुसार

हत्वार्जुनं मम सुतः कर्णो जयतु संयुगे ।
हत्वा कर्णं जयत्वद्य मम पुत्रो धनञ्जयः ॥ ५९ ॥
इति सूर्यस्य चैवासीद्विवादो वासवस्य च ।
पक्षसंस्थितयोस्तत्र तयोर्विबुधसिंहयोः ।
द्वैपक्ष्यमासीद्देवानामसुराणां च भारत ॥ ६० ॥
समेतौ तौ महात्मानौ दृष्ट्वा कर्णधनञ्जयौ ।
अकम्पन्त त्रयो लोकाः सहदेवर्षिचारणाः ॥ ६१ ॥
सर्वे देवगणाश्चैव सर्वभूतानि यानि च ।
यतः पार्थस्ततो देवा यतः कर्णस्ततोऽसुराः ॥ ६२ ॥
रथयूथपयोः पक्षौ कुरुपाण्डववीरयोः ।
दृष्ट्वा प्रजापतिं देवाः स्वयम्भुवमचोदयन् ॥ ६३ ॥
कोऽनयोर्विजयी देव कुरुपाण्डवयोधयोः ।
समोऽस्तु विजयो देव एतयोर्नरसिंहयोः ॥ ६४ ॥
कर्णार्जुनविवादेन सर्वं संशयितं जगत् ।
स्वयम्भो ब्रूहि नस्तथ्यमेतयोर्विजयं प्रभो ॥ ६५ ॥
स्वयम्भो ब्रूहि तद्वाक्यं समोऽस्तु विजयोऽनयोः ।
तदुपश्रुत्य मघवा प्रणिपत्य पितामहम् ॥ ६६ ॥

और सूर्यने कहा कि कर्ण अर्जुनको जीते। इन्द्र कहने लगे, हमारा पुत्र अर्जुन कर्णको मार विजय पावै, इसी प्रकार देव श्रेष्ठ सूर्य और इन्द्र अपना अपना पक्ष लेकर विवाद करने लगे ॥ हे भारत ! उस समय सब देवता और दानवोंके दो पक्ष होगये ॥ (५६-६०)

दोनों वीरोंको एकत्र खडा देख ऋषि, चारण, भूत और देवतोंके सहित तीनों लोक कांपने लगे ॥ सब देवता अर्जुन और सब राक्षस कर्णकी प्रशंसा करने लगे ॥ इसी प्रकार दोनों सेनाके मनुष्य अपने अपने वीरोंकी प्रशंसा करने लगे, प्रजापतियोंके सहित ब्रह्माको आये देख सब देवतोंने उनसे कहा, हे देव ! इन पुरुषसिंह वीरोंमें किसीकी विजय होगी ? हमलोगोंको जान पडता है कि, ये दोनों समान ही रहेंगे ॥ (६१-६४)

हे प्रभु ! इन दोनोंके युद्धमें सब जगत्को सन्देह है। इसमें जो कुछ सत्य है, सो आप हमसे कहिये ॥ हे ब्रह्मन् ! आप ऐसा उपाय कीजिये, जिसमें ये दोनों समान ही रहें। देवतोंके ऐसे वचन सुन इन्द्र ब्रह्माको प्रणाम

स तेन विद्धोऽतिभृशं तरस्वी महाहवे वृषसेनेन राजन् ॥ २९ ॥
क्रुद्धेन धावन्समरे जिघांसुः कर्णात्मजं पाण्डुसुतो नृवीरः ।
वितत्य पक्षौ सहसापतन्तं श्येनं यथैवामिषलुब्धमाजौ ॥ ३० ॥
अवाकिरद्वृषसेनस्ततस्तं शितैः शरैर्नकुलमुदारवीर्यम् ।
स तान्मोघांस्तस्य कुर्वञ्शरौघाश्चचार मार्गान्नकुलश्चित्ररूपान् ॥३१॥
अथास्य तूर्णं चरतो नरेन्द्र खड्गेन चित्रं नकुलस्य तस्य ।
महेषुभिर्व्यधमत्कर्णपुत्रो महाहवे चर्म सहस्रतारम् ॥ ३२ ॥
तं चायसं निशितं तीक्ष्णधारं विकोशमुग्रं गुरुभारसाहम् ।
द्विषच्छरीरान्तकरं सुघोरमाधुन्वतः सर्पमिवोग्ररूपम् ॥ ३३ ॥
क्षिप्रं शरैः षड्भिरमित्रसाहश्चकर्त खड्गं निशितैः सुवेगैः ।
पुनश्च दीप्तैर्निशितैः पृषत्कैः स्तनान्तरे गाढमथाभ्यविद्धयत् ॥३४॥
कृत्वा तु तद्दुष्करमार्यजुष्टमन्यैर्नरैः कर्म रणे महात्मा ।
ययौ रथं भीमसेनस्य राजञ्शराभितप्तो नकुलस्त्वरावान्॥ ३५ ॥
स भीमसेनस्य रथं हताश्वो माद्रीसुतः कर्णसुताभितप्तः ।
आपुप्लुवे सिंह इवाचलाग्रं सम्प्रेक्ष्यमाणस्य धनञ्जयस्य ॥ ३६ ॥
ततः क्रुद्धो वृषसेनो महात्मा ववर्ष तान्विषुजालेन वीरः ।

हे राजन् ! तब उन्होंने खेलते हुए नकुलके शरीरमें अठारह तेज बाण मारे। उन बाणोंके लगनेसे वीर तेजस्वी नकुल कर्णके पुत्रको मारनेके लिये हाथ फैला कर इस प्रकार दौडे जैसे कोई बाज पङ्ख फैला कर मांसके लिये पक्षीकी ओर दौडता है ॥ यद्यपि वृषसेनने वीर नकुलके मारनेके लिये अनेक बाण चलाये परन्तु उन्होंने उन सबको अपनी चालोंसे काटदिया ॥ (२९-३१)

इस प्रकार विचित्र गतियोंसे घूमते हुए विचित्र योद्धा नकुलकी अनेक तारोंवाली ढालको वृषसेनने महत्ती बाणोंसे काट दिया, तब नकुल घोर शत्रुओंके नाश करनेवाले महा प्रकाशमान् सर्पके समान विष भरे केवल खड्ग ही को घुमाने लगे, तब कर्णके पुत्रने छः तेज बाणोंसे उनका खड्ग भी काट दिया और अनेक बाण उनके हृदयमें मारे ॥ (३२-३४)

तब अन्य मनुष्योंसे न करने योग्य यह घोर कर्म करके और बाणोंसे व्याकुल होकर नकुल दौडकर भीमसेनके रथपर चढ गये ॥ अर्जुनके देखते देखते माद्रीपुत्र नकुल वृषसेनके बाणोंसे पीडित होकर भीमसेनके रथपर इस प्रकार कूद-

पार्थः सर्वगुणोपेतो देवकार्यमिदं यतः ॥ ७५ ॥
क्लिश्यन्ते पाण्डवा नित्यं वनवासादिभिर्भृशम् ।
सम्पन्नस्तपसा चैव पर्याप्तः पुरुषर्षभः ॥ ७६ ॥
अतिक्रमेच्च माहात्म्यादिष्टमप्यर्थपर्ययम् ।
अतिक्रान्ते च लोकानामभावो नियतं भवेत् ॥ ७७ ॥
न विद्यते व्यवस्थानं क्रुद्धयोः कृष्णयोः क्वचित् ।
स्रष्टारौ जगतश्चैव सततं पुरुषर्षभौ ॥ ७८ ॥
नरनारायणावेतौ पुराणावृषिसत्तमौ ।
अनियम्यौ नियन्तारावेतौ तस्मात्परन्तपौ ॥ ७९ ॥
नैतयोस्तु समः कश्चिद्दिवि वा मानुषेषु वा ।
अनुगम्यास्त्रयो लोकाः सह देवर्षिचारणैः ॥ ८० ॥
सर्वदेवगणाश्चापि सर्वभूतानि यानि च ।
अनयोस्तु प्रभावेन वर्तते निखिलं जगत् ॥ ८१ ॥
कर्णो लोकानयं मुख्यानाप्नोतु पुरुषर्षभः ।
कर्णो वैकर्तनः शूरो विजयस्त्वस्तु कृष्णयोः ॥ ८२ ॥
वसूनां समलोकत्वं मरुतां वा समाप्नुयात् ।

इनकी विजय क्यों नहीं होगी ? और ये तो देवतोंका काम है ॥ (७१–७५)

महात्मा पाण्डवों ने वनमें रहकर बहुत दुःख भोगा है । इससे ये ही जीतेंगे, पुरुषसिंह अर्जुन तपसे सम्पन्न होनेके कारण कर्णको जीतनेमें समर्थ भी हैं ॥ यदि अर्जुन युद्धमें न जीते तो प्रारब्ध ही उल्टी हो सक्ती है। और उसके लौटनेसे सब जगत्का नाश हो सक्ता है ॥ ये ही पुरुषसिंह कृष्ण और अर्जुन जगत्के पति है । इस लिये इनके क्रुद्ध होनेमे कोई नहीं बच सक्ता ॥ (७६–७८)

श्रीकृष्ण और अर्जुन प्राचीन नर और नारायण ऋषि हैं, ये जगत्को अपने नियममें रखते है । और आप भी नियमसे चलते है, इससे इनके शत्रुओंका नाश होगा, इनके समान कोई मनुष्य और देवता भी नहीं है । सब सिद्ध और चारण तीनों लोकोंके सहित इनके पीछे चलते है, सब देवता आदि चर अचर जगत् इन्हीं दोनोंकी शक्तिसे चलता है ॥ (७९–८१)

महापराक्रमी कर्ण मरकर स्वर्गको जाय और अर्जुनकी विजय होय ॥ कर्ण, भीष्म और द्रोणाचार्यके सहित चाहे

द्रुपदसुतवरिष्ठाः पञ्च शैनेयपष्ठा द्रुपददुहितृपुत्राः पञ्च चामित्रसाहाः ।
द्विरदरथनराश्वान्सूदयन्तस्त्वदीयान्भुजगपतिनिकाशैर्मार्गणैरात्तशस्त्राः २॥
अथ तव रथमुख्यास्तान्प्रतीयुस्त्वरन्तः कृपहृदिकसुतौ च द्रौणिदुर्योधनौ च ।
शकुनिसुतवृकौ च क्राथदेवावृधौ च द्विरदजलजघोषैः स्यन्दनैः कार्मुकैश्च ३॥
तव नृप रथिवीरास्तान्दर्शकं च वीरान्नृवरशरवराग्रैस्ताडयन्तोऽभ्यरुन्धन् ।
नवजलदसवर्णैर्हस्तिभिस्तानुदीयुर्गिरिशिखरनिकाशैर्भीमवेगैः कुलिन्दाः४॥

सुकल्पिता हैमवता मदोत्कटा रणाभिकामैः कृतिभिः समास्थिताः ।
सुवर्णजालैर्विततता ववुर्गजास्तथा यथा खे जलदाः सविद्युतः ॥ ५ ॥
कुलिन्दपुत्रो दशभिर्महायसैः कृपं ससूताश्वमपीडयद्भृशम् ।
ततः शरद्वत्सुतसायकैर्हतः सहैव नागेन पपात भूतले ॥ ६ ॥
कुलिन्दपुत्रावरजस्तु तोमरैर्दिवाकरांशुप्रतिमैरयस्मयैः ।
रथं च विक्षोभ्य ननाद नर्दंतस्ततोऽस्य गान्धारपतिः शिरोऽहरत् ॥ ७ ॥
ततः कुलिन्देषु हतेषु तेष्वथ प्रहृष्टरूपास्तव ते महारथाः ।
भृशं प्रदध्मुर्लवणाम्बुसम्भवान्परांश्च वाणासनपाणयोऽभ्ययुः ॥ ८ ॥

बैठे शिक्षित सारथियोंके सहित दौडे । ये सब महापराक्रमी वीर सांपोंके समान बाणोंसे तुम्हारे हाथी घोडे, और पदातियोंका नाश करने लगे ॥ (१-२)

तुम्हारी ओरसे भी उस सबको मारनेके लिये मेघ और हाथीके समान शब्दवाले रथोंपर चढकर कृपाचार्य, कृतवर्मा, राजा दुर्योधन, अश्वत्थामा, उलूक तथा वृक, क्राथ, और देवावृध दिव्य धनुष धारण करके दौडे ॥ हे महाराज ! ये सब वीर पहले कहे पाण्डवोंके ग्यारह वीरोंपर बाण वर्षाते हुए चले, तब नवीन काले मेघके समान काले वर्णवाले, पर्वतोंके शिखरके समान भारी शीघ्र चलनेवाले, हाथियोंपर चढकर कुलिंददेशके क्षत्री दौडे ॥ (३-४)

जैसे बिजलियोंके सहित काले मेघ आकाशमें शोभित होते हैं, तैसेही सुवर्ण जाल वाले, शिक्षित महाव्रतों सहित महावीर योद्धासे युक्त हाथी शोभित होने लगे ॥ तब कुलिन्द देशके राजपुत्रने अपने बाणोंसे कृपाचार्यको घोडोंके सहित व्याकुल कर दिया, अनन्तर कृपाचार्यने हाथीके सहित उसे मारडाला तब वह हाथीके सहित भूमिपर गिरपडा ॥ उसके छोटे भाईने सूर्यकी किरणोंके समान अनेक तोमर कृपाचार्यके रथकी ओर चलाये, तब शकुनिने बाणोंसे उसका शिर काट लिया ॥ (५-७)

इन दोनों राजपुत्रोंके मरनेसे तुम्हारी

तयोर्ध्वजौ वीतमलौ शुशुभाते रथे स्थितौ।
राहुकेतू यथाकाशे उदितौ जगतः क्षये ॥ ९२ ॥
कर्णस्याशीविषनिभा रत्नसारमयी दृढा।
पुरन्दरधनुःप्रख्या हस्तिकक्ष्या विराजते ॥ ९३ ॥
कपिश्रेष्ठस्तु पार्थस्य व्यादितास्य इवान्तकः।
दंष्ट्राभिर्भीषयन्भाभिर्दुर्निरीक्ष्यो रविर्यथा ॥ ९४ ॥
युद्धाभिलाषुको भूत्वा ध्वजो गाण्डीवधन्वनः।
कर्णध्वजमुपातिष्ठत्स्वस्थानाद्वेगवान्कपिः ॥ ९५ ॥
उत्पपात महावेगः कक्ष्यामभ्याहनत्तदा।
नखैश्च दशनैश्चैव गरुडः पन्नगं यथा ॥ ९६ ॥
सा किङ्किणीकाभरणा कालपाशोपमायसी।
अभ्यद्रवत्सुसंरब्धा हस्तिकक्ष्याथ तं कपिम् ॥ ९७ ॥
तयोर्घोरतरे युद्धे द्वैरथे द्यूत आहिते।
प्राकुर्वतां ध्वजौ युद्धं पूर्वं पूर्वतरं तदा ॥ ९८ ॥
हया हयानभ्यहेषन्स्पर्धमानाः परस्परम्।
अविध्यत्पुण्डरीकाक्षः शल्यं नयनसायकैः ॥ ९९ ॥
शल्यश्च पुण्डरिकाक्षं तथैवाभिसमैक्षत।
तत्राजयद्वासुदेवः शल्यं नयनसायकैः ॥ १०० ॥

में प्रलयके समय उदय हुए राहु और केतुके समान दीखने लगी॥ कर्णके रथ पर इन्द्रधनुष और सांपके समान हाथीके चिन्हसे युक्त सुवर्ण और मणियोंसे जटित उत्तम ध्वजा लगी थी॥ (९१-९३)

इसी प्रकार सूर्यके समान तेजस्वी अर्जुनकी ध्वजापर बैठे हुए हनुमान अपने तेज और दांतोंसे मनुष्यों को डरा रहे थे, युद्धकी इच्छा करके महातेजस्वी वन्दर अर्जुनकी ध्वजासे कर्णकी ध्वजापर जाते हुए जान पडते थे। जैसे गरुड सांपोंको मारडालते हैं ऐसे ही हनुमानने कूदकर कर्णकी ध्वजाके हाथी को दांत और नाखूनोंसे चीर डाला॥ कर्णकी लोहेकी बनी ध्वजा भी उस वन्दरसे लडनेको दौडी उनका घोर युद्ध होनेके पहिले ही इनकी ध्वजाओंमें घोर युद्ध होने लगा॥ (९४-९८)

दोनोंके घोडे परस्पर द्वेष करके बोलने लगे, श्रीकृष्णने अपने तेज नेत्ररूपी बाण शल्यको मारे, इसी प्रकार शल्यने श्रीकृष्णकी ओर देखा परन्तु

रथी द्विपस्थेन हतोऽपतच्छरैः क्राथाधिपः पर्वतजेन दुर्जयः ।
सवाजिसूतेष्वसनध्वजस्तथा यथा महावातहतो महाद्रुमः ॥ १६ ॥
वृको द्विपस्थं गिरिराजवासिनं भृशं शरैर्द्वादशभिः पराभिनत् ।
ततो वृकं साश्वरथं महाद्विपो द्रुतं चतुर्भिश्चरणैर्व्यपोथयत् ॥ १७ ॥
स नागराजः सनियन्तृकोऽपतत्तथा हतो बभ्रुसुतेषुभिर्भृशम् ।
स चापि देवाबृधसूनुरर्दितः पपात नुन्नः सहदेवसूनुना ॥ १८ ॥
विषाणगात्रावरयोधपातिना गजेन हन्तुं शकुनिं कुलिन्दजः ।
जगाम वेगेन भृशार्दयंश्च तं ततोऽस्य गान्धारपतिः शिरोऽहरत् ॥१९ ॥
ततः शतानीकहता महागजा हया रथाः पत्तिगणाश्च तावकाः ।
सुपर्णवातप्रहता यथोरगास्तथा गता गां विवशा विचूर्णिताः ॥ २० ॥
ततोऽभ्यविद्धयद्बहुभिः शितैः शरैः कालिङ्गपुत्रो नकुलात्मजं समयन् ।
ततोऽस्य कोपाद्विचकर्त नाकुलिः शिरः क्षुरेणाम्बुजसन्निभाननम्॥ २१ ॥
ततः शतानीकमविध्यदाशुसैस्त्रिभिः शरैः कर्णसुतोऽर्जुनं त्रिभिः ।

दौडकर घोडोंके समेत क्राथका रथ उल्टा कर तोड डाला ॥ परन्तु क्राथ वच गये, तब उन्होंने अपने बाणोंसे राज कुमार सहित हाथीको मारकर इस प्रकार गिरा दिया, जैसे इन्द्र वज्रसे काटकर पर्वतको गिराते है ॥ तब एक पर्वतवासी कुलिन्ददेशके हाथीपर चढे योद्धाने अपने बाणोंसे रथ, सारथी और घोडोंके सहित राजा क्राथको मार कर इस प्रकार गिरा दिया, जैसे वायु वृक्षको गिरा देता है ॥ (१५—१६)

तब वृकने उस वीरकी ओर बारह बाण चलाये । उसी समय उस हाथीने दौडकर अपने चारों पैरोंसे घोडे सारथी और रथके सहित वृकका चूरा कर दिया ॥ अनन्तर बभ्रुके पुत्रने उस हाथीको अपने बाणोंसे महावतके सहित मारडाला उसे सहदेवके पुत्रने मारकर पृथ्वीमें गिरा दिया ॥ तब कुलिन्द देशका चौथा राजपुत्र बडे दांतवाले मतवाले हाथीपर चढकर शकुनिको मारने दौडे । तब शकुनिने अपने बाणोंसे उसका शिर काट लिया ॥ (१७-१९)

इतने ही समयमें शतानीकने तुम्हारे अनेक हाथी, घोडे और मनुष्योंको इस प्रकार मार डाला जैसे गरुड सांपोंको मार डालता है ॥ तब कलिङ्गदेशके राजपुत्रने क्रोध करके नकुलपुत्र शतानीककी ओर अनेक बाण चलाये । नकुलपुत्र शतानीकने एक बाणसे उसका कमलके समान मुखयुक्त शिर काटकर पृथ्वी में गिरा दिया, तब कर्णके पुत्रने क्रोध करके

सच्छत्रकवचं चैव सशक्तिशरकार्मुकम् ।
द्रष्टास्यद्य रणे कृष्ण शरैश्छिन्नमनेकधा ॥ १०९ ॥
अद्यैव सरथं साश्वं सशक्तिकवचायुधम् ।
संचूर्णितमिवारण्ये पादपं दन्तिना यथा ॥ ११० ॥
अद्य राधेयभार्याणां वैधव्यं समुपस्थितम् ।
ध्रुवं स्वप्नेष्वनिष्टानि ताभिर्दृष्टानि माधव ॥ १११ ॥
द्रष्टासि ध्रुवमद्यैव विधवाः कर्णयोषितः ।
नहि मे शाम्यते मन्युर्यदनेन पुरा कृतम् ॥ ११२ ॥
कृष्णां सभागतां दृष्ट्वा मूढेनादीर्घदर्शिना ।
अस्मांस्तथावहसता क्षिपता च पुनः पुनः ॥ ११३ ॥
अद्य द्रष्टासि गोविन्द कर्णमुन्मथितं मया ।
वारणेनेव मत्तेन पुष्पितं जगतीरुहम् ॥ ११४ ॥
अद्य ता मधुरा वाचः श्रोतासि मधुसूदन ।
दिष्ट्या जयसि वार्ष्णेय इति कर्णे निपातिते॥ ११५ ॥
अद्याभिमन्युजननीं प्रहृष्टः सान्त्वयिष्यसि ।
कुन्तीं पितृष्वसारं च प्रहृष्टः सञ्जनार्दन ॥ ११६ ॥
अद्य बाष्पमुखीं कृष्णां सान्त्वयिष्यसि माधव ।

मेरे शत्रु कर्णके छत्र, धनुष, बाण और शक्ति सब कट गये, जैसे कोई हाथी वनमें वृक्षका चूरा कर देता है ऐसा ही मैं कवच, घोडे, शक्ति, बाण धनुष के सहित कर्णको मार कर गिरा दूंगा ॥ (१०७-११०)

हे माधव ! आज राधापुत्रकी सब स्त्री विधवा होजायंगी। निश्चय आज रातको उन्होंने बुरे स्वप्न देखे होंगे। इसने जो हमारा पहले दोष किया है सो मेरा क्रोध शान्त नहीं हुआ, इसलिये आप इसकी सब स्त्रियोंको विधवा देखेंगे ॥ जिस समय द्रौपदी सभामें आई थी तब इस मूर्ख अदूरदर्शीने हंसकर हम लोगों को और द्रौपदीको अनेक दुर्वचन कहे थे ॥ जैसे मतवाला हाथी फूले फले वृक्षको तोड डालता है, ऐसे ही मैं आज कर्णको मार डालूंगा ॥ (१११-११४)

हे मधुसूदन यदुकुल श्रेष्ठ ! अब आप कर्णके मरनेके पश्चात् इन मीठे वचनोंको सुनेंगे कि प्रारब्धसे कर्ण मारा गया ॥ हे जनार्दन ! अब तुम्हारे पिताकी बहन कुन्ती और तुम्हारी बहन अभिमन्युकी माता प्रसन्न होंगी, अब तुम अपने अमृत

आरक्तनेत्रोऽन्तकशत्रुहन्ता उवाच कर्णं भृशमुत्स्मयंस्तदा ॥ ३० ॥
दुर्योधनं द्रौणिमुखांश्च सर्वानहं रणे वृषसेनं तमुग्रम् ।
सम्पश्यतः कर्ण तवाद्य सङ्ख्ये नयामि लोकं निशितैः पृषत्कैः ॥ ३१ ॥
जनं च तावद्धि जना वदन्ति सर्वैर्भवद्भिर्मम सूनुर्हतोऽसौ ।
एको रथो मद्विहीनस्तरस्वी अहं हनिष्ये भवतां समक्षम् ॥ ३२ ॥
संरक्ष्यतां रथसंस्थाः सुतोऽयमहं हनिष्ये वृषसेनमुग्रम् ।
पश्चाद्वधिष्ये त्वामपि सम्प्रमूढमहं हनिष्येऽर्जुन आजिमध्ये ॥ ३३ ॥
तमद्य मूलं कलहस्य सङ्ख्ये दुर्योधनापाश्रयजातदर्पम् ।
त्वामद्य हन्तास्मि रणे प्रसह्य अस्यैव हन्ता युधि भीमसेनः ॥ ३४ ॥
दुर्योधनस्याधमपूरुषस्य यस्यानयादेष महान्क्षयोऽभवत् ।
स एवमुक्त्वा विनिसृज्य चापं लक्ष्यं हि कृत्वा वृषसेनमाजौ ॥ ३५ ॥
ससर्ज बाणान्विशिखान्महात्मा वधाय राजन्कर्णसुतस्य सङ्ख्ये ।
विव्याध चैनं दशभिः पृषत्कैर्मर्मस्वशङ्कं प्रहसन्किरीटी ॥ ३६ ॥
चिच्छेद चास्येष्वसनं भुजौ च क्षुरैश्चतुर्भिर्निशितैः शिरश्च ।
स पार्थबाणाभिहतः पपात रथाद्विबाहुर्विशिरा धरायाम् ॥ ३७ ॥
सुपुष्पितो वृक्षवरोऽतिकायो वातेरितः शाल इवाद्रिशृङ्गात् ।

लाल नेत्र करके कर्णसे बोले, हे कर्ण ! मैं तुम्हारे और दुर्योधन तथा अश्वत्थामाके आगे वृषसेनको मारता हूं ॥ तुम सब लोगोंने मेरे पुत्र बलवान अकेले अभिमन्युको मेरे पीछे मिलकर मार डाला था, परन्तु मैं तुम्हारे सबके देखते देखते इस कर्णके पुत्रको मारता हूं ॥ (२९–३२)

रे मूर्ख ! मै अर्जुन हूं, इस तेरे पुत्रको मार कर पीछे तुझे भी मारूंगा, रथमें बैठे सब क्षत्रियोंको उचित है, कि इसीकी रक्षा करें ॥ अब मै वृषसेनको मारता हूं, अब मै सब वैरके मूल तुझे मारकर दुर्योधनका आश्रय तोडूंगा। थोडे ही समयमें दुर्योधनको भी भीमसेन मार डालेंगे ॥ (३३–३४)

इस नीच मूर्ख दुर्योधनकी दुर्बुद्धिसे यह क्षत्रियोंका नाश हुआ ऐसा कहकर अर्जुनने धनुष पर टङ्कार दी और वृषसेनको लक्ष्य करके युद्धमें अनेक बाण चलाये, फिर हंसकर दश बाण उसको मारनेके लिये मर्मस्थानोंमें मारे, फिर चार बाणोंसे उसके दोनों हाथ धनुष और शिर काट दिये, तब वह पृथ्वीमें गिर गया। जैसे पर्वतका शिखर गिरनेसे फला फूला शालका वृक्ष टूट जाता है

भयातुरा एकरथौ समाश्रयंस्ततोऽभवत्त्वद्भुतमेव सर्वतः ।
ततोऽस्त्रमस्त्रेण परस्परं तौ विधूय वाताविव पूर्वपश्चिमौ ॥ ७ ॥
घनान्धकारे विततेतमोनुदौ यथोदितौ तद्वदतीव रेजतुः ।
न चाभिसर्तव्यमिति प्रचोदिताः परे त्वदीयाश्च तथावतस्थिरे ॥ ८ ॥
महारथौ तौ परिवार्य सर्वतः सुरासुराः शम्बरवासवाविव ।
मृदङ्गभेरीपणवानकस्वनैः ससिंहनादैर्ननदतुर्नरोत्तमौ ॥ ९ ॥
शशाङ्कसूर्याविव मेघनिःस्वनैर्विरेजतुस्तौ पुरुषर्षभौ तदा ।
महाधनुर्मण्डलमध्यगावुभौ सुवर्चसौ बाणसहस्रदीधिती ॥ १० ॥
दिधक्षमाणौ सचराचरं जगद्युगान्तसूर्याविव दुःसहौ रणे ।
उभावजेयावहितान्तकावुभावुभौ जिघांसू कृतिनौ परस्परम् ॥ ११ ॥
महाहवे वीतभयौ समीयतुर्महेन्द्रजम्भाविव कर्णपाण्डवौ ।
ततो महास्त्राणि महाधनुर्धरौ विमुञ्चमानाविषुभिर्भयानकैः ॥ १२ ॥
नराश्वनागानमितान्निजघ्नतुः परस्परं चापि महारथौ नृप ।

अन्धकार होगया । तब दोनों ओरके वीरोंको कुछ नहीं दीख पडा ॥ (४-६)

तब सब योद्धा भयसे कर्ण और अर्जुनके पास खडे होगये, उस समय ये दोनों एक दूसरेके बाण काटते हुए इस प्रकार युद्ध करने लगे । उन दोनोंके बाण परस्पर ऐसे मिलने लगे, जैसे पूर्व और पश्चिमके वायु मिल जाते है ॥ उस घोर अन्धकारमें अर्जुन और कर्ण दो सूर्यके समान प्रकाश करने लगे । यद्यपि वे और वीरोंसे युद्ध करनेको कहते थे, तो भी वहां कोई नहीं जाता था ॥ जैसे शम्बर और इन्द्रने अपने बाणोंसे देवता और राक्षसोंकी सेनाको पूरित कर दिया था, ऐसेही इन दोनोंने भी दोनों दलोंको व्याकुल कर दिया । अनेक शङ्ख नगारेके शब्द सुनकर दोनों पुरुषसिंह सिंहके समान गर्जने लगे ॥ (७—९)

ये दोनों रथोंमें बैठे हुए धनुष घुमाते सहस्रों बाणरूपी किरणधारी दोनों वीर इस प्रकार शोभित हुए, जैसे मेघोंके बीचमें सूर्य और चन्द्रमा । जैसे जगत्को जलानेके लिये प्रलयकालमें अग्नि और सूर्य मिलकर इकट्ठे होजाते है, ऐसे ही दूसरेके मारनेके लिये ये दोनों अजेय वीर युद्ध करनेको उपस्थित हुए। जैसे निर्भय होकर इन्द्र और जंभ युद्ध करनेको खडे हुए थे, ऐसे ही महाधनुषधारी कर्ण और अर्जुन घोर बाण छोडते हुए युद्ध करनेको खडे हुए ॥ (१०-१२)

हे राजन् ! तब ये दोनों पुरुषश्रेष्ठ अपने बाणोंसे अनेक हाथी, घोडे और

शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् ।
एष मद्रेश्वरो राजा रथाग्रे पर्यवस्थितः ॥ ७ ॥
नियच्छति हयानस्य राधेयस्यामितौजसः ।
शृणु दुन्दुभिनिर्घोषं शङ्खशब्दं च दारुणम् ॥ ८ ॥
सिंहनादांश्च विविधाञ्शृणु पाण्डव सर्वतः ।
अन्तर्धाय महाशब्दान्कर्णेनामिततेजसा ॥ ९ ॥
दोधूयमानस्य भृशं धनुषः शृणु निःस्वनम् ।
एते दीर्यन्ति सगणाः पञ्चालानां महारथाः ॥ १० ॥
दृष्ट्वा केसरिणं क्रुद्धं मृगा इव महावने ।
सर्वयत्नेन कौन्तेय हन्तुमर्हसि सूतजम् ॥ ११ ॥
नहि कर्णशरानन्यः सोढुमुत्सहते नरः ।
सदेवासुरगन्धर्वांस्त्रीँल्लोकान्सचराचरान् ॥ १२ ॥
त्वं हि जेतुं रणे शक्तस्तथैव विदितं मम ।
भीमसुग्रं महात्मानं त्र्यक्षं शर्वं कपर्दिनम् ॥ १३ ॥
न शक्ता द्रष्टुमीशानं किं पुनर्योधितुं प्रभुम् ।
त्वया साक्षान्महादेवः सर्वभूतशिवः शिवः ॥ १४ ॥
युद्धेनाराधितः स्थाणुर्देवाश्च वरदास्तव ।

ध्वजाकी शोभा इन्द्रधनुषके समान दीख रही है, ये दुर्योधनके प्रियके लिये रथमें बैठे सूतपुत्र चले आते हैं । ये मेघकी धाराके समान कर्णके बाण चले आते है। ये साक्षात् सद्रदेशके राजा महाराज शल्य तेजस्वी कर्णके रथपर बैठे घोडोंको हांक रहे है। इधर अनेक नगारे और शङ्ख बज रहे है, ये देखो चारों ओर महा तेजस्वी कर्णके गर्जनेका शब्द चला आता है, इसमे ये सब शब्द छिपे जाते है ॥ (५-९)

ये कर्णके धनुषका शब्द सुनकर पाञ्चाल महारथ भागे जाते है ॥ इस समय उनकी दशा ऐसीही रही जैसे वन में सिंहको देख कर हरिणोंकी। तुम ही इसे मारो क्यों कि तुम्हारे सिवाय जगत् में ऐसा कोई नहीं है जो इनके बाणोंको सह सके । तुम देवता, राक्षस और गन्धर्वोंके सहित चर अचर तीनों लोकोंको युद्धमें जीत सकते हो । (१०-१३)

तुमने तीन नेत्रधारी भगवान् शिवको प्रसन्न किया है उन्हें कोई देख भी नहीं सक्ता है । परन्तु तुमने उन्हींसे युद्ध किया तुमने उन्हें युद्धमें प्रसन्न किया

अथाब्रवीद् द्रोणसुतस्तवात्मजं करं करेण प्रतिपीड्य सान्त्वयन्॥ २० ॥
प्रसीद दुर्योधन शाम्य पाण्डवैरलं विरोधेन धिगस्तु विग्रहम् ।
हतो गुरुर्ब्रह्मसमो महास्त्रवित्तथैव भीष्मप्रमुखा महारथाः ॥२१॥
अहं त्ववध्यो मम चापि मातुलः प्रशाधि राज्यं सह पाण्डवैश्चिरम् ।
धनञ्जयः शास्यति वारितो मया जनार्दनो नैव विरोधमिच्छति ॥२२ ॥
युधिष्ठिरो भूतहिते रतः सदा वृकोदरस्तद्वशगस्तथा यमौ ।
त्वया तु पार्थैश्च कृते च संविदे प्रजाः शिवं प्राप्नुयुरिच्छया तव॥ २३ ॥
व्रजन्तु शेषाः स्वपुराणि बान्धवा निवृत्तयुद्धाश्च भवन्तु सैनिकाः ।
न चेद्वचः श्रोष्यसि मे नराधिप ध्रुवं प्रतप्तासि हतोऽरिभिर्युधि ॥ २४ ॥
इदं च दृष्टं जगता सह त्वया कृतं यदेकेन किरीटमालिना ।
यथा न कुर्याद्बलभिन्न चान्तको न चापि धाता भगवाञ्च यक्षराट् ॥२५॥
अतोऽपि भूयान्स्वगुणैर्धनञ्जयो न चातिवर्तिष्यति मे वचोऽखिलम् ।
तवानुयात्रां च सदा करिष्यति प्रसीद राजेन्द्र शमं त्वमाप्नुहि ॥ २६॥

परन्तु कर्ण और दुर्योधन न कुछ घबराये न कुछ आश्चर्यमें आये, तब अश्वत्थामाने दुर्योधनका हाथ पकड कर ऐसे वचन कहे, महाराज दुर्योधन! आप प्रसन्न हूजिये और पाण्डवोंसे सन्धि कर लीजिये लडाईको धिक्कार है। देखो सब शस्त्रोंके जाननेवाले, ब्रह्माके समान बुद्धिमान तुम्हारे गुरु और भीष्म आदि अनेक वीर मारे गये,हम और कृपाचार्य अवध्य हैं। आप पाण्डवोंसे मिलकर बहुत दिन तक राज्य कीजिये, मैं अर्जुनको युद्धसे रोक देता हूं। कृष्ण युद्धको चाहते ही नहीं ॥ (२०-२२)

महाराज युधिष्ठिर सदा ही जगत्का कल्याण चाहते हैं । भीमसेन, नकुल और सहदेव उनकी आज्ञाहीमें हैं। अब सन्धि होना केवल आपकी इच्छा ही पर है, आपका और पाण्डवोंका मेल होनेसे प्रजा बहुत दिन तक सुख पावेगी दोनों ओर सम्बन्धी अपने अपने घर चले जांय,सेना युद्धसे निवृत्त होय। हे महाराज ! यदि आप हमारे इन वचनोंको नहीं सुनियेगा तो शत्रुओंके हाथसे मरकर बहुत दुःख पाइयेगा। तुमने और सब जगत्ने अर्जुनके इस पराक्रमको देखा, ऐसा काम इन्द्र, यमराज, ब्रह्मा, और साक्षात् कुबेर भी नहीं कर सक्ते ॥ (२३-२५)

ये सब होनेपर भी पाण्डव हमारे वचनको नहीं टालेंगे। वे सदा आपकी आज्ञामें रहेंगे, हे राजोंके महाराज! आप सन्धि कर लीजिये, और प्रसन्न

जयेन संपूज्य स पाण्डवं तदा प्रचोदयामास हयान्मनोजवान् ।
स पाण्डुपुत्रस्य रथो मनोजवः क्षणेन कर्णस्य रथाग्रतोऽभवत् ॥२३॥४३५७

इति श्रीमहाभारते शतसाहस्र्या० कर्णपर्वणि कर्णार्जुनद्वैरथे वासुदेववाक्ये षडशीतितमोऽध्याय. ॥८६॥

सञ्जय उवाच— धृषसेनं हतं दृष्ट्वा शोकामर्षसमन्वितः ।
पुत्रशोकोद्भवं वारि नेत्राभ्यां समवासृजत् ॥ १ ॥
रथेन कर्णस्तेजस्वी जगामाभिमुखो रिपुम् ।
युद्धायामर्षताम्राक्षः समाहूय धनञ्जयम् ॥ २ ॥
तौ रथौ सूर्यसङ्काशौ वैयाघ्रपरिवारितौ ।
समेतौ ददृशुस्तत्र द्वाविवार्कौ समुद्गतौ ॥ ३ ॥
श्वेताश्वौ पुरुषौ दिव्यावास्थितावरिमर्दनौ ।
शुशुभाते महात्मानौ चन्द्रादित्यौ यथा दिवि ॥ ४ ॥
तौ दृष्ट्वा विस्मयं जग्मुः सर्वसैन्यानि मारिष ।
त्रैलोक्यविजये यत्ताविन्द्रवैरोचनाविव ॥ ५ ॥
रथज्यातलनिर्ह्रादैर्घाणसिंहरवैस्तथा ।
तौ रथावभ्यधावन्तौ समालोक्य महीक्षिताम् ॥ ६ ॥
ध्वजौ च दृष्ट्वा संसक्तौ विस्मयः समपद्यत ।
हस्तिकक्षं च कर्णस्य वानरं च किरीटिनः ॥ ७ ॥

जय ऐसा कहकर घोडोंको वायुके समान हांका। थोडे समयमें वह वायुके समान तेज रथ कर्ण के रथ के आगे जा पहुंचा ॥ (२१-२३) [४३५७]

कर्णपर्वमें छियासी अध्याय समाप्त ।

कर्णपर्वमें सतासी अध्याय ।

सञ्जय बोले, हे राजन् ! वृषसेनको मरा देख महातेजस्वी कर्ण पुत्रके शोक से रोने लगे ॥ फिर क्रोधसे लालनेत्र करके अर्जुनको पुकारते हुए युद्ध करने को चले ॥ वे दोनो सिंहके चमडेसे मढे हुए रथ उस समय उदय हुए दो सूर्यके समान दीखने लगे ॥ (१-३)

सफेद घोडोंके रथपर चढे हुए शत्रुओंको मारनेवाले दोनों वीर आकाशमें उदय हुए चन्द्रमा और सूर्यके समान दीखने लगे ॥ उन दोनोंको तीन लोकके जीतनेके लिये इन्द्र और वैरोचनके समान खडे हुए देख सब वीर आश्चर्य करने लगे । वे दोनों वीर सब राजोंके आगे धनुष, ताल और गर्जनेका शब्द करने लगे । कर्णकी नाग युक्त और अर्जुनकी वानर युक्त ध्वजा देखके सब कोई आश्चर्य करने लगे ॥ (४—७)

समाहिताभिद्रवताहितान्मम सबाणहस्ताः किमु जोषमासत ॥३४॥ ४५०८

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि अश्वत्थामवाक्येऽष्टाशीतितमोऽध्याय ८८

सञ्जय उवाच- तौ शङ्खभेरीनिनदे समृद्धे समीयतुः श्वेतहयौ नराग्र्यौ ।
वैकर्तनः सूतपुत्रोऽर्जुनश्च दुर्मन्त्रिते तव पुत्रस्य राजन् ॥ १ ॥
यथा गजौ हैमवतौ प्रभिन्नौ प्रवृद्धदन्ताविव वासितार्थे ।
तथा समाजग्मतुरुग्रवीर्यौ धनञ्जयश्चाधिरथिश्च वीरौ ॥ २ ॥
बलाहकेनेव महाबलाहको यदृच्छया वा गिरिणा यथा गिरिः ।
तथा धनुर्ज्यातलनेमिनिःस्वनैः समीयतुस्ताविषुवर्षवर्षिणौ ॥ ३ ॥
प्रवृद्धशृङ्गद्रुमवीरुदोषधी प्रवृद्धनानाविधनिर्झरौकसौ ।
यथाचलावाचलितौ महाबलौ तथा महास्त्रैरितरेतरं हतः ॥ ४ ॥
स सन्निपातस्तु तयोर्महानभूत्सुरेशवैरोचनयोर्यथा पुरा ।
शरैर्विनुन्नाङ्गनियन्तृवाहयोः सुदुःसहोऽन्यैः कटुशोणितोदकः ॥ ५ ॥
प्रभूतपद्मोत्पलमत्स्यकच्छपौ महाह्रदौ पक्षिगणैरिवावृतौ ।
सुसन्निकृष्टावनिलोद्धतौ यथा तथा रथौ तौ ध्वजिनौ समीयतुः॥ ६॥

ऐसा कहकर दुर्योधनने अश्वत्थामाको अनुकूल कर लिया और फिर अपने वीरोंसे कहा, तुम लोग क्यों चुपचाप खडे हो, अब शीघ्र शस्त्र लेकर शत्रुओंका नाश करो ॥ (३३-३४) [४५०८]

कर्णपर्वमें अठासी अध्याय समाप्त ।

कर्णपर्वमें नवासी अध्याय ।

सञ्जय बोले, हे राजन् ! तब पुरुषश्रेष्ठ श्वेतघोडेवाले कर्ण और अर्जुन शङ्ख और भेर आदिका शब्द सुनाते हुए युद्ध करनेको उपस्थित हुए, जैसे एक हथिनीके लिये बडे दांतवाले हिमाचल की तराईके दो मतवाले हाथी युद्ध करते है, ऐसे ही कर्ण और अर्जुन भी युद्ध करने लगे ॥ जैसे दो मेघ या दो पर्वत युद्ध करनेको चलते हैं ऐसे ही वे दोनों वीर ताल, धनुष और रथके शब्द करते हुए युद्ध करनेको चले ॥ (१-३)

जैसे अनेक वृक्ष और फली फूली लताओंके सहित नाना प्रकारके झरनोंसे युक्त ऊंचे शिखरवाले दो पर्वत युद्ध करनेको चलते है, ऐसे ही इन दोनोंके रथ चले, इनके घोर बाण इस प्रकार चले जैसे पहले समयमें इन्द्र और विरोचनके चले थे । इन बाणोंको उन दोनों के सिवाय दूसरा कोई नहीं सह सकता था, तब दोनोंके शरीरसे रुधिर बहने लगे; जैसे मछली कछवे आदि जन्तुओंसे भरे, वायुसे तरङ्ग लेते, पक्षियोंसे शोभित

कृष्णशल्यरथोपेतौ तुल्यरूपौ महारथौ ॥ १६ ॥
सिंहस्कन्धौ दीर्घभुजौ रक्ताक्षौ हेममालिनौ।
सिंहस्कन्धप्रतीकाशौ व्यूढोरस्कौ महाबलौ ॥
अन्योन्यवधमिच्छन्तावन्योन्यजयकांक्षिणौ ॥ १७ ॥
अन्योन्यमभिधावन्तौ गोष्ठे गोवृषभाविव।
प्रभिन्नाविव मातङ्गौ सुसंरब्धाविवाचलौ ॥ १८ ॥
आशीविषशिशुप्रख्यौ यमकालान्तकोपमौ।
इन्द्रवृत्राविव क्रुद्धौ सूर्यचन्द्रसमप्रभौ ॥ १९ ॥
महाग्रहाविव क्रुद्धौ युगान्ताय समुत्थितौ।
देवगर्भौ देवबलौ देवतुल्यौ च रूपतः ॥ २० ॥
यदृच्छया समायातौ सूर्याचन्द्रमसौ यथा।
बलिनौ समरे दृप्तौ नानाशस्त्रधरौ युधि ॥ २१ ॥
तौ दृष्ट्वा पुरुषव्याघ्रौ शार्दूलाविव धिष्ठितौ।
बभूव परमो हर्षस्तावकानां विशाम्पते ॥ २२ ॥
संशयः सर्वभूतानां विजये समपद्यत।
समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनञ्जयौ ॥ २३ ॥

शल्य सारथीके सहित एक समान दीखने लगे ॥ (१२-१६)

ये दोनों सिंहके समान कन्धे, लम्बी भुजा और लाल नेत्रवाले, दोनों वीर एक दूसरेको मारनेके लिये, अपनी विजयकी इच्छा करके इस प्रकार दौंडे जैसे दो बैल युद्ध करनेको चलते है। मतवारे दो हाथियों वा क्रोधी पर्वत के समान दीखनेवाले ये दोनों सूर्य और चन्द्रमाके समान तेजस्वी, यमराज और मृत्युके समान क्रोधी, विषीले सर्पोंके समान तेज; इस प्रकार युद्ध करनेको चले जैसे इन्द्र और वृत्रासुर चले थे ॥ (१७-१९)

जैसे दो ग्रह प्रलय करनेको उदय होते हैं, ऐसे ही ये दोनों देवपुत्रों के समान पराक्रमी वीर युद्ध करनेको उपस्थित हुए, जैसे इच्छानुसार सूर्य और चन्द्रमा इकट्ठे होजांय, ऐसे ही ये दोनों वीर अनेक प्रकारके शस्त्र धारण करके युद्ध करनेको उपस्थित हुए॥ हे पृथ्वीनाथ! उन दोनों पुरुषसिंहोंको शार्दूलके समान खडा देखकर तुम्हारी सेना बहुत प्रसन्न हुई ॥ (२०—२२)

कर्ण और अर्जुनको युद्धके लिये खडा देख दोनों ओरके वीरोंको अपनी अपनी

नाराचनालीकवराहकर्णान्क्षुरांस्तथा साञ्जलिकार्धचन्द्रान् ॥ १४ ॥
ते सर्वतः समकीर्यन्त राजन्पार्थेषवः कर्णरथं विशन्तः ।
अवाङ्मुखाः पक्षिगणा दिनान्ते विशन्ति केतार्थमिवाशु वृक्षम्॥ १५ ॥
यानर्जुनः सभ्रुकुटीकटाक्षं कर्णाय राजन्नसृजज्जितारिः ।
तान्सायकैर्यसते सूतपुत्रः क्षिप्तान्क्षिप्तान्पाण्डवस्याशु सङ्गान् ॥ १६ ॥
ततोऽस्त्रमाग्नेयमामित्रसाधनं मुमोच कर्णाय महेन्द्रसूनुः ।
भूम्यन्तरिक्षे च दिशोऽर्कमार्गं प्रवृत्य देहोऽस्य बभूव दीप्तः ॥ १७ ॥
योधाश्च सर्वे ज्वलिताम्बरा भृशं प्रदुद्रुवुस्तत्र विदग्धवस्त्राः ।
शब्दश्च घोरोऽतिबभूव तत्र यथा वने वेणुवनस्य दह्यतः ॥ १८ ॥
तद्वीक्ष्य कर्णो ज्वलनास्त्रमुद्यतं सवारुणं तत्प्रशमार्थमाहवे ।
समुत्सृजन्सूतसुतः प्रतापवान्स तेन वह्निं शमयाम्बभूव ॥ १९ ॥
बलाहकौघश्च दिशस्तरस्वी चकार सर्वास्तिमिरेण संवृताः ।
ततो धरित्रीधरतुल्यरोधसः समन्ततो वै परिवार्य वारिणा ॥ २० ॥
तैश्चातिवेगात्स तथाविधोऽपि नीतः शमं वह्निरतिप्रचण्डः ।
बलाहकैरेव दिगन्तराणि व्याप्तानि सर्वाणि यथा नभश्च ॥ २१ ॥
तथा च सर्वास्तिमिरेण वै दिशो मेघैर्वृता न प्रदृश्येत किञ्चित् ।

चलाने आरम्भ किये ॥ जैसे सन्ध्याके समय पक्षी शीघ्रता सहित वृक्षकी ओर दौडते हैं, ऐसेही अर्जुनके बाण कर्णके रथकी ओर सब ओरसे दौडे ॥ हे राजन्! विजयी अर्जुन अपनी भौंह टेढी करके जितने बाण छोडते थे उन सबके झुण्डको कर्ण अपने बाणोंसे काट देते थे ॥ (१४-१६)

तब अर्जुनने शत्रुओंका नाश करनेके लिये आग्नेय बाण चलाया उससे भूमि, आकाश और सूर्यके मार्गतक आग फैल गई उससे कर्णका शरीर प्रदीप्त होगया॥ सब वीरोंके कपडे जलने लगे और सेना भागने लगी तब वहां ऐसा शब्द उठा जैसा जलते हुए वेणुवनमें होता है ॥ (१७-१८)

प्रतापी सूतपुत्र कर्णने अपनी सेनाको जलते देख उसकी शान्तिके लिये वरुण अस्त्र चलाया, तब वह सब अग्नि ठण्डी होगयी, तब अनेक पर्वत तुल्य मेघ आकाशमें आगये और जल वर्षाने लगा और पृथ्वी जलसे भर गयी, उन मेघोंसे आकाश और सब दिशा पूरित होगयीं तथा अर्जुनका शस्त्रभी शान्त होगया, उस समय ऐसा अन्धकार होगया कि किसीको कुछ नहीं दीख

ताभ्यां द्यूतं समासक्तं विजयायेतराय च ।
अस्माकं पाण्डवानां च स्थितानां रणमूर्धनि ॥ ३३ ॥
तौ तु स्थितौ महाराज समरे युद्धशालिनौ ।
अन्योन्यं प्रतिसंरब्धावन्योन्यवधकांक्षिणौ ॥ ३४ ॥
तावुभौ प्रजिहीर्षन्तावित्रद्रवृत्राविव प्रभो ।
भीमरूपधरावास्तां महाधूमाविव ग्रहौ ॥ ३५ ॥
ततोऽन्तरिक्षे साक्षेपा विवादा भरतर्षभ ।
मिथोभेदाश्च भूतानामासन्कर्णार्जुनान्तरे ॥ ३६ ॥
व्यश्रूयन्त मिथो भिन्नाः सर्वलोकास्तु मारिष ।
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ॥ ३७ ॥
प्रतिपक्षग्रहं चक्रुः कर्णार्जुनसमागमे ।
घौरासीत्सूतपुत्रस्य पक्षे मातेव घिष्ठिता ॥ ३८ ॥
भूमिर्धनञ्जयस्यासीन्मातेव जयकांक्षिणी ।
गिरयः सागराश्चैव नद्यश्च सजलास्तथा ॥ ३९ ॥
वृक्षाश्चौषधयश्चैव व्याश्रयन्त परस्परम् ।
असुरा यातुधानाश्च गुह्यकाश्च परन्तप ॥ ४० ॥
ते कर्ण समपद्यन्त हृष्टरूपाः समन्ततः ।

समान खडे होकर देखने लगे और पराजयका सबको निश्चय होगया ॥ २९-३२

उस समय जय और पराजयका दांव रख हम और पाण्डव युद्धरूपी जुवा खेलने लगे ॥ हे महाराज ! तब वे दोनों वीर एक दूसरेको मारनेकी इच्छासे युद्ध करनेको खडे हुए जैसे दो ग्रह धुएंसे भर कर उदय होते हैं । इन्द्र और वृत्रासुर जैसे इकट्ठे हुए थे, ऐसे ही ये दोनों वीर लडनेको उपस्थित हुए ॥ (३३–३५)

हे भरतकुल सिंह ! आकाशमें घूमते हुए सिद्धोंका कर्ण और अर्जुनकी विजयके लिये विवाद होने लगा ॥ उस समय देवता, दानव, गन्धर्व, पिशाच, सर्प और राक्षस आदि सब जगत्निवासी जीव इन कर्णार्जुनकी विजय के लिये विवाद करने लगे। सब आकाश के देवता कर्ण और अर्जुनका पक्ष लेकर विवाद करने लगे। जिस प्रकार आकाशके घूमनेवाले सिद्धोंने माताके समान कर्णका पक्ष धारण किया था । ऐसे ही नदी, समुद्र, वृक्ष और लताओंके सहित पृथ्वीने अर्जुनका पक्ष लिया । (३६–४०)

हे शत्रुनाशन ! उस समय असुर,

तत्पञ्चालाः सोमकाश्चापि राजन्कर्णेनाजौ पीड्यमानाः शरौघैः।
क्रोधाविष्टा विव्यधुस्तं समन्तात्तीक्ष्णैर्बाणैः सूतपुत्रं समेताः॥ ३० ॥
तान्सूतपुत्रो निजघान बाणैः पञ्चालानां रथनागाश्वसङ्घान्।
अभ्यर्दयद्बाणगणैः प्रसह्य विध्वा हर्षात्समरे सूतपुत्रः ॥ ३१ ॥
ते भिन्नदेहा व्यसवो निपेतुः कर्णेषुभिर्भूमितले स्वनन्तः।
क्रुद्धेन सिंहेन यथेभयूथा महावने भीमबलेन तद्वत् ॥ ३२ ॥
पञ्चालानां प्रवरान्संनिहत्य प्रसह्य योधानखिलानदीनः।
ततः स राजन्विरराज कर्णो यथाम्बरे भास्कर उग्ररश्मिः॥ ३३ ॥
कर्णस्य मत्वा तु जयं त्वदीयाः परां मुदं सिंहनादांश्च चक्रुः।
सर्वे ह्यमन्यन्त भृशाहतौ च कर्णेन कृष्णाविति कौरवेन्द्र॥ ३४ ॥
तत्तादृशं प्रेक्ष्य महारथस्य कर्णस्य वीर्यं च परैरसह्यम्।
दृष्ट्वा च कर्णेन धनञ्जयस्य तथाजिमध्ये निहतं तदस्त्रम् ॥ ३५ ॥
ततस्त्वमर्षी क्रोधसन्दीप्तनेत्रो वातात्मजः पाणिना पाणिमार्च्छत्।
भीमोऽब्रवीदर्जुनं सत्यसन्धममर्षितो निःश्वसञ्जातमन्युः ॥ ३६ ॥
कथं नु पापोऽयमपेतधर्मः सूतात्मजः समरेऽद्य प्रसह्य।

डाला ॥ (२८-२९)

हे राजन्! सोमक और पाञ्चालोंने भी क्रोध करके और उनके बाणोंसे व्याकुल होकर चारों ओरसे इकट्ठे होकर कर्णके ऊपर अनेक तेज बाण चलाये॥ सूतपुत्रने भी क्रोधसे भर कर पाञ्चाल देशीय हाथी, घोडे और रथोंपर चढे हुए झुण्डके झुण्डवीर बाणोंसे काटडाले। जैसे महावन में महापराक्रमी सिंह के मारे हुए शरीर टूटे हाथी गिर पडते है, ऐसे ही सूतपुत्रके बाणोंसे व्याकुल होकर तथा मरकर अनेक पाञ्चाल योद्धा गिर गये ॥ (३०-३२)

हे राजन्! उस समय पाण्डवोंके अनेक वीरोंको मारकर प्रतापी कर्ण इस प्रकार शोभित हुए जैसे दोपहरमें प्रखर तेजवाले सूर्य ॥ हे कौरवेन्द्र! कर्णकी इस विजयको देख और यह जानकर कि कर्णने अपने पराक्रमसे कृष्ण और अर्जुनको बहुत व्याकुल कर दिया, तुम्हारी सेनाके वीर सिंहके समान गर्जने लगे ॥ (३३-३४)

इस प्रकार कर्णके पराक्रमको बढते और अर्जुनके शस्त्रका नाश देखकर महापराक्रमी भीमसेनने क्रोधकर अपने हाथ मीज कर सत्यवादी अर्जुनसे ऐसे वचन कहे, हे अर्जुन! इस पापी अधर्मी सूतके बेटेने तुम्हारे देखते देखते इतने

प्रेताश्चैव पिशाचाश्च क्रव्यादाश्च मृगाण्डजाः ॥ ५० ॥
राक्षसाः सह यादोभिः श्वसृगालाश्च कर्णतः ।
देवब्रह्मनृपर्षीणां गणाः पाण्डवतोऽभवन् ॥ ५१ ॥
तुम्बुरुप्रमुखा राजन्गन्धर्वाश्च यतोऽर्जुनः ।
राधेयाः सहसौनेया गन्धर्वाप्सरसां गणाः ॥ ५२ ॥
ईहामृगाः पक्षिगणा द्विपाश्वरथपत्तिभिः ।
उह्यमानास्तथा मेघैर्वायुना च मनीषिणः ॥ ५३ ॥
दिदृक्षवः समाजग्मुः कर्णार्जुनसमागमम् ।
देवदानवगन्धर्वा नागयक्षाः पतत्रिणः ॥ ५४ ॥
महर्षयो वेदविदः पितरश्च स्वधाभुजः ।
तपो विद्यास्तथौषध्यो नानारूपबलान्विताः ॥ ५५ ॥
अन्तरिक्षे महाराज विनदन्तोऽवतस्थिरे ।
ब्रह्मा ब्रह्मर्षिभिः सार्धं प्रजापतिभिरेव च ॥ ५६ ॥
भवश्चैव स्थितो याने दिव्यं तं देशमागमत् ।
समेतौ तौ महात्मानौ दृष्ट्वा कर्णधनञ्जयौ ॥ ५७ ॥
अर्जुनो जयतां कर्णमिति शक्रोऽब्रवीत्तदा ।
जयतामर्जुनं कर्ण इति सूर्योऽभ्यभाषत ॥ ५८ ॥

ब्राह्मण, क्षत्री, यज्ञ और दक्षिणा सब अर्जुनकी ओर हुए। भूत, प्रेत, पिशाच और मांस खानेवाले, सब जीव जन्तु, राक्षस, चर, अचर, कुत्ते, और गीदड कर्णकी ओर हुए। देवऋषि, ब्रह्मऋषि और राजऋषियोंने अर्जुनका पक्ष लिया ॥ तुम्बुरु आदि सब गन्धर्व, अप्सरा और मुनिपुत्र भी अर्जुनही की ओर हुए ॥ (५०-५२)

जैसे वायुसे मेघ भाग जाते हैं, ऐसे ही रथको देखकर भेडिये, पक्षियोंके झुण्ड, पदाति और रथ भागने लगे। अर्जुन और कर्णका युद्ध देखनेके लिये, देवता, दानव, गन्धर्व, नाग, यक्ष और पक्षी आये ॥ इसी प्रकार वेद जाननेवाले महऋषि, श्राद्ध खानेवाले पितर, अनेक रूप धारनी विद्या, तपस्या औषधी भी आकाशमें गर्जती हुई घूमने लगी ॥ (५३-५६)

हे राजन् ! इस समय प्रजापति और ब्रह्मऋषियोंके सहित ब्रह्मा तथा दिव्य विमान पर चढकर शिव भी महात्मा कर्ण और अर्जुनका युद्ध देखने आये ॥ इन्द्रने कहा कि, अर्जुन कर्णको जीते

यया धृत्या निहतं तामसास्त्रं युगे युगे राक्षसाश्चापि घोराः ॥ ४४ ॥
दम्भोद्भवाश्चासुराश्चाहवेषु तया धृत्या जहि कर्ण त्वमद्य ।
अनेन चास्य क्षुरनेमिनाद्य सञ्छिन्धि मूर्धानमरेः प्रसह्य ॥ ४५ ॥
मया विसृष्टेन सुदर्शनेन वज्रेण शक्रो नमुचेरिवारेः ।
किरातरूपी भगवान्सुधृत्या त्वया महात्मा परितोषितोऽभूत् ॥४६॥
तां त्वं पुनर्वीर धृतिं गृहीत्वा सहानुबन्धं जहि सूतपुत्रम् ।
ततो महीं सागरमेखलां त्वं सपत्तनां ग्रामवतीं समृद्धाम् ॥ ४७ ॥
प्रयच्छ राज्ञे निहतारिसङ्घां यशश्च पार्थातुलमाप्नुहि त्वम् ।
स एवमुक्तोऽतिबलो महात्मा चकार बुद्धिं हि वधाय सौतेः ॥ ४८ ॥
स चोदितो भीमजनार्दनाभ्यां स्मृत्वा तथात्मानमवेक्ष्य सर्वम् ।
इहात्मनश्चागमने विदित्वा प्रयोजनं केशवमित्युवाच ॥ ४९ ॥
प्रादुष्करोम्येष महास्त्रमुग्रं शिवाय लोकस्य वधाय सौतेः ।
तन्मेऽनुजानातु भवान्सुराश्च ब्रह्मा भवो वेदविदश्च सर्वे ॥ ५० ॥
इत्युच्य देवं स तु सव्यसाची नमस्कृत्वा ब्रह्मणे सोऽमितात्मा ।
तदुत्तमं ब्राह्ममसह्यमस्त्रं प्रादुश्चक्रे मनसा यद्विधेयम् ॥ ५१ ॥

धारणासे तामस अस्त्रका नाश किया था, और जिस विद्यासे युग युगमें घोर राक्षसोंका नाश किया है, और जिससे दुष्ट दानवोंको मारा है, उसी साहससे कर्णको जीतो; अब तुम इस तेज बाणसे इस शत्रुका शिर काट लो ॥ (४२–४५)

तुमने अपने बाहुबलसे युद्धमें किरात रूपधारी भगवान् शिवको प्रसन्न किया था, जैसे इन्द्रने नमुचीका नाश किया था ऐसे हमारे इस चक्रसे इस दुष्ट कर्णका नाश करो ॥ हे वीर ! यदि तुम अपने बाणोंसे आज इस सूतपुत्रको मारकर ग्राम और नगरोंके सहित समुद्रवलयांकित भूमिको अपने जेठे भाईको समर्पित करोगे, तो तुम्हें अतुल यश मिलेगा ॥ (४६–४८)

श्रीकृष्णके ऐसे वचन सुन महात्मा बलवान् अर्जुनने कर्णके मारनेका विचार किया ॥ श्रीकृष्ण और भीमसेनके ऐसे वचन सुन और अपने बलका स्मरण कर तथा अपनी सेनाकी दशा देख अर्जुन श्रीकृष्णसे ऐसे बोले, अब मैं जगत् के कल्याण और सूतपुत्रके मारनेके लिये यह घोर शस्त्र चलाता हूं । आप, सब देवता, ब्रह्मा, शिव और सब वेद विद्या जाननेवाले, हमारे इस वचनको सुने, और हमें अनुमति दें, अब हम यह शस्त्र छोड़ते हैं ॥ (४८–५०)

श्रीकृष्णसे ऐसे कह पराक्रमी अर्जुन

व्यज्ञापयत देवेशमिदं मतिमतां वरः ।
पूर्व भगवता प्रोक्तं कृष्णयोर्विजयो ध्रुवः ॥ ६७ ॥
तत्तथास्तु नमस्तेऽस्तु प्रसीद भगवन्मम ।
ब्रह्मेशानावथो वाक्यमूचतुस्त्रिदशेश्वरम् ॥ ६८ ॥
विजयो ध्रुवमेवास्य विजयस्य महात्मनः ।
खाण्डवेये हुतभुक्तोषितः सव्यसाचिना ॥ ६९ ॥
स्वर्गं च समनुप्राप्य साहाय्यं शक्र ते कृतम् ।
कर्णश्च दानवः पक्ष अतः कार्यः पराजयः ॥ ७० ॥
एवं कृते भवेत्कार्यं देवानामेव निश्चितम् ।
आत्मकार्यं च सर्वेषां गरीयस्त्रिदशेश्वर ॥ ७१ ॥
महात्मा फाल्गुनश्चापि सत्यधर्मरतः सदा ।
विजयस्तस्य नियतं जायते नात्र संशयः ॥ ७२ ॥
तोषितो भगवान्येन महात्मा वृषभध्वजः ।
कथं वा तस्य न जयो जायते शतलोचन ॥ ७३ ॥
यस्य चक्रे स्वयं विष्णुः सारथ्यं जगतः प्रभुः ।
मनस्वी बलवाञ्शूरः कृतास्त्रोऽथ तपोधनः ॥ ७४ ॥
बिभर्ति च महातेजा धनुर्वेदमशेषतः ।

करके बोले, हे भगवन् ! आपने पहले कहा था कि, कृष्ण और अर्जुनकी निश्चय विजय होगी । हम आपको प्रणाम करते हैं अब आप अपने पहले वचनको सिद्ध कीजिये । (६५—६८)

तब ब्रह्मा और शिव बोले, जिस अर्जुनने खाण्डव वनमें अग्निको तृप्त किया था और जिसने स्वर्गमें जाकर तुम्हारी सहायता की थी, उसी अर्जुनकी विजय है, कर्ण दानवोंके पक्षमें है, इसलिये हार जायगे ॥ हे देवनाथ ! ऐसा ही होनेसे देवतोंका कल्याण होगा जगत्में सबको अपना कल्याण प्यारा है ॥ इसलिये ऐसा ही करना चाहिये । (६८--७१)

महात्मा अर्जुन सत्यवादी और धार्मिक है इसलिये इन्होंकी विजय होनी चाहिये ॥ हे सहस्र नेत्रधारी ! जिस अर्जुनने युद्धमें शिवको प्रसन्न किया है, सो कर्णको क्यों नहीं जीत सकेंगे ? जिनके रथको सब शस्त्र जाननेवाले, बलवान् शूरवीर तीनलोकके स्वामी साक्षात् श्रीकृष्ण हांक रहे है और जो आप भी सब शस्त्र विद्याको जानते हैं,

अन्यस्य सव्यः सह वर्मणा च क्षुरप्रकृत्तः पतितो धरण्याम् ।
एवं समस्तानपि योधमुख्यान्विध्वंसयामास किरीटमाली॥ ५९ ॥
शरैः शरीरान्तकरैः सुघोरैर्दौर्योधनं सैन्यमशेषमेव ।
वैकर्तनेनापि तथाजिमध्ये सहस्रशो बाणगणा विसृष्टाः ॥ ६० ॥
ते घोषिणः पाण्डवमभ्युपेयुः पर्जन्यमुक्ता इव वारिधाराः ।
ततः सकृष्णं च किरीटिनं च वृकोदरं चाप्रतिमप्रभावः ॥ ६१ ॥
त्रिभिस्त्रिभिर्भीमबलो निहत्य ननाद घोरं महता स्वरेण ।
सकर्णबाणाभिहतः किरीटी भीमं तथा प्रेक्ष्य जनार्दनं च ॥ ६२ ॥
अमृष्यमाणः पुनरेव पार्थः शरान्दशार्ष्टौ च समुद्वहर्ह ।
स केतुमेकेन शरेण विध्वा शल्यं चतुर्भिस्त्रिभिरेव कर्णम् ॥६३ ॥
ततः स सुवर्णैर्दशभिर्जघान सभापतिं काञ्चनवर्मनद्धम् ।
स राजपुत्रो विशिरा विबाहुर्विवाजिसूतो विधनुर्विकेतुः ॥ ६४ ॥
हतो रथाग्रादपतत्स रुग्णः परश्वधैः शाल इवावकृत्तः ।
पुनश्च कर्णं त्रिभिरष्टभिश्च द्वाभ्यां चतुर्भिर्दशभिश्च विध्वा ॥६५ ॥
चतुःशतान्द्विरदान्सायुधान्वै हत्वा रथानष्टशताञ्जघान ।

सुन्दर हाथ खड्गके सहित कट गया, किसीका बाया हाथ क्षुर बाणोंसे कटनेसे कवचके सहित पृथ्वीमें गिर गया, इस प्रकार अर्जुनने अनेक प्रधान वीरोंको मार डाला ॥ (५७-५९)

जैसे अर्जुनने अपने तेज और घोर बाणोंसे तुम्हारी सेनाका नाश किया ऐसे ही कर्णने भी युद्धमें सहस्रों बाण चलाये वे सब बाण अर्जुन, श्रीकृष्ण और भीमसेनके शरीरमें लगे । तेजस्वी कर्णके बाण इस समय वर्षते हुए मेघकी धाराके समान चलनेलगे । फिर महाबलवान् कर्ण तीनोंके शरीरमें तीन तीन बाण मार कर सिंहके समान गर्जने लगे । (५९-६२)

उन बाणोंके लगनेसे तथा श्रीकृष्ण और भीमसेनको अत्यन्त व्याकुल देखकर और क्रोध करके अर्जुनने फिर अठारह बाण चलाये । एक ध्वजामें तीन कर्णके शरीरमें और चार शल्यके मारे, शेष दश बाण सुवर्ण कवचधारी राजकुमार सभापतिके शरीरमें मारे, उन बाणोंके लगनेसे उस राजपुत्रके हाथ, शिर, सारथी, ध्वजा, घोडे, धनुष और केतु सब कट गये । वह अपने रथसे इस प्रकार गिरा जैसे कुल्हाडीसे कटा शाल वृक्ष । (६२-६५)

फिर अर्जुनने कर्णके शरीरमें तीन,

सहितो द्रोणभीष्माभ्यां नाकलोकमवाप्नुयात् ॥ ८३ ॥
इत्युक्तो देवदेवाभ्यां सहस्राक्षोऽब्रवीद्वचः ।
आमन्त्र्य सर्वभूतानि ब्रह्मेशानानुशासनम् ॥ ८४ ॥
श्रुतं भवद्भिर्यत्प्रोक्तं भगवद्भ्यां जगद्धितम् ।
तत्तथा नान्यथा तद्धि तिष्ठध्वं विगतज्वराः ॥ ८५ ॥
इति श्रुत्वेन्द्रवचनं सर्वभूतानि मारिष ।
विस्मितान्यभवन्राजन्पूजयाञ्चक्रिरे तदा ॥ ८६ ॥
व्यसृजंश्च सुगन्धीनि पुष्पवर्षाणि हर्षिताः ।
नानारूपाणि विबुधा देवतूर्याण्यवादयन् ॥ ८७ ॥
दिदृक्षवश्चाप्रतिमं द्वैरथं नरसिंहयोः ।
देवदानवगन्धर्वाः सर्व एवावतस्थिरे ॥ ८८ ॥
रथौ तयोः श्वेतहयौ दिव्यौ युक्तौ महात्मनोः ।
यौ तौ कर्णार्जुनौ राजन्प्रहृष्टौ व्यवतिष्ठताम् ॥ ८९ ॥
समागता लोकवीराः शङ्खान्दध्मुः पृथक् पृथक् ।
वासुदेवार्जुनौ वीरौ कर्णशल्यौ च भारत ॥ ९० ॥
तद्भीरुसन्त्रासकरं युद्धं समभवत्तदा ।
अन्योन्यस्पर्धिनोरुग्रं शक्रशम्बरयोरिव ॥ ९१ ॥

स्वर्गलोकमें निवास करें चाहे वसुओंके लोकमें रहैं ॥ देवदेव ब्रह्मा और शिवके वचन सुन इन्द्रने सब देवतोंको अपने पास बुलाकर ऐसे वचन कहे, जो कुछ इन दोनों ईश्वरोंने जगत्के कल्याणके लिये कहा सो तुम लोग सुनो, अब ऐसाही होगा सब सुखी हो ॥ ८२-८५

हे राजन् ! इन्द्रके ऐसे वचन सुन सब देवता प्रसन्न हुए और आश्चर्य करके इन्द्रकी प्रशंसा करने लगे और प्रसन्न होकर सुगन्धियोंसे भरे अनेक प्रकारके फूल वर्षाने लगे ॥ और अनेक प्रकारके बाजे बजाने लगे ॥ पुरुषसिंह अर्जुन और कृष्णका युद्ध देखनेको सब देवता स्थिर हुए ॥ सफेद घोडोंसे युक्त रथमें बैठे हुए महात्मा कृष्ण और अर्जुनको सब प्रसन्न होकर देखने लगे, तब इधरसे कृष्ण और अर्जुनने उधरसे कर्ण और वीर शल्यने अपने अपने शङ्ख बजाये ॥ (८६-९०)

तब इन दोनोंका भयानक युद्ध इस प्रकार होने लगा जैसे परस्पर इन्द्र और शम्बरका हुआ था ॥ हे भारत ! रथपर चढे इन दोनोंकी निर्मल ध्वजा आकाश

स कार्मुकज्यातलसंनिपातः सुमुक्तबाणस्तुमुलो बभूव ॥ ७३ ॥
घ्नतोस्तथान्योन्यमिषुप्रवेकैर्धनञ्जयस्याधिरथेश्च तत्र ।
ततो धनुर्ज्या सहसातिकृष्टा सुघोषमच्छिद्यत पाण्डवस्य ॥ ७४ ॥
तस्मिन्क्षणे पाण्डवं सूतपुत्रः समाचिनोत्क्षुद्रकाणां शतेन ।
निर्मुक्तसर्पप्रतिमैरभीक्ष्णं तैलप्रधौतैः खगपत्रवाजैः ॥ ७५ ॥
षष्ट्या विभेदाशु च वासुदेवमनन्तरं फाल्गुनमष्टभिश्च ।
पूषात्मजो मर्मसु निर्विभेद मरुत्सुतं चायुतशः शराग्र्यैः॥ ७६ ॥
कृष्णं च पार्थं च तथा ध्वजं च पार्थानुजान्सोमकान्पातयंश्च ।
प्राच्छादयंस्ते विशिखैः पृषत्कैर्जीमूतसङ्घा नभसीव सूर्यम्॥७७ ॥
आगच्छतस्तान्विशिखैरनेकैर्न्यष्टम्भयत्सूतपुत्रः कृतास्त्रः ।
तैरस्तमस्त्रं विनिहत्य सर्वं जघान तेषां रथवाजिनागान् ॥ ७८ ॥
तथा तु सैन्यप्रवरांश्च राजन्नभ्यर्दयन्मार्गणैः सूतपुत्रः ।
ते भिन्नदेहा व्यसवो निपेतुः कर्णेषुभिर्भूमितले स्वनन्तः ॥ ७९ ॥
सिंहेन क्रुद्धेन यथा श्वयूथ्या महाबला भीमबलेन तद्वत् ।

युद्ध करते देख पृथ्वी और आकाशके सब देवता और मनुष्य खडे रह गये, धनुष और तालका घोर शब्द, उत्तम बाणोंका चलना और बाणोंका बाणोंसे कटना देखने योग्य था। तब अर्जुनके अपने धनुषको अत्यन्त वेगसे खींचनेसे रोदा टूट गया। (७२–७४)

इतने ही समयमें सूतपुत्रने अर्जुनके शरीरमें सौ क्षुद्रक बाण मारे, फिर केंचुलीसे निकले सांपके समान तेलमें धोये हुए पक्षी पङ्ख युक्त साठ बाण श्रीकृष्णके शरीरमें मारे, और फिर आठ बाण अर्जुनके मारे, फिर प्रतापी कर्णने भीमसेनके मर्मस्थानोंमें असंख्य बाण मारकर कृष्ण और अर्जुनको बाणोंसे व्याकुल करके नकुल और सहदेवके शरीरमें अनेक बाण मारकर अनेक पाञ्चाल क्षत्रियोंको मारडाला। ७४-७७

जैसे मेघ सूर्यको छिपा देते है, ऐसे ही उन वीरोंने भी कर्णके रथको अपने बाणोंसे छिपा दिया। उनको आते देख शस्त्रविद्या जाननेवाले,कर्णने अपने बाणोंसे रोक दिया। इनके चलाये हुए बाणोंको काटकर अनेक हाथी,घोडे और मनुष्योंको काट डाला ॥ अनेक प्रधान वीर भी मर गये। वे सब शब्द करते हुए कर्णके बाणोंसे व्याकुल होकर पृथ्वीमें गिर गये, और मर गये, जैसे बलवान् सिंह बडे बडे कुत्तोंको मारडालता है, ऐसे ही कर्णने पाञ्चालोंको मार डाला,

कर्णं चाप्यजयद् दृष्ट्वा कुन्तीपुत्रो धनञ्जयः ।
अथाब्रवीत्सूतपुत्रः शल्यमाभाष्य सस्मितम्॥ १०१ ॥
यदि पार्थो रणे हन्यादद्य मामिह कर्हिचित् ।
किं करिष्यसि संग्रामे शल्य सत्यमथोच्यताम् ॥ १०२ ॥

शल्य उवाच— यदि कर्ण रणे हन्यादद्य त्वां श्वेतवाहनः ।
उभावेकरथेनाहं हन्यां माधवपाण्डवौ ॥ १०३ ॥

सञ्जय उवाच— एवमेव तु गोविन्दमर्जुनः प्रत्यभाषत
तं प्रहस्याब्रवीत्कृष्णः सत्यं पार्थमिदं वचः ॥ १०४ ॥
पतेद्दिवाकरः स्थानाच्छुष्येदपि महोदधिः ।
शैत्यमग्निरियान्न त्वां हन्यात्कर्णो धनञ्जयः ॥ १०५ ॥
यदि चैतत्कथञ्चित्स्याल्लोकपर्यासनं भवेत् ।
हन्यां कर्ण तथा शल्यं बाहुभ्यामेव संयुगे ॥ १०६ ॥
इति कृष्णवचः श्रुत्वा प्रहसन्कपिकेतनः ।
अर्जुनः प्रत्युवाचेदं कृष्णमक्लिष्टकारिणम् ॥ १०७ ॥
मम तावदपर्याप्तौ कर्णशल्यौ जनार्दन ।
सपताकध्वजं कर्णं सशल्यरथवाजिनम् ॥ १०८ ॥

दोनोंके नेत्र युद्धमें श्रीकृष्ण जीते ॥ इसी प्रकार नेत्र युद्धमें कर्णको अर्जुनने जीत लिया तब कर्णने शल्यको पुकारकर ऐसे वचन कहे । हे शल्य ! आप सत्य सत्य कहो यदि अर्जुन मुझे युद्धमें मार डालेंगे तो आप क्या कीजियेगा ? (९९–१०२)

शल्य बोले, हे कर्ण ! यदि अर्जुन युद्धमें तुमको मारेंगे तो मैं एकला ही कृष्ण और अर्जुनको मार डालूंगा ॥ (१०३)

सञ्जय बोले, हे राजन् ! इसी प्रकार अर्जुनने श्रीकृष्णसे पूछा, वह सुनकर श्रीकृष्णने हंसकर कहा कि, हे कुन्तीपुत्र ! तुम जो कहते हो सो सत्य है । परन्तु चाहे समुद्र सूख जाय, अग्नि ठण्ढी होजाय, सूर्य अपने स्थानसे गिर जायं परन्तु कर्ण तुमको न मार सकेगा, यदि यह सब जगत् उलट जाय और कर्ण तुमको मारही डाले तो मैं केवल अपने हाथोंहीसे कर्ण और शल्यको पीस दूंगा ॥ (१०४–१०६)

श्रीकृष्णके ऐसे वचन सुन अर्जुन हंसकर ऐसे बोले, हे कृष्ण ! मैं एकला ही घोडे, शल्य, पताका और ध्वजाके सहित कर्णके मारनेमें समर्थ हूं । हे कृष्ण ! आप थोडे समयमें देखेंगे कि

प्रक्रीडमानोऽथ श्मशानमध्ये रौद्रे मुहूर्ते रुधिरार्द्रगात्रः ॥ ८७ ॥
ततस्त्रिभिस्तं त्रिदशाधिपोपमं शरैर्विभेदाधिरथिर्धनञ्जयम् ।
शरांश्च पञ्च ज्वलितानिवोरगान्प्रवेशयामास जिघांसयाच्युतम् ॥ ८८ ॥
ते वर्म भित्त्वा पुरुषोत्तमस्य सुवर्णचित्रा न्यपतन्सुमुक्ताः ।
वेगेन गामाविविशुः सुवेगाः स्नात्वा च कर्णाद्विमुखाः प्रतीयुः ॥ ८९ ॥
तान्पञ्चभल्लैर्दशभिः सुमुक्तैस्त्रिधा त्रिधैकैकमथोच्चकर्त ।
धनञ्जयास्त्रैर्न्यपतन्पृथिव्यां महाहयस्तक्षकपुत्रपक्षाः ॥ ९० ॥
ततः प्रजज्वाल किरीटमाली क्रोधेन कक्षं प्रदहन्निवाग्निः ।
तथा विनुन्नाङ्गमवेक्ष्य कृष्णं सर्वेषुभिः कर्णभुजप्रसृष्टैः ॥ ९१ ॥
स कर्णमाकर्णविकृष्टसृष्टैः शरैः शरीरान्तकरैर्ज्वलद्भिः ।
मर्मस्वविद्ध्यत्स चचाल दुःखादैवादवातिष्ठत धैर्यबुद्धिः ॥ ९२ ॥
ततः शरौघैः प्रदिशो दिशश्च रवेः प्रभा कर्णरथश्च राजन् ।
अदृश्यमासीत्कुपिते धनञ्जये तुषारनीहारवृतं यथा नभः ॥ ९३ ॥
स चक्ररक्षानथ पादरक्षान्पुरःसरान्पृष्ठगोपांश्च सर्वान् ।
दुर्योधनेनानुमतानरिघ्नः समुद्यतान्सरथान्सारभूतान् ॥ ९४ ॥

कर्ण स्मशानमें घूमते हुए शिवके समान घूमने लगे ॥ (८४–८७)

तब कर्णने इन्द्रके समान पराक्रमी अर्जुनके शरीरमें तीन और कृष्णके शरीमें मारनेके लिये अग्निके समान प्रकाशित जलते हुए पांच बाण मारे। वे बाण उनके कवच काटकर वेगसे रुधिरमें भीगकर पृथ्वीमें घुस गये। कर्णने जो तक्षकपुत्र अश्वसेनके मन्त्र युक्त पांच बाण कृष्ण की ओर चलाये थे, उन को अर्जुनने अपने दश बाणोंसे काटकर पृथ्वीमें गिरा दिया ॥ (८८–९०)

कर्णके बाणोंसे निकले हुए सांपोंसे कृष्णको व्याकुल देख अर्जुन इस प्रकार क्रोधसे जलने लगे, जैसे काठमें दबी हुई अग्नि एकबार जलती है। तब अर्जुन ने कर्णके शरीरमें कानतक खींचकर शरीर नाश करनेके योग्य अनेक बाण मारे, उनके लगनेसे कर्ण कांपने लगे। परन्तु प्रारब्ध और धीरसे भाग नहीं सके ॥ जैसे कुहर बरसनेसे आकाश छिप जाता है, ऐसे ही अर्जुनके बाणोंसे दिशा सूर्यकी किरण और कर्णका रथ ये सब छिप गये ॥ दुर्योधनकी आज्ञासे आये हुए कर्णके रथके आगे पीछे और इधर उधर रक्षा करनेवाले रथपर चढे अनेक वीरों को अर्जुनने मार डाला ॥(९१-९४)

वाग्भिश्चामृतकल्पाभिर्धर्मराजं च पाण्डवम् ॥११७॥४४७४

इति श्रीमहाभारते शतसाहस्र्या० कर्णपर्वणि कर्णार्जुनसमागमें द्वैरथे सप्ताशीतितमोऽध्याय ॥ ८७ ॥

सञ्जय उवाच — तद्देवनागासुरसिद्धयक्षैर्गन्धर्वरक्षोप्सरसां च सङ्घैः ।
ब्रह्मर्षिराजर्षिसुपर्णजुष्टं बभौ वियद्विस्मयनीयरूपम् ॥ १ ॥
नानद्यमानं निनदैर्मनोज्ञैर्वादित्रगीतस्तुतिनृत्यहासैः ।
सर्वेऽन्तरिक्षं ददृशुर्मनुष्याः खस्थाश्च तद्विस्मयनीयरूपम् ॥ २ ॥
ततः प्रहृष्टाः कुरुपाण्डुयोधा वादित्रशङ्खस्वनसिंहनादैः ।
विनादयन्तो वसुधां दिशश्च स्वनेन सर्वान्द्विषतो निजघ्नुः ॥ ३ ॥
नराश्वमातङ्गरथैः समाकुलं शरासिशक्त्यृष्टिनिपातदुःसहम् ।
अभीरुजुष्टं हतदेहसंकुलं रणाजिरं लोहितमाबभौ तदा ॥ ४ ॥
बभूव युद्धं कुरुपाण्डवानां यथा सुराणामसुरैः सहाभवत् ।
तथा प्रवृत्ते तुमुले सुदारुणे धनञ्जयस्याधिरथेश्च सायकैः ॥ ५ ॥
दिशश्च सैन्यं च शितैरजिह्मगैः परस्परं प्रावृणुतां सुदंशितैः ।
ततस्त्वदीयाश्च परे च सायकैः कृतेऽन्धकारे ददृशुर्न किञ्चन॥ ६ ॥

के समान वचनोंसे रोती हुई द्रौपदीको और धर्मराज युधिष्ठिर को प्रसन्न करोगे ॥ (११५—११७) [४४७४]

कर्णपर्वमें सतासी अध्याय समाप्त ।

कर्णपर्वमें अठासी अध्याय ।

सञ्जय बोले, हे राजन् ! उस समय देवता, सांप, राक्षस, सिद्ध, गन्धर्व, यक्ष और अप्सराओंके झुण्डसे आकाश भर गया और विचित्र रूपी हो गया ॥ नीचे खडे हुए सब वीरोंने उस समय आकाशमें गीत, बाजे और नाच देखकर बहुत आश्चर्य किया और उत्तम वस्तुओंको देख बहुत प्रसन्न हुए । दोनों ओरके सब योद्धा प्रसन्न होकर अनेक प्रकारके बाजे और शङ्ख बजाकर शत्रुओंको मारने लगे ॥ (१—३)

उस समय हाथी, घोडे, रथ और मनुष्योंसे भरी हुई बाण, अग्नि, शक्ति आदि शस्त्रोंसे शोभित और मरे हुए शरीरोंसे भरी हुई वह युद्धभूमि रुधिरसे भरजानेके कारण अत्यन्त शोभित हुई, उसके समीप कादरके जानेकी सामर्थ न थी, जिस प्रकार देवता और राक्षसोंका युद्ध हुआ था, ऐसे ही यह कौरव और पाण्डवोंका घोर युद्ध हुआ । तब अर्जुन और कर्ण भी घोर बाण चलाने लगे । उस समय अर्जुन कर्णके मारनेके लिये और कर्ण अर्जुनके मारनेके लिये अपने बाणोंसे सेनाको मारने लगे । उस समय सब दिशाओंमें छाये हुए बाणोंसे युद्धमें

प्रक्रीडमानोऽथ श्मशानमध्ये रौद्रे मुहूर्ते रुधिरार्द्रगात्रः ॥ ८७ ॥
ततस्त्रिभिस्तं त्रिदशाधिपोपमं शरैर्विभेदाधिरथिर्धनञ्जयम् ।
शरांश्च पञ्च ज्वलितानिवोरगान्प्रवेशयामास जिघांसयाच्युतम् ॥ ८८ ॥
ते वर्म भित्त्वा पुरुषोत्तमस्य सुवर्णचित्रा न्यपतन्सुमुक्ताः ।
वेगेन गामाविविशुः सुवेगाः स्नात्वा च कर्णाद्विमुखाः प्रतीयुः ॥ ८९ ॥
तान्पञ्चभिर्हैदशभिः सुमुक्तैस्त्रिधा त्रिधैकैकमथोच्चकर्त ।
धनञ्जयास्त्रैर्न्यपतन्पृथिव्यां महाहयस्तक्षकपुत्रपक्षाः ॥ ९० ॥
ततः प्रजज्वाल किरीटमाली क्रोधेन कक्षं प्रदहन्निवाग्निः ।
तथा विनुन्नाङ्गमवेक्ष्य कृष्णं सर्वेषुभिः कर्णभुजप्रसृष्टैः ॥ ९१ ॥
स कर्णमाकर्णविकृष्टसृष्टैः शरैः शरीरान्तकरैर्ज्वलद्भिः ।
मर्मस्वविद्ध्यत्स चचाल दुःखादैवादवातिष्ठत धैर्यबुद्धिः ॥ ९२ ॥
ततः शरौघैः प्रदिशो दिशश्च रवेः प्रभा कर्णरथश्च राजन् ।
अदृश्यमासीत्कुपिते धनञ्जये तुषारनीहारवृतं यथा नभः ॥ ९३ ॥
स चक्ररक्षानथ पादरक्षान्पुरःसरान्पृष्ठगोपांश्च सर्वान् ।
दुर्योधनेनानुमतानरिघ्नः समुद्यतान्सरथान्सारभूतान् ॥ ९४ ॥

कर्ण स्मशानमें घूमते हुए शिवके समान घूमने लगे ॥ (८४–८७)

तब कर्णने इन्द्रके समान पराक्रमी अर्जुनके शरीरमें तीन और कृष्णके शरीमें मारनेके लिये अग्निके समान प्रकाशित जलते हुए पांच बाण मारे । वे बाण उनके कवच काटकर वेगसे रुधिरमें भीगकर पृथ्वीमें घुस गये। कर्णने जो तक्षकपुत्र अश्वसेनके मन्त्र युक्त पांच बाण कृष्ण की ओर चलाये थे, उन को अर्जुनने अपने दश बाणोंसे काटकर पृथ्वीमें गिरा दिया ॥ (८८–९०)

कर्णके बाणोंसे निकले हुए सांपोंसे कृष्णको व्याकुल देख अर्जुन इस प्रकार क्रोधसे जलने लगे, जैसे काठमें दबी हुई अग्नि एकबार जलती है। तब अर्जुन ने कर्णके शरीरमें कानतक खींचकर शरीर नाश करनेके योग्य अनेक बाण मारे, उनके लगनेसे कर्ण कांपने लगे । परन्तु प्रारब्ध और धीरसे भाग नहीं सके ॥ जैसे कुहर बरसनेसे आकाश छिप जाता है, ऐसे ही अर्जुनके बाणोंसे दिशा सूर्यकी किरण और कर्णका रथ ये सब छिप गये ॥ दुर्योधनकी आज्ञासे आये हुए कर्णके रथके आगे पीछे और इधर उधर रक्षा करनेवाले रथपर चढे अनेक वीरों को अर्जुनने मार टाला ॥(९१-९४)

ततो विसस्रुः पुनरर्दिता नरा नरोत्तमाभ्यां कुरुपाण्डवाश्रयाः ॥ १३ ॥
सनागपत्त्यश्वरथा दिशो दश तथा यथा सिंहहता वनौकसः ।
ततस्तु दुर्योधनभोजसौबलाः कृपेण शारद्वतसूनुना सह ॥ १४ ॥
महारथाः पञ्च धनञ्जयाच्युतौ शरैः शरीरार्तिकरैरताडयन् ।
धनूंषि तेषामिषुधीन्ध्वजान्हयान्रथांश्च सूतांश्च धनञ्जयः शरैः ॥१५॥
समं प्रमथ्याशु परान्समन्ततः शरोत्तमैर्द्वादशभिश्च सूतजम् ।
अथाभ्यधावंस्त्वरिताः शतं रथाः शतं गजाश्चार्जुनमाततायिनः ॥१६॥
शकास्तुषारा यवनाश्च सादिनः सहैव काम्बोजवरैर्जिघांसवः ।
वरायुधान्पाणिगतैः शरैः सह क्षुरैर्न्यकृन्तत्प्रपतञ्शिरांसि च ॥१७॥
हयांश्च नागांश्च रथांश्च युध्यतो धनञ्जयः शत्रुगणान्क्षितौ क्षिणोत् ।
ततोऽन्तरिक्षे सुरतूर्यनिःस्वनाः ससाधुवादाहृषितैः समीरिताः ॥१८॥
निपेतुरप्युत्तमपुष्पवृष्टयः सुगन्धिगन्धाः पवनेरिताः शुभाः ।
तदद्भुतं देवमनुष्यसाक्षिकं समीक्ष्य भूतानि विसिस्मियुस्तदा ॥१९॥
तवात्मजः सूतसुतश्च न व्यथां न विस्मयं जग्मतुरेकनिश्चयौ ।

मनुष्योंको मारने लगे । तब दोनों ओरकी सेना फिर भागने लगी, जिस समय तुम्हारी सेना सिंहसे डरे हुए हरिनोंके समान भागने लगी,तब दुर्योधन, कृतवर्मा, कृपाचार्य, अश्वत्थामा और सुबलपुत्र शकुनि कृष्ण और अर्जुनके ऊपर शरीर काटनेवाले बाण छोडने लगे।(१३-१५)

तब अर्जुनने क्षणमात्रमें अपने बाणोंसे इन पाचों महारथोंके घोडे, सारथी, ध्वजा, रथ और धनुष काट दिये ।तब अर्जुनने इन सबको अपने बाणोंसे व्याकुल करके सुतपुत्रके शरीरमें बारह बाण मारे ॥ (१५—१६)

उस समय सौ मतवाले हाथी और सौ रथ वधकी इच्छासे वीर अर्जुनकी ओर दौडे। इसी प्रकार घोडोंपर चढकर शक, तुषार, यवन और काम्बोज अनेक प्रकारके तेज बाण बर्षाते हुए अर्जुनसे युद्ध करनेको आये, अर्जुनने अपने क्षुर बाणोंसे उस सेनाके अनेक वीरोंके शिर काट दिये, अर्जुनने अपने बाणोंसे युद्ध करते हुए वीरोंके हाथी, घोडे और रथोंको काट डाला । उस समय आकाशमें खडे हुए देवता साधु साधु कहकर अनेक प्रकारके बाजे बजाने लगे और प्रसन्न होने लगे । अनेक सुगन्धसे युक्त वायु आकाशसे फूल बर्षाने लगा । देव मनुष्यकी साक्षीसे इस फूल बर्षाको देख वे सब वीर आश्चर्य करने लगे ॥ (१६-१९)

तदर्जुनास्त्रं व्यधमद्दहन्तं कर्णस्तु बाणैर्निशितैर्महात्मा ॥ ४ ॥
ततो विमर्दः सुमहान्बभूव तत्रार्जुनस्यांधिरथेश्च राजन् ।
अन्योन्यमासादयतोः पृषत्कैर्विषाणघातैर्द्विपयोरिवोग्रैः ॥ ५ ॥
तत्रास्त्रसङ्घातसमावृतं तदा बभूव राजंस्तुमुलं स सर्वतः ।
तत्कर्णपार्थौ शरवृष्टिसङ्घैर्निरन्तरं चक्रतुरम्बरं तदा ॥ ६ ॥
ततो जालं बाणमयं महान्तं सर्वेऽद्राक्षुः कुरवः सोमकाश्च ।
नान्यं च भूतं ददृशुस्तदा ते बाणान्धकारे तुमुलेऽथ किञ्चित् ॥ ७ ॥
तौ सन्दधानावनिशं च राजन्समस्यन्तौ चापि शरानने कान् ।
सन्दर्शयेतां युधि मार्गान्विचित्रान्धनुर्धरौ तौ विविधैः कृतास्त्रैः ॥८॥
तयोरेवं युध्यतोराजिमध्ये सूतात्मजोऽभूदधिकः कदाचित् ।
पार्थः कदाचित्त्वधिकः किरीटी वीर्यास्त्रमायाबलपौरुषेण ॥ ९ ॥
दृष्ट्वा तयोस्तं युधि सम्प्रहारं परस्परस्यान्तरमीक्षमाणयोः ।
घोरं तयोर्दुर्विषहं रणेऽन्यैर्योधाः सर्वे विस्मयमभ्यगच्छन् ॥ १० ॥
ततो भूतान्यन्तरिक्षस्थितानि तौ कर्णपार्थौ प्रशशंसुर्नरेन्द्र ।
भोः कर्ण साध्वर्जुन साधु चेति वियत्सु वाणी श्रूयते सर्वतोऽपि ॥११॥
तस्मिन्विमर्दे रथवाजिनागैस्तदाभिघातैर्दलिते हि भूतले ।

अनुसार अर्जुनके उस शस्त्रका नाश कर दिया ॥ (१—४)

हे राजन् ! जैसे दो मतवाले हाथी अपने दांतोंसे घोर युद्ध करते है, ऐसे ही अधिरथपुत्र कर्ण और अर्जुन अपने बाणोंसे एक दूसरेके मारनेको घोर युद्ध करने लगे ॥ उस समय सब युद्धभूमि बाणोंसे पूरित होगई। इसी प्रकार कर्ण और अर्जुनके बाणोंके अन्धकारमें पाञ्चाल और कौरवोंकी बाणोंके जालके सिवाय और कुछ नहीं दीखता था, दोनों धनुषधारी वीर अपने अपने अभ्यासके अनुसार शीघ्रता सहित अनेक बाण चलाते हुए अनेक प्रकारकी गतियां दिखलाने लगे ॥ (५–८)

रणभूमिके बीचमें युद्ध करते हुए इन दोनोंमें कभी विद्या बल और साहसमें कर्ण और कभी अर्जुन अधिक दीखने लगते थे ॥ उन दोनोंके दूसरेसे न सहने योग्य घोर बाण घाव देखकर सब योद्धा आश्चर्य करते थे ॥ हे पृथ्वीनाथ ! तब आकाशमें खडे हुए सब देवता कर्ण और अर्जुनकी प्रशंसा करने लगे । उस समय आकाशमे यही शब्द सुनाई देता था, कि कर्णको धन्य है और अर्जुनने बहुत पराक्रम किया ॥ (९–११)

ममापि मानः परमः सदा त्वयि ब्रवीम्यतस्त्वां परमाच्च सौहृदाच्च ।
निवारयिष्यामि च कर्णमप्यहं यदा भवान्सप्रणयो भविष्यति ॥ २७ ॥
वदन्ति मित्रं सहजं विचक्षणास्तथैव साम्ना च धनेन चार्जितम् ।
प्रतापतश्चोपनतं चतुर्विधं तदस्ति सर्व तव पाण्डवेषु ॥ २८ ॥
निसर्गतस्ते तव वीर बान्धवाः पुनश्च साम्ना समवाप्नुहि प्रभो ।
त्वयि प्रसन्ने यदि मित्रतां गते हितं कृतं स्याज्जगतस्त्वयातुलम् ॥ २९ ॥
स एवमुक्तः सुहृदा वचो हितं विचिन्त्य निःश्वस्य च दुर्मनाऽब्रवीत् ।
यथा भवानाह सखे तथैव तन्ममापि विज्ञापयतो वचः शृणु ॥ ३० ॥
निहत्य दुःशासनमुक्तवान्वचः प्रसह्य शार्दूलवदेष दुर्मतिः ।
वृकोदरस्तद्धृदये मम स्थितं न तत्परोक्षं भवतः कुतः शमः ॥ ३१ ॥
न चापि कर्णं प्रसहेद्रणेऽर्जुनो महागिरिं मेरुमिवोग्रमारुतः ।
न चाश्वसिष्यन्ति पृथात्मजा मयि प्रसह्य वैरं बहुशो विचिन्त्य ॥ ३२ ॥
न चापि कर्ण गुरुपुत्रसंयुगादुपारमेत्यर्हसि वक्तुमच्युत ।
श्रमेण युक्तो महताद्य फाल्गुनस्तमेष कर्णः प्रसभं हनिष्यति ॥ ३३ ॥
तमेवमुक्त्वाप्यनुनीय चासकृत्तवात्मजः स्वाननुशास्ति सैनिकान् ।

हूजिये, हम कर्णको भी युद्धसे रोक देंगे । हे महाराज ! पण्डित लोग मित्रों और शत्रुओंके लिये साम, दाम, दण्ड और नम्रता यही चार उपाय बतलाते है । सो पाण्डवोंके सङ्ग आप चारों ही कर सक्ते हैं । हे राजन् ! हे महाराज ! हे वीर ! पाण्डव लोग जन्म हीसे आपके बन्धु हैं । आप प्रसन्न होकर इनसे सन्धि कीजिये ऐसा होनेसे सब जगत्-का अतुलनीय कल्याण होगा ॥ २६ २९

गुरुपुत्रके ऐसे वचन सुन दुर्योधन लम्बी सांस लेकर और विमन होकर बोला, हे आचार्य पुत्र ! आप जो कहते है सो सभी सत्य है. परन्तु मेरे भी कुछ वचन सुनिये ॥ इस दुष्ट भीमसेनने जो दुःशासनको मारते समय आपके आगे शार्दूलके समान गर्जकर वचन कहे थे, सो मेरे हृदयमें शलते हैं । भला अब उन वचनोंको सुनकर सन्धि कैसे हो सक्ती है ? जैसे वायु पर्वतराज मेघको नहीं उडा सक्ता ऐसे ही अर्जुन कर्णको नहीं मार सकते और मुझसे वैर करके अत्यन्त यत्न करने पर भी पाण्डव बहुत दिन नहीं जी सकेंगे ॥(३०-३२)

हे गुरुपुत्र ! आप इस समय कर्णसे यह भी नहीं कह सकते हैं, कि युद्ध मत करो क्योंकि अर्जुन बहुत थक गये है,अब कर्ण इन्हें अवश्यही मारडालेंगे॥

उभौ महेन्द्रस्य समानविक्रमावुभौ महेन्द्रप्रतिमौ महारथौ ।
महेन्द्रवज्रप्रतिमैश्च सायकैर्महेन्द्रवृत्राविव सम्प्रजघ्नतुः ॥ ७ ॥
सनागपत्त्यश्वरथे शुभे बले विचित्रवर्माभरणाम्बरायुधे ।
चकम्पतुर्विस्मयनीयरूपे वियद्गताश्चार्जुनकर्णसंयुगे ॥ ८ ॥
भुजाः सवस्त्रांगुलयः समुच्छ्रिताः ससिंहनादैर्हृषितैर्दिदृक्षुभिः ।
यदर्जुनो मत्त इव द्विपो द्विपं समभ्ययादाधिरथिं जिघांसया ॥ ९ ॥
उदक्रोशन्सोमकास्तत्र पार्थं पुरःसराश्चार्जुन भिन्धि कर्णम् ।
छिन्ध्यस्य मूर्धानमलं चिरेण श्रद्धां च राज्याद्धृतराष्ट्रसूनोः ॥ १० ॥
तथास्माकं बहवस्तत्र योधाः कर्ण तथा याहि याहीत्यवोचन् ।
जह्यर्जुनं कर्ण शरैः सुतीक्ष्णैः पुनर्वनं यान्तु चिराय पार्थाः ॥ ११ ॥
तथा कर्णः प्रथमं तत्र पार्थं महेषुभिर्दशभिः सम्प्रविध्यत् ॥ १२ ॥
परस्परं तौ विशिखैः सुपुङ्खैस्ततक्षतुः सूतपुत्रोऽर्जुनश्च ।
परस्परं तौ विभिदुर्विमर्दे सुभीममभ्यापततुश्च हृष्टौ ॥ १३ ॥
ततोऽर्जुनः प्रासृजदुग्रधन्वा भुजावुभौ गाण्डिवं चानुमृज्य ।

दो तालाव मिलते है, ऐसेही ये ध्वजा युक्त दोनों रथ मिल गये ॥ (४—६)

ये दोनों इन्द्रके समान बलवान, इन्द्रके समान उत्साही वीर इन्द्र और वृत्रासुरके समान वज्र तुल्य बाणोंसे युद्ध करने लगे ॥ अर्जुन और कर्णको रथमें बैठा देख घोडे, हाथी और रथ तथा आकाशके देवता आश्चर्य करके कांपने लगे ॥ जिस समय मतवाले हाथीकी ओर मतवाले हाथीके समान अर्जुन कर्णकी ओर चले, तब सब योद्धा शस्त्र और पञ्जोंके सहित हाथ फैलाकर सिंहके समान गर्जने लगे ॥ (७—९)

सब पाञ्चाल कहने लगे, हे अर्जुन! आप कर्णको मारिये, इसका सिर काटकर दुर्योधनको राज्यसे भ्रष्ट कीजिये ॥ इसी प्रकार हमारी ओरके योद्धा कहने लगे कि, हे कर्ण ! तुम जाओ और अपने तेज बाणोंसे शीघ्र अर्जुनको मारो और युधिष्ठिरके लिये फिर बहुत दिनको वनवास दो ॥ जब पहले कर्णने अर्जुनके शरीरमें दश बाण मारे, तब अर्जुनने भी हंसकर अत्यन्त तेज बाण कर्णकी कोखमें मारे, तब वे दोनों प्रसन्न होकर एक दूसरेकी ओर अनेक तेज बाण चलाने लगे और घोर युद्ध करने लगे ॥ (१०—१३)

तब अर्जुनने अपने हाथ फटकाकर और धनुष घुमाकर अनेक नालीक, नाराच, वराहकर्ण और अर्धचन्द्र बाण

ततस्तु वीरः शरविक्षताङ्गो दध्रे मनो ह्येकशयस्य तस्य ॥ १९ ॥
ततो रिपुघ्नं समधत्त कर्णः सुसञ्चितं सर्पमुखं ज्वलन्तम् ।
रौद्रं शरं सन्नतसुग्रधौतं पार्थार्थमत्यर्थचिराभिगुप्तम् ॥ २० ॥
सदार्चितं चन्दनचूर्णशायितं सुवर्णतूणीरशयं महार्चिषम् ।
आकर्णपूर्णं च विकृष्य कर्णः पार्थोन्मुखः सन्दधे चोत्तमौजाः ॥२१॥
प्रदीप्तमैरावतवंशसम्भवं शिरो जिहीर्षुर्युधि सव्यसाचिनः ।
ततः प्रजज्वाल दिशो नभश्च उल्काश्च घोराः शतशः प्रपेतुः ॥२२॥
तस्मिंस्तु नागे धनुषि प्रयुक्ते हाहाकृता लोकपालाः सशक्राः ।
न चापि तं बुबुधे सूतपुत्रो बाणे प्रविष्टं योगबलेन नागम् ॥ २३ ॥
दृशशतनयनोऽहिं दृश्य बाणे प्रविष्टं निहत इति सुतो मे स्रस्तगात्रो बभूव।
जलजकुसुमयोनिः श्रेष्ठभावो जितात्मा
त्रिदशपतिमवोचन्मा व्यथिष्ठा जये श्रीः ॥ २४ ॥
ततोऽब्रवीन्मद्रराजो महात्मा दृष्ट्वा कर्णं प्रहितेषुं तमुग्रम् ।
न कर्ण ग्रीवामिषुरेष लप्स्यते समीक्ष्य सन्धत्स्व शरं शिरोघ्नम् ॥ २५ ॥
अथाब्रवीत्क्रोधसंरक्तनेत्रो मद्राधिपं सूतपुत्रस्तरस्वी ।
न सन्धत्ते द्विःशरं शल्य कर्णो न मादृशा जिह्मयुद्धा भवन्ति ॥२६॥

एक वीर अर्जुनको मारनेकी इच्छा की और बहुत दिनसे अर्जुनके लिये रक्खा हुआ तेलमें भीगा अत्यन्त तेज सांप मुखवाला बाण धनुषपर चढाया, तब कर्णने सोनेके तूणीरमें सोनेवाले, सदा चन्दन आदि सुगन्धोंसे पूजित, उस महातेजस्वी बाणको कान तक खींचकर अर्जुनका शिर काटनेके लिये अर्जुनकी ओर छोडा ॥ (१९–२१)

वह ऐरावत वंशमें उत्पन्न हुआ बाण अपने तेजसे सब दिशाओंको प्रकाशित करने लगा, उस सांप युक्त बाणके धनुष पर चढते ही इन्द्रादि सब देवता हाहाकार करने लगे । परन्तु कर्णने यह नहीं जाना कि इसमें योग बलसे सांप घुसा है, उस सांपको बाणमें घुसाहुआ देख सहस्र नेत्रवाले देवराज इन्द्रने यह जाना कि अर्जुन मर जायगा, बहुत घबराए, तब जगत् कर्त्ता कमलसे उत्पन्न हुए ब्रह्माने कहा तुम कुछ मत डरो ॥ (२२—२४)

तब महापराक्रमी शल्यने बाण छोडते हुए कर्णसे कहा । हे कर्ण ! तुम्हारा लक्ष्य ठीक नहीं है, यह बाण धनुषसे छूट कर अर्जुनके कण्ठमें नहीं लग सकेगा । इस लिये अर्जुनका शिर देख कर बाण छोडो। तब कर्णने क्रोध करके

अथापोवाह्यास्त्रमस्त्रज्ञान्समस्तान्वायव्यास्त्रेणापततः स कर्णात् ॥ २२ ॥
ततोऽप्यस्त्रं दयितं देवराजः प्रादुश्चक्रे वज्रमतिप्रभावम् ।
गाण्डीवं ज्यां विशिखांश्चानुमन्त्र्य धनञ्जयः शत्रुभिरप्रधृष्यः॥ २३ ॥
ततः क्षुरप्राञ्जलिकार्धचन्द्रा नालीकनाराचवराहकर्णाः ।
गाण्डीवतः प्रादुरासन्सुतीक्ष्णाः सहस्रशो वज्रसमानवेगाः ॥ २४ ॥
ते कर्णमासाद्य महाप्रभावाः सुतेजना गार्ध्रपत्राः सुवेगाः ।
गात्रेषु सर्वेषु हयेषु चापि शरासने युगचक्रे ध्वजे च ॥ २५ ॥
निर्भिद्य तूर्णं विविशुः सुतीक्ष्णास्तार्क्ष्यत्रस्ता भूमिमिवोरगास्ते ।
शराचिताङ्गो रुधिरार्द्रगात्रः कर्णस्तदा रोषविवृत्तनेत्रः ॥ २६ ॥
दृढज्यमानास्य समुद्रघोषं प्रादुश्चक्रे भार्गवास्त्रं महात्मा ।
सहेन्द्रशस्त्राभिसृष्टान्विसृष्टांश्छित्त्वा कर्णः पाण्डवस्येषुसङ्घान् ॥ २७ ॥
तस्यास्त्रमस्त्रेण निहत्य सोऽथ जघान सङ्ख्ये रथनागपत्तीन् ।
अमृष्यमाणश्च महेन्द्रकर्मा महारणे भार्गवास्त्रप्रतापात् ॥ २८ ॥
पञ्चालानां प्रवरांश्चापि योधान्क्रोधाविष्टः सूतपुत्रस्तरस्वी ।
बाणैर्विध्याधाहवे सुप्रमुक्तैः शिलाशितैः रुक्मपुङ्खैः प्रसह्य ॥ २९ ॥

पडता था । (१९–२२)

तब अर्जुनने उस शस्त्रकी शान्तिके लिये वायव्य अस्त्र चलाया और उससे सब मेघ उड गये ॥ फिर अर्जुनने मंत्र पढकर गाण्डीव धनुप की डोरी और अपने बाणोंको अभिमन्त्रित करके इन्द्र का प्यारा वज्र अस्त्र चढाया । तब शत्रु नाशन अर्जुनके गाण्डीव धनुपसे अनेक वज्रके समान वेगवाले क्षुर, प्राञ्जलिक, अर्द्धचन्द्र, नालीक, नाराच और वराहकर्ण निकलने लगे ॥ (२२–२४)

ये सब अत्यंत तीक्ष्ण, गृध्र पंखवाले, वेगशाली, महाप्रभावी बाण कर्णके घोडे, पहिये, रथ, ध्वजा, शरीर और धनुपमें लगे । जैसे गरुडके डरसे सांप पृथ्वीमें घुस जाते है ऐसे ही वे बाण कवच काटकर कर्णके शरीरमें घुस गये तब कर्ण रुधिरसे भीग गये और क्रोधसे आंखें फाडके अर्जुनकी ओर देखने लगे॥ तब कर्णने क्रोध करके भार्गवास्त्र चलाया उससे अर्जुनके चलाये सब अस्त्र कट गये ॥ (२५–२७)

इन्द्रके समान पराक्रमी कर्णने उस भार्गवास्त्रसे अर्जुनके बाण काटकर अनेक हाथी, घोडे और पैदलोंको काट डाला ॥ प्रतापी सूतपुत्रने क्रोध करके सोनेके पंखवाले शिलापर घिसे घोर बाणोंसे अनेक पाञ्चाल देशीय वीरोंको मार-

पुरन्दरार्थं तपसा प्रयत्नतः स्वयं कृतं यद्विभुना स्वयम्भुवा।
महार्हरूपं द्विषतां भयङ्करं विभर्तुरत्यर्थसुखं सुगन्धिनम् ॥ ३४ ॥
जिघांसते देवरिपून्सुरेश्वरः स्वयं ददौ यत्सुमनाः किरीटिने।
हराम्बुपाखण्डलवित्तगोभृभिः पिनाकपाशाशनिसायकोत्तमैः ॥३५॥
सुरोत्तमैरप्यविषह्यमर्दितुं प्रसह्य नागेन जहार यद्वृषः।
स दुष्टभावो वितथप्रतिज्ञः किरीटमत्यद्भुतमर्जुनस्य ॥ ३६ ॥
नागो महार्हं तपनीयचित्रं पार्थोत्तमाङ्गात्प्रहरत्तरस्वी।
तद्धेमजालावततं सुघोषं जाज्वल्यमानं निपपात भूमौ ॥ ३७ ॥
तदुत्तमेपून्मथितं विषाग्निना प्रदीप्तमर्चिष्मदथो क्षितौ प्रियम्।
पपात पार्थस्य किरीटमुत्तमं दिवाकरोऽस्तादिव रक्तमण्डलः॥३८॥
स वै किरीटं बहुरत्नभूषितं जहार नागोऽर्जुनमूर्धतो बलात्।
गिरेः सुजातांकुरपुष्पितद्रुमं महेन्द्रवज्रः शिखरोत्तमं यथा ॥३९॥
मही वियद् द्यौः सलिलं च वायुना प्रसह्यमुग्रं विनिघूर्णितं यथा।
अतीव शब्दो भुवनेषु वै तदा जनाऽध्यवस्यन्व्यथिताश्च चस्खलुः ॥४०॥

मुकुट काट दिया, यह सुगन्धिसे भरा धारण करनेवालेकी शोभा बढानेवाला और शत्रुओंको भय देनेवाला उत्तम मुकुट ब्रह्माने बहुत तप करनेके पश्चात् इन्द्रको बना कर दिया था॥ (३२-३४)

जिस समय अर्जुनने इन्द्र, वरुण, यम, कुबेर, शिव और विष्णुके पिनाकादि शस्त्रोंसे दानवोंको मारा था, तभी इन्द्रने यह मुकुट उन्हें दिया था। जिस किरीटको देवता भी नहीं काट सक्ते थे, उसे सांप युक्त बाणसे कर्णने काट दिया परन्तु उस दुष्ट सांपकी प्रतिज्ञा पूरी न हुई अर्थात् अर्जुन न मरा। उस सांपने तेजसे सुवर्णमें बना हुआ प्रकाशमान उत्तम मुकुट काट कर पृथ्वीमें गिरा दिया॥ (३५-३७)

जैसे अस्त होते समय सूर्यका लाल मण्डल अस्ताचलसे गिरता है, ऐसे ही उस बाणके वेग और सांपके विषसे कटकर अर्जुनका सुन्दर मुकुट पृथ्वीपर गिर गया। जैसे फूलेफले वृक्षोंके सहित पर्वतका शिखर इन्द्रके वज्रसे कटकर गिरता है, ऐसे ही अर्जुनका मणिजटित मुकुट गिरा॥ जैसे बहुत आंधी आनेसे पृथ्वी जल, द्यौ और आकाशमें क्षोभ उत्पन्न होकर बडा शब्द होता है, ऐसे ही उस मुकुटके गिरनेसे सब जगत्में बडा शब्द हुआ और उस शब्दसे सब लोग भयसे व्यथित होकर स्खलित होने लगे॥ (३८-४०)

पञ्चालानां योधमुख्याननेकान्निजघ्निवांस्तव जिष्णो समक्षम् ॥ ३७ ॥
पूर्वं देवैरजितं कालकेयैः साक्षात्स्थाणोर्बाहुसंस्पर्शमेत्य ।
कथं नु त्वां सूतपुत्रः किरीटिन्नथेषुभिर्दशभिः प्रागविध्यत् ॥ ३८ ॥
त्वया क्षिप्रांश्चाग्रसद्बाणसङ्घानाश्चर्यमेतत्प्रतिभाति मेऽद्य ।
कृष्णापरिक्लेशमनुस्मर त्वं यथाब्रवीत्षण्ढतिलान्स्म वाचः ॥ ३९ ॥
रूक्षाः सुतीक्ष्णाश्च हि पापबुद्धिः सूतात्मजोऽयं गतभीर्दुरात्मा ।
संस्मृत्य सर्वं तदिहाद्य पापं जह्याशु कर्णं युधि सव्यसाचिन्॥ ४० ॥
कस्मादुपेक्षां कुरुषे किरीटिन्नुपेक्षितुं नायमिहाद्य कालः ।
यया धृत्या सर्वभूतान्यजैषीर्ग्रासं ददत्खाण्डवे पावकाय ॥ ४१ ॥
तया धृत्या सूतपुत्रं जहि त्वमहं चैनं गदया पोथयिष्ये ।
अथाब्रवीद्वासुदेवोऽपि पार्थं दृष्ट्वा रथेषून्प्रतिहन्यमानान् ॥ ४२ ॥
अमीमृदत्सर्वपातेऽद्य कर्णो ह्यस्त्रैरस्त्रं किमिदं भो किरीटिन् ।
स वीर किं मुह्यसि नावधत्से नदन्त्येते कुरवः सम्प्रहृष्टाः ॥४३ ॥
कर्णं पुरस्कृत्य विदुर्हि सर्वे तवास्त्रमस्त्रैर्विनिपात्यमानम् ।

प्रधान पञ्चाल वीरोंको क्यों मार डाला? हे किरीटधारी ! तुमने पहले सब काल-केयोंको मारा था, और युद्धमें साक्षात् शिवको भी प्रसन्न किया था, तब सूतके बेटेने तुम्हारे शरीरमें दश बाण कैसे मार दिये ? (१३–३८)

हमें बहुत आश्चर्य होता है, कि तुम्हारे चलाये हुए सब बाण काट दिये, क्या तुम्हें द्रौपदीका कुछ भी दुःख याद न रहा ? स्मरण करो कि इसीने हमको सभाके बीचमें नपुंसक कहा था, हे सव्यसाची ! इसी मूर्ख दुष्ट पापी दुरात्मा सूतके बेटेने हमलोगोंको कठोर और रूखी वाणी सुनायी थी, उन सब को स्मरण करके इसे युद्धमें जीतो । हे किरीटधारी ! तुम अब इसे क्यों छोड रहे हो ? यह छोडनेका समय नहीं है, जिस धैर्यसे तुमने पहले खाण्डव वनमें अग्निको तृप्त किया था, इसी ही धैर्यसे अब इसे जीतो, या तो तुम इसको उसी बुद्धिसे जीतो नहीं तो मैं इस गदासे इसका चूरा कर देता हूं । (३९–४२)

तब श्रीकृष्णने भी कर्णके बाणोंको प्रबल देखकर अर्जुनसे कहा, हे अर्जुन ! तुम ऐसे क्यों चुप चाप बैठे हो ? ये चारों ओरसे कर्णके बाण चले आते हैं। ये कौरव प्रसन्न होकर गर्ज रहे हैं, तुम्हें इस समय क्या होगया ? तुम्हारे शस्त्रको कर्णके शस्त्रसे कटा देख, ये सब कर्णके सहित प्रसन्न होरहे हैं । जिस

नागोऽब्रवीद्विद्धि कृतागसं मां पार्थेन मातुर्वधजातवैरम् ॥ ४६ ॥
यदि स्वयं वज्रधरोऽस्य गोप्ता तथापि याता पितृराजवेश्मनि ।
कर्ण उवाच—न नाग कर्णोऽद्य रणे परस्य बलं समास्थाय जयं बुभूषेत् ॥४७॥
न सन्दध्यां द्विः शरं चैव नाग यद्यर्जुनानां शतमेव हन्याम् ।
तमाह कर्णः पुनरेव नागं तदाजिमध्ये रविसूनुसत्तमः ॥ ४८ ॥
व्यालास्त्रसर्गोत्तमयत्नमन्युभिर्हन्तास्मि पार्थं सुसुखी वज्र त्वम् ।
इत्येवमुक्तो युधि नागराजः कर्णेन रोषादसहंस्तस्य वाक्यम् ॥ ४९ ॥
स्वयं प्रायात्पार्थवधाय राजन्कृत्वा स्वरूपं विजिघांसुरुग्रः ।
ततः कृष्णः पार्थमुवाच सङ्ख्ये महोरगं कृतवैरं जहि त्वम् ॥ ५० ॥
स एवमुक्तो मधुसूदनेन गाण्डीवधन्वा रिपुवीर्यसाहः ।
उवाच को ह्येष ममाद्य नागः स्वयं य आयाद्गरुडस्य वक्त्रम् ॥ ५१ ॥
कृष्ण उवाच-योऽसौ त्वया खाण्डवे चित्रभानुं सन्तर्पयाणेन धनुर्धरेण ।
वियद्गतो जननीगुप्तदेहो मत्वैकरूपं निहतास्य माता ॥ ५२ ॥
स एष तद्वैरमनुस्मरन्वै त्वां प्रार्थयत्यात्मवधाय नूनम् ।

तेजस्वी कौन हो ? सांप बोला, मैं अर्जुनका शत्रु हूं; इसने मेरी माताको मार डाला था, तुम मुझे बाण पर चढाकर छोडो तो यदि साक्षात् इन्द्र भी इनकी रक्षा करें तौ भी मै उन्हें मार डालूंगा ॥ (४६–४७)

कर्ण बोले, हे नाग ! कर्ण दूसरेके बलसे अपनी विजय करना नहीं चाहता, हे नाग ! यदि सौ अर्जुन मुझसे युद्ध करनेको आवें तो भी मै एक बाणको दो बार धनुष पर नहीं चढाऊंगा, तब फिर कर्णने सांपसे कहा, हे सर्प ! मै आप ही क्रोधमें भरके नागास्त्रसे अर्जुनको मार डालूंगा, तुम सुखसे अपने घरको चले जाओ । (४७–४९)

कर्णके ऐसे कठोर वचन सुन कर वह साप घोर रूप धारण करके आपही अर्जुनको मारने चला, तब शत्रुनाशन गाण्डीवं धनुपधारी अर्जुन श्रीकृष्णसे बोले, यह कौन सांप है ? जो मुझ गरुडके मुखमें आपसे आप चला आता है ॥ (४९–५१)

श्रीकृष्ण बोले, हे अर्जुन ! तुमने जो अग्निको तृप्त करते समय खाण्डव वनमें अपनी मातासे रक्षित एक सांपको एक शरीर जान कर मारा था, हे शत्रुनाशन! उस समय इसकी माता मर गई थी, और यह बच गया था । सो उसी वैरको स्मरण करके यह तुम्हारे हाथसे मरनेको आता है, देखो यह आकाशमें

तदस्य हत्वा विरराज कर्णो मुक्त्वा शरान्मेघ इवाम्बुधाराः ।
समीक्ष्य कर्णेन किरीटिनस्तु तथाजिमध्ये निहतं तदस्त्रम् ॥ ५२ ॥
ततोमर्षी बलवान्क्रोधदीप्तो भीमोऽब्रवीदर्जुनं सत्यसन्धम् ।
ननु त्वाहुर्वेदितारं महास्त्र ब्राह्मं विधेयं परमं जनास्तत् ॥ ५३ ॥
तस्मादन्यद्योजय सव्यसाचिन्निति स्मोक्तोऽयोजयत्सव्यसाची ।
ततो दिशः प्रदिशश्चापि सर्वाः समावृणोत्सायकैर्भूरितेजाः ॥ ५४ ॥
गाण्डीवमुक्तैर्भुजगैरिवोग्रैर्दिवाकरांशुप्रतिमैर्ज्वलद्भिः ।
सृष्टास्तु बाणा भरतर्षभेण शतं शतानीव सुवर्णपुङ्खाः ॥ ५५ ॥
प्राच्छादयन्कर्णरथं क्षणेन युगान्तवन्ह्यर्ककरप्रकाशाः ।
ततश्च शूलानि परश्वधानि चक्राणि नाराचशतानि चैव ॥ ५६ ॥
निश्चक्रमुर्घोरतराणि योधास्ततो ह्यहन्यन्त समन्ततोऽपि ।
च्छिन्नं शिरः कस्यचिदाजिमध्ये पपात योधस्य परस्य कायात् ॥५७॥
भयेन सोऽप्याशु पपात भूमावन्यः प्रणष्टः पतितं विलोक्य ।
अन्यस्य सासिर्निपपात कृत्तो योधस्य बाहुः करिहस्ततुल्यः ॥५८ ॥

ने ब्रह्मा को प्रणाम किया, और न सहने योग्य ब्रह्म अस्त्रका प्रकाश किया ॥ परन्तु कर्णने मेघकी धाराके समान बाण चलाकर अर्जुनके उस अस्त्रको भी निष्फल कर दिया । (५१–५२)

अर्जुनके उस बाणको भी वृथा देखकर क्रोधसे लाल होकर महा पराक्रमी भीमसेन सत्यवादी अर्जुनसे बोले, हे अर्जुन ! सब जगत् तुम्हें शस्त्रविद्याका जाननेवाला कहता है, और यह बाण भी निष्फल होनेवाला नहीं है । इसलिये फिर तुम दूसरा बाण चलाओ, भीमसेनके ऐसे वचन सुन अर्जुनने अपने धनुष पर शस्त्र चढाया उस समय तेजस्वी अर्जुनके बाणोंसे सब दिशा और उपदिशा पूरित होगये ॥ (५२–५४)

जैसे विषीले सांप सब ओर फैल जाते है, ऐसे ही गाण्डीवसे छूटे हुए सूर्यकी किरणोंके समान प्रकाशित बाण भरत कुलसिंह अर्जुनने सहस्रों छोडे । वे सोनेके पङ्खवाले बाण प्रलयकाल की अग्नि और सूर्यके समान कर्णके रथके चारों ओर छा गये, तब अनेक चक्र, त्रिशूल और प्रकाशित परश्वध तथा सैकडों नाराच उस शस्त्रसे निकल कर अनेक वीरोंका नाश करने लगे ॥५५-५७

किसी योद्धाका शिर कट कर पृथ्वीमें गिर गया,दूसरा योद्धा डरके मारे पृथ्वी में गिर गया; तीसरा उसको देखकर मरगया; किसीका हाथीकी सूंडके समान

परःशतैः पत्रिभिरिन्द्रविक्रमस्तथा यथेन्द्रो बलमोजसा रणे ॥ ६१ ॥
ततः शराणां नवतिं तदार्जुनः ससर्ज कर्णेऽन्तकदण्डसंनिभाम् ।
तैः पत्रिभिर्विद्धतनुः स विव्यथे तथा यथा वज्रविदारितोऽचलः ॥ ६२ ॥
मणिप्रवेकोत्तमवज्रहाटकैरलंकृतं चास्य वराङ्गभूषणम् ।
प्रविद्धमुर्व्यां निपपात पत्रिभिर्धञ्जयेनोत्तमकुण्डलेऽपि च ॥ ६३ ॥
महाधनं शिल्पिवरैः प्रयत्नतः कृतं यदस्योत्तमवर्म भारम् ।
सुदीर्घकालेन ततोऽस्य पाण्डवः क्षणेन बाणैर्बहुधा व्यशातयत् ॥ ६४ ॥
स तं विवर्माणमथोत्तमेषुभिः शितैश्चतुर्भिः कुपितः पराभिनत् ।
स विव्यथेऽत्यर्थमरिप्रताडितो यथातुरः पित्तकफानिलज्वरैः ॥ ६५ ॥
महाधनुर्मण्डलनिःसृतैःशितैः क्रियाप्रयत्नप्रहितैर्बलेन च ।
ततक्ष कर्णं बहुभिः शरोत्तमैर्विभेद मर्मस्वपि चार्जुनस्त्वरन् ॥ ६६ ॥
दृढाहतः पत्रिभिरुग्रवेगैः पार्थेन कर्णो विविधैः शिताग्रैः ।
बभौ गिरिर्गैरिकधातुरक्तः क्षरन्प्रपातैरिव रक्तमम्भः ॥ ६७ ॥
ततोऽर्जुनः कर्णमवक्रगैर्नवैः सुवर्णपुङ्खैः सुदृढैरयस्मयैः ।
यमाग्निदण्डप्रतिमैः स्तनान्तरे पराभिनत्कौञ्चमिवाद्रिमग्निजः ॥ ६८ ॥

ने उसके हंसनेकी क्षमा न किया और मर्मोंमें इस प्रकार सैकडों बाण मारे जैसे इन्द्रने बल नामक दैत्यके मारे थे॥ तब अर्जुनने यमराजके दण्डके समान नव्वे बाण कर्णके शरीरमें मारे उनके लगनेसे वे इस प्रकार कांपने लगे, जैसे वज्र लगनेसे पर्वत ॥ (६०—६२)

तब अर्जुनने सोनेका बना हुआ नीलम आदि मणियोंसे जडा कर्णका मुकुट काट कर पृथ्वीमें गिरा दिया, और उत्तम कुण्डल भी काट दिये। जिस कवचको अनेक कारीगरोंने बहुत यत्न करके बहुत दिनमें बनाया था, उसको अर्जुनने क्षण भरमें काट दिया, तब अर्जुनने इनके कवच रहित शरीरमें चार घोर बाण मारे, उनके लगनेसे कर्ण ऐसे व्याकुल होगये जैसे वात, पित्त और कफके ज्वरमे रोगी ॥ तब अर्जुनने शीघ्रता से अपनी बुद्धि और बलसे कर्णके सब मर्मोंमें अनेक बाण मारे ॥ (६३–६५)

वीर बलवान अर्जुनके बाण लगनेसे कर्ण बहुत व्याकुल हो गये और उनके शरीरसे इस प्रकार रुधिर बहने लगा, जैसे पर्वतसे गेरु बहता है ॥ तब अर्जुनने अग्नि और यमराजके दण्डके समान सोनेके पङ्खवाले अत्यन्त शीघ्र चलनेवाले, नौ तेज बाण कर्णके हृदयमें इस प्रकार मारे जैसे स्वामिकार्त्तिकने क्रौंच

सहस्रशोऽश्वांश्च पुनः ससादीनष्टौ सहस्राणि च पत्तिवीरान् ॥ ६६ ॥
कर्णं ससूतं सरथं सकेतुमदृश्यमज्ञोगतिभिः प्रचक्रे ।
अथाक्रोशन्कुरवो वध्यमाना धनञ्जयेनाधिरथिं समन्तात् ॥ ६७ ॥
मुञ्चाभिविध्यार्जुनमाशु कर्ण बाणैः पुरा हन्ति कुरून्समग्रान् ।
स चोदितः सर्वयत्नेन कर्णो मुमोच बाणान्सुबहूनभीक्ष्णम् ॥ ६८ ॥
ते पाण्डुपञ्चालगणान्निजघ्नुर्मर्मच्छिदः शोणितपांसुदिग्धा ।
तावुत्तमौ सर्वधनुर्धराणां महाबलौ सर्वसपत्नसाहौ ॥ ६९ ॥
निजघ्नतुश्चाहितसैन्यमुग्रमन्योन्यमप्यस्त्रविदौ महास्त्रैः ।
अथोपयातस्त्वरितो दिदृक्षुर्मन्त्रौषधीभिर्निरुजो विशल्यः ॥ ७० ॥
कृतः सुहृद्भिर्भिषजां वरिष्ठैर्युधिष्ठिरस्तत्र सुवर्णवर्मा ।
तथोपयातं युधि धर्मराजं दृष्ट्वा मुदा सर्वभूतान्यनन्दन् ॥ ७१ ॥
राहोर्विमुक्तं विमलं समग्रं चन्द्रं यथैवाभ्युदितं तथैव ।
दृष्ट्वा तु मुख्यावथ युध्यमानौ दिदृक्षवः शूरवरावरिघ्नौ ॥ ७२ ॥
कर्णं च पार्थं च विलोकयन्तः स्वस्था महीस्थाश्च जनाऽवतस्थुः ।

आठ, दो, दश और चार बाण मारे, फिर शस्त्रधारी वीरोंके सहित चार सौ रथोंका नाश कर दिया। एक सहस्र घोडोंपर चढे वीरोंको मारकर आठ सहस्र पैदलोंको मारा। फिर इतने तेज बाण चलाये, कि कर्ण घोडे सारथी और रथके सहित छिप गये। (६५–६७)

तब अर्जुनके बाणोंसे व्याकुल होकर सब कौरव कर्णको पुकारने लगे। हे कर्ण! अर्जुन हमारा नाश किये देता है। इसलिये, तुम इसके मारनेके लिये शीघ्र बाण चलाओ, सब कौरवोंके ऐसे वचन सुन कर्ण घोर बाण चलाने लगा। वे रुधिरसे भीगे मर्म काटनेवाले बाण पाण्डवोंकी सेनामें जाकर पाञ्चालोंका नाश करने लगे। (६७–६९)

इस प्रकार सब शत्रुओंका नाश करनेवाले महापराक्रमी कर्ण और अर्जुन घोर बाणोंसे दोनों सेनाओंका नाश करने लगे, उसी समय मन्त्र और औषधियोंसे घावोंको अच्छा करके सावधान होकर अपने मित्र और वैद्योंकी संमतिसे सोनेका कवच पहन कर युद्ध देखनेके लिये, महाराज युधिष्ठिर आये। धर्मराज युधिष्ठिरको आता देख सब लोग प्रसन्न होकर जय जय पुकार करने लगे। उस समय महाराजकी शोभा ऐसी बढ रही थी जैसे राहुसे छूटे चन्द्रमाकी। (६९—७२)

उन दोनों शत्रुनाशन प्रधान वीरोंको

महीरुहैराचितसानुकन्दरो यथा गिरीन्द्रः स्फुटकर्णिकारवान् ॥७६॥
स बाणसङ्घान्बहुधा व्यवासृजन्विभाति कर्णः शरजालरश्मिवान् ।
स लोहितो रक्तगभस्तिमण्डलो दिवाकरोऽस्ताभिमुखो यथा तथा॥७७॥
बाह्वन्तरादाधिरथेर्विमुक्तान्बाणान्महाहीनिव दीप्यमानान् ।
व्यध्वंसयन्नर्जुनबाहुमुक्ताः शराः समासाद्य दिशः शिताग्राः ॥७८॥
ततः स कर्णः समवाप्य धैर्यं बाणान्विमुञ्चन्कुपिताहिकल्पान् ।
विव्याध पार्थं दशभिः पृषत्कैः कृष्णं च षड्भिः कुपिताहिकल्पान्॥७९॥
ततः किरीटी भृशमुग्रनिःस्वनं महाशरं सर्पविषानलोपमम् ।
अयस्मयं रौद्रमहास्त्रसंभृतं महाहवे क्षेमृमना महामतिः ॥ ८० ॥
कालो ह्यदृश्यो नृप विप्रकोपान्निदर्शयन्कर्णवधं ब्रुवाणः ।
भूमिस्तु चक्रं ग्रसतीत्यवोचत्कर्णस्य तस्मिन्वधकाल आगते ॥८१॥
ततस्तदस्त्रं मनसः प्रनष्टं यद्भार्गवोऽस्मै प्रददौ महात्मा ।
चक्रं च वामं ग्रसते भूमिरस्य प्राप्ते तस्मिन्वधकाले नृवीर ॥८२॥
ततो रथो घूर्णितवान्नरेन्द्र शापात्तदा ब्राह्मणसत्तमस्य ।
ततश्चक्रमपतत्तस्य भूमौ स विह्वलः समरे सूतपुत्रः ॥ ८३ ॥
स वेदिकश्चैत्य इवातिमात्रः सुपुष्पितो भूमितले निमग्नः ।

कर्णकी ऐसी शोभा बढी जैसे फूले कचनार सहित गुफावाले पर्वतकी ॥ तब कर्ण भी अनेक बाण चलाने लगे, उस समय रुधिरसे भीगे कर्ण ऐसे दीखते थे जैसे अस्ताचलको जाते हुए लाल मण्डलवाले सूर्य ॥ कर्णके हाथोंसे छूटे हुए सांपके समान तेज बाणको काटकर अर्जुनके घोर बाण सब दिशाओंमें दीखने लगे ॥ (७६–७८)

तब कर्णने धैर्य धारण कर और क्रोधमें भरकर क्रोधी सांपके समान तेज बारह बाण अर्जुनके और छः श्रीकृष्णके मारे । तब अर्जुनने महा क्रोध करके लोहेका बना सर्प अग्नि और विषके समान एक घोर बाण शिवका मन्त्र पढकर चलाना चाहा ॥ ७९–८०

हे महाराज ! जब कर्णके मरनेका समय आया तब ब्राह्मणके शापसे वध करनेके लिये अदृश्य रूपसे आकर कालने कर्णसे कहा, कि हे वीर कर्ण ! पृथ्वीने तेरे रथके चक्के पकड लिये है । तब कर्ण परशुरामसे जो बाण सीखे थे सो भूल गये । हे राजन् ! उस समय उस ब्राह्मणके श्रापसे वह रथ इधर उधरको न हिल सका । अपने रथकी यह दशा देख सूतपुत्र बहुत घबडाये ॥ (८१–८३)

पुनश्च पञ्चालवरास्तथान्ये तदन्तरे कर्णधनञ्जयाभ्याम् ॥ ८० ॥
प्रस्कन्दन्तो बलिना साधुमुक्तैः कर्णेन बाणैर्निहताः प्रसह्य ।
जयं मत्वा विपुलं वै त्वदीयास्तलान्निजघ्नुः सिंहनादांश्च नेदुः ॥८१॥
सर्वे ह्यमन्यन्त वशे कृतौ तौ कर्णेन कृष्णाविति ते विमर्दे ।
ततो धनुर्ज्यासवनास्य शीघ्रं शरानस्तानाधिरथेर्विधस्य ॥ ८२ ॥
सुसंरब्धः कर्णशरक्षताङ्गो रणे पार्थः कौरवान्प्रत्यगृह्णात् ।
ज्यां चानुसृज्याभ्यहनत्तलत्रे बाणान्धकारं सहसा च चक्रे॥ ८३ ॥
कर्ण च शल्यं च कुरूंश्च सर्वान्बाणैरविध्यत्प्रसभं किरीटी ।
न पक्षिणो ववभ्रमुरन्तरिक्षे तदा महास्त्रेण कृतेऽन्धकारे ॥ ८४ ॥
वायुर्दिवस्पृग्भिरीरितो भूतसङ्घैरुवाह दिव्यः सुरभिस्तदानीम् ।
शल्यं च पार्थो दशभिः पृषत्कैर्भृशं तनुत्रे प्रहसन्नविध्यत्॥ ८५ ॥
ततः कर्ण द्वादशभिः सुमुक्तैर्विध्वा पुनः सप्तभिरभ्यविद्ध्यत् ।
स पार्थबाणासनवेगमुक्तैर्दृढाहतः पत्त्रिभिरुग्रवेगैः ॥ ८६ ॥
विभिन्नगात्रः क्षतजोक्षिताङ्गः कर्णो बभौ रुद्र इवाततेषुः ।

तब और पाञ्चाल सेना गर्जती हुई कर्ण और अर्जुनके रथके बीचमें घुस गयी, परन्तु बलवान कर्णने अपने बाणोंसे उन सबको मारडाला ॥ (७८-८०)

तब तुम्हारी ओरके वीरोंने अपनी विजय देखकर ताली बजाई और सिंह-के समान गर्जने लगे । उस समय सबने जान लिया,कि कृष्ण और अर्जुन कर्णसे हार गये, तब अर्जुनने बहुत शीघ्रतासे धनुषपर दूसरा रोदा चढाकर अपने बाणोंसे कर्णके सब बाण काट दिये, और अनेक वीरोंको मारडाला । उस समय अर्जुनका शरीर रुधिरसे भीग गया था । फिर धनुषके रोदेको हाथसे मलकर अपने बाणोंसे अन्धकार कर दिया । (८१-८३)

फिर अर्जुनने बाणोंसे कर्ण, शल्य और सब कौरवोंको व्याकुल कर दिया । उस समय आकाशमें महास्त्रसे ऐसा अन्धकार होगया था, कि कोई पक्षी भी नहीं उड सक्ता था ॥ आकाशमें घूमते हुए देवतोंकी आज्ञासे सुगन्धयुक्त वायु चलने लगी । तब अर्जुनने हंसकर शल्यके कवचमें दश बाण मारे, फिर कर्णके शरीरमें बारह बाण मारकर सात बाण मारे, उस शीघ्र वेधवाले. उत्तम पङ्खयुक्त अर्जुनके बाण लगनेसे कर्णके शरीरमें बहुत पीडा हुई ॥ अनेक बाण लगनेसे रुधिरमें भीगे कर्ण शिवके समान शोभित होगये । उस रौद्रमुहूर्त्तमें

ऐन्द्रं ततोऽर्जुनस्यापि तं दृष्ट्वाभ्युपमन्त्रयत् ॥ ९१ ॥
गाण्डीवं ज्यां च बाणांश्च सोऽनुमन्त्र्य परन्तपः ।
व्यसृजच्छरवर्षाणि वर्षाणीव पुरन्दरः ॥ ९२ ॥
ततस्तेजोमया बाणा इथात्पार्थस्य निःसृताः ।
प्रादुरासन्महावीर्याः कर्णस्य रथमान्तिकात् ॥ ९३ ॥
तान्कर्णस्त्वग्रतो न्यस्तान्मोघांश्चके महारथः ।
ततोऽब्रवीद्वृष्णिवीरस्तस्मिन्नस्त्रे विनाशिते ॥ ९४ ॥
विसृजास्त्रं परं पार्थ राधेयो ग्रसते शरान् ।
ततो ब्रह्मास्त्रमत्युग्रं संमन्त्र्य समयोजयत् ॥ ९५ ॥
छादयित्वा ततो बाणैः कर्णं प्रत्यस्यदर्जुनः ।
ततः कर्णः शितैर्बाणैर्ज्यां चिच्छेद सुतेजनैः ॥ ९६ ॥
द्वितीयां च तृतीयां च चतुर्थीं पञ्चमीं तथा ।
षष्ठीमथास्य चिच्छेद सप्तमीं च तथाष्टमीम् ॥ ९७ ॥
नवमीं दशमीं चास्य तथा चैकादशीं धृषः ।
ज्याशतं शतसन्धानः स कर्णो नावबुध्यते ॥ ९८ ॥
ततो ज्यां विनिधायान्यामभिमन्त्र्य च पाण्डवः ।

जान न सका, तब फिर साहस और शक्तिको स्थिर करके ब्रह्मास्त्र चलाया, तब अर्जुनने इन्द्र बाण चलाया॥(८८-९१

शत्रुनाशन अर्जुनने धनुष, रोदे और बाणोंको मन्त्रित करके इस प्रकार शस्त्र वर्षाये, जैसे इन्द्र पानीको वर्षाता है ॥ तब वे उत्तम प्रकाशित बाण अर्जुनकी धनुषसे छूटकर कर्णके रथके चारों ओर फैल गये, तब महारथ कर्णने अपने बाणोंसे अर्जुनके सब शस्त्रोंका नाश कर दिया। (९२—९४)

उसी समय श्रीकृष्ण अर्जुनसे बोले, हे कुन्तीपुत्र! कर्ण तुम्हारे बाणोंका नाश किये देता है। इसलिये तुम भी कोई घोर बाण चलाओ। श्रीकृष्णके ऐसे वचन सुन अर्जुनने भी ब्रह्मास्त्र चलाया, अर्जुनने अपने बाणोंसे कर्णके सब बाण काट दिये, तब कर्णने अर्जुनके धनुषका रोदा काट दिया। अनन्तर अर्जुनने दूसरा रोदा चढाया, कर्णने उसे भी काट दिया। कर्णने तीसरा चौथा पांचवां छहवां सातवां आठवां नौवा दसवा ग्यारहवा इसी प्रकार सौ रोदे काट दिये ॥ परन्तु कर्णने कितने रोदे हैं यह नहीं जाना ॥ (९५-९८)

तब अर्जुनने एक रोदा मन्त्रित करके

द्विसाहस्रान्समरे सव्यसाची कुरुप्रवीरानृषभः कुरूणाम् ।
क्षणेन सर्वान्सरथाश्वसूतान्निनाय राजन्क्षयमेकवीरः ॥ ९५ ॥
ततोऽपलायन्त विहाय कर्ण तवात्मजाः क्षुरवो येऽवशिष्टाः ।
हतानपाकीर्य शरक्षतांश्च लालप्यमानांस्तनयान्पितॄंश्च ॥ ९६ ॥
स सर्वतः प्रेक्ष्य दिशो विशून्या भयावदीर्णैः कुरुभिर्विहीनः ।
न विव्यथे भारत तत्र कर्णः प्रहृष्ट एवार्जुनमभ्यधावत् ॥ ९७॥ [४६०५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कर्णार्जुनद्वैरथे ऊननवतितमोऽध्याय ॥८९॥

सञ्जय उवाच– ततः प्रयाताः शरपातमात्रमवस्थिताः क्षुरवो भिन्नसेनाः ।
विद्युत्प्रकाशं ददृशुः समन्ताद्धनञ्जयास्त्रं समुदीर्यमाणम् ॥ १ ॥
तदर्जुनास्त्रं ग्रसति स्म कर्णो वियद्गतं घोरतरैः शरैस्तत् ।
क्रुद्धेन पार्थेन भृशाभिसृष्टं वधाय कर्णस्य महाविमर्दे ॥ २ ॥
उदीर्यमाणं स्म कुरून्दहन्तं सुवर्णपुङ्खैर्विशिखैर्ममर्द ।
कर्णस्त्वमोघेष्वसनं दृढज्यं विस्फारयित्वा विसृजञ्छरौघान् ॥ ३ ॥
रामादुपात्तेन महामहिम्ना ह्याथर्वणेनारिविनाशनेन ।

हे राजन् ! उस समय कुरुकुलश्रेष्ठ महावीर अर्जुनने अपने बाणोंसे तुम्हारी सेनाके दो सहस्र वीरोंको रथ घोडे और हाथियोंके सहित मारडाला ॥ तब बचे हुए तुम्हारे बेटे और पोते घावोंसे व्याकुल होकर चिल्लाते हुए कर्णको छोडकर युद्धसे भागे । अर्जुन भी उन भागते हुओंपर अनेक बाण छोडने लगे । सब सेनाको भागते देख और अपनेको युद्धमें अकेला जानकर भी कर्ण कुछ न डरे और बाण बर्षाते हुए प्रसन्न होकर अर्जुनकी ओर दौडे ॥ (९५—९७) [४६०५]

कर्णपर्वमें नवासी अध्याय समाप्त ।

कौरवोंकी सेना भिन्न होकर भागगयी और जिस जगहमें अर्जुनके बाण नहीं पडते ऐसी जगहमें खडी होकर देखने लगी, तो बिजलीके समान प्रकाशमान अर्जुनका शस्त्र चारों ओर फैलरहा है ॥ इस घोर युद्धमें अर्जुनने जो क्रोधसे कर्णके मारनेके लिये अस्त्र छोडा था, जिसके बाण आकाशमें पूरित होरहे थे, कर्णने बाणोंसे उसे काट दिया ॥ कर्णने मेघके समान शब्दवाले अपने घोर धनुषपर टङ्कार देकर कौरवोंका नाश करते हुए अर्जुनके अस्त्रको अपने बाणोंसे काटकर फिर अनेक बाण चलाये । महात्मा कर्णने परशुरामके दिये हुए शत्रुओंका नाश करनेवाले घोर बाणसे अथर्व वेदके

कर्णपर्वमें नब्बे अध्याय ।

सञ्जय बोले. हे राजन् ! अनन्तर

भो भो पार्थ महेष्वास मूहूर्तं परिपालय ।
यावच्चक्रमिदं ग्रस्तमुद्धरामि महीतलात ॥ १०८ ॥
सव्यं चक्रं महीग्रस्तं दृष्ट्वा दैवादिदं मम ।
पार्थ कापुरुषाचीर्णमभिसन्धिं विसर्जय ॥ १०९ ॥
न त्वं कापुरुषाचीर्णं मार्गमास्थातुमर्हसि ।
ख्यातस्त्वमसि कौन्तेय विशिष्टो रणकर्मसु ॥ ११० ॥
विशिष्टतरमेव त्वं कर्तुमर्हसि पाण्डव ।
प्रकीर्णकेशे विमुखे ब्राह्मणेऽथ कृताञ्जलौ ॥ १११ ॥
शरणागते न्यस्तशस्त्रे याचमाने तथार्जुन ।
अबाणे भ्रष्टकवचे भ्रष्टभग्नायुधे तथा ॥ ११२ ॥
न विमुञ्चन्ति शस्त्राणि शूराः साधुव्रते स्थिताः ।
त्वं च शूरतमो लोके साधुवृत्तश्च पाण्डव ॥ ११३ ॥
अभिज्ञो युद्धधर्माणां वेदान्तावभृथाप्लुतः ।
दिव्यास्त्रविदमेयात्मा कार्तवीर्यसमो युधि ॥ ११४ ॥
यावच्चक्रमिदं ग्रस्तमुद्धरामि महाभुज ।
न मां रथस्थो भूमिष्ठं विकलं हन्तुमर्हसि ॥ ११५ ॥
न वासुदेवात्त्वत्तो वा पाण्डवेय विभेम्यहम् ।

महाधनुषधारी अर्जुन! तुम क्षणभर ठहर जाओ, जबतक मैं पहियेको ना निकाल लूं, तबतक बाण मत छोडो। हे पार्थ! प्रारब्धसे पृथ्वीने मेरे रथके दहने पहियेको पकड लिया है। इस समय बाण चलाना, तुम्हारी कादरता है। तुम जगत् प्रसिद्ध महावीर हो, इसलिये, यह नपुंसक कर्म मत करो ॥ १०७-११०

हे पाण्डव! तुम उत्तम कर्म करने योग्य हो और यह भी जानते हो कि, भागते हुए, ब्राह्मण, हाथ जोडते, शरणागत, शस्त्रत्यागी, समय मागते हुए, बाणहीन, कवचहीन, टूटे और गिरे शस्त्रवाले मनुष्यपर, उत्तम शस्त्रधारी वीर शस्त्र नहीं चलाते। तुम जगत् प्रसिद्ध महावीर और महात्मा हो तुम युद्धके विषयोंको जाननेवाले, सब शास्त्रोंके पण्डित, शस्त्रों के जाननेवाले और कृतवीर्यपुत्र अर्जुनके समान योद्धा हो ॥ (१११—११४)

हे महाबाहो! हम जबतक इस रथके पहियेको पृथ्वीमे न निकालें तबतक तुम बाण मत छोडो क्यों कि हम व्याकुल होकर पृथ्वीपर बैठे हैं, हम तुममे और

द्विसाहस्रान्समरे सव्यसाची कुरुप्रवीरानृषभः कुरूणाम् ।
क्षणेन सर्वान्सरथाश्वसूतान्निनाय राजन्क्षयमेकवीरः ॥ १५ ॥
ततोऽपलायन्त विहाय कर्ण तवात्मजाः कुरवो येऽवशिष्टाः ।
हतानपाकीर्य शरक्षतांश्च लालप्यमानांस्तनयान्पितॄंश्च ॥ १६ ॥
स सर्वतः प्रेक्ष्य दिशो विशून्या भयावदीर्णैः कुरुभिर्विहीनः ।
न विव्यथे भारत तत्र कर्णः प्रहृष्ट एवार्जुनमभ्यधावत् ॥ १७॥ [४६०५]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कर्णार्जुनद्वैरथे ऊननवतितमोऽध्याय ॥८९॥

सञ्जय उवाच- ततः प्रयाताः शरपातमात्रमवस्थिताः कुरवो भिन्नसेनाः ।
विद्युत्प्रकाशं ददृशुः समन्ताद्धनञ्जयास्त्रं समुदीर्यमाणम् ॥ १ ॥
तदर्जुनास्त्रं ग्रसति स्म कर्णो वियद्गतं घोरतरैः शरैस्तत् ।
क्रुद्धेन पार्थेन भृशाभिसृष्टं वधाय कर्णस्य महाविमर्दे ॥ २ ॥
उदीर्यमाणं स्म कुरून्दहन्तं सुवर्णपुङ्खैर्विशिखैर्ममर्द ।
कर्णस्त्वमोघेष्वसनं दृढज्यं विस्फारयित्वा विसृजञ्छरौघान् ॥ ३ ॥
रामादुपात्तेन महामहिम्ना ह्याथर्वणेनारिविनाशनेन ।

हे राजन् ! उस समय कुरुकुलश्रेष्ठ महावीर अर्जुनने अपने बाणोंसे तुम्हारी सेनाके दो सहस्र वीरोंको रथ घोडे और हाथियोंके सहित मारडाला ॥ तब बचे हुए तुम्हारे बेटे और पोते घावोंसे व्याकुल होकर चिल्लाते हुए कर्णको छोडकर युद्धसे भागे । अर्जुन भी उन भागते हुओंपर अनेक बाण छोडने लगे । सब सेनाको भागते देख और अपनेको युद्धमें अकेला जानकर भी कर्ण कुछ न डरे और बाण बर्षाते हुए प्रसन्न होकर अर्जुनकी ओर दौडे ॥ (९५—९७) [४६०५]

कर्णपर्वमें नवासी अध्याय समाप्त ।

कर्णपर्वमें नब्बे अध्याय ।

सञ्जय बोले. हे राजन् ! अनन्तर

कौरवोंकी सेना भिन्न होकर भागगयी और जिस जगहमें अर्जुनके बाण नहीं पडते ऐसी जगहमें खडी होकर देखने लगी, तो बिजलीके समान प्रकाशमान अर्जुनका शस्त्र चारों ओर फैलरहा है ॥ इस घोर युद्धमें अर्जुनने जो क्रोधसे कर्णके मारनेके लिये अस्त्र छोडा था, जिसके बाण आकाशमें पूरित होरहे थे, कर्णने बाणोंसे उसे काट दिया ॥ कर्णने मेघके समान शब्दवाले अपने घोर धनुषपर टङ्कार देकर कौरवोंका नाश करते हुए अर्जुनके अस्त्रको अपने बाणोंसे काटकर फिर अनेक बाण चलाये । महात्मा कर्णने परशुरामके दिये हुए शत्रुओंका नाश करनेवाले घोर बाणसे अथर्व वेदके

यदा रजस्वलां कृष्णां दुःशासनवशे स्थिताम् ।
सभायां प्राहसः कर्ण क्व ते धर्मस्तदा गतः ॥ ७ ॥
यदनार्यैः पुरा कृष्णां क्लिश्यमानामनागसम् ।
उपप्रेक्षसि राधेय क्व ते धर्मस्तदा गतः ॥ ८ ॥
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः ।
पतिमन्यं वृणीष्वेति वदंस्त्वं गजगामिनीम् ।
उपप्रेक्षसि राधेय क्व ते धर्मस्तदा गतः ॥ ९ ॥
राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवान् ।
यदा शकुनिमाश्रित्य क्व ते धर्मस्तदा गतः ॥ १० ॥
यदाभिमन्युं बहवो युद्धे जघ्नुर्महारथाः ॥
परिवार्य रणे बालं क्व ते धर्मस्तदा गतः ॥ ११ ॥
यद्येष धर्मस्तत्र न विद्यते हि किं सर्वथा तालुविशोषणेन ॥ १२ ॥
अद्येह धर्म्याणि विधत्स्व सूत तथापि जीवन्न विमोक्ष्यसे हि ।
नलो ह्यक्षैर्निर्जितः पुष्करेण पुनर्यशो राज्यमवाप वीर्यात् ॥ १३ ॥

सोते हुए पाण्डवोंको जलाया था, तब तुम्हारा धर्म कहां चला गया था ?(४-६)

हे कर्ण ! जब दुःशासनसे पकडी हुई रजस्वला द्रौपदीको देखकर तुम हंसे थे, तब तुम्हारा धर्म कहां गया था ? हे राधापुत्र ! जब सभामें दुष्टोंके द्वारा क्लेशको प्राप्त हुई निरपराधिनी द्रौपदीको देख तुमने उनका निवारण न करके उनकी उपेक्षा ही किया था, तब तुम्हारा धर्म कहां गया था ? जब तुमने द्रौपदी से कहा था कि "हे गजगामिनी ! पाण्डव नष्ट होगये, इन्हें घोर दुःख भोगना पडेगा इसलिये तुम दूसरा पति कर लो" तब तुम्हारा धर्म कहां गया था ? (७—१०)

हे कर्ण ! जब राज्यके लोभसे पाण्डवोंके सङ्ग तुमने युद्ध करना विचारा था और जब शकुनिके आश्रयसे जुआ खेला था, तब तुम्हारा धर्म कहां गया था ? जब तुमने अनेक वीरोंसे मिलकर बालक अभिमन्युको मारा था, तब तुम्हारा धर्म कहां गया था ? उन सबोंमें धर्म नहीं था ? अब इस समय धर्म है ? अब अधिक बोलनेसे मुख सूखने के सिवाय और कुछ लाभ नहीं है ॥ (१०—१२)

हे सूतपुत्र ! अब हमारे पास आकर धर्म युक्त बात कर तथापि तुम जीता न बचेगा । जैसे नल पुष्करसे जुएमें राज्य हारकर फिर राज्य और यशको प्राप्त



कर्णके रथ का चक्र भूमीमें फंस गया।

(भा. मु. आय) (म. भा. कर्णपर्व अ. ९०)

ततोऽन्यदस्त्रं कौन्तेयो दयितं जातवेदसः ॥ २२ ॥
मुमोच कर्णमुद्दिश्य तत्प्रजज्वाल तेजसा।
वारुणेन ततः कर्णः शमयामास पावकम् ॥ २३ ॥
जीमूतैश्च दिशः सर्वाश्चक्रे तिमिरदुर्दिनाः।
पाडवेयस्त्वसम्भ्रान्तो वायव्यास्त्रेण वीर्यवान्॥ २४ ॥
अपोवाह तदाभ्राणि राधेयस्य प्रपश्यतः।
ततः शरं महाघोरं ज्वलन्तमिव पावकम् ॥ २५ ॥
आददे पाण्डुपुत्रस्य सूतपुत्रो जिघांसया।
योज्यमाने ततस्तस्मिन्वाणे धनुषि पूजिते ॥ २६ ॥
चचाल पृथिवी राजन्सशैलवनकानना।
ववौ सशर्करो वायुर्दिशश्च रजसावृताः ॥ २७ ॥
हाहाकारश्च संजज्ञे सुराणां दिवि भारत।
तमिषुं सन्धितं दृष्ट्वा सूतपुत्रेण मारिष ॥ २८ ॥
विषादं परमं जग्मुः पाण्डवा दीनचेतसः।
स सायकः कर्णभुजप्रमुक्तः शक्राशनिप्रख्यरुचिः शिताग्रः ॥ २९ ॥
भुजान्तरं प्राप्य धनञ्जयस्य विवेश वल्मीकमिवोरगोत्तमः।
स गाढविद्धः समरे महात्मा विघूर्णमानः श्लथहस्तगाण्डिवः॥ ३० ॥
चचाल बीभत्सुरमित्रमर्दनः क्षितेः प्रकम्पे च यथाचलोत्तमः।

वरुण अस्त्रसे शान्त कर दिया॥ उस समय सब दिशाओंमें मेघ छागये और घोर अन्धकार होगया। तब अर्जुनने वायु वाण चला कर कर्णके देखते देखते सब मेघोंको उडा दिया। (२१—२५)

फिर जलती हुई अग्निके समान घोर वाण कर्णने अर्जुनके मारनेको धनुप पर चढाया, जब वह श्रेष्ठ वाण धनुप पर चढा उस समय पर्वत और वनोंके सहित पृथ्वी कांपने लगी, और वायु धूलके सहित चलने लगा। हे पृथ्वीनाथ! सूतपुत्रके उस वाणको देखकर आकाश में घूमते हुए देवता हाहाकार करने लगे, और पाण्डवोंकी सेना भी बहुत मलीन हो गयी। (२५—२९)

वह वज्रके समान घोर वाण कर्णके धनुपसे छूटकर अर्जुनकी छातीमें लग कर इस प्रकार घुसा जैसे सांप बिलमें। उस वाणके लगनेसे महात्मा अर्जुन कांपने लगे और धनुप हाथसे गिर गया। जिस प्रकार भूकम्पमें पर्वत हिलने लगते हैं। ऐसे ही शत्रुनाशन अर्जुन

ततस्तु पातालतले शयानो नागोऽश्वसेनः कृतवैरोऽर्जुनेन ॥ १२ ॥
राजंस्तदा खाण्डवदाहमुक्तो विवेश कोपाद्वसुधातलं यः ।
अधोत्पपातोर्ध्वगतिर्जवेन सन्दृश्य कर्णार्जुनयोर्विमर्दम् ॥ १३ ॥
अयं हि कालोऽस्य दुरात्मनो वै पार्थस्य वैरप्रतियातनाय ।
सञ्चिन्त्य तूणं प्रविवेश चैव कर्णस्य राजञ्शररूपधारी ॥ १४ ॥
ततोऽस्त्रसङ्घातसमाकुलं तदा बभूव जन्यं विततांशुजालम् ।
तत्कर्णपार्थौ शरसङ्घवृष्टिभिर्निरन्तरं चक्रतुरम्बरं तदा ॥ १५ ॥
तद्बाणजालैकमयं महान्तं सर्वेऽत्रसन्कुरवः सोमकाश्च ।
नान्यत्किञ्चिद्ददृशुः सम्पतद्भिर्बाणान्धकारे तुमुलेऽतिमात्रम् ॥ १६ ॥
ततस्तौ पुरुषव्याघ्रौ सर्वलोकधनुर्धरौ ।
त्यक्तप्राणौ रणे वीरौ युद्धश्रममुपागतौ ॥
समुत्क्षेपैर्वीक्षमाणौ सिक्तौ चन्दनवारिणा ॥ १७ ॥
सवालव्यजनैर्दिव्यैर्दिविस्थैरप्सरोगणैः ।
शक्रसूर्यकराञ्जाभ्यां प्रमार्जितमुखावुभौ ॥ १८ ॥
कर्णोऽथ पार्थं न विशेषयद्यदा भृशं च पार्थेन शराभितप्तः ।

जहां इस प्रकार घोडे, हाथी और मनुष्योंके आघातसे पृथ्वी विदीर्ण होगई थी, तहां अर्जुनका वैरी अश्वसेन नामक सर्प जो खाण्डव वनके जलाते समय भागकर बचा था और पृथ्वीमें रहता था कर्ण और अर्जुनका ऐसा घोर युद्ध देखकर शीघ्रता सहित क्रोधमें भरकर दौडा, उस दुष्टने यह जाना, कि अर्जुनसे वैर लेनेका यही समय है, तब बाणका रूप बनाकर कर्णके तूणीरमें घुस गया ॥ (१२—१४)

तब कर्ण और अर्जुनने अपने बाणोंसे समस्त आकाश पूरित कर दिया उस बाणोंके घोर अन्धकारमें कौरव और पाञ्चालोंको बाणोंके सिवाय और कुछ न दीखा, इन दोनोंके बाण आकाशमें छा गये, जब ये दोनों जगत् प्रसिद्ध धनुषधारी महापराक्रमी वीर पुरुषसिंह युद्धमें थक गये, तब एक दूसरेकी ओर देखने लगा । उसी समय उन दोनोंकी ओरके मनुष्य दोनोंके ऊपर चन्दन मिला जल छिडकने लगे । आकाशमें घूमती हुई अप्सरा उन दोनोंको पङ्खा करने लगी, सूर्य और इन्द्रने अपनी किरणोंसे दोनोंके मुख निरमल कर दिये ॥ (१५—१८)

जब बाणोंसे पीडित कर्ण किसी प्रकार अर्जुनसे अधिक न होसके, तब

ततोऽस्य देहं सततं सुखोचितं सुरूपमत्यर्थमुदारकर्मणः ॥ ५३ ॥
परेण कृच्छ्रेण शिरः समत्यजद्गृहं महर्द्धीव सुसङ्गमीश्वरः ।
शरैर्विभिन्नं व्यसु तत्सुवर्चसः पपात कर्णस्य शरीरमुच्छ्रितम् ॥५४॥
स्रवद्व्रणं गैरिकतोयविस्रवं गिरेर्यथा वज्रहतं महाशिरः ।
देहाच्च कर्णस्य निपातितस्य तेजः सूर्यः खं वितत्याविवेश॥ ५५ ॥
तदद्भुतं सर्वमनुष्ययोधाः सन्दृष्टवन्तो निहते स कर्णे ।
ततः शङ्खान्पाण्डवा दध्मुरुच्चैर्दृष्ट्वा कर्णं पातितं फाल्गुनेन ॥ ५६ ॥
तथैव कृष्णश्च धनञ्जयश्च हृष्टौ यमौ दध्मतुर्वारिजातौ ।
तं सोमकाः प्रेक्ष्य हतं शयानं सैन्यैः सार्धं सिंहनादान्प्रचक्रुः ॥ ५७ ॥
तूर्याणि सञ्जघ्नुरतीव हृष्टा वासांसि चैवादुधुवुर्भुजांश्च ।
संवर्धयन्तश्च नरेन्द्रयोधा पार्थं समाजग्मुरतीव हृष्टाः ॥ ५८ ॥
बलान्विताश्चापरे ह्यप्यनृत्यन्नन्योन्यमाश्लिष्य नदन्त ऊचुः ।
दृष्ट्वा तु कर्णं भुवि वा विपन्नं कृत्तं रथात्सायकैर्जुनस्य ॥ ५९ ॥
महानिलेनाद्रिमिवापविद्धं यज्ञावसानेऽग्निमिव प्रशान्तम् ।

गिराया पीछे धड गिर पडा, जैसे लाल मण्डलवाले सूर्य अस्ताचलसे गिरते हैं, ऐसे कर्णका शिर कटकर पृथ्वीमें गिर गया। तब सुख भोगने योग्य अत्यन्त सुन्दर उत्तम कर्मकारी कर्णका धड भी प्राण रहित होकर गिरा, धड और शिर दोनों अत्यन्त कठिनतासे इस प्रकार अलग हुए जैसे धन भरे घरसे स्वामी। (५१–५४)

जैसे पर्वतसे गेरुके झरने बहते हैं, ऐसे ही तेजस्वी कर्णके शरीरसे रुधिर बहने लगा। जैसे वज्रसे कटकर पर्वतका शिखर गिरता है, ऐसे ही कर्णका शिर कटकर पृथ्वीमें गिर गया और जीव सूर्यलोकके पास चला गया, कर्णके जीवको जाते हुए सब वीरोंने देखा। कर्णको मरा देख पाण्डव प्रसन्न होकर शङ्ख बजाने लगे॥ उसी समय अर्जुन, कृष्ण, नकुल और सहदेवने प्रसन्न होकर शङ्ख बजाये। सेना समेत कर्णको मरा देख पाञ्चाल प्रसन्न हो सिंहके समान गर्जने लगे॥ (५४–५७)

सब पाण्डवोंकी सेना प्रसन्न होकर बाजे बजाने लगी, और वस्त्र घुमाकर ताली बजाकर नाचने लगी, फिर अर्जुनको धन्यवाद देनेको उनके पास सब वीर आये॥ कर्णको अपने बाणोंसे कटा हुआ और रथसे नीचे पडा देख परस्पर मिलकर नाचने कूदने और गर्जने लगे, जैसे पर्वतका टूटा हुआ शिखर, यज्ञके अन्तकी अग्नि और अस्त

इतीदमुक्त्वा विससर्ज तं शरं प्रयत्नतो वर्षगणाभिपूजितम् ।
हतोऽसि वै फाल्गुन इत्यधिक्षिपन्नुवाच चोच्चैर्गिरसूर्जितां वृषः ॥२७॥
स सायकः कर्णभुजप्रसृष्टो हुताशनार्कप्रतिमः सुघोरः ।
गुणच्युतः कर्णधनुःप्रमुक्तो वियद्गतः प्राज्वलदन्तरिक्षे ॥ २८ ॥
तं प्रेक्ष्य दीप्तं युधि माधवस्तु त्वरान्वितं स त्वरयैव लीलया ।
पदा विनिष्पिष्य रथोत्तमं स प्रावेशयत्पृथिवीं किञ्चिदेव ॥ २९ ॥
क्षितिं गता जानुभिस्तेऽथ वाहा हेमच्छन्नाश्चन्द्रमरीचिवर्णाः ।
ततोऽन्तरिक्षे सुमहान्निनादः सम्पूजनार्थं मधुसूदनस्य ॥ ३० ॥
दिव्याश्च वाचः सहसा बभूवुर्दिव्यानि पुष्पाण्यथ सिंहनादाः ।
तस्मिंस्तथा वै धरणीं निमग्ने रथे प्रयत्नान्मधुसूदनस्य ॥ ३१ ॥
ततः शरः सोऽभ्यहनत्किरीटं तस्येन्द्रदत्तं सुदृढं च धीमतः ।
अथार्जुनस्योत्तमगात्रभूषणं धरावियत्द्योसलिलेषु विश्रुतम् ॥३२॥
व्यालाङ्कसर्गोत्तमयत्नमन्युभिः शरेण मूर्ध्नः प्रजहार सूतजः ।
दिवाकरेन्दुज्वलनप्रभत्विषं सुवर्णमुक्तामणिवज्रभूषितम् ॥ ३३ ॥

शल्यसे कहा, हे शल्य ! हमारे समान मनुष्य दो वार लक्ष्य नहीं देखते और एक वार वाण चढा कर फिर उसे नहीं चढाते। ऐसा कह कर कर्णने जोरसे पुकारा कि अर्जुन मारा गया, ऐसा कह कर वहुत काल पूजित उस घोर वाणको कर्णने छोड दिया ॥ (२५—२७)

वह घोर सूर्य और अग्नि के समान वाण कर्ण के धनुपसे छूट कर आकाश में जाकर प्रकाश करने लगा, श्रीकृष्णने उस घोर वाणको आते देख अपनी लीलासे अपने पैरोंसे रथको ऐसा दवाया कि घोडों सहित रथ पृथ्वीमें घुस गया, और चन्द्रमाके समान सफेद सोनेके उत्तम जालवाले, घोडोंको विठला दिया, श्रीकृष्णका यह अद्भुत कर्म देख आकाशमें खडे हुए सव देवता श्रीकृष्णकी प्रशंसा करते हुए वाजा वजाने लगे। जव श्रीकृष्णने अपने वलसे उस रथको पृथ्वीमें घुसा दिया, तव आकाशसे फूलोंकी वर्षा होने लगी और सव देवता सिंहके समान गर्ज कर अनेक प्रकारके वचन कहने लगे ॥ (२८—३१)

अनन्तर उस वाणसे इन्द्रका दिया हुआ स्वर्ग भूमि और पातालमें प्रसिद्ध उत्तम मुकुट कट गया। क्रोधी सूतपुत्रने इस सर्पयुक्त वाणमे मोती, नीलम आदि मणियोंसे जडा हुआ सोनेका वना सूर्य-की किरणोंके समान प्रकाशित अर्जुनका

सहस्ररश्मिर्दिनसंक्षये यथा तथापतत्कर्णशिरो वसुन्धराम्॥६७॥[४७८८]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कर्णवधे एकनवतितमोऽध्याय ॥९१॥

सञ्जय उवाच- शल्यस्तु कर्णार्जुनयोर्विमर्दे बलानि दृष्ट्वा मृदितानि बाणैः।
ययौ हते चाधिरथौ पदानुगे रथेन संछिन्नपरिच्छदेन ॥ १ ॥
निपातितस्यन्दनवाजिनागं बलं च दृष्ट्वा हतसूतपुत्रम्।
दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो दीनो मुहुर्निःश्वसंश्चार्तरूपः ॥ २ ॥
कर्णं तु शूरं पतितं पृथिव्यां शराचितं शोणितदिग्धगात्रम्।
यदृच्छया सूर्यमिवावनिस्थं दिदृक्षवः सम्परिवार्य तस्थुः ॥ ३ ॥
प्रहृष्टवित्रस्तविषण्णविस्मितास्तथापरे शोकहता इवाभवन्।
परे त्वदीयाश्च परस्परेण यथा यथैषां प्रकृतिस्तथाभवन् ॥ ४ ॥
प्रविद्धवर्माभरणाम्बरायुधं धनञ्जयेनाभिहतं महौजसम्।
निशाम्य कर्णं कुरवः प्रदुद्रुवुर्हतर्षभा गाव इवाजने वने ॥ ५ ॥
भीमश्च भीमेन तदा स्वनेन नादं कृत्वा रोदसी कम्पयानः।
आस्फोटयन्वल्गते नृत्यते च हते कर्णे त्रासयन्धार्तराष्ट्रान् ॥ ६ ॥

सूर्य सन्ध्याको अस्ताचलसे गिरता है ॥ (६५—६७) [४७८८]

कर्णपर्वमें एकानब्बे अध्याय समाप्त।

कर्णपर्वमें बानब्बे अध्याय।

सञ्जय बोले, हे राजन्! शल्य, अर्जुन और कर्णके घोर युद्धमें बाणोंकी गति और बलको देख कर तथा कर्णको पदाति मरा छोड, टुटे फूटे रथको ले डेरेमें गये ॥ अपनी सेनाके हाथी घोडे और मनुष्योंको मरा देख और कर्णको पृथ्वीमें पडा देख दुर्योधन ऊंचे श्वांस लेकर आखोंमें आंसू भरकर कुछ समय तक रोते रहे ॥ अपनी इच्छासे गिरे हुए सूर्यके समान कर्णको पृथ्वीमें गिरा और बाणोंसे कटा जान कर सब सेनाके वीर देखनेको आये ॥ (१—३)

कोई कर्णको पडा देख प्रसन्न हुआ, कोई शोकसे व्याकुल हो रोने लगे, कोई जैसे खडे थे, वैसे ही रह गये और कोई आश्चर्य करने लगे ॥ इस प्रकार सबने अपने स्वभावके अनुसार कर्णका शोक किया। जैसे सांडके मरनेसे गौ व्याकुल होकर वनसे भागने लगती है ऐसे ही अर्जुनके बाणोंसे कवच और भूषण रहित कर्णको मरा सुन तुम्हारी सेना भागने लगी ॥ (४—६)

कर्णके मरनेके पश्चात् भीमसेन ताल ठोंककर अपने घोर शब्दसे जगत्को कंपाते हुए और तुम्हारे पुत्रोंको डराते हुए नाचने और कूदने लगे ॥ इसी

विना किरीटं शुशुभे स पार्थः श्यामो युवा नील इवोच्चशृङ्गः ।
ततः समुद्वृत्य सितेन वाससा स्वमूर्धजानव्यथितस्तदार्जुनः ॥
विभासितः सूर्यमरीचिना हठं शिरोगतेनोदयपर्वतो यथा ॥ ४१ ॥

गोकर्णा सुमुखी कृतेन इषुणा गोपुत्रसम्प्रेषिता ।
गोशब्दात्मजभूषणं सुविहितं सुव्यक्तगोऽसुप्रभम् ॥
दृष्ट्वा गोगतकं जहार मुकुटं गोशब्दगोपूरि वै ।
गोकर्णासनमर्दनश्च न ययावप्राप्य मृत्योर्वशम् ॥ ४२ ॥

स सायकः कर्णभुजप्रसृष्टो हुताशनार्कप्रतिमो महार्हः ।
महोरगः कृतवैरोऽर्जुनेन किरीटमाहृत्य ततो व्यतीयात् ॥ ४३ ॥
तं चापि दग्ध्वा तपनीयचित्रं किरीटमाकृष्य तदर्जुनस्य ।
इयेष गन्तुं पुनरेव तूणं दृष्टश्च कर्णेन ततोऽब्रवीत्तम् ॥ ४४ ॥
मुक्तस्त्वयाहं त्वसमीक्ष्य कर्ण शिरो हृतं यन्न मयार्जुनस्य ।
समीक्ष्य मां मुञ्च रणे त्वमाशु हन्तास्मि शत्रुं तव चात्मनश्च ॥ ४५ ॥
स एवमुक्तो युधि सूतपुत्रस्तमब्रवीत्को भवानुग्ररूपः ।

मुकुट गिरनेसे श्याम सुन्दर तरुण अर्जुन ऐसे शोभित हुए जैसे उच्च शिखर वाला पर्वत । तब अर्जुनने सावधान होकर सफेद कपड़ेसे अपने बिखरे हुए बालोंको बांधा उस कपड़ेसे अर्जुनकी ऐसी शोभा बढी जैसे सूर्यके सहित उदयाचलकी ॥ जिस चक्षुश्रवा सर्पिणीको अर्जुनने खाण्डव वनमें मारा था, उसके पुत्रने कर्णके बाण पर बैठ कर कर्णके धनुषसे छूट कर प्रकाशित सूर्यकी किरणोंके समान सुन्दर इन्द्रके भूषणभूत मुकुटको काट दिया, परन्तु घोडोंकी रासकी सीधपर दीखता हुआ अर्जुनका शिर न कटा । बाणोंसे सर्पको मारनेवाले अर्जुन भी गलेमें सांपके न लगनेसे न मरे ॥ (४१-४२)

वह कर्णके हाथसे छूटे बाण पर बैठा हुआ अग्नि और सूर्यके समान प्रकाशमान सर्प अर्जुनका मुकुट काट कर पृथ्वी पर गिर गया तब उस गिरे मुकुटको उसी सांपने अपने विषसे भस्म कर दिया, और फिर कर्णके भातेमें जानेकी इच्छा की परन्तु जब उसे कर्णने देखा तब वह कर्णसे कहने लगा । हे कर्ण! तुमने मुझे विना देखे छोड दिया था, इसीसे मैंने अर्जुनका शिर नहीं काटा, अब तुम देखकर हमें छोडो तो हम उस तुम्हारे और अपने शत्रुको अवश्य मारेंगे ॥ (४३-४५)

तब सूतपुत्रने उससे कहा तुम महा-

एतद्वचो मद्रपतेर्निशम्य स्वं चाप्यनीतं मनसा निरीक्ष्य ।
दुर्योधनो दीनमना विसंज्ञः पुनः पुनर्न्यश्वसदार्तरूपः ॥ १५ ॥ [४८०३]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि शल्यप्रत्यागमने द्विनवतितमोऽध्याय ॥९२॥

धृतराष्ट्र उवाच—तस्मिंस्तु कर्णार्जुनयोर्विमर्दे दग्धस्य रौद्रेऽहनि विद्रुतस्य ।
बभूव रूपं कुरुसृञ्जयानां बलस्य बाणोन्मथितस्य कीदृक् ॥ १ ॥

सञ्जय उवाच— शृणु राजन्नवहितो यथा वृत्तो महाक्षयः ।
घोरे मनुष्यदेहानामाजौ च गजवाजिनाम् ॥ २ ॥
यत्र कर्णे हते पार्थः सिंहनादमथाकरोत् ।
तदा तव सुतान्राजन्नाविवेश महद्भयम् ॥ ३ ॥
न सन्धातुमनीकानि न चैवाशु पराक्रमे ।
आसीद् बुद्धिर्हते कर्णे तव योधस्य कर्हिचित् ॥ ४ ॥
वणिजो नावि भिन्नायामगाधे विप्लवे यथा ।
अपारे पारमिच्छन्तो हते द्वीपे किरीटिना ॥ ५ ॥
सूतपुत्रे हते राजन्वित्रस्ताः शस्त्रविक्षताः ।
अनाथा नाथमिच्छन्तो मृगाः सिंहैरिवार्दिताः ॥ ६ ॥

इसका कुछ सोच मत करो। प्रारब्ध बडी बलवान् है, साहस रक्खो सर्व काल सिद्धि नहीं होती ॥ (१२–१४)

मद्रराज शल्यके ऐसे वचन सुन और अपने अधर्मोंको विचार राजा दुर्योधन बार बार ऊंचे स्वांस लेकर रोने लगे ॥ (१५) [४८०३]

कर्णपर्वमें बानव्वे अध्याय समाप्त ।

कर्णपर्वमें तिरानव्वे अध्याय ।

धृतराष्ट्र बोले, हे सञ्जय! इस प्रकार कर्ण और अर्जुनका घोर युद्ध होनेके पश्चात् बाणोंसे व्याकुल कुरु और पाञ्चाल सेनाका रूप कैसा होगया था ? (१)

सञ्जय बोले, हे राजेन्द्र ! आप सावधान होकर सुनिये उस समय युद्धमें मनुष्य, हाथी, घोडोंके मरनेके पश्चात् जो कुछ हुआ सो हम कहते हैं ॥ जब कर्णको मारकर अर्जुन सिंहके समान गर्जे, तो भी तुम्हारे पुत्र डरसे कांपने लगे ॥ उस समय तुम्हारे वीर सेनाको सम्हाल न सके और न आप ही युद्ध कर सके ॥ (२–४)

जैसे नाव टूटनेपर अपार समुद्रमें डूबते हुए बनिये घबराते हैं और पार जानेकी इच्छा करते हैं, ऐसे ही अर्जुनके हाथसे कर्णको मरा देख तुम्हारे पुत्र घबडाये। जैसे सिंहको देखकर हरिण डरकर भागते हैं, ऐसे ही कर्णके

नभश्च्युतां प्रज्वलितामिवोल्कां पश्यैनमायान्तममित्रसाह ॥ ५३ ॥
सञ्जय उवाच-ततः स जिष्णुः परिवृत्य रोषाच्चिच्छेद षड्भिर्निशितैः सुधारैः ।
नागं वियत्तिर्यगिवोत्पतन्तं स च्छिन्नगात्रो निपपात भूमौ ॥ ५४ ॥
गते च तस्मिन्भुजगे किरीटिना स्वयं विभुः पार्थिव भूतलादथ ।
समुज्जहाराशु पुनः पतन्तं रथं भुजाभ्यां पुरुषोत्तमस्ततः ॥ ५५ ॥
तस्मिन्मुहूर्ते दशभिः पृषत्कैः शिलाशितैर्बर्हिणबर्हवाजितैः ।
विव्याध कर्णः पुरुषप्रवीरो धनञ्जयं तिर्यगवेक्षमाणः ॥ ५६ ॥
ततोऽर्जुनो द्वादशभिः सुमुक्तैर्वराहकर्णैर्निशितैः समर्प्य ।
नाराचमाशीविषतुल्यवेगमाकर्णपूर्णायतमुत्ससर्ज ॥ ५७ ॥
स चित्रवर्मेषुवरो विदार्य प्राणान्निरस्यन्निव साधु मुक्तः ।
कर्णस्य पीत्वा रुधिरं विवेश वसुन्धरां शोणितदिग्धवाजः ॥ ५८ ॥
ततो वृषो बाणनिपातकोपितो महोरगो दण्डविघट्टितो यथा ।
तदाशुकारी व्यसृजच्छरोत्तमान्महाविषः सर्प इवोत्तमं विषम् ॥ ५९ ॥
जनार्दनं द्वादशभिः पराभिनन्नवैर्नवत्या च शरैस्तथार्जुनम् ।
शरेण घोरेण पुनश्च पाण्डवं विदार्य कर्णो व्यनदज्जहास च ॥ ६० ॥
तमस्य हर्षं ममृषे न पाण्डवो विभेद मर्माणि ततोऽस्य मर्मवित् ।

उडता हुआ जलती हुई मसालके समान चला आता है ॥ (५२-५३)

सञ्जय बोले, हे राजन् ! तब अर्जुन ने छः तेज बाणोंसे टेढे उडते हुए सांपको काट दिया। वह कटकर पृथ्वीमें गिर गया, जिस समय इस प्रकार वह सर्प मरगया, तब श्रीकृष्णने रथसे उतर कर अपने हाथोंसे रथ और घोडोंको उठाया, उतने ही समयमें वीर कर्णने टेढी दृष्टि करके शिला पर घिसे हुए मोरपङ्खयुक्त दश बाण अर्जुनके शरीरमें मारे ॥ (५४-—५६)

तब अर्जुनने भी अत्यन्त तेज बारह बाण कर्णके शरीरमें मार कर एक घोर नाराच कानतक खींचकर छोडा वह घोर बाण अर्जुनके धनुषसे छूट कर कर्णका कवच काट रुधिर पी और रुधिरमें भीग कर पृथ्वीमें घुस गया, जैसे बडा सर्प लट्ठी लगनेसे क्रोधमें भर कर विष छोडता है, ऐसे ही उस बाणके लगनेसे क्रोधमें भरकर कर्णने उत्तम बाण छोडने आरम्भ किया ॥ (५७—५९)

तब श्रीकृष्णके शरीरमें नौ बाण मार कर अर्जुनके शरीरमें निनानव्वे बाण मारे; फिर एक घोर बाण मार कर गर्जने और हंसने लगे ॥ परन्तु अर्जुन-

जवेनाभ्यपतन्हृष्टा घ्नन्तो दौर्योधनं बलम् ।
तस्याश्वसादीन्सुबहूंस्ते निहत्य शितैः शरैः ॥ ३१ ॥
समभ्यधावंस्त्वरितास्तत्र युद्धमभून्महत् ।
धनञ्जयोऽपि चाभ्येत्य रथानीकं तव प्रभो ॥ ३२ ॥
विश्रुतं त्रिषु लोकेषु गाण्डीवं विक्षिपन्धनुः ।
कृष्णसारथिमायान्तं दृष्ट्वा श्वेतहयं रथम् ॥ ३३ ॥
अर्जुनं चापि योद्धारं त्वदीयाः प्राद्रवन्भयात् ।
विप्रहीणरथाश्चैव शरैश्च परिकर्षिताः ॥ ३४ ॥
पञ्चविंशतिसाहस्राः कालमार्छन्पदातयः ।
हत्वा तान्पुरुषव्याघ्रः पञ्चालानां महारथः ॥ ३५ ॥
पुत्रः पाञ्चालराजस्य धृष्टद्युम्नो महामनाः ।
भीमसेनं पुरस्कृत्य न चिरात्प्रत्यदृश्यत ॥ ३६ ॥
महाधनुर्धरः श्रीमानमित्रगणतापनः ।
पारावतसवर्णाश्वं कोविदारमयं ध्वजम् ॥ ३७ ॥
धृष्टद्युम्नं रणे दृष्ट्वा त्वदीयाः प्राद्रवन्भयात् ।
गान्धारराजं शीघ्रास्त्रमनुसृत्य यशस्विनौ ॥ ३८ ॥
न चिरात्प्रत्यदृश्येतां माद्रीपुत्रौ ससात्यकी ।
चेकितानः शिखण्डी च द्रौपदेयाश्च मारिष ॥ ३९ ॥
हत्वा त्वदीयं सुमहत्सैन्यं शङ्खांस्तथाऽधमन् ।

की ओर चले गये, उस समय शकुनि की सेनामें घोर युद्ध होने लगा । इसी प्रकार अर्जुन भी तुम्हारी रथ सेनामें जाकर जगत् विख्यात गाण्डीव धनुषको घुमाने लगे ॥ (३०—३३)

कृष्ण सारथी और सफेद घोडोंसे युक्त रथको आते देख और महायोद्धा अर्जुनको बाण छोडते देख बाणोंसे व्याकुल तुम्हारी सेना भागी, धृष्टद्युम्नने पचीस सहस्र पदातियोंको मारकर भीमसेनके सहित प्रसन्न होकर खडे होगये, उस समय सफेद घोडोंके रथपर चढे, महापराक्रमी श्रीमान् धृष्टद्युम्न कचनार ध्वजायुक्त बहुत शोभित हुए। उन्हें देखकर तुम्हारी सेना इधर उधरको भागने लगी । (३३—३८)

शीघ्र शस्त्र चलानेवाले गान्धारराज शकुनिके पास जाकर महायशस्वी नकुल और सहदेव, सात्यकी, द्रौपदीके पांचों पुत्र और शिखण्डी तेज बाण बर्षाने लगे।

ततः शरासनोपमपास्य सूतजो धनुश्च तच्छक्रशरासनोपमम् ।
ततो रथस्थः स मुमोह च स्खलन्प्रशीर्णमुष्टिः सुभृशाहतः प्रभो॥ ६९॥
न चार्जुनस्तं व्यसने तदेषिवान्निहन्तुमार्यः पुरुषव्रते स्थितः ।
ततस्तमिन्द्रावरजः सुसम्भ्रमादुवाच किं पाण्डव हे प्रमाद्यसे ॥ ७० ॥
नैवाहितानां सततं विपश्चितः क्षणं प्रतीक्षन्त्यपि दुर्बलीयसाम् ।
विशेषतोऽरीन्व्यसनेषु पण्डितो निहत्य धर्मं च यशश्च विन्दते ॥ ७१ ॥
तदेकवीरं तव चाहितं सदा त्वरस्व कर्ण सहसाभिमर्दितुम् ।
पुरा समर्थः समुपेति सूतजो भिन्धि त्वमेनं नमुचिं यथा हरिः ॥ ७२ ॥
ततस्तदेवेत्यभिपूज्य सत्वरं जनार्दनं कर्णमविध्यदर्जुनः ।
शरोत्तमैः सर्वकुरूत्तमस्त्वरंस्तथा यथा शम्बरहा पुरा बलिम् ॥ ७३ ॥
साश्वं तु कर्ण सरथं किरीटी समाचिनोद्धारत वत्सदन्तैः ।
प्रच्छादयामास दिशश्च बाणैः सर्वप्रयत्नात्तपनीयपुङ्खैः ॥ ७४ ॥
स वत्सदन्तैः पृथुपीनवक्षाः समाचितः सोऽधिरथिर्विभाति ।
सुपुष्पिताशोकपलाशशाल्मलिर्यथाचलश्चन्दनकाननायुतः ॥ ७५ ॥
शरैः शरीरे बहुभिः समर्पितैर्विभाति कर्णः समरे विशाम्पते ।

पर्वतमें शक्ति मारी थी। हे पृथ्वीनाथ! तब कर्णके हाथसे वह इन्द्रधनुष तुल्य धनुष गिर गया, मुट्ठी ढीली होगयी और रथमें मूर्च्छा आगयी ॥ (६६–६९)

तब अर्जुनने महात्माओंके कर्मानुसार मूर्च्छित कर्णको मारनेकी इच्छा न की; तब श्रीकृष्णने कहा, हे अर्जुन! तुम यह क्या भूल करते हो? कोई पण्डित दुर्बल शत्रुओंको भी नहीं छोड़ता है। विशेष कर आपत्तिमें शत्रुओंको मारनेसे यश और धर्म प्राप्ति होती है जैसे पहले इन्द्रने नमुचिको मारा था, तैसे तुम अपने शत्रु महावीर कर्णको मारनेके लिये शीघ्रता करो. नहीं तो यह फिर समर्थ होकर तुम्हारी हानि करेगा ॥ (७०—७२)

तब श्रीकृष्णके वचनको स्वीकार करके कुरुकुलश्रेष्ठ अर्जुनने कर्णके शरीरमें इस प्रकार बाण मारे जैसे पहले इन्द्रने बलिके शरीरमें मारे थे ॥ हे भारत! उस समय अर्जुनने सोनेके पङ्खवाले वत्सदन्त बाणोंसे दशों दिशा, कर्णका रथ और घोडे सब छिपा दिये। जैसे फूले हुए कचनार, ढाक और चन्दनके वृक्षोंसे युक्त पर्वत शोभित होता है, ऐसे ही ऊंचे हृदयवाले कर्ण अर्जुनके बाणोंसे शोभित हुए ॥ (७३-७५)

हे पृथ्वीनाथ! अनेक बाण लगनेसे

तत्रावधीत्ततः क्रुद्धः शतशोऽथ सहस्रशः ।
तत्सैन्यं पाण्डवेयानां बोधयामास सर्वतः ॥ ४९ ॥
तत्राद्भुतमपश्याम तव पुत्रस्य पौरुषम् ।
यदेकः सहितान्सर्वान्रणेऽयुध्यत पाण्डवान् ॥ ५० ॥
ततोऽपश्यन्महात्मा स स्वसैन्यं भृशदुःखितम् ।
ततोऽवस्थाप्य राजेन्द्र कृतबुद्धिस्तवात्मजः ॥ ५१ ॥
हर्षयन्निव तान्योधानिदं वचनमब्रवीत् ।
न तं देशं प्रपश्यामि यत्र याता भयार्दिताः ॥ ५२ ॥
गतानां यत्र वै मोक्षः पाण्डवार्त्कि गतेन वः ।
अल्पं च बलमेतेषां कृष्णौ च भृशविक्षतौ ॥ ५३ ॥
अद्य सर्वान्हनिष्यामि ध्रुवो हि विजयो भवेत् ।
विप्रयातांस्तु वो भिन्नान्पाण्डवाः कृतकिल्बिषान्॥५४॥
अनुसृत्य वधिष्यन्ति श्रेयान्नः समरे वधः ।
सुखं सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम् ॥ ५५ ॥
मृतो दुःखं न जानीते प्रेत्य चानन्त्यमश्नुते ।
शृणुध्वं क्षत्रियाः सर्वे यावन्तः स्थ समागताः ॥५६॥
यदा शूरं च भीरुं च मारयत्यन्तको यमः ।

ओर बाण वर्षाने लगे। दुर्योधनने पाण्डवोंकी सेनाके सैकडों वा सहस्रों मनुष्योंको मारडाला, हमने उस समय दुर्योधनका अद्भुत पराक्रम देखा, वे अकेले ही सब पाण्डवोंके सङ्ग युद्ध करते रहे। हे राजेन्द्र! तुम्हारे पुत्र महात्मा दुर्योधनने अपनी सेनाको व्याकुल देख कर सावधान किया, और अपनी सेनाको प्रसन्न करते हुए ऐसे वचन बोले, हम ऐसा देश कोई नहीं देखते जहां इनसे भागकर तुम लोग बचोगे॥ (४८-५२)

इस समय पाण्डवोंकी सेना बहुत थोडी रह गई है तथा अर्जुन और कृष्ण घावोंसे बहुत व्याकुल होरहे हैं अब हम इन सबको मारकर निश्चय अपनी विजय करेंगे, यदि तुम भागोगे तो पाण्डव तुम्हें पीछे दौड कर मार डालेंगे, हमसे युद्ध हीमें मरना क्षत्रियोंका धर्म है और इसीसे कल्याण होता है॥ हे क्षत्रियो! मरा हुआ मनुष्य दुःख देखनेको नहीं आता और युद्धमें मरनेसे अनन्तर सुख होता है।" (५३—५६)

जब शूर और कादर दोनोंहीको यमराज मारडालता है तो ऐसा कौन

घूर्णे रथे ब्राह्मणस्याभिशापाद्रामादुपात्ते त्वविभाति चास्त्रे ॥ ८४ ॥
छिन्ने शरे सर्पमुखे च घोरे पार्थेन तस्मिन्विषसाद कर्णः ।
अमृष्यमाणो व्यसनानि तानि हस्तौ विधुन्वन्स विगर्हमाणः ॥८५॥
धर्मप्रधानं किल पाति धर्म इत्यब्रुवन्धर्मविदः सदैव ।
वयं च धर्मं प्रयताम नित्यं चर्तुं यथाशक्ति यथाश्रुतं च ॥ ८६ ॥
स चापि निघ्नति न पाति भक्तान्मन्ये न नित्यं परिपाति धर्मः ।
एवं ब्रुवन्प्रस्खलिताश्वसूतो विचाल्यमानोऽर्जुनबाणपातैः ॥
मर्माभिघाताच्छिथिलः क्रियासु पुनः पुनर्धर्ममसौ जगर्ह ॥ ८७ ॥
ततः शरैर्भीमतरैरविध्यत्त्रिभिराहवे ।
हस्ते कृष्णं तथा पार्थमभ्यविध्यच्च सप्तभिः ॥ ८८ ॥
ततोऽर्जुनः सप्तदश तिग्मवेगानजिह्मगान् ।
इन्द्राशनिसमान्घोरानसृजत्पावकोपमान् ॥ ८९ ॥
निर्भिद्य ते भीमवेगा ह्यपतन्पृथिवीतले ।
कम्पितात्मा ततः कर्णः शक्त्या चेष्टामदर्शयत् ॥९०॥
बलेनाथ स संस्तभ्य ब्रह्मास्त्रं समुदैरयत् ।

ब्राह्मणके शापसे पृथ्वीसे पकडे हुए रथपर परशुरामका शस्त्र भूलकर कर्ण इस प्रकार बैठे रह गये जैसे अत्यन्त पुष्पित ग्रामसूचक बडा चैत्य वृक्ष । जब अर्जुनने उस सांप मुखवाले घोर बाणको काट दिया और कर्ण शस्त्रको भूल गये, तब क्रोधमें भरकर और अपनेको धिक्कार देते हुए हाथ पटकने लगे । और कर्ण बोले, धर्म करनेवाले मनुष्य की धर्म अवश्य ही रक्षा करता है हम अपनी शक्ति और विद्याके अनुसार सदा ही धर्म करते रहे हैं परन्तु वह धर्म हमारी उस समय रक्षा नहीं करता, इससे जान पडता है कि पहले कहे पण्डितोंके वचन झूठ हैं, ऐसे कहते हुए कर्ण अर्जुनके बाणोंसे व्याकुल होकर कांपने लगे, तब मर्ममें बाण लगनेसे कर्ण कर्म करनेमें असमर्थ होकर बार बार धर्मकी निंदा करने लगे ॥ (८४–८७)

फिर साहस करके धनुष उठाया और श्रीकृष्णके हाथमें तीन और अर्जुनके शरीरमें सात घोर बाण मारे तब, अर्जुनने क्रोध करके वज्रके समान कठोर, आगके समान प्रकाशित, शीघ्र चलनेवाले सत्रह बाण कर्णके शरीर में मारे, वे उनके शरीरको वेधकर पृथ्वीमें चले गये, तब कर्ण बहुत कांपने लगे । परन्तु साहससे ऐसा यत्न किया, कि कोई

शरावभिन्नैः पतितैस्तुरङ्गमैः श्वसद्भिरार्तैः क्षतजं वमद्भिः ॥ ४ ॥
दीनं स्तनद्भिः परिवृत्तनेत्रैर्महीं दशद्भिः कृपणं नदद्भिः ।
तथापविद्धैर्गजवाजियोधैर्बलापविद्धैरथ वीरसङ्घैः ॥ ५ ॥
मन्दासुभिश्चैव गतासुभिश्च नराश्वनागैश्च रथैश्च मर्दितैः ।
मन्दांशुभिश्चैव मही महाहवे नूनं यथा वैतरणीव भाति ॥ ६ ॥
गजैर्निकृत्तैर्वरहस्तगात्रैरुद्वेपमानैः पतितैः पृथिव्याम् ।
विशीर्णदन्तैः क्षतजं वमद्भिः स्फुरद्भिरार्तैः करुणं नदद्भिः ॥ ७ ॥
निकृत्तचक्रेषुयुगैः सयोक्तृभिः प्रविद्धतूणीरपताककेतुभिः ।
सुवर्णजालावततैर्भृशाहतैर्महारथौघैर्जलदैरिवावृता ॥ ८ ॥
यशस्विभिर्नागरथाश्वयोधिभिः पदातिभिश्चाभिमुखैर्हतैः परैः ।
विशीर्णवर्माभरणाम्बरायुधैर्वृताप्रशान्तैरिव तावकैर्मही ॥ ९ ॥
शरप्रहाराभिहतैर्महाबलैरवेक्षमाणैः पतितैः सहस्रशः ।
दिवश्च्युतैर्भूरतिदीप्तिमद्भिर्नक्तं ग्रहैर्द्यौरमलप्रदीप्तैः ॥ १० ॥
प्रनष्टसंज्ञैः पुनरुच्छ्वसद्भिर्मही बभूवानुगतैरिवार्चिभिः ।
कर्णार्जुनाभ्यां शरभिन्नगात्रैर्हतैः प्रवीरैः कुरुसृञ्जयानाम् ॥ ११ ॥

अधमरे तडफ रहे हैं । सोनेके जालोंके सहित रुधिरमें भीगे अधमरे घोडे छट पटाते हैं, ये दुःखसे धीरे धीरे बोलते पृथ्वीमें पडे और योधा चिल्ला रहें है । कोई मर गया है और कोई मरने चाहता है। इन सब हाथी, घोडोंसे यह सब पृथ्वी वैतरणीके समान दीख रही है ॥ ये दुःखसे चिल्लाते हुए सूंड, पैर और दांत टूटे हाथी, घोडे, मरे पडे हैं, हाथियोंके शरीरसे रुधिर बह रहा है ॥ (४-७)

यह पृथ्वी टूटे जुये, पहिये ध्वजा और पताका वाले, सोनेके जालोंसे युक्त कटे हुए रथोंसे ऐसी दीखती है जैसे मेघोंसे भरा आकाश ॥ ये देखो ये बुझी हुई आगके समान कवच और शस्त्र रहित हाथी, घोडे और रथों पर चढे तथा अनेक यशस्वी पैदल मरे पडे हैं । जैसे रातका आकाश अत्यन्त प्रकाशवाले, गिरते हुए तारोंसे अत्यन्त शोभित होता है ऐसे ही बाणोंसे मरे महा पराक्रमी वीरोंसे यह पृथ्वी शोभित हो रही है ॥ ८—१०)

ये कौरव और पाञ्चाल योद्धा अर्जुन और कर्णके बाणोंसे मर कर पृथ्वीमें पटे हैं, और अनेक मूर्छित होकर सांस ले रहे है । ये अर्जुन और कर्णके बाण हाथी घोडे और मनुष्योंको काटकर पाताल

शरैरवाकिरत्कर्ण दीप्यमानैरिवाहिभिः ॥ ९९ ॥
तस्य ज्याच्छेदनं कर्णो ज्यावधानं च संयुगे ।
नान्वबुध्यत शीघ्रत्वात्तदद्भुतमिवाभवत् ॥ १०० ॥
अस्त्रैरस्त्राणि संवार्य प्रनिघ्नन्सव्यसाचिनः ।
चक्रे चाप्यधिकं पार्थात्स्ववीर्यमतिदर्शयन् ॥ १०१ ॥
ततः कृष्णोऽर्जुनं दृष्ट्वा कर्णास्त्रेण च पीडितम् ।
अभ्यसेत्यब्रवीत्पार्थमातिष्ठास्त्रं व्रजेति च ॥ १०२ ॥
ततोऽग्निसदृशं घोरं गरं सर्पविषोपमम् ।
अश्मसारमयं दिव्यमभिमन्त्र्य परन्तप ॥ १०३ ॥
रौद्रमस्त्रं समाधाय क्षेप्तुकामः किरीटवान् ।
ततोऽग्रसन्मही चक्रं राधेयस्य तदा नृप ॥ १०४ ॥
ततोऽवतीर्य राधेयो रथादाशु समुद्यतः ।
चक्रं भुजाभ्यामालम्ब्य समुत्क्षेप्तुमियेष सः ॥ १०५ ॥
सप्तद्वीपा वसुमती सशैलवनकानना ।
गीर्णचक्रा समुत्क्षिप्ता कर्णेन चतुरंगुलम् ॥ १०६ ॥
ग्रस्तचक्रस्तु राधेयः क्रोधादश्रूण्यवर्तयत् ।
अर्जुनं वीक्ष्य संरब्धमिदं वचनमब्रवीत् ॥ १०७ ॥

धनुषपर चढाया, और विषीले सांपके समान अनेक बाण कर्णकी ओर चलाये। कर्णका रोदा काटना और अर्जुनका चढाना इस अद्भुत शीघ्रताको कोई न देख सका, उस समय भी अर्जुनके सब बाण काटकर कर्णने अपना पराक्रम उनसे अधिक दिखलाया ॥ (९९-१०१)

तब श्रीकृष्णने अर्जुनको कर्णके बाणों से व्याकुल देखकर कहा तुम इस समय चुप मत बैठो शीघ्र शस्त्र चलाओ, तब शत्रुनाशन अर्जुनने लोहेका बना अग्नि, विष और सांपके समान भयानक एक दिव्य बाण निकालके उसपर मन्त्र पढा और रुद्रास्त्रसे युक्त करके चलानेकी इच्छा की,उसी समय पृथ्वीने कर्णके रथ का पहिया भी पकड किया ॥ तब राधा पुत्र कर्ण रथसे नीचे उतरे, और हाथके बलसे रथके पहिये को उठाने लगे ॥ उस समय कर्णने द्वीप और नगरोंके सहित सब पृथ्वीको चार अङ्गुलतक उठा लिया ॥ (१०२–१०६)

उस समय क्रोधसे भरे कर्णकी आंखसे आंसू बहने लगे । और अर्जुनको बाण चढाये देख ऐसे वचन बोले,हे

आपीडकेयूरवराङ्गदानि ग्रैवेयनिष्काः ससुवर्णसूत्राः ॥ २० ॥
मण्युत्तमा वज्रसुवर्णमुक्ता रत्नानि चोच्चावचमङ्गलानि ।
गात्राणि चात्यन्तसुखोचितानि शिरांसि चेन्दुप्रतिमाननानि ॥२१ ॥
देहांश्च भोगांश्च परिच्छदांश्च त्यक्त्वा मनोज्ञानि सुखानि चैव ।
स्वधर्मनिष्ठां महतीमवाप्य व्याप्याशु लोकान्यशसा गतास्ते ॥२२ ॥
निवर्त दुर्योधन यान्तु सैनिका व्रजस्व राजञ्शिबिराय मानद ।
दिवाकरोऽप्येष विलम्बते प्रभो पुनस्त्वमेवात्र नरेन्द्र कारणम्॥ २३ ॥
इत्येवमुक्त्वा विरराम शल्यो दुर्योधनं शोकपरीतचेताः ।
हा कर्ण हा कर्ण इति ब्रुवाणमार्तं विसंज्ञं भृशमश्रुनेत्रम् ॥ २४ ॥
तं द्रोणपुत्रप्रमुखा नरेन्द्राः सर्वे समाश्वास्य मुहुः प्रयान्ति ।
निरीक्षमाणा मुहुरर्जुनस्य ध्वजं महान्तं यशसा ज्वलन्तम् ॥ २५ ॥
नराश्वमातङ्गशरीरजेन रक्तेन सिक्तां च तथैव भूमिम् ।
रक्ताम्बरस्रक्तपनीययोगान्नारीं प्रकाशामिव सर्वगम्याम् ॥ २६ ॥
प्रच्छन्नरूपां रुधिरेण राजन्रौद्रे मुहूर्तेऽतिविराजमाने ।
नैवावतस्थुः कुरवः समीक्ष्य प्रव्राजिता देवलोकाय सर्वे ॥ २७ ॥
वधेन कर्णस्य तु दुःखितास्ते हा कर्ण हा कर्ण इति ब्रुवाणाः ।

और विना टूटे हीरे और मोतियोंके हार, केयूर, बाजू गोभ, सोनेके सूतमें गुथे निष्क (मूहर) उत्तम मणि और सुवर्णमें जडे रत्न पडे है । ये सुख भोगने योग्य शरीर चन्द्रमाके समान सुन्दर मुखवाले, शिर पडे है ॥ (१७-२१)

ये सब क्षत्री शरीर, वस्त्र और जगत् के सुखोंको छोडकर यशको बढाकर सनातन स्वर्गको चले गये ॥ हे नरेन्द्र दुर्योधन ! ये देखो सूर्य अस्ताचलको जाता है । इसलिये अब सब सेना अपने अपने डेरोंको जाय और तुम भी लौटकर अपने डेरेको जाओ, हाकर्ण ! हाकर्ण ! ऐसा कहकर रोते हुए मूर्खके समान खडे, आंसू बहाते दुर्योधनसे ऐसा कहकर राजा शल्य शोकसे व्याकुल होकर चुप होगये ॥ (२२-२४)

फिर अश्वत्थामा आदि सब वीर यशसे भरी ध्वजाको देखकर दुर्योधनके पास आये, और उन्हें समझाने लगे ॥ उस समय मनुष्य, हाथी और घोडोंके रुधिरसे भीगकर पृथ्वी लाल वस्त्रवाली वेश्याके समान दीखने लगी थी ॥ उस रौद्र मुहूर्त्तमें उस पृथ्वीको देखकर कोई कौरव खडा न रह सका, और सबने मरनेका निश्चय कर लिया ॥ २५-२७

त्वं हि क्षत्रियदायादो महाकुलविवर्धनः ॥
अतस्त्वां प्रब्रवीम्येष मुहूर्तं क्षम पाण्डव ॥ ११६ ॥ [४७२१]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कर्णरथप्रसने नवतितमोऽध्याय ॥९०॥

सञ्जय उवाच— तमब्रवीद्वासुदेवो रथस्थो राधेय दिष्ट्या स्मरसीह धर्मं ।
प्रायेण नीचा व्यसनेषु मग्ना निन्दन्ति दैवं कुकृतं न तु स्वम् ॥ १ ॥
यद् द्रौपदीमेकवस्त्रां सभायामानाययेस्त्वं च सुयोधनश्च ।
दुःशासनः शकुनिः सौबलश्च न ते कर्ण प्रत्यभात्तत्र धर्मः ॥ २ ॥
यदा सभायां गाजानमनक्षज्ञं युधिष्ठिरम् ।
अजैषीच्छकुनिर्ज्ञानात्क्व ते धर्मस्तदा गतः ॥ ३ ॥
वनवासे व्यतीते च कर्ण वर्षे त्रयोदशे ।
न प्रयच्छसि यद्राज्यं क्व ते धर्मस्तदा गतः ॥ ४ ॥
यद्भीमसेनं सर्पैश्च विषयुक्तैश्च भोजनैः ।
आचरत्त्वन्मते राजा क्व ते धर्मस्तदा गतः ॥ ५ ॥
यद्वारणावते पार्थान्सुप्राञ्जतुगृहे तदा ।
आदीपयस्त्वं राधेय क्व ते धर्मस्तदा गतः ॥ ६ ॥

कृष्णसे कुछ नहीं डरते हैं। परन्तु तुम क्षत्रियोंके उत्तम कुलमें उत्पन्न हुए हो इसलिये हम तुमसे कहते हैं, कि क्षणमात्र ठहर जाओ ॥ (११५-११६)[४७२१]

कर्णपर्वमें नव्वे अध्याय समाप्त ।

कर्णपर्वमें एकानव्वे अध्याय ।

सञ्जय बोले, हे राजन् ! तब श्रीकृष्णने रथमें बैठे बैठे कर्णसे कहा कि, हे राधापुत्र ! तुमने आज प्रारब्धसे धर्मका स्मरण किया । तुम्हारे समान नीच मनुष्य आपत्तिहीमें प्रारब्धकी निन्दा करते है परंतु अपने बुरे कर्मका स्मरण नहीं करते ॥ हे कर्ण ! जिस समय तुम, दुःशासन, दुर्योधन और सुबलपुत्र शकुनिने एक वस्त्रवाली द्रौपदीको सभामें बुलाया था, तब तुमने धर्म नहीं समझा था ? जब जुआ न जाननेवाले, महाराजको शकुनिने दुष्टतासे सभामें जीता था, तब तुम्हारा धर्म कहां गया था ? (१-३)

हे कर्ण ! जब तेरह वर्ष वनमें रहकर पाण्डव आये, तो भी तुमने उनको राज्य न दिया । तब तुम्हारा धर्म कहां रहा? जब तुम्हारी सम्मतिसे दुर्योधनने भीमसेनको सर्पोंसे कटवाकर और विष खिलाकर नदीमें डुबा दिया था, तब तुम्हारा धर्म कहां गया था ? हे राधापुत्र ! जब वारणावत नगरमें लाखके घरमें तुमने

नाभवद्विकृतिः काचिद्धतस्यापि महात्मनः ॥ ३६ ॥
चारुवेषधरं वीरं चारुमौलिशिरोधरम् ।
तन्मुखं सूतपुत्रस्य पूर्णचन्द्रसमद्युति ॥ ३७ ॥
नानाभरणवान्राजंस्तप्तजाम्बूनदाङ्गदः ।
हतो वैकर्तनः शेते पादपोऽङ्कुरवानिव ॥ ३८ ॥
कनकोत्तमसङ्काशो ज्वलन्निव विभावसुः ।
स शान्तः पुरुषव्याघ्रः पार्थसायकवारिणा ॥ ३९ ॥
यथा हि ज्वलनो दीप्तो जलमासाद्य शाम्यति ।
कर्णाग्निः समरे तद्वत्पार्थमेघेन शामितः ॥ ४० ॥
आहत्य च यशो दीप्तं सुयुद्धेनात्मनो भुवि ।
विसृज्य शरवर्षाणि प्रताप्य च दिशो दश ॥ ४१ ॥
सपुत्रः समरे कर्णः स शान्तः पार्थतेजसा ।
प्रताप्य पाण्डवान्सर्वान्पञ्चालांश्चास्त्रतेजसा ॥ ४२ ॥
वर्षित्वा शरवर्षेण प्रताप्य रिपुवाहिनीम् ।
श्रीमानिव सहस्रांशुर्जगत्सर्वं प्रताप्य च ॥ ४३ ॥
हतो वैकर्तनः कर्णः सपुत्रः सहवाहनः ।
अर्थिनां पक्षिसङ्घस्य कल्पवृक्षो निपातितः ॥ ४४ ॥

कर्णसे पाण्डवोंके योद्धा डरने लगे ॥ महात्मा पुरुषसिंह कर्ण मरे हुए भी जीते हुएके समान दिखलाई देते थे, उनका कोई स्वरूप नहीं बिगडा था ॥ सूतपुत्र कर्ण पूर्ण चन्द्रमाके समान मुख, उत्तम किरीट और भूषण धारण किये और सोनके बाजू सहित मरे हुए ऐसे दीखते थे जैसे टूटा हुआ वृक्ष ॥ ३५-३८

अच्छे सुवर्णके समान कांति वाला प्रज्वलित अग्निके समान प्रकाशमान कर्ण अर्जुनके बाणरूपी जलसे शान्त हुआ। जैसे मेघ अग्निको बुझा देता है, ऐसे ही अर्जुनरूपी मेघने कर्णरूपी अग्निको ठण्डा कर दिया ॥ अपने यशसे जगत्को पूरित करके और बाणोंसे सब दिशाओंको तपाकर तथा पाण्डव और पाञ्चालोंको व्याकुल करके पुत्र सहित कर्ण अर्जुनके तेजसे मर गये। (३९-४२)

जैसे सूर्य अपनी किरणसे जगत्को व्याकुल कर देता है, ऐसे ही अपने बाणोंसे पांचाल और पाण्डवोंकी सेनाको व्याकुल करके पुत्र सहित कर्ण मर गये। मानों भिक्षुक रूपी पक्षियोंका कल्पवृक्ष टूट गया ॥ जो धार्मिक कर्ण सदा भिक्षु-

प्राप्तास्तथा पाण्डवा बाहुवीर्यात्सवैः समेताः परिवृत्तलोभाः ।
निहत्य शत्रून्समरे प्रवृद्धान्ससोमका राज्यमवाप्नुयुस्ते ॥ १४ ॥
तथा गता धार्तराष्ट्रा विनाशं धर्माभिगुप्तैः सततं नृसिंहैः ।
सञ्जय उवाच— एवमुक्तस्तदा कर्णो वासुदेवेन भारत ॥ १५ ॥
लज्जयावनतो भूत्वा नोत्तरं किञ्चिदुक्तवान् ।
क्रोधात्प्रस्फुरमाणौष्ठो धनुरुद्यम्य भारत ॥ १६ ॥
योधयामास वै पार्थं महावेगपराक्रमः ।
ततोऽब्रवीद्वासुदेवः फाल्गुनं पुरुषर्षभम् ॥ १७ ॥
दिव्यास्त्रेणैव निर्भिद्य पातयस्व महाबल ।
एवमुक्तस्तु देवेन क्रोधमागात्ततदार्जुनः ॥ १८ ॥
मन्युमभ्याविशद्घोरं स्मृत्वा तत्तु धनञ्जयः ।
तस्य क्रुद्धस्य सर्वेभ्यः स्रोतोभ्यस्तेजसोऽर्चिषः॥ १९ ॥
प्रादुरासंस्तदा राजंस्तदद्भुतमिवाभवत् ।
तत्समीक्ष्य ततः कर्णो ब्रह्मास्त्रेण धनञ्जयम् ॥ २० ॥
अभ्यवर्षत्पुनर्यत्नमकरोद्रथसर्जने ।
ब्रह्मास्त्रेणैव तं पार्थो ववर्ष शरवृष्टिभिः ॥ २१ ॥
तदस्त्रमस्त्रेणावार्य प्रजहार च पाण्डवः ।

हुए थे ऐसेही पाञ्चालोंके सहित पाण्डव अपने बाहुबलसे शत्रुओंका नाश करके राजा हुए है। धार्मिक पाण्डवोंने धृतराष्ट्र के वंशका नाश कर दिया। (१३—१५)

सञ्जय बोले, हे राजन् ! श्रीकृष्णके ऐसे वचन सुन कर्णने लज्जासे अपना मुख नीचा कर लिया और कुछ उत्तर न दिया और क्रोधसे हाथ फटकाकर धनुष उठाकर वहींसे अर्जुनके सङ्ग घोर युद्ध करने लगा, तब श्रीकृष्णने अर्जुनसे कहा तुम इसी समय इसे दिव्य बाणसे मारो। (१५—१८)

कृष्णके वचन सुनते ही अर्जुनको महाक्रोध आगया। उन सब वचनोंको स्मरण करके अर्जुनको ऐसा क्रोध आया कि सब रोंओंसे ज्वाला निकलने लगी, अर्जुनका ऐसा घोर रूप देखकर कर्णने ब्रह्मास्त्र चलाया और अनेक बाण मार कर धनुषको रख पहियेको उठाने लगा। (१८—२१)

तब अर्जुनने ब्रह्मास्त्रसे ही उसके बाण काट कर उस शस्त्रको शांत कर दिया और फिर अग्नि बाण चलाया। उस प्रकाशमान बाणकी अग्निको कर्णने

हते तु कर्णे विदिशोऽपि जज्वलुस्तमोवृता द्यौर्विचचाल भूमिः।
पपात चोल्का ज्वलनप्रकाशा निशाचराश्चाप्यभवन्प्रहृष्टाः ॥ ५२ ॥
शशिप्रकाशाननमर्जुनो यदा क्षुरेण कर्णस्य शिरो न्यपातयत्।
तदान्तरिक्षे सहसैव शब्दो बभूव हाहेति सुरैर्विमुक्तः ॥ ५३ ॥
स देवगन्धर्वमनुष्यपूजितं निहत्य कर्णं रिपुमाहवेऽर्जुनः।
रराज राजन्परमेण वर्चसा यथा पुरा वृत्रवधे शतक्रतुः ॥ ५४ ॥
ततो रथेनाम्बुदवृन्दनादिना शरन्नभोमध्यदिवाकरार्चिषा।
पताकिना भीमनिनादकेतुना हिमेन्दुशङ्खस्फटिकावभासिना ॥ ५५ ॥
महेन्द्रवाहप्रतिमेन तावुभौ महेन्द्रवीर्यप्रतिमानपौरुषौ।
सुवर्णमुक्तामणिवज्रविद्रुमैरलंकृतावप्रतिमेन रंहसा ॥ ५६ ॥
नरोत्तमौ केशवपाण्डुनन्दनौ तदा हि तावग्निदिवाकराविव।
रणाजिरे वीतभयौ विरेजतुः समानयानाविव विष्णुवासवौ ॥ ५७ ॥
ततो धनुर्ज्यातलवाणनिःस्वनैः प्रसह्य कृत्वा च रिपून्हतप्रभान्।
सञ्छादयित्वा तु कुरूञ्शरोत्तमैः कपिध्वजः पक्षिवरध्वजश्च ॥ ५८ ॥
हृष्टौ ततस्तावमितप्रभावौ मनांस्यरीणामवदारयन्तौ।
सुवर्णजालावततौ महास्वनौ हिमावदातौ परिगृह्य पाणिभिः।

कर्णके मरनेके पश्चात् सब दिशा और कोने जलने लगे। आकाशमें अन्धकार छागया। पृथ्वी हिलने लगी, आकाशसे अग्निके समान बिजली गिरी और राक्षस प्रसन्न होगये॥ जब अर्जुनने अपने तेज बाणसे पूर्ण चन्द्रमाके समान मुखवाला कर्णका शिर काटा तब आकाशमें सब देवता हाहाकार करने लगे॥(५२-५३)

हे राजन्! जैसे वृत्रासुरको मारकर महातेजस्वी इन्द्र शोभित हुए थे, ऐसे ही देवता गन्धर्व और मनुष्योंसे पूजित कर्णको मारकर अर्जुन प्रसन्न हुए॥ तब बरफ, चन्द्रमा और स्फटिकके समान सफेद ध्वजा युक्त, अनेक मेघोंके समान शब्दवाले, आकाशमें घूमते हुए सूर्यके समान तेज भरे इन्द्रके रथके समान सुंदर रथपर बैठकर इन्द्रके समान पराक्रमी माणि और मोतीयुक्त अनेक भूषण पहने असाधारण तेजस्वी, अग्नि और सूर्यके समान तेजस्वी श्रीकृष्ण और अर्जुन बेडर होकर युद्धमें ऐसे शोभित हुए जैसे एक रथपर बैठे विष्णु और इन्द्र॥ (५४—५७)

अपने धनुष और तालके शब्द तथा बाणोंसे सब शत्रुओंका नाश करके और अपने बाणोंसे कौरवोंका हृदय चीरनेके

तदन्तरं प्राप्य वृषो महारथो रथाङ्गमुर्वीगतमुज्जिहीर्षुः ॥ ३१ ॥
रथादवप्लुत्य निगृह्य दोर्भ्यां शशाक दैवान्न महाबलोऽपि ।
ततः किरीटी प्रतिलभ्य संज्ञां जग्राह बाणं यमदण्डकल्पम् ॥ ३२ ॥
ततोऽर्जुनः प्राञ्जलिकं महात्मा ततोऽब्रवीद्वासुदेवोऽपि पार्थम् ।
छिन्ध्यस्य मूर्धानमरेः शरेण न यावदारोहति वै रथं वृषः ॥ ३३ ॥
तथैव सम्पूज्य स तद्वचः प्रभोस्ततः शरं प्रज्वलितं प्रगृह्य ।
जघान कक्षाममलार्कवर्णां महारथे रथचक्रे विमग्ने ॥ ३४ ॥
तं हस्तिकक्षाप्रवरं च केतुं सुवर्णमुक्तामणिवज्रपृष्ठम् ।
ज्ञानप्रकर्षोत्तमशिल्पियुक्तैः कृतं सुरूपं तपनीयचित्रम् ॥ ३५ ॥
जयास्पदं तव सैन्यस्य नित्यमामित्रवित्रासनमीड्यरूपम् ।
विख्यातमादित्यसमं स लोके त्विषा समं पावकभानुचन्द्रैः ॥ ३६ ॥
ततः क्षुरप्रेण सुसंशितेन सुवर्णपुङ्खेन हुताग्निवर्चसा ।
श्रिया ज्वलन्तं ध्वजमुन्ममाथ महारथस्याधिरथेः किरीटी ॥ ३७ ॥
यशश्च दर्पश्च तथा प्रियाणि सर्वाणि कार्याणि च तेन केतुना ।
साकं कुरूणां हृदयानि चापतन्वभूव हाहेति च निःस्वनो महान् ॥३८॥

कांपने लगे, इतना समय पाकर महारथ कर्ण पृथ्वीसे पहिया उठाने लगा, तब कर्णने बहुत बलसे पहिया निकालनेका यत्न किया पर निकल न सका ॥ (२९–३२)

इतनेही समयमें अर्जुनने चैतन्य हो कर यम दण्डके समान घोर बाण चढाया। तब श्रीकृष्णने अर्जुनसे कहा कि, जब तक यह रथपर न चढे तभी तक इस दुष्टका शिर काट लो ॥ श्रीकृष्णके वचनोंको स्वीकार करके अर्जुनने कर्णके महारथकी पहिया भूमिमें मग्न थी उसी अवसरमें एक प्रज्वालित बाणसे कर्णके रथ की कक्षा और ध्वजा काट दी। वह ध्वजा हाथीके चिन्हसे युक्त, सोने मोती और हीरे आदि मणियोंसे बनी हुई, बहुत युक्तिसे शिल्पकारोंकी बनाई हुई, तुम्हारी सेनाके विजयका स्थान, शत्रुओंको डराने वाली स्तुति करने योग्य, जगत् प्रसिद्ध, सूर्यके समान तेजस्वी, चन्द्रमा और अग्निके समान कांतिमान थी, उस ध्वजाको कर्णके महारथसे, महारथ अर्जुनने अग्नि और सूर्यके समान प्रकाशित सोनेके पङ्ख-वाले एक बाणसे गिरा दिया ॥ ३३–३७

कौरवोंके यश, प्रताप, बल और सुख सबके सब उस ध्वजाके सङ्ग ही गिर गये। सबके हृदय फटने लगे, और सेनामें हाहाकार शब्द होने लगा। हे

जयाभिवृद्ध्या परयाभिपूजितौ हते तु कर्णे परमाहवे तदा ॥ ६७ ॥
यथानुरूपं प्रतिपूजितावुभौ प्रशस्यमानौ स्वकृतैर्गुणौघैः ।
ननन्दतुस्तौ ससुहृद्गणौ तदा बलं नियम्येव सुरेशकेशवौ ॥६८॥[४९३१]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि रणभूमिवर्णन नामचतुर्नवतितमोऽध्याय ॥९४

सञ्जय उवाच— हते वैकर्तने राजन्कुरवो भयपीडिताः ।
वीक्षमाणा दिशः सर्वाः पर्यापेतुः सहस्रशः ॥ १ ॥
कर्ण तु निहतं दृष्ट्वा शत्रुभिः परमाहवे ।
भीता दिशो व्यकीर्यन्त तावकाः क्षतविक्षताः॥ २ ॥
ततोऽवहारं चक्रुस्ते योधाः सर्वे समन्ततः ।
निवार्यमाणाश्चोद्विग्नास्तावका भृशदुःखिताः ॥ ३ ॥
तेषां तन्मतमाज्ञाय पुत्रो दुर्योधनस्तव ।
अवहारं ततश्चक्रे शल्यस्यानुमते नृप ॥ ४ ॥
कृतवर्मा रथैस्तूर्णं वृतो भारत तावकैः ।
नारायणावशेषैश्च शिबिरायैव दुद्रुवे ॥ ५ ॥
गान्धाराणां सहस्रेण शकुनिः परिवारितः ।
हतमाधिरथिं दृष्ट्वा शिबिरायैव दुद्रुवे ॥ ६ ॥

महायुद्धमें कर्णके मरनेके पश्चात् उन दोनोंको देवता, गन्धर्व, मनुष्य, चारण, महाऋषि, यक्ष और सांप जयका आशीर्वाद देने लगे ॥ इस प्रकार अपनी कीर्त्ति और गुणोंको सुनते हुए अपनी सेनाको इस प्रकार सावधान करने लगे, जैसे देवतोंको इन्द्र और विष्णु ॥ ६७ ६८

कर्णपर्वमें चौरानव्वे अध्याय समाप्त । [४९३१]

कर्णपर्वमें पचानव्वे अध्याय ।

सञ्जय बोले, हे राजन् ! जिस समय विकर्त्तन पुत्र कर्ण मर गये तब कौरव भयसे व्याकुल होकर सब दिशाओंको देखते हुए इधर उधरको भागने लगे ॥ उस बडे युद्धमें शत्रुओंके हाथसे कर्णको मरा हुआ देख क्षत विक्षत शरीरवाले तेरी सेनाके योद्धा लोग भयभीत होकर सब दिशाओंमें भागने लगे ॥ तुम्हारे पुत्रोंने व्याकुल और युद्धमे असमर्थ होकर अपनी सेनाको चारों ओरसे शल्यकी सम्मतिके अनुसार रणभूमिसे लौटाया ॥ (१--४)

हे महाराज ! बची हुई नारायणी सेना और थोडे रथोंके सहित कृतवर्मा अपने डेरोंको चले ॥ बचे हुए गन्धार देशके वीरोंके सहित शकुनी भी अपने डेरोंको गये ॥ हे भारत इसी प्रकार सेनोंके

रराज कर्णस्य शिरो निकृत्तमस्तङ्गतं भास्करस्येव बिम्बम् ॥ ६० ॥
शरैराचितसर्वाङ्गः शोणितौघपरिप्लुतः ।
विभाति देहः कर्णस्य स्वरश्मिभिरिवांशुमान् ॥ ६१ ॥
प्रताप्य सेनामामित्रीं दीप्तैः शरगभस्तिभिः ।
बलिनार्जुनकालेन नीतोऽस्तं कर्णभास्करः ॥ ६२ ॥
अस्तं गच्छन्यथादित्यः प्रभामादाय गच्छति ।
तथा जीवितमादाय कर्णस्येषुर्जगाम सः ।
अपराह्णेऽपराह्णोऽस्य सूतपुत्रस्य मारिष ॥ ६३ ॥
छिन्नमञ्जलिकेनाजौ सोत्सेधमपतच्छिरः ।
उपर्युपरि सैन्यानामस्य शत्रोस्तदञ्जसा ।
शिरः कर्णस्य सोत्सेधमिषुः सोऽप्यहरद् द्रुतम् ॥६४॥
कर्ण तु शूरं पतितं पृथिव्यां शराचितं शोणितदिग्धगात्रम् ।
दृष्ट्वा शयानं भुवि मद्रराजश्छिन्नध्वजेनाथ ययौ रथेन ॥ ६५ ॥
हते कर्णे कुरवः प्राद्रवन्त भयार्दिता गाढविद्धाश्च सङ्ख्ये
अवेक्ष्यमाणा मुहुरर्जुनस्य ध्वजं महान्तं वपुषा ज्वलन्तम् ॥ ६६ ॥
सहस्रनेत्रप्रतिमानकर्मणः सहस्रपत्रप्रतिमाननं शुभम् ।

हुआ सूर्यका मण्डल दीखता है ऐसे ही मरे हुए कर्णका शिर दीखने लगा ॥ (५८—६०)

जैसे किरणों सहित अस्त होनेके समय सूर्य दीखते हैं, ऐसे ही मरे हुए कर्णका शरीर बाण युक्त दीखने लगा ॥ अपने बाणरूपी किरणोंसे शत्रुकी सेनाको तपा कर अर्जुनरूपी कालके वशमें होकर कर्णरूपी सूर्य अस्त होगये ॥ जैसे सूर्य अपने किरणोंके सहित अस्त होजाता है ऐसे ही वह बाण कर्णका प्राण लेकर शीघ्र शांत होगया ॥ हे महाराज! दिनके चौथे भागमें अर्जुनने अञ्जलिक बाणसे शीघ्रता सहित कर्णका शिर काट कर सेनाके आगे युद्ध भूमिमें गिरा दिया ॥ (६१-६४)

महा पराक्रमी वीर कर्णको बाणोंसे कटा और पृथ्वीमें पडा छोड मद्रराज शल्य ध्वजा रहित रथको लेकर डरोंको चले गये ॥ कर्णके मरनेके पश्चात् घावोंसे व्याकुल अर्जुनकी ध्वजासे डरते हुए तुम्हारी सेनाके वीर युद्ध छोडकर भागे । इन्द्रके समान कर्म करनेवाले कर्णका सहस्र पत्रवाले कमलके समान मुखयुक्त शिर इस प्रकार कट कर पृथ्वीमें गिर पडा जैसे सहस्र किरणवाला

हते कर्णे महाराज निराशाः कुरवोऽभवन् ।
जीवितेष्वपि राज्येषु दारेषु च धनेषु च ॥ १६ ॥
तान्समानीय पुत्रस्ते यत्नेन महता विभुः ।
निवेशाय मनो दध्रे दुःखशोकसमन्वितः ॥ १७ ॥
तस्याज्ञां शिरसा योधाः परिगृह्य विशाम्पते ।
विवर्णवदना राजन्न्यविशन्त महारथाः ॥ १८ ॥ [४९४९]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि शिविरप्रयाणे पञ्चनवतितमोऽध्याय ॥९५॥

सञ्जय उवाच— तथा निपातिते कर्णे परसैन्ये च विद्रुते ।
आश्लिष्य पार्थं दाशार्हो हर्षाद्वचनमब्रवीत् ॥ १ ॥
हतो वज्रभृता वृत्रस्त्वया कर्णो धनञ्जय ।
वृत्रकर्णवधं घोरं कथयिष्यन्ति मानवाः ॥ २ ॥
वज्रेण निहतो वृत्रः संयुगे भूरितेजसा ।
त्वया तु निहतः कर्णो धनुषा निशितैः शरैः ॥ ३ ॥
तमिमं विक्रमं लोके प्रथितं ते यशस्करम् ।
निवेदयावः कौन्तेय कुरुराजस्य धीमतः ॥ ४ ॥
वधं कर्णस्य संग्रामे दीर्घकालचिकीर्षितम् ।

लिये इच्छा करे ॥ (१३—१५)

जब कर्ण मरे उस समय सब कौरव धन, स्त्री, राज्य और जीवनसे भी निराश होगये ॥ उन सबको बहुत यत्नसे बुलाकर शोक और दुःखसे भरे, दुर्योधनने विश्राम करनेकी आज्ञा दी ॥ हे महाराज ! दुर्योधनकी आज्ञा शिरपर रखकर दुःखसे व्याकुल सब वीर अपने अपने डेरोंको गये ॥ (१५–१८) [४९४९]

कर्णपर्वमें पचानवे अध्याय समाप्त ।

कर्णपर्वमें छानवे अध्याय ।

सञ्जय बोले, हे राजन ! कर्णके मरनेके और तुम्हारी सेना भागनेके पश्चात श्रीकृष्ण प्रसन्न होकर और अर्जुनको आलिंगन देकर ऐसे वचन बोले, जैसे इन्द्रने वृत्रासुरको मारा था, ऐसे ही तुमने कर्णको मारा। इन दोनों कथाओंको मनुष्य मनुष्योंको बहुत दिनतक कहेंगे । तेजस्वी इन्द्रने वज्रसे वृत्रासुरको मारा था और तुमने केवल धनुष और बाणही से कर्ण को मार डाला ॥ (१—३)

अब यह तुम्हारा यश और बल मिटाने लिये प्रसिद्ध रहेगा, अब चलो ये सब समाचार महाराजाधिराजसे निवेदन करें ॥ महाराज धर्मराज बहुत दिनसे

तथैव राजन्सोमकाः सृञ्जयाश्च शङ्खान्दध्मुः सस्वजुश्चापि सर्वे ।
परस्परं क्षत्रिया हृष्टरूपाः सूतात्मजे वै निहते तदानीम् ॥ ७ ॥
कृत्वा विमर्दं महदर्जुनेन कर्णो हतः केसरिणेव नागः ।
तीर्णा प्रतिज्ञा पुरुषर्षभेण वैरस्यान्तं गतवांश्चापि पार्थः ॥ ८ ॥
मद्राधिपश्चापि विमूढचेतास्तूर्णं रथेनापकृतध्वजेन ।
दुर्योधनस्यान्तिकमेत्य राजन्सबाष्पदुःखाद्वचनं बभाषे ॥ ९ ॥
विशीर्णनागाश्वरथप्रवीरं बलं त्वदीयं यमराष्ट्रकल्पम् ।
अन्योन्यमासाद्य हतं महद्भिर्नराश्वनागैर्गिरिकूटकल्पैः ॥ १० ॥
नैतादृशं भारत युद्धमासीद्यथा तु कर्णार्जुनयोर्बभूव ।
ग्रस्तौ हि कर्णेन समेत्य कृष्णावन्ये च सर्वे तव शत्रवो ये ॥ ११ ॥
दैवं ध्रुवं पार्थवशात्प्रवृत्तं यत्पाण्डवान्पाति हिनस्ति चास्मान् ।
तवार्थसिद्ध्यर्थकरास्तु सर्वे प्रसह्य वीरा निहता द्विषद्भिः ॥ १२ ॥
कुबेरवैवस्वतवासवानां तुल्यप्रभावा नृपते सुवीराः ।
वीर्येण शौर्येण बलेन तेजसा तैस्तैस्तु युक्ता विविधैर्गुणौघैः ॥ १३ ॥
अवध्यकल्पा निहता नरेन्द्रास्तवार्थकामा युधि पाण्डवेयैः ।
तान्मा शुचो भारत दिष्टमेतत्पर्याश्वस त्वं न सदास्ति सिद्धिः ॥ १४ ॥

प्रकार पाञ्चाल और सृञ्जय वशी क्षत्री परस्पर मिलकर प्रसन्न होकर शङ्ख बजाने और परस्पर आलिंगन देने लगे, वीर अर्जुनने कर्णको इस प्रकार मारा जैसे सिंह हाथीको मारता है, इसके मरनेसे अर्जुनकी प्रतिज्ञा पूरी होगयी और वैर समाप्त होगया ॥ (६-८)

राजा शल्य मी मूर्खके समान ध्वजा रहित रथको दौडाते हुए दुर्योधनके डेरे पर जाकर दुःखसे भरे ऐसे वचन बोले, ये देखो तुम्हारी सब सेना हाथी और घोडे रथोंसे रहित होकर इधर उधरको भाग गयी, पाण्डवोंने पत्थरोंके समान बाणोंसे इसका नाश कर दिया, हे भारत ! जैसा ये युद्ध हुआ वैसा कभी नहीं हुआ । कर्णने अपने बाणोंसे कृष्ण आदि तुम्हारे सब शत्रुओंको ग्रस्त कर दिया था ॥ (९-११)

क्या करें, प्रारब्ध बडी बलवान् है, वह सदा पाण्डवोंकी रक्षा और हमारा नाश करती है, उसीके वशमें होकर पाण्डवोंके हाथसे तुम्हारे सब योद्धा मारे गये ॥ तुम्हारी ओरके वीर इन्द्र, कुबेर और यमराजके समान गुणोंसे भरे थे और इनको कोई नहीं मार सका था, केवल पाण्डवोंने मारडाला ॥ (१२-१३)

अगृह्णीतां च मुदितौ चरणौ पार्थिवस्य तौ ॥ १३ ॥
तयोः प्रहर्षमालक्ष्य हर्षादश्रूण्यवर्तयत् ।
राधेयं निहतं मत्वा समुत्तस्थौ युधिष्ठिरः ॥ १४ ॥
उवाच च महाबाहुः पुनः पुनररिन्दमः ।
वासुदेवार्जुनौ प्रेम्णा तावुभौ परिषस्वजे ॥ १५ ॥
तत्तस्मै तद्यथावृत्तं वासुदेवः सहार्जुनः ।
कथयामास कर्णस्य निधनं यदुपुङ्गवः ॥ १६ ॥
ईषदुत्स्मयमानस्तु कृष्णो राजानमब्रवीत् ।
युधिष्ठिरं हतामित्रं कृताञ्जलिरथाच्युतः ॥ १७ ॥
दिष्ट्या गाण्डीवधन्वा च पाण्डवश्च वृकोदरः ।
त्वं चापि कुशली राजन्माद्रीपुत्रौ च पाण्डवौ ॥ १८॥
मुक्ता वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात् ।
क्षिप्रमुत्तरकालानि कुरु कार्याणि पाण्डव ॥ १९ ॥
हतो वैकर्तनो राजन्सूतपुत्रो महारथः ।
दिष्ट्या जयसि राजेन्द्र दिष्ट्या वर्धसि भारत ॥२०॥
यस्तु द्यूतजितां कृष्णां प्राहसत्पुरुषाधमः ।
तस्याद्य सूतपुत्रस्य भूमिः पिबति शोणितम् ॥ २१ ॥
शेतेऽसौ शरपूर्णाङ्गः शत्रुस्ते कुरुपुङ्गव ।

पैरोंमें गिर पडे ॥ (१२–१३)

महाराजने उन्हें प्रसन्न देखकर जान लिया, कि कर्ण मारा गया और प्रसन्न होकर उन दोनोंको छातीसे लगाकर प्रेम सहित ऐसे वचन कहे, हम प्रारब्धसे तुम दोनों को देखते हैं। तब इन दोनों ने कर्णके युद्ध और मरनेका सब समाचार उनसे कह दिया, कृष्णने हंसकर और हाथ जोडकर महाराज से सब निवेदन कर दिया ॥ (१३–१६)

कृष्णने कहा, हे महाराज! प्रारब्धसे आप, भीमसेन, अर्जुन, नकुल और सहदेव कुशलसे हैं ॥ हे पाण्डव! इस प्रलय कालरूपी घोर युद्धसे आप सब बच गये अब आगे जो कुछ करने योग्य काम हो सो कीजिये ॥ हे राजेन्द्र! हे भारत! प्रारब्धसे सूतपुत्र कर्ण मारा गया, और आपकी उन्नति हुई ॥(१७–२०)

जो मूर्ख द्यूतमें जित द्रौपदीको सभामें आई देख हसा था, उस सूतपुत्र कर्णका रुधिर आज भूमि पी रही है। हे कुरुकुलश्रेष्ठ! अब तुम्हारा शत्रु

भग्नशृङ्गा वृषा यद्वद्भग्नदंष्ट्रा इवोरगाः ।
प्रत्यपायास सायाह्ने निर्जिताः सव्यसाचिना ॥ ७ ॥
हतप्रवीरा विध्वस्ता निकृत्ता निशितैः शरैः ।
सूतपुत्रे हते राजन्पुत्रास्ते दुद्रुवुर्भयात् ॥ ८ ॥
विस्रस्तयन्त्रकवचाः कान्दिग्भूता विचेतसः ।
अन्योन्यमवमृद्नन्तो वीक्ष्यमाणा भयार्दिताः ॥ ९ ॥
मामेव नूनं धीभत्सुर्मामेव च वृकोदरः ।
अभियातीति मन्वानाः पेतुर्मम्लुश्च सम्भ्रमात् ॥ १० ॥
हयानन्ये गजानन्ये रथानन्ये महारथाः ।
आरुह्य जवसम्पन्नाः पदातीन्प्रजहुर्भयात् ॥ ११ ॥
कुञ्जरैः स्यन्दनाः क्षुण्णाः सादिनश्च महारथैः ।
पदातिसङ्घाश्चाश्वौघैः पलायद्भिर्भयार्दितैः ॥ १२ ॥
व्यालतस्करसङ्कीर्णे सार्थहीना यथा वने ।
सूतपुत्रे हते राजंस्तव योधास्तथाभवन् ॥ १३ ॥
हतारोहा यथा नागाश्छिन्नहस्ता यथा नराः ।

मरनेपर घावोंसे व्याकुल तुम्हारी सेना इधर उधरको भागने लगी और रक्षा करनेवालेको ढूंढने लगी। जैसे सींग टूटनेसे बैल और दांत टूटनेसे सांप दुर्बल हो जाता है, ऐसे ही सन्ध्याके समय अर्जुनसे डरी हुई तुम्हारी सेना इधर उधरको भागने लगी ॥ (५-७)

हे राजन् ! कर्णके मरनेके पश्चात् और प्रधान वीरोंके नाश होनेपर तुम्हारे पुत्र शस्त्रोंसे और डरसे व्याकुल होकर इधर उधर भाग गये ॥ यन्त्र और कवचोंसे रहित घबराये हुए डरसे व्याकुल चारों ओर देखते हुए एक दूसरेको मारते हुए और हमारी ही ओर अर्जुन और भीमसेन चले आते हैं, यह विचारते हुए भयसे गिरने और बहुत म्लान होने लगे ॥ (८-१०)

कोई अनेक महारथ हाथी, घोडे और रथोंपर चढकर पदातियोंको छोडकर वेगसे भागे । जब सब वीर भयसे भागने लगे, तब हाथियोंसे रथ, रथोंसे घुडसवार और भागनेवाले घोडोंसे पैदल वीर भग्न होने लगे ॥ जैसे हिंस्रपशु और चोरोंसे मरे हुए वनमें बटोही घबराते हैं, ऐसे ही सूतपुत्रके मरनेसे तुम्हारी सेना घबराई । ऊपर बैठने वालेसे रहित हाथी तथा छिन्नहस्त योधाके समान दुर्योधनके जब वीर भयसे पीडित होकर

जयश्चैव ध्रुवोऽस्माकं न त्वस्माकं पराजयः ।
यदा त्वं युधि पार्थस्य सारथ्यमुपजग्मिवान् ॥ ३१ ॥
भीष्मो द्रोणश्च कर्णश्च महात्मा गौतमः कृपः ।
अन्ये च बहवः शूरा ये च तेषां पदानुगाः ॥ ३२ ॥
त्वद्बुद्ध्या निहते कर्णे हता गोविन्द सर्वथा ।
इत्युक्त्वा धर्मराजस्तु रथं हेमविभूषितम् ॥ ३३ ॥
श्वेतवर्णैर्हयैर्युक्तं कालवालैर्मनोजवैः ।
आस्थाय पुरुषव्याघ्रः स्वबलेनाभिसंवृतः ॥ ३४ ॥
प्रययौ स महाबाहुर्द्रष्टुमायोधनं तदा ।
कृष्णार्जुनाभ्यां वीराभ्यामनुमन्त्र्य ततः प्रियम्॥३५॥
अभाषमाणस्तौ वीरावुभौ माधवफाल्गुनौ ।
स ददर्श रणे कर्णं शयानं पुरुषर्षभम् ॥ ३६ ॥
यथा कदम्बकुसुमं केसरैः सर्वतो वृतम् ।
चितं शरशतैः कर्णं धर्मराजो ददर्श सः ॥ २७ ॥
गन्धतैलावसिक्ताभिः काञ्चनीभिः सहस्रशः ।
दीपिकाभिः कृतोद्योतं पश्यन्ते वै वृषं तदा ॥ ३८ ॥
संछिन्नभिन्नकवचं बाणैश्च विदलीकृतम् ।
सपुत्रं निहतं दृष्ट्वा कर्णं राजा युधिष्ठिरः ॥ ३९ ॥

करते हैं और कभी युद्धमे विमुख नहीं होते हैं। जिस समय तुम अर्जुनके सारथी बने थे, तभी हमने जान लिया था, कि हमारी विजय होगी; पराजय कदापि नहीं होगा॥ भीष्म, द्रोण, कर्ण और कृपाचार्य आदि जो दुर्योधनके सङ्गी थे, और है सो सब तेरी बुद्धिसे कर्णके मरनेमे नष्ट होगये॥ (३०—३२)

श्रीकृष्णसे ऐसा कहकर सफेद घोडे वाले, सोनेके रथमें बैठकर और अपनी निज सेनाके सहित वीर कृष्ण और अर्जुनसे बात करते हुए युद्धभूमि देखनेको चले॥ इस प्रकार उन दोनोंकी बातें सुनते हुए महाराज वहां पहुंचे और पृथ्वीमें सोते हुए कर्णको देखा। जैसे कदम्बका फूल चारों ओर पखरियोंसे भरा रहता है, ऐसे ही बाणोंसे पूरित कर्णको महाराजने देखा॥(३३-३५)

तब महाराजने सुगन्धित तेलोंसे भरे, सोनेके अनेक दीपक जलवाकर कर्णके सब शरीर देखे, बाणोंसे छिन्न भिन्न पुत्र सहित कर्णको पृथ्वीमें पडा

ते सर्वे तावकान्प्रेक्ष्य द्रवतोऽपि पराङ्मुखान् ॥ ४० ॥
अभ्यवर्तन्त संरब्धान्वृषाञ्जित्वा यथा वृषाः ।
सेनावशेषं तं दृष्ट्वा तव सैन्यस्य पाण्डवः ॥ ४१ ॥
व्यवस्थितः सव्यसाची चुक्रोध बलवान्नृप ।
धनञ्जयो रथानीकमभ्यवर्तत वीर्यवान् ॥ ४२ ॥
विश्रुतं त्रिषु लोकेषु व्याक्षिपद्गाण्डिवं धनुः ।
तत एनाञ्शरव्रातैः सहसा समवाकिरत् ॥ ४३ ॥
तमसा संवृते नाथ न स्म किञ्चिद्व्यदृश्यत ।
अन्धकारीकृते लोके रजोभूते महीतले ॥ ४४ ॥
योधाः सर्वे महाराज तावकाः प्राद्रवन्भयात् ।
सम्भज्यमाने सैन्ये तु कुरुराजो विशाम्पते ॥ ४५ ॥
परानभिमुखांश्चैव सुतस्ते समुपाद्रवत् ।
ततो दुर्योधनः सर्वानाजुहावाथ पाण्डवान् ॥ ४६ ॥
युद्धाय भरतश्रेष्ठ देवानिव पुरा बलिः ।
त एनमभिगर्जन्तः सहिताः समुपाद्रवन् ॥ ४७ ॥
नानाशस्त्रभृतः क्रुद्धा भर्त्सयन्तो मुहुर्मुहुः ।
दुर्योधनोऽप्यसम्भ्रान्तस्तान्रणे निशितैः शरैः ॥४८ ॥

उन सबने तुम्हारी सेनाका नाश करके अपने शङ्ख बजाये, तब तुम्हारी सेना भाग चली। तुम्हारी बची हुई सेनाको खडे देख बलवान् अर्जुनको बहुत क्रोध हुआ और इस प्रकार दौडे जैसे हारे हुए बैलपर बलवान् बैल दौडता है ॥ (३८-४२)

जगत् प्रसिद्ध गाण्डीव धनुषको घुमाकर अर्जुनने अनेक बाण चलाये, उस समय भूमिसे ऐसी धूल उठी, कि सब लोकमें अन्धकार होगया और कुछ न दीखने लगा। हे पृथ्वीनाथ! हे महाराज! फिर तुम्हारी सेनाके योद्धा इधर उधरको भागने लगे ॥ (४३ ४५)

अपनी सेनाको भागते देख और पाण्डवोंको एकले बढते देख दुर्योधनने पाण्डवोंके सब वीरोंको अपनी ओर पुकारा और आप ही उससे लडनेको चला, तब सब योद्धा दुर्योधनकी ओर इकट्ठे होकर ऐसे दौडे जैसे देवताओंके ऊपर बली दौडे थे॥ वे सब क्रोध करके अनेक प्रकारके बाण बर्षाते हुए और दुर्योधनको डपटते हुए दौडे। ४५-४८

दुर्योधन भी निडर होकर इन सबकी

नकुलः सहदेवश्च पाण्डवश्च वृकोदरः ।
सात्यकिश्च महाराज वृष्णीनां प्रवरो रथः ॥ ४९ ॥
धृष्टद्युम्नः शिखण्डी च पाण्डुपञ्चालसृञ्जयाः ।
पूजयन्ति स्म कौन्तेयं निहते सूतनन्दने ॥ ५० ॥
ते वर्धयित्वा नृपतिं धर्मात्मानं युधिष्ठिरम् ।
जितकाशिनो लब्धलक्ष्या युद्धशौण्डाः प्रहारिणः ॥५१॥
स्तुवन्तः स्तवयुक्ताभिर्वाग्भिः कृष्णौ परन्तपौ ।
जग्मुः स्वशिबिरायैव मुदा युक्ता महारथाः ॥ ५२ ॥
एवमेष क्षयो वृत्तः सुमहाँल्लोमहर्षणः ।
तव दुर्मन्त्रिते राजन्किमर्थमनुशोचसि ॥ ५३ ॥
वैशम्पायन उवाच-श्रुत्वैतदप्रियं राजा धृतराष्ट्रोऽम्बिकासुतः ।
पपात भूमौ निश्चेष्टश्छिन्नमूल इव द्रुमः ॥ ५४ ॥
तथा सा पतिता देवी गान्धारी दीर्घदर्शिनी ।
शुशोच बहुलालापैः कर्णस्य निधनं युधि ॥ ५५ ॥
तां पर्यगृह्णाद्विदुरो नृपतिं सञ्जयस्तथा ।
पर्याश्वासयतां चैव तावुभावेव भूमिपम् ॥ ५६ ॥
तथैवोत्थापयामासुर्गान्धारीं कुरुयोषितः ।

महारथ आकर महाराज युधिष्ठिरकी जै जै करने लगे ॥ तब नकुल, सहदेव, भीमसेन, यदुकुल श्रेष्ठ महारथ सात्यकी, धृष्टद्युम्न और शिखण्डी आदि सब पाञ्चाल योद्धा और सृञ्जयवंशी वीर कर्णके मरनेसे महाराजकी प्रशंसा करने लगे ॥ (४९—५०)

वे सब महा शस्त्र चलानेवाले, महावीर विजय करके और महाराजको धन्यवाद देकर कृष्ण और अर्जुनकी प्रशंसा करके प्रसन्नता सहित अपने डेरोंको चले गये ॥ हे राजन ! यह मनुष्योंका नाश केवल आपकी दुर्बुद्धिसे हुआ अब शोच करनेसे क्या होगा ? (५१-५३)

श्रीवैशम्पायन बोले, सञ्जयके ऐसे कठोर वचन सुनकर अम्बिकापुत्र महाराज धृतराष्ट्र जड कटे वृक्षके समान पृथ्वीमें गिर गये, इसी प्रकार पतिव्रता गान्धारी भी रोती हुई और कर्णके शोच करती हुई पृथ्वीमें गिर पडी तब विदुर और सञ्जय महाराजको उठाकर समझाने लगे, इसी प्रकार कुरुकुलकी स्त्रियोंने गान्धारीको उठाकर ठीक प्रकार समझाया । (५४-५७)

को न मूढो न युध्येत माहशः क्षत्रियव्रतः ॥ ५७ ॥
द्विषतो भीमसेनस्य क्रुद्धस्य वशमेष्यथ ।
पितामहैराचरितं न धर्मं हातुमर्हथ ॥ ५८ ॥
नह्यधर्मोऽस्ति पापीयान्क्षत्रियस्य पलायनात् ।
न युद्धधर्माच्छ्रेयो हि पन्थाः स्वर्गस्य कौरवाः ॥
अचिरेण हता लोकान्सद्यो योधाः समश्नुत ॥ ५९ ॥
सञ्जय उवाच— एवं ब्रुवति पुत्रे ते सैनिका भृशविक्षताः ।
अनवेक्ष्यैव तद्वाक्यं प्राद्रवन्सर्वतोदिशः ॥ ६० ॥ [४८६३]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि कौरवसैन्यपलायने त्रिनवतितमोऽध्यायः ॥९३

सञ्जय उवाच— दृष्ट्वा तु सैन्यं परिवृत्यमानं पुत्रेण ते मद्रपतिस्तदानीम् ।
सन्त्रस्तरूपः परिमूढचेता दुर्योधनं वाक्यमिदं बभाषे ॥ १ ॥
शल्य उवाच—पश्येदमुग्रं नरवाजिनागैरायोधनं वीरशतैः सुपूर्णम् ।
महीधराभैः पतितैश्च नागैः सकृत्प्रभिन्नैः शरभिन्नदेहैः ॥ २ ॥
स विह्वलद्भिश्च गतासुभिश्च प्रध्वस्तवर्मायुधचर्मखड्गैः ।
वज्रापविद्धैरिव चाचलोत्तमैर्विभिन्नपाषाणमहाद्रुमौषधैः ॥ ३ ॥
प्रविद्धघण्टांकुशतोमरध्वजैः सहेमजालैः रुधिरौघसम्प्लुतैः ।

मूर्ख क्षत्री होगा जो हमारे समान युद्ध न करे ? भागते हुए तुमको भी भीमसेन मार ही डालेंगे, तब अपने पुरुषोंके धर्मको क्यों छोडते हो ? हे वीर ! क्षात्रियोंको युद्धसे भागना इसके समान कोई पाप नहीं और युद्ध करनेके समान धर्म नहीं, तुम सब युद्धमें मरकर बहुत दिनतक स्वर्ग सुख भोगो ॥ ५७—५९

सञ्जय बोले, तुम्हारे पुत्रके ऐसे वचन सुनकर भी घावोंसे व्याकुल महा योद्धा युद्ध करनेको न लौटे किंतु चारों ओर भागे ॥ (६०) [४८६३]

कर्णपर्वमें तिरानव्वे अध्याय समाप्त ।

कर्णपर्वमें चौरानव्वे अध्याय ।

सञ्जय बोले, हे राजन् ! दुर्योधनको सेना लौटाते देख मद्रराज शल्य भयसे व्याकुल होकर ऐसे वचन बोले ॥ (१)

शल्य बोले, ये अनेक हाथी घोडे और मनुष्योंसे तथा सैकडों वीरोंसे भरी हुई रणभूमि बाणोंसे विद्ध होनेसे मरे हुए पर्वतोंके समान मत वाले हाथियोंसे पूरित होरही है । अनेक कटे ढाल खड्ग कवच अनेक आयुध लिये, वीर पृथ्वीमें पडे हैं । मरे हुए हाथी ऐसे दीखते हैं जैसे वज्रसे कटे वृक्ष और लता रहित पर्वत । अनेक हाथी कवच रहित होकर

कपिलानां सवत्सानां सर्वमेकं निरन्तरम् ।
यो दद्यात्सुकृतं तद्धि श्रवणात्कर्णपर्वणः ॥ ६५ ॥ [५०१४]

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां कर्णपर्वणि युधिष्ठिरहर्षे पण्णवतितमोऽध्याय ॥ ९६ ॥

कर्णपर्व समाप्तम् ॥

अतः परं शल्यपर्व भविष्यति तस्यायमाद्यः श्लोकः—

जनमेजय उवाच—एवं निपातिते कर्णे समरे सव्यसाचिना ।
अल्पावशिष्टाः कुरवः किमकुर्वत वै द्विज ॥ १ ॥

कहा है । इससे इसके सुननेवाले, मनुष्य सुखी होते हैं । और धन धान्यको पाते हैं ॥ जो एक वर्षतक प्रतिदिन बछडे सहित कपिला गौ दान देनेका फल पाते हैं । वही फल कर्णपर्वके सुननेसे होगा ॥ (६३-६५) [५०१४]

कर्णपर्वमें छानव्वे अध्याय समाप्त ।

आदितः श्लोकसंख्या—

१	आदिपर्व—	८७०९
२	सभापर्व—	२७६२
३	वनपर्व —	११८९२
४	विराटपर्व—	२२६२
५	उद्योगपर्व—	६५९०
६	भीष्मपर्व—	५८७०
७	द्रोणपर्व —	९६४२
८	कर्णपर्व —	५०१४

सर्वयोगः— ५२७४१

कर्णपर्व समाप्तम्

शरास्तु कर्णार्जुनबाहुमुक्ता विदार्य नागाश्वमनुष्यदेहान् ।
प्राणान्निरस्याशु महीं प्रतीयुर्महोरगा वासमिवाभिनम्राः ॥ १२ ॥
हतैर्मनुष्याश्वगजैश्च सङ्ख्ये शरापविद्धैश्च रथैर्नरेन्द्र ।
धनञ्जयस्याधिरथेश्च मार्गणैरगम्यरूपा वसुधा बभूव ॥ १३ ॥
रथैर्वरेषून्मथितैः सुकल्पैः सयोधशस्त्रैश्च वरायुधैर्ध्वजैः ।
विशीर्णयोक्त्रैर्विनिकृत्य बन्धनैर्निकृत्तचक्राक्षयुगत्रिवेणुभिः॥१४ ॥
विमुक्तशस्त्रैश्च तथा व्युपस्करैर्हतानुकर्षैर्विनिषङ्गबन्धनैः ।
प्रभग्ननीडैर्मणिहेमभूषितैः स्तृता मही द्यौरिव शारदैर्घनैः ॥ १५॥
विकृष्यमाणैर्जवनैस्तुरङ्गमैर्हतेश्वरै राजरथैः सुकल्पितैः ।
मनुष्यमातङ्गरथाश्वराशिभिर्द्रुतं व्रजन्तो बहुधा विचूर्णिताः ॥१६॥
सहेमपट्टाः परिघाः परश्वधाः शिताश्च शूला मुसलानि मुद्गराः ।
पेतुश्च खड्गा विमला विकोशा गदाश्च जाम्बूनदपट्टनद्धाः ॥ १७ ॥
चापानि रुक्माङ्गदभूषणानि शराश्च कार्तस्वरचित्रपुङ्खाः ।
ऋष्टयश्च पीता विमला विकोशाः प्रासाश्च दण्डैः कनकावभासैः ॥१८॥
छत्राणि वालव्यजनानि शङ्खाश्छिन्नापविद्धाश्च स्रजो विचित्राः ।
कुथाः पताकाम्बरभूषणानि किरीटमालामुकुटाश्च शुभ्राः ॥ १९ ॥
प्रकीर्णका विप्रकीर्णाश्च राजन्प्रवालमुक्तातरलाश्च हाराः ।

को जानेवाले सर्पोंके समान पृथ्वीमें घुस गये हैं॥ हे नरेन्द्र ! ये अर्जुन और कर्णके बाणोंसे कटे हाथी,घोडे, मनुष्य और रथोंसे पृथ्वी जाने योग्य नहीं रही ॥ (११-१३)

ये अनेक शस्त्र और ध्वजा युक्त टूटे पहिये और टूटे जुएवाले रथ पडे हैं। सारथी और योद्धा भी मर गये हैं। ये मणि जटित टूटे जुए वाले रथोंसे अनेक योद्धा और सारथी गिर पडे हैं, इन सबसे पृथ्वीकी ऐसी शोभा दीखती है, जैसे कार्त्तिकके मेघोंसे आकाशकी ॥ ये बहुत शीघ्र चलनेवाले, राजोंके रथोंमें लगे मरे हुए मनुष्योंके झुण्डोंमें घूमते हुए अनेक घोडे मर पडे हैं। १४-१६

ये सोनेके पत्रोंसे जडे परिघ, परश्वध, सफेद त्रिशूल, मूसल, मुद्गर, चमकदार तेगे, खड्ग और सोनेसे जडी गदा आदि अनेक शस्त्र पडे हैं ॥ सोनेमें जडे धनुष, बाण पीले निरमल नये भाले, सोनेके दण्डवाले प्रास, छत्र, कटे हुए पहिये, कटी हुई विचित्र माला, हाथियोंकी झूल, पताका, भूषण, उत्तम किरीट, माला, सुन्दर मुकुट, अनेक टूटे

अध्याय	विषय	पृष्ठ
	२४ नकुलके संग कर्णका वाग्युद्ध करके घोर संग्राम करना और नकुल को पराजित करके उनके गलेमें धनुष डालके पकडना तथा उनकी निन्दा करके छोड देना।	११९
	कर्णका असीम पराक्रम प्रकाशित करना।	१२५
	२५ शकुनि और सुतसोमका युद्ध।	१२८
	२६ कृपाचार्यके संग युद्ध करके धृष्टद्युम्नका भागना।	१३३
	कृतवर्मासे युद्ध करके शिखण्डी का पराजित होना।	१३६
	२७ अर्जुनका घोर संग्राम तथा विजय।	१३८
	२८ युधिष्ठिरसे युद्ध करके दुर्योधनका पराजित होना और दोनों सेनाका संकुल युद्ध।	१४३
	२९ युधिष्ठिर और दुर्योधनका पुनर्वार युद्ध।	१४९
	३० पाण्डवोंका विजय तथा पहले दिनका युद्ध समाप्त।	१५३
	३१ धृतराष्ट्रके पश्चात्तापयुक्त वचन सुनके सञ्जयका उत्तर।	१५९
	कर्णका निज गुण वर्णन करके दुर्योधनसे शल्यको अपना सारथी बनानेके लिये कहना।	१६४
	३२ दुर्योधनका विनयपूर्वक शल्य को कर्णका सारथि बनानेके लिये अनुरोध करना।	१६८
	बहुत प्रार्थनाके सहित दुर्योधनके समझाने पर शल्यका कर्णका सारथी बनना।	१७६
	३३ ३४ दुर्योधनके द्वारा शल्यके समीप त्रिपुरवध उपाख्यान वर्णन।	१७७
	३५ दुर्योधनके द्वारा कर्णसारथ्य स्वीकार।	
	३६ दुर्योधनकी विनयसे दूसरे दिन कर्ण। शल्यसारथीके सहित रथपर चढके युद्ध करनेके लिये प्रस्थान।	
	३७ युद्धके लिये कर्णके प्रस्थान करनपर युद्धभूमिमें बहुतसे उत्पात देखना।	
	अपनी बडाई करनेमें प्रवृत्त हुए कर्णका शल्यके द्वारा तिरस्कार।	
	३८ कृष्णार्जुनको दिखानेवाले पुरुष को मैं विविध धन दान करूंगा ऐसा कहके कर्णका गर्व प्रकाश करना।	
	३९ कर्णको कुपित करनेकी इच्छा से उसके विषयमें शल्यका अत्यन्त तिरस्कार।	
	४० शल्यके विषयमें कर्णके द्वारा मद्रदेशीय बुराइयोंका वर्णन तथा शल्यकी अत्यन्त निन्दा।	
	४१ उपमा प्रसंगसे कर्णके समीप शल्यका काकोपाख्यान वर्णन करके कर्णकी निन्दा करना।	
	४२ शल्यके समीप कर्णका अपनी बडाई करना और मृत्युकालके समय ब्रह्मास्त्र भूलने तथा रथका गाय पहिया पृथ्वीमें घुसनेके विषयमें दोनों शापका वृत्तान्त कहना।	
	४३ कर्णके द्वारा शल्यकी निन्दा।	
	४४ शल्यके विषयमें कर्णका मद्र देशके बहुतसे प्रचलित बुरे आचारों का वर्णन करके उसकी अत्यत निन्दा करना।	

द्रुतं प्रयाताः शिबिराणि राजन्दिवाकरं रक्तमवेक्षमाणाः ॥ २८ ॥
गाण्डीवमुक्तैस्तु सुवर्णपुङ्खैः शिलाशितैः शोणितदिग्धवाजैः ।
शरैश्चिताङ्गो युधि भाति कर्णो हतोऽपि सन्सूर्य इवांशुमाली ॥ २९ ॥
कर्णस्य देहं रुधिरावसिक्तं भक्तानुकम्पी भगवान्विवस्वान् ।
स्पृष्ट्वांशुभिर्लोहितरक्तरूपः स्निग्धास्तुरभ्येति परं समुद्रम् ॥ ३० ॥
इतीव सञ्चिन्त्य सुरर्षिसङ्घाः सम्प्रस्थिता यान्ति यथा निकेतनम् ।
साञ्चिन्तयित्वा जनता विसस्मुर्यथासुखं खं च महीतलं च ॥ ३१ ॥
तदद्भुतं प्राणभृतां भयङ्करं निशम्य युद्धं कुरुवीरमुख्ययोः ।
धनञ्जयस्याधिरथेश्च विस्मिताः प्रशंसमानाः प्रययुस्तदा जनाः ॥३२॥
शरसंकृत्तवर्माणं रुधिरोक्षितवाससम् ।
गतासुमपि राधेयं नैव लक्ष्मीर्विमुञ्चति ॥ ३३ ॥
तप्तजाम्बूनदनिभं ज्वलनार्कसमप्रभम् ।
जीवन्तमिव तं शूरं सर्वभूतानि मेनिरे ॥ ३४ ॥
हतस्यापि महाराज सूतपुत्रस्य संयुगे ।
वित्रेसुः सर्वतो योधाः सिंहस्येवेतरे मृगाः ॥ ३५ ॥
हतोऽपि पुरुषव्याघ्र जीववानिव लक्ष्यते ।

उस समय कौरवोंकी सेनामें चारों ओरसे हा कर्ण ! हा कर्ण ! यही शब्द सुनाई देता था । सूर्यको लाल देखकर दुर्योधनने अपनी सेनाको लौटाया और आप भी सब कौरवोंके सङ्ग अपने डेरों-पर चलेगये । उस समय रुधिरसे भीगे, पंखवाले, गाण्डीवसे छूटे, शिलापर घिसे बाणोंसे मरे हुए कर्ण सूर्यके समान दीखते थे । उस समय ऐसा जान पडता था, मानो भगवान सूर्य कर्णके शोकसे व्याकुल होकर और अपनी किरणोंसे उनके रुधिरको लेकर लाल होगये है । और अब शोक दूर करनेके लिये, पश्चिम समुद्रमें स्नान करनेको जाते हैं ॥ २८-३०

यही विचार कर देवता और ऋषि भी अपने अपने घरको चले गये । उस अद्भुत कर्ण और अर्जुनके युद्धको देखकर सब योद्धा उसीकी प्रशंसा करते हुए अपने अपने डेरोंको चले गये । बाणोंसे भरे हुए और रुधिरसे भीगे हुए कर्णका तेज उस समय भी नष्ट नहीं हुआ था। सोनेके समान सुन्दर, अग्नि और सूर्यके समान तेजस्वी वीर कर्णको इस समय भी मनुष्योंने जीता ही जाना ॥(३१-३४)

हे महाराज ! जैसे मरे हुए सिंहको देख हरिण डरते हैं, ऐसे ही मरे हुए

अध्याय	विषय	पृष्ठ
६७	युधिष्ठिरके समीप युद्धका वृत्तान्त सुनके अर्जुनका कर्णवधके निमित्त प्रतिज्ञा करना।	४१४
६८	कर्णको जीवित सुनके युधिष्ठिर का अत्यन्त क्रुद्ध होकर अर्जुन की अत्यन्त निन्दा करके समर्थ पुरुषको गाण्डीव धनुष देनेके लिये आज्ञा करना।	४१७
६९	दूसरेको गाण्डीव धनुष दो ऐसा कहनेवाले पुरुषके विनाश विषयमें प्रतिज्ञा रहनेपर अर्जुन का युधिष्ठिरको मारनेके लिये तरवार उठाना और कृष्णका बलाक कौशिक उपाख्यानादि विविध प्रमाण प्रदर्शित करके विस्तार पूर्वक अर्जुनको उपदेश करना तथा प्रतिज्ञा पालनकी उपाय वर्णन करना।	४२२
७०	कृष्णके उपदेश क्रमसे अर्जुन का युधिष्ठिरको कठोर वचन कहना उस दोषको छुडानेके लिये अपनी बडाई करना तथा युधिष्ठिरके समीप विनय करना और युधिष्ठिरको अभिमान उत्पन्न होनेपर कृष्णके द्वारा शान्त होना तथा युधिष्ठिरके द्वारा कृष्णकी अत्यन्त प्रशंसा।	४३३
७१	अर्जुनका युधिष्ठिरको फिर प्रसन्न करना और प्रीतिपूर्वक दोनों भाइयोंका मिलना तथा कर्णको मारनेके लिये अर्जुनका फिर प्रण करना।	४४२
७२	कृष्णका अर्जुनके विषयमें बहुत प्रशंसा करके उन्हें कर्णवधके निमित्त उत्साहित करना।	४४७
७३	अर्जुनकी बार बार प्रशंसा करके कृष्णका आदिसे अन्ततक युद्ध वृत्तान्त कहना और शत्रुवधके निमित्त उत्तेजित करना।	४५१
७४	कृष्णके वचनसे उत्साहित होकर अर्जुनका कर्णवधके लिये दृढ संकल्प करके अपनी बडाई करना।	४६६
७५	संकुलयुद्ध,उत्तमौजाके हाथसे सुषेणका मारा जाना।	४७६
७६	भीमका बहुतसे हस्ति प्रभृति मारनेके अनन्तर सारथिसे घाणोंकी संख्या पूछकेश त्रुओंके मारनेका दृढ संकल्प करना।	४७६
७७	भीमार्जुनका असीम विक्रम प्रकाशित करना और भीमके समीप पराजित शकुनिको लेकर दुर्योधनका भागना।	४८१
७८	कर्णकी घोर वीरता प्रकाशित होनी तथा पाण्डवोंकी सेना और महारथोंका भागना।	४९०
७९	शल्यका उपदेश सुनके कर्णका कृष्णार्जुनकी प्रशंसा करके अपनी बडाई करना और कुरुसेनाके महारथोंके साथ अर्जुनका अत्यन्त पराक्रम प्रकाशित करना।	४९८
८०	अर्जुन और भीमसेनका अत्यन्त पराक्रम प्रकाशित करना।	५११
८१	अर्जुन और कर्णका पराक्रम। कर्णके हाथसे पाञ्चाल सेनाका विनाश।	५१४ ५१८
८२-८३	भीमसेन और दुःशासनका युद्ध तथा दुःशासनका मारा जाना।	५२१
८४	भीमके हाथसे दुर्योधनके निषंगी प्रभृति दश भाइयोंका मारा जाना।	५३३
	वृषसेनसे युद्ध करके नकुलका पराजित होना।	५३८
८५	शतानीकके हाथसे कलिङ्ग	

ददानीत्येव योऽवोचन्न नास्तीत्यर्थितोऽर्थिभिः ।
सद्भिः सदा सत्पुरुषः स हतो द्वैरथे वृषः ॥ ४५ ॥
यस्य ब्राह्मणसात्सर्वं वित्तमासीन्महात्मनः ।
नादेयं ब्राह्मणेष्वासीद्यस्य स्वमपि जीवितम् ॥ ४६ ॥
सदा स्त्रीणां प्रियो नित्यं दाता चैव महारथः ।
स वै पार्थास्त्रनिर्दग्धो गतः परमिकां गतिम् ॥ ४७ ॥
यमाश्रित्याकरोद्वैरं पुत्रस्ते स गतो दिवम् ।
आदाय तव पुत्राणां जयाशां शर्म वर्म च ॥ ४८ ॥
हते कर्णे सरितो न प्रसस्रुर्जगाम चास्तं सविता दिवाकरः ।
ग्रहश्च तिर्यग्ज्वलनार्कवर्णः सोमस्य पुत्रोऽभ्युदियाय तिर्यक् ॥ ४९ ॥
नभः पफालेव ननाद चोर्वी ववुश्च वाताः परुषाः सुघोराः ।
दिशो बभूवुर्ज्वलिताः सधूमा महार्णवाः सस्वनुश्चुक्षुभुश्च ॥ ५० ॥
सकाननाश्चाद्रिचयाश्चकम्पिरे प्रविव्यथुर्भूतगणाश्च सर्वे ।
बृहस्पतिः सम्परिवार्य रोहिणीं बभूव चन्द्रार्कसमो विशाम्पते ॥५१॥

ओंसे यही कहते थे, कि "देते हैं" जिन्होंने कभी भिक्षुकको "नहीं" नहीं की, वही महात्मा कर्ण अर्जुनके हाथसे मारे गये ॥ (४२-४५)

जिस महात्माने अपना सब धन ब्राह्मणोंहीका समझ रक्खा था । जो अपना जीवन तक भी ब्राह्मणोंको देना चाहते थे, जो स्त्रियोंका सदा प्यारे, ब्राह्मणोंके लिये दानी और वीरोंमें महारथ गिने जाते थे, सो ही कर्ण अर्जुनके बाणोंसे मरकर परम धामको गये ॥ जिनकी आशापर तुम्हारे पुत्रोंने पाण्डवोंसे वैर किया था, वही कर्ण उनकी आशा कल्याण और रक्षा भङ्गमें लेकर स्वर्गको चले गये ॥ (४६-४८)

कर्णके मरनेसे बहती नदी बन्द होगयीं, भगवान् सूर्य अस्त होगये । बुध ग्रह लाल होकर टेढे उदय हुए । उनका रङ्ग उस समय जलती अग्निके समान दीखने लगा ॥ आकाश भयानक होगया, पृथ्वी कांपने लगी, वायु रूखा चलने लगा । सब दिशा धुएंके सहित और जलती हुई सी दीखने लगीं । समुद्र घोर शब्द करके उमडने लगे । वनोंके सहित पर्वत कांपने लगे, सब जगत्के जन्तु डर गये । बृहस्पति, रोहिणी नक्षत्रके समीप उदय होगये, उस समय आकाशमें ऐसा जान पडता था कि, ये सूर्य और चन्द्रमा के समान उदय होगये हैं ॥ (४९-५१)

चुचुम्बतुः शङ्खवरौ नृणां वरौ वराननाभ्यां युगपच्च दध्मतुः ॥ ५९ ॥
पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः ।
पृथिवीं चान्तरिक्षं च दिशश्चैवान्वनादयत् ॥ ६० ॥
विस्मिताश्चाभवन्सर्वे कौरवा राजसत्तम ।
शङ्खशब्देन तेनाथ माधवस्यार्जुनस्य च ॥ ६१ ॥
तौ शङ्खशब्देन निनादयन्तौ वनानि शैलान्सरितो गुहाश्च ।
वित्रासयन्तौ तव पुत्रसेनां युधिष्ठिरं नन्दयतां वरिष्ठौ ॥ ६२ ॥
ततः प्रयाताः क्रुरवो जवेन श्रुत्वैव शङ्खस्वनमीर्यमाणम् ।
विहाय मद्राधिपतिं पतिं च दुर्योधनं भारत भारतानाम् ॥ ६३ ॥
महाहवे तं बहु रोचमानं धनञ्जयं भूतगणाः समेताः ।
तदान्वमोदन्त जनार्दनं च दिवाकरावभ्युदितौ यथैव ॥ ६४ ॥
समाचितौ कर्णशरैः परन्तपावुभौ व्यभातां समरेऽच्युतार्जुनौ ।
तमो निहत्याभ्युदितौ यथाम्बरे शशाङ्कसूर्यौ दिवि रश्मिमालिनौ ॥६५॥
विहाय तान्वाणगणान्व्यागतौ सुहृद्वृतावप्रतिमानविक्रमौ ।
सुखं प्रविष्टौ शिबिरं स्वमीश्वरौ सदस्यहूताविव विष्णुवासवौ ॥६६॥
तौ देवगन्धर्वमनुष्यचारणैर्ऋषिभिर्यक्षमहोरगैरपि ।

लिये सोनेके तारोंसे खिंच हुए उत्तम शब्दवाले बर्फके समान सफेद शङ्ख दोनों वीरोंने एकही बार बजाये ॥ पांचजन्य और देवदत्तका शब्द पृथ्वी, आकाश और दशों दिशामें पूरित होगया ॥ ५८–६०

हे महाराज ! श्रीकृष्ण और अर्जुनके उस शङ्ख शब्दको सुनकर तुम्हारी सब सेना डरने लगी, इस प्रकार तुम्हारे पुत्र की सेना पर्वत और वनोंको तपाकर श्री कृष्ण और अर्जुन युधिष्ठिरको प्रसन्न करनेको चले गये ॥ हे भारत ! उस शङ्खके शब्दको सुनकर तुम्हारी सब सेना शल्य और दुर्योधनको छोडकर इधर उधरको भाग गयी ॥ (६१–६३)

जैसे उदय होते सूर्यको सब मनुष्य प्रणाम करते है, ऐसे ही श्रीकृष्ण और अर्जुनको सब मनुष्य धन्यवाद देने लगे ॥ जैसे अपनी किरणोंके सहित सूर्य और चन्द्रमा अन्धकारको नाश करके शोभित होते है ऐसे ही अपने शरीरमें लगे कर्णके बाणोंसे अर्जुन और श्रीकृष्ण दीखने लगे ॥ जैसे बुलाये हुए विष्णु और इन्द्र सभामें आते है ऐसे ही इन सब वीरोंको निकालकर मित्रोंके सहित श्रीकृष्ण और अर्जुन डेरोंको गये ॥ (६४—६६)

महाभारत।

आर्योंके विजयका प्राचीन इतिहास।

इस समय तक छपकर तैयार पर्व।

पर्वका नाम	अंक	कुल अंक	पृष्ठसंख्या	मूल्य	डा व्यय
१ आदिपर्व	[१ से ११]	११	११२५	६) छः	रु १)
२ सभापर्व	[१२ " १५]	४	३५६	२) दो	,, ।-)
३ वनपर्व	[१६ " ३०]	१५	१५३८	८) साठ	,, १।)
४ विराटपर्व	[३१ " ३३]	३	३०६	१॥) डेढ	,, ।-)
५ उद्योगपर्व	[३४ " ४२]	९	९५३	५) पांच	,, १)
६ भीष्मपर्व	[४३ " ५०]	८	८००	४) चार	,, ॥)
७ द्रोणपर्व	[५१ " ६४]	१४	१३६४	७॥) साडेसात	१।=)
८ कर्णपर्व	[६५ " ७०]	६	६३७	३॥)साढेतीन)	,, ॥।)

कुल मूल्य ३७॥) कुल डाव्यय ६॥)

सूचना— ये पर्व छप कर तैयार हे। अतिशीघ्र मंगवाइये। मूल्य मनी आर्डर द्वारा भेज दीजिये तो आधा डाकव्यय माफ करेंगे, अन्यथा प्रत्येक रु० के मूल्यके ग्रथको तीन आने डाकव्यय मूल्यके अलावा देना होगा।

मंथी— स्वाध्याय मंडल, औंध (जि सातारा)

कृपः शारद्वतो राजन्नागानीकेन भारत ।
महामेघनिभेनाशु शिबिरायैव दुद्रुवे ॥ ७ ॥
अश्वत्थामा ततः शूरो विनिःश्वस्य पुनः पुनः ।
पाण्डवानां जयं दृष्ट्वा शिबिरायैव दुद्रुवे ॥ ८ ॥
संशप्तकावशिष्टेन बलेन महता वृतः ।
सुशर्मापि ययौ राजन्वीक्ष्यमाणो भयार्दितः ॥ ९ ॥
दुर्योधनोऽपि नृपतिर्हतसर्वस्ववान्धवः ।
ययौ शोकसमाविष्टश्चिन्तयान्विमना बहु ॥ १० ॥
छिन्नध्वजेन शल्यस्तु रथेन राथिनां वरः ।
प्रययौ शिबिरायैव वीक्ष्यमाणो दिशो दश ॥ ११ ॥
ततोऽपरे सुबहवो भारतानां महारथाः ।
प्राद्रवन्त भयत्रस्ता ह्रियाविष्टा विचेतसः ॥ १२ ॥
असृक्क्षरन्तः सोद्विग्ना वेपमानास्तथातुराः ।
कुरवो दुद्रुवुः सर्वे दृष्ट्वा कर्णं निपातितम् ॥ १३ ॥
प्रशंसन्तोऽर्जुनं केचित्केचित्कर्णं महारथाः ।
व्यद्रवन्त दिशो भीताः कुरवः कुरुसत्तम ॥ १४ ॥
तेषां योधसहस्राणां तावकानां महामृधे ।
नासीत्तत्र पुमान्काश्चियो युद्धाय मनो दधे ॥ १५ ॥

समान हाथियोंकी सेनाके सहित कृपाचार्य भी अपने डेरोंको गये ॥ वीर अश्वत्थामा भी पाण्डवोंकी विजय देख सांस लेते हुए अपने डेरोंको चले ॥ (५—८)

बचे हुए संशप्तक भी राजा सुशर्माके सहित भयसे व्याकुल होकर अपने डेरोंको चले गये ॥ राजा दुर्योधन भी अपने बान्धवोंके मरनेमे शोचते हुए शोकसे व्याकुल होकर अपने डेरेको चले गये ॥ महाराज शल्य भी टूटी हुई ध्वजावाले रथको लेकर दशों दिशाओंको देखते हुए अपने डेरेको गये ॥ इसी प्रकार और सब सैनिक भी भयसे व्याकुल होकर इधर उधरको भागने लगे ॥ (९–१२)

कर्णको मरा देख रुधिरमें भीगे भयसे व्याकुल कौरव दशों दिशाओंको भागने लगे ॥ हे कुरुकुलश्रेष्ठ ! उस समय कोई अर्जुन और कोई कर्णकी प्रशंसा करने लगे ॥ उन बचे हुए तुम्हारे सहस्रों वीरोंमें ऐसा कोई नहीं था जो युद्धके

कपटका कपटसे निवारण ।

वासुदेव उवाच ।

मायाविन इमां मायां

मायया जहि भारत ।

मायावी मायया वध्यः

सत्यमेतद्युधिष्ठिर ॥ ७ ॥

शल्य. अ. ३१

श्री वासुदेव कहते हैं– हे युधिष्ठिर !

" इस कपटी की इस माया का मायासे ही नाश कर, क्योंकि कपट करनेवालेका वध कपटसे ही करना योग्य है । यही सत्य धर्म है । "

मुद्रक तथा प्रकाशक–श्रीपाद दामोदर सातवळेकर, भारत मुद्रणालय,

स्वाध्याय मंडल, औंध. (जि सातारा)

